THE

PRINCESS OF WALES

# SARASWATĪ BHAVANA TEXTS

No. 4[illegible]

( PART I )

—o—

EDITED BY

GOPI NĀTH KAVIRAJ, M. A.

---

THE

# SMĀRTOLLĀSA

( PART I )

*Printed by Jai Krishna Das Gupta*
*Vidya Vilas Press, Benares City.*

1933

# स्मार्त्तोल्लासः

## श्री शि व प्र सा द कृ तः

( प्रथमोभागः )

---

वेदाचार्य पण्डित श्रीभगवत्प्रसादशर्मणा भूमिका-

टिप्पण्यादिभिर्विभूष्य संशोधितः ।

---

THE

# SMĀRTOLLĀSA

BY

S'RĪ S'IVAPRASĀD.

( PART I )

EDITED WITH NOTES AND

INTRODUCTION

By

VEDACHĀRYA

BHAGVATPRASAD S'ARMĀ

Professor, Govt. Sanskrit College, Benares.

---

1933.

॥ श्रीः ॥

# प्राक्कथनम्

श्रीमच्छिवप्रसादपाठककृतः स्मार्त्तोल्लासाभिधोऽयं ग्रन्थोऽद्ययावद्मुद्रित आवसथ्याग्निसाध्यानां शुक्लयजुर्वेदीयगृह्यकर्मणां तत्त्वं जिज्ञासमानानां विदुषां स्पृहणीयतम इत्यत्र नास्ति सन्देहलवोऽपि, किन्त्वयमत्यन्तं दुष्प्रापो वर्तते। दुष्प्रापतां चास्य दूरीकर्तुमस्माकं प्रभुवरैः पूज्यपादैः श्री काशिकराजकीयसंस्कृतपाठशालाध्यक्षमहोदयचरणैराज्ञप्तोऽहमेतद्ग्रन्थरत्नस्य संशोधने प्रवृत्तः।

ग्रन्थस्यास्य पठनपाठनसम्प्रदायस्य विच्छिन्नत्वेनादर्शपुस्तकेषु च भिन्नानां पाठानामप्यशुद्धिबाहुल्यादध्येतॄणां हृदयाकर्षणेऽयं ग्रन्थो न पर्याप्तः। अत एतद्ग्रन्थस्य संशोधनाय प्रयतितव्यमिति मे मतिरभूत्।

ग्रन्थोऽयं पारस्करगृह्यसूत्रमनुसृत्य ग्रन्थकारेण रचितः, यद्यपि हरिहरगदाधरगङ्गाधरवासुदेवरेणुदीक्षितप्रभृतिभिर्मनीषिभिरप्यग्न्याधानादि गृह्यकर्मप्रतिपादिकाः पद्धतय आरचितास्तथापि तासां पद्धतीनां पद्धतिमात्रलेखनेनापर्याप्तत्वाद्ग्रन्थस्यास्य पद्धतिप्रतिपादकतया शास्त्रीयालोचनपुरस्सरं सिद्धान्तनिर्णीततया च ताभ्योऽधिकमुपयोगिता।

ग्रन्थेऽस्मिन् प्रतिपाद्या विषया इमे—

आवसथ्यप्रशंसा।
स्मार्त्ताधानकालः।
अधिकारिनिरूपणम्।
परिवेत्तृदोषविचारः।
मुहूर्तविचारः।
अरणिलक्षणम्।
आधानपात्रलक्षणम्।
व्रतनिरूपणम्।
होमद्रव्यदानम्।
सर्वप्रायश्चित्तप्रयोगः।
स्मार्त्ताधानम्।
स्मार्त्ताग्निहोत्रहोमः।
दर्शपौर्णमासस्थालीपाकः।
पिण्डपितृयागः।

नवान्नप्राशनम् ।
पञ्चमहायज्ञाः ।
श्रवणाकर्म ।
इन्द्रयज्ञः ।
पृषातकाकर्म ।
अष्टकाश्राद्धम् ।
अन्वष्टकाकर्म ।
स्रस्तरारोहणम् ।
उपाकर्म ।
स्मार्त्ताग्निमत और्ध्वदेहिकविधिः ।
स्मार्ताग्नेर्नियमाः ।

विशेषतो ग्रन्थस्यास्य ग्रन्थकर्तुश्च परिचयादिकं सम्पूर्णे ग्रन्थे मुद्रिते प्रकाशमेष्यति ।

एतद्ग्रन्थपरिशोधनार्थं निम्नलिखितान्यादर्शपुस्तकानि संयोजितानि—

"क" संज्ञकं पुस्तकं १९७८ विक्रमसंवत्सरीयज्येष्ठकृष्ण ३० लिखितं पण्डितप्रवरश्रीविद्याधरशर्ममहोदयानाम् । अत्र १४४ पत्राणि प्रतिपृष्ठं ८ पङ्क्तयः प्रतिपङ्क्ति ४३ अक्षराणि ।

"ख" संज्ञकं पुस्तकं १९५० विक्रमसंवत्सरीयमार्गशीर्षकृष्णसप्तम्यां लिखितं सोमयाजि श्री गङ्गाधरदीक्षितमहोदयानाम् । अत्र ११९ पत्राणि प्रतिपृष्ठं ८ पङ्क्तयः प्रतिपङ्क्ति ५० अक्षराणि ।

"ग" संज्ञकं पुस्तकमिदं विक्रमाब्दे १९६४ लिखितम् अमरनाथ दीक्षितमहाशयानाम् ।

अत्र ९६ पत्राणि प्रतिपृष्ठं ११ पङ्क्तयः प्रतिपङ्क्ति ४६ अक्षराणि सन्ति।

"घ" संज्ञकं पुस्तकं १८९५ विक्रमसंवत्सरीयफाल्गुनकृष्णनवम्यां भृगुवासरे लिखितमस्मदीयम् । अत्र २५९ पत्राणि प्रतिपृष्ठं ७ पङ्क्तयः प्रतिपङ्क्ति षड्विंशत्यक्षराणि । एतानि सर्वाणि पुस्तकानि देवनागरि लिप्यां लिखितानि सन्ति ।

अध्ययनाध्यापनाद्यवशिष्टेऽल्पीयसि काले यथामति परिशोध्य प्रकाशं नीयतेऽयं ग्रन्थः, अतोऽत्र याः काश्चन त्रुटयो भवेयुस्ता विद्वद्भिः क्षन्तव्या इति निवेदयति—

| | |
|---|---|
| वाराणसी<br>चैत्रशुक्लपञ्चमी<br>१९८९ | विद्वज्जनानुचरः<br>श्री भगवत्प्रसादशर्मा मिश्रः । |

श्री वेदपुरुषाय नमः ।

शिवप्रसादकृतः

# स्मार्तोल्लासः

विघ्नराजं नमस्कृत्य पितरं मातरं तथा ।
त्रिपुरां शारदां नत्वा श्रीगुरोश्चरणद्वयम् ।।
यजुःशिवप्रसादेन सूत्रशास्त्रार्थसङ्गतिम् ।
आलोक्य क्रियते सम्यक् स्मार्तोल्लासो मयाऽधुना ।।

तत्र प्रशंसावाक्यं गृह्यकाण्डे—

( आवसथ्यप्रशंसा )

"नावसथ्यात्परो धर्मो नावसथ्यात्परं तपः ।
नावसथ्यात्परं दानं नावसथ्यात् परो जपः ।।
नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः ।
नावसथ्यात्परा सिद्धिर्नावसथ्यात् परा गतिः ।।
नावसथ्यात्परं दानं नावसथ्यात् परो दमः ।
नावसथ्यात् परं स्नानं नावसथ्यात्परं व्रतम् ।।
यो दद्यात् काञ्चनं मेरुं पृथिवीं च ससागराम् ।
तत्सायंप्रातर्होमस्य तुल्यं भवति वा न वा ।।

संध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम् ।
वैश्वदेवोऽतिथिश्चैव षट् कर्माणि दिने दिने ॥
षराणां तु कर्म्मणां यस्य(१) त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः"

इत्यादिवाक्यपर्यालोचनया संध्यावदौपासनस्यापि नित्यत्वम् । अकरणे प्रत्यवायश्रवणात् ।

"कृतदारो न तिष्ठेत क्षणमप्यग्निना विना ।
तिष्ठन्भवेद् द्विजो व्रात्यस्तथा च पतितो भवेत्" ॥

व्यासः—

"नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
स्वकर्महानौ पतनमब्देनैव त्वनापदि ॥
स्वकर्महानौ नास्तिक्यान्मासेन पतनं स्मृतम् ।
द्वादशाब्दव्रतेनैव तस्य शुद्धिस्तु नान्यथा ॥
तं निरीक्ष्यार्कमीक्षेत स्पर्शे स्नायात्सचैलकम् ।
तेन सम्भाषणं हास्यं कुर्वन्नब्देन तत्समः ॥
तदन्नभुक्तौ सद्यस्तु सहशय्याऽऽसनेषु च ।
प्राणायामत्रयेणैव पूतो भवति साग्निकः ॥
तस्मान्न हि त्यजेत्कर्म सूतके मृतकेऽपि वा ।
मासे मासे तु कृच्छ्रं स्यात्षण्मासाद् द्विगुणं भवेत् ॥
त्रिगुणं नवमासात्तु वत्सरात् पतितो भवेत् ।
यो नाग्निमुपसेवेत दारान् कामादुभावपि ॥

( १ ) कर्मणामस्य इति पाठः समीचीनः ।

परदारी स विज्ञेयः स्वस्त्रीस्वीकरणादपि ।
अनग्निकस्य या भार्या परयोषैव सा स्मृता ॥
जारजाः स्युः प्रजास्तस्यां स विप्रो जार उच्यते ।
अनग्निकस्तु यो विप्रो वृथापाकस्तु स स्मृतः ।
वृथापाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत् ॥
वरं कन्दफलाहारो वरं वा शाकभोजनम् ।
वरं हत्या सुरापानं नाऽनग्नेर्गृहभोजनम्''—

इत्यादिविधिबलादकरणे प्रत्यवायः, प्रायश्चित्तश्रुतेश्च सन्ध्यावन्दनादिवदुपासनं सत्यधिकारे नित्यम् । तत्र नित्येषु यावच्छक्यमनुष्ठानेन प्रत्यवायपरिहारः साधितः । अनधीतवर्णविशेषस्य स्वरवर्णहीनमन्त्रैर्यथाकथञ्चन सन्ध्यायामनुष्ठितायां ब्राह्मण्यमात्रसिद्धिः, तद्वद्यथाकथंचिदौपासनाग्नौ सायंप्रातः पृथक् होमविधानेन(१) ।

आपदि तु—

समस्यहोम—पत्नीहोम—शेषहोमातिक्रान्तहोमैर्वा गृहस्थधर्मप्रतिपादनेनाकरणप्रत्यवायपरिहारोपपत्तिः ॥

## ( अथाधानकालः )

**पारस्करः—**

''दारकाले दायाद्यकाल एकेषाम्'' ( पा० गृ० १।२।१ ) दारशब्देन विवाहादूर्ध्वं चतुर्थीकर्मोत्तरं दारकाल इति, भ्रातृमतो दायाद्यकालः, पैतृकद्रव्यस्य भ्रातृभिः सह विभागो दायाद्यकालः ।

---

( १ ) ''ख'' ख पुस्तकेऽधिकः ।

तदुक्तम्—

"अभ्रातृमांस्तु पुण्येऽह्नि चतुर्थ्युत्तरकालतः ।
भ्रातृमान् धनभागे वा पितर्युपरतेऽथवा ॥
(१)मातर्युपरमे दध्यात् कनिष्ठः सोदराज्ञया" ।

तथा—

"कालद्वयेऽपि चेद्येन नाधानं तु कृतं पुरा ।
स कृत्वाऽन्यतमं कृच्छ्रमग्निमप्याहरेत्ततः" ॥

एतदाधानं गृहपतौ पितरि प्रेते एकादशाहे द्वादशाहे वा कार्यम् ।

तदुक्तं गृह्यकारिकायाम्—

"एतद् गृहपतौ प्रेते कुर्यादेकादशेऽहनि ।
प्रागेवैकादशश्राद्धाद् वृद्धिश्राद्धविवर्जितम् ॥
एवं ज्येष्ठः समादध्यात् कनीयांस्तु विवर्जयेत् ।
एकादशेऽह्नि कुर्वीत द्वादशे वा विचक्षणः" ॥

किंच

"योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥
वृथापाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत् ।
प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति ॥

(१) पुस्तकद्वयेऽपि पाठस्त्वेकविध एव, परन्तु "मातुरुपरमे" इति पाठः साधीयान् प्रतिभाति ।

## अधिकारिनिरूपणम्

### ( आधानकालातिक्रमे प्रायश्चित्तम् )

कालातिक्रमे तु प्रायश्चित्तमुक्तम्—

"यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः ।
तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि ॥
कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम् ।
चान्द्रायणं चरेद्वर्षं प्रतिमासमहोऽपि वा ॥
नास्तिक्यादथवाऽऽलस्याद्योऽग्निं नाधातुमिच्छति ।
न यजेत् पाकयज्ञैश्च स याति नरकं ध्रुवम् ॥
तस्मात् सर्वप्रयत्नेन ब्राह्मणस्तु विशेषतः ।
आधायाग्निं विशुद्धात्मा यजेत परमेश्वरम् ॥

### अथाधिकारी निरूप्यते

तदुक्तं गृह्ये—

"ब्राह्मणाः क्षत्रिया वैश्याः शूद्रं हित्वाऽनुलोमजाः ।
अधिकुर्वन्ति गार्ह्येषु सह भर्त्रा स्त्रियस्तथा ॥
मासोदूर्ध्वं (१)स्त्रीप्रसूर्या स्यात्पुत्रसूर्दिनविंशतिः ।
रजस्युपरते स्नानदिनादूर्ध्वं रजस्वला ॥
नाधिकारोऽस्ति सर्वेषां सूतके मृतकेऽपि वा ।
(२)तथैव पतितानां च तथा दोषयुजामपि ॥

( १ ) स्त्रीप्रसूता या स्यात् इति ख० पाठः ।

( २ ) "अग्न्याधानेऽधिकारोऽस्ति रथकारस्य चोत्तरे ।
माहिष्येण करण्यां तु रथकारः प्रजायते ।

वेदाध्ययनसम्पन्नाः प्रयोगेण श्रुतेन च ॥
अधिकुर्वन्ति सर्वत्र यद्वाऽर्थश्रवणं विना ।
(१)यद्वाऽध्ययनसंसिद्धविज्ञानरहितोऽपि सन् ॥
नाधिकारी क्रियाशून्यो भर्तृयज्ञादिशासनात् ।
(२)व्यभिचारवती योषा रोगिणी द्वेषिणी च या ॥
आधाने सा परित्याज्या सूत्रकारमतान्तरात् ।
अधीतवेदोऽपि कृतावसथ्यः पित्रादिकैरस्खलिताधिकारः ।
पत्नीसहायो द्विज आदधीत त्वग्नीन् स्वकर्माणि करिष्यमाणः" ॥

इत्यधिकारिनिरूपणम् ।

अथ परिवेत्तृदोषविचारः ।

मदनरत्ने व्यासः—

"अग्निर्वैवाहिको येन न गृहीतः प्रमादिना ।
पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः" ॥

वैश्यायां क्षत्रियाज्जातो माहिष्यो मुनिभिः स्मृतः ।
जाता वैश्येन शूद्रायां करणीत्यभिधीयते" ।
इति गदाधरभाष्येऽधिकः पाठः ।

( १ ) "यद्वाऽध्ययनवेदार्थविज्ञानरहितोऽपि सन्" इति गदाधर-भाष्ये पाठः ।

( २ ) "द्रविडस्त्वन्यथा प्राह सर्वशून्येऽप्यधिक्रियाम् ।
भार्याचेद्भवेत्कर्ता नेहक् सर्वानुसम्मतम्" इति गदाधरभाष्येऽधिकः पाठः ।

अथाधिकारानधिवद्ये ज्येष्ठे भ्रातरि पितरि (वा) साग्नौ कनिष्ठस्य पुत्रस्य वाऽन्यभावेऽपि न दोषः ।

तत्रैव गार्ग्यः—

"पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः ।
ज्ञानाध्ययननिष्ठो वा न दुष्येदग्निना विना ॥
अनग्निकस्य वेदोऽग्निर्वेदहीनोऽप्यनग्निकः ।
साग्निकोऽप्यनधीतश्च अनग्निक इति स्मृतः" ॥

गृहस्थस्याप्यध्ययनमाह सत्यव्रतः—

"अनधीत्य द्विजो वेदं स्नात्वोद्वाह्य यथा तथा ।
अधीते ब्रह्मचर्येण साङ्गं वेदं गुरोर्गृहे" ॥

इदं चाधानं ज्येष्ठे स्कृताधाने न कार्यम् ।

(१)"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥
परिवित्तिः परिवेत्ता नरकं गच्छतो ध्रुवम्(२) ।
अपि चीर्णप्रायश्चित्तौ पादोनफलभागिनौ" ॥ इति ।

मनुशातातपोक्तेः । स्मार्तेऽप्येवम् ।

"सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम् ।
आवसथ्ये तथाऽऽधानं पतितस्तु तथा भवेत्" ॥

इति तत्रैव गार्ग्योक्तेः । अनुज्ञया त्वदोषमाह ।

---

(१) "उद्वाहं चाग्निसंयोगं" इति गदाधरभाष्ये पाठः ।

(२) "गच्छतो ध्रुवौ" इति (क) (ख) पाठः ।

सुमन्तुः—

"ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् ।
अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा" ॥

वसिष्ठः—

"अग्रजस्तु यदाऽनग्निराधध्यादनुजः कथम् ।
अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि" ॥

हारीतः—

"सोदराणां तु सर्वेषां परिवेत्ता(१) कथं भवेत् ।
दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया" ॥

अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनरत्ने परिजातः ।
विवाहस्त्वनुज्ञया नेत्यर्थः । सोदरोक्तेरसोदराणां
सापत्नदत्तकादीनां न दोषः ।

"विवाहे चाग्निसंयोगे न दोषः परिवेदने ।
देशान्तरस्थक्लीबैकवृषणानसहोदरान् ॥
वेश्यानिष्ठांश्च पतितान्छूद्रतुल्यातिरोगिणः ।
जडमूकान्धबधिरकुब्जवामनखञ्जकान् ॥
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपे तथा ।
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा ॥
कुटिलोन्मादरोगांश्च परिविन्दन्न दुष्यति ।
गीतवादित्रनिरतान्नर्तकान् पारदारिकान् ॥

(१) कथञ्चन इति (ख) पाठः ।

वशिकान् गारुडांश्चैव परिविन्दन्न दुष्यति ।
योगशास्त्राभियुक्ते च द्विजे प्रव्रजिते तथा ॥
(१)ज्येष्ठे श्रद्धाविहीने च सत्याधेयमनुज्ञया ।
पितुः सत्यप्यनुज्ञाने नादधीत कदाचन ॥
(२)पितर्यनाहिताद्वाक्यादादधीताथवा सुतः ।
अग्निहोत्रं च जुहुयादिति लौगाक्षिकारिका ॥
नास्तिके चाग्निसंयोगे न दोषः परिवेदने ।
पिता पितामहो यस्य अग्रजो वाऽप्यनग्निमान् ॥
इज्यातपोऽग्निसंयोगे न दोषः परिवेदने ।
(३)परिवादनवाक्यैर्ये श्रूयन्ते दोषसंयुताः ॥
तेषामप्यधिकारोऽस्ति प्रायश्चित्तादनन्तरम् ।
पिता पितामहो वापि नास्तिको वाऽप्यनाश्रमी ॥
यस्य दोषोऽस्ति नैवेह तस्याधाने कदाचन ।
अग्रजे सति निर्दुष्टे यवीया(४)नग्निमाहरेत् ॥
प्रतिपर्व भवेत्तस्य ब्रह्महत्या न संशयः ।
नाग्नयः परिविन्दन्ति न वेदा न तपांसि च ॥

---

(१) अत्र "नास्तिके चाग्निसंयोगे न दोषः परिवेदने" इति गदाधरभाष्ये ।

(२) "पितर्यनाहिताग्नावप्यादधीताथ वा सुतः" इति त्रिकाण्डमण्डने ( कां० १ श्लो० ७१ ) पाठः ।

(३) "परिवेदनवाक्ये ये" इति गदाधरभाष्ये पाठः ।

(४) "नग्निमाम्भवेत्" इति गदाधरसम्मतः पाठः ।

न च श्राद्धं कनिष्ठस्य विरूपा या च कन्यका ।
(१)ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् ॥
अनुज्ञातोऽपि सन्मित्रा नादध्यान्मनुरब्रवीत् ।
धनवार्धुषिकं राजसेवकं कर्षकं तथा ॥
प्रोषितं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ।
(२)प्रोषितं चेन्न शृणुयात् त्र्य(अ)ब्दादूर्ध्वं समाचरेत् ॥
आगते तु पुनस्तस्मिन् पा(३)दकृच्छ्रं समाचरेत् ।
देशान्तरस्थो न ज्येष्ठो ज्ञायेताहितवानिति ॥
(४)कनिष्ठो नाधिकारी चेदादधीताविचारयन् ।
द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोगतः ॥
न्याय्यः प्रतीक्षितो भ्राता श्रूयमाणः पुनः पुनः ।
प्रोषितस्तु यदा ज्येष्ठो ज्ञायेतानाहितानलः ॥
षड् वत्सरान् प्रतीक्षेत आदधीतानुजस्तथा ।
पितरि प्रे(५)तभावे वा देशान्तरगतेऽपि वा ॥
अधिकारविघातो हि न पुत्रस्योपजायते ।

---

(१) "ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् ।
अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा" इति गदाधरभाष्ये ।

(२) "प्रोषितश्चेत् त्रिवर्षं स्यात्" इति गदाधरभाष्ये पाठः ।

(३) पादकृच्छ्रत्रयं चरेत् इति गदाधरभाष्ये पाठः (ग) पुस्तक पाठः त्रिकाण्डमण्डने ( कां० १ श्लो० ७४ ) पाठश्च ।

(४) कनीयाननधिकारी च इति गदाधरभाष्ये पाठः ।

(५) "प्रेतभावे वा" इत्यपि पाठः गदाधरभाष्ये ।

कृष्णकेशः (१)समुत्पन्नपुत्रेऽन्याधेयमाचरेत् ॥
अधर्मेणार्जितं द्रव्यं यः क्रियासूपयोजयेत् ।
पापात्मा नरकं गच्छेद्यस्यार्थस्तस्य तत्फलम् ॥
धर्मविद् ब्राह्मणः शूद्रात् क्रियार्थं याचते धनम् ।
जायते प्रेत्य चाण्डालः शूद्रार्थे(२)नेष्टदेवतः ॥
(३)यज्ञार्थं भिक्षितं द्रव्यं यः सर्वं नोपयच्छति ।
श्वकाकयोनौ जायेत स तच्छोक्ता तु दुर्मतिः ॥
उपादाय धनं शूद्राद्योऽग्निहोत्रमुपासते ।
शूद्राग्निहोत्री स भवेद् ब्रह्मवादिषु गर्हितः ॥
परपाकरतो नित्यं शूद्राग्नेः पर्युपासते ।
आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः ॥
ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ।
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥
असत्प्रतिग्रहेणापि तृप्तिरेकैव वारिता ।
अयाचितोपपन्नानां द्रव्याणां (४)न प्रतिग्रहात् ॥

---

(१) "समुत्पन्नपुत्रोऽन्याधेयमाचरेत् । सूत्रान्तरेष्वनुक्तत्वाभियमा तेति केचित" । इत्येति" त्रिकाण्डमण्डने (१ । ७६) पाठः, (ख) पुस्तकपाठश्च ।

(२) नेष्टदेवतमिति (ख) पाठः ।

(३) यज्ञार्थं भिक्षितं द्रव्यमन्यत्र विनियोजयेत् । श्वाक्वादौ स्यावपाङ्क्तेयो भासयोनिं स गच्छति । इति त्रिकाण्डमण्डने (१ । १०७) पाठः ।

(४) न द्रव्याणां परिग्रहात् (ख) पाठः ।

अविशिष्टः शिलोञ्छाभ्यां तं विन्द्यादप्रतिग्रहम् ।
श्रद्धाभक्तिविविक्त्यादितरुणीवल्लभेन च ॥
यज्वना रेणुकार्येण कृतेयं गृह्यकारिका ॥

इति शिवप्रसादकृते स्मार्तोल्लासग्रन्थे गृह्यकर्मकृताकृत—
महिमवर्णनं चाधिकारिनिर्णयः समाप्तः ॥

## अथ मुहूर्तविचारः ।

अथेदानीं मुहूर्तविचारोऽप्यत्र क्रियते ।

तत्र कारिका—

"माघादिपञ्चमासेषु श्रावणे चाश्विने तथा ।
(१)कुर्यान्मृगोत्तमाङ्गे वा आधानं शुक्लपक्षतः" ॥

मृगोत्तमाङ्गो मार्गशीर्षः ।

मुहूर्तरत्नावल्याम्—

"श्रेष्ठं फाल्गुनमाधवोत्तरदलं चाषाढमासत्रयं
पौषे चोर्जयुते सजीवभृगुजे वन्हिद्वये त्रिप्रभे ।
आदित्यध्रुवशाक्रभे मृदुचरे नन्दासुभद्राजया-
योगेऽस्मिन् द्विजवर्यपुण्यनिधये वन्हेर्विधानं शुभम्" ॥

अन्यच्च—

"अग्न्याधानं द्विजेन्द्राणां स्यात्कृत्तिकविशाखयोः ।
रेवतीरोहिणीपुष्यमृगज्येष्ठोत्तरात्रये ।"

(१) "मार्गशीर्षे शुक्लपक्षे आधानमथकारयेत्" इति सटीकनिर्णयसिन्धौ २६१ पत्रे पाठः ।

तथान्यः—

"हस्तद्वये विशाखासु कृत्तिकादित्रये तथा ।
पुनर्वसुद्वये तद्वद्रेवतीषूत्तरासु च ॥
भौमार्कवर्जिते वारे नाधिमासे त्तये तथा ।
चन्द्रेऽनुकूले पूर्वाह्णे रिक्ताविष्टिविवर्जिते" ॥

आश्वलायनः—

"अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फाल्गुनीषु विशाखोत्तरयोः प्रौष्ठपदयोरेतेषां कस्मिंश्चिद् वसन्ते पर्वणि ब्राह्मण आदधीत ॥

आपस्तम्बाधानप्रयोगे—

उक्तनक्षत्रपर्वणोरारम्भप्रभृतिगार्हपत्याधानप्रभृति वा आहवनीयाधानान्तं वर्तमानयोर्यागे वा इतरे पर्वणि रोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरापूर्वाषाढोत्तराषाढाहस्तचित्राविशाखानुराधाश्रवणोत्तरेषु प्रौष्ठपदेषु पूर्ववद्वर्तमान आदधीत अत्यन्तापदि मुमूर्षोः सर्वेषु ऋतुषु आधानं कार्यं, नैवानाहिताग्निर्म्रियेतेति वृत्तिकारोदाहृतश्रुतेः ( आश्वलायनश्रौतसूत्रनारायणवृत्तौ २ अ० १ खण्ड० ४७ पत्रे ) ।

तथा च कात्यायनश्रुतिः—

"यदहरेवैनं श्रद्धोपनमेत्तदादधीतेति" ।

रत्नमालायाम्—

"प्राजापत्ये पूषभे सद्विदैवे
पुष्ये ज्येष्ठासे(स्वै)न्दवे कृत्तिकासु ।

(१)अग्न्याधानं ह्युत्तराणां त्रयेऽपि—

(१) श्रुतिरपि कालादिविशिष्टमाधानं विधत्ते—

"कृत्तिकास्वग्नीऽ आदधीत, रोहिण्यामग्नीऽ आदधीत,
मृगशीर्षेऽग्नी आदधीत, फल्गुनीष्वग्नीऽ आदधीत,
हस्तेऽग्नी आदधीत, चित्रायामग्नी आदधीत"

( श० ब्रा० २।१–१६ )

"ब्रह्म वै वसन्तः क्षत्रं ग्रीष्मो विडेव वर्षास्तस्माद् ब्राह्मणो वसन्तऽ आदधीत ब्रह्म हि वसन्तस्तस्मात् क्षत्रियो ग्रीष्मऽ आदधीत क्षत्र ँ हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्ढि वर्षाः"(श०ब्रा०२।२।५)। "स यत्रोदङ्ङावर्तते तर्ह्यग्नी आदधीत" इत्यपि तत्रैव ।

"वसन्तो ब्राह्मणब्रह्मवर्चसकामयोः, ग्रीष्मः क्षत्रियश्रीकामयोः, वर्षाः प्रजापशुकामवैश्यरथकृतानाम्" ॥

( का० श्रौ० सू० ४।७।५–७ )

"वसन्ते ब्राह्मणस्य स्यादाधेयोऽग्निर्नराधिप ? ।
वसन्तो ब्राह्मणः प्रोक्तो वेदयोनिः स उच्यते ॥
अग्न्याधानं तु येनाथ वसन्ते क्रियते नृप ।
तस्य श्रीब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्द्धते ॥
क्षत्रियस्याग्निराधेयो ग्रीष्मे श्रेष्ठः स वै नृप ।
येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्धते ॥
श्रीः प्रजाः पशवश्चैव वित्तं चैव [illegible] यशः ।
शरत्कालेतु वैश्यस्याप्याधानीयो हुताशनः ॥
शरद्राज्यः स्वयं वैश्यो वैश्ययोनिः स उच्यते ।
शरद्याधानमेवं वै क्रियते येन पाण्डव ॥
तस्य वै श्रीः प्रजायुश्च पशवोऽर्थश्च वर्धते" ।

( बृ० गौ० स्मृ० १५।४७–५२ )

(१)चित्रादित्ये कीर्त्तितं गर्गमुख्यैः" ॥

मदनरत्ने वृद्धगार्ग्यः—

"पुष्याग्नेयत्र्युत्तरादित्यपौष्ण-
ज्येष्ठाचित्राऽऽर्द्रादिदैवेन्दुभेषु ।
कुर्युर्वाऽन्याधानमाद्यं वसन्ते
ग्रीष्मे वर्षास्वेव विप्रादिवर्णाः" ॥

"अग्निहोत्रं दर्शपूर्णमासाख्येऽप्युत्तरायणे ।
उपक्रम्य यथाकालमुपासीरन् द्विजातयः ॥
सोमं च पशुबन्धं च सर्वांश्च विकृतीरपि ।
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः" ॥

अन्यत्र—

"अग्न्याधानं मृगान्त्यध्रुवगुरुबलभिन्मिश्रभैरष्टशुद्धौ
(२)केन्द्रस्थावात्रिकोणेष्विनकुजगुरुचन्द्रेषु सौम्यायने स्यात् ।
लग्नांशौ नक्रकर्काण्डजघटघटितौ लग्नगौ चन्द्रशुक्रौ ।
रिक्तास्त्यक्त्वाऽस्तनीचारिगृहगविजितांश्चेन्दुभौमेज्यशुक्रान् ॥

अग्न्याधानमिति, मृगरेवतीध्रुवपुष्यज्येष्ठामिश्रनक्षत्रैः केन्द्रतृतीयैकादशषष्ठत्रिकोणान्यतमेषु रविभौमगुरुचन्द्रेषु सत्सु सौम्यायने उत्तरायणे वा अग्न्याधानं स्यात् । तथा लग्नांशौ मकरकुंभकर्कमीनघटितौ त्यक्त्वा तथा चन्द्रशुक्रौ लग्नगतौ त्यक्त्वा तथा रिक्ता-

---

( १ ) "श्रेष्ठं प्रोक्तं प्राग्जनैर्विप्रमुख्यैः" इति पीयूषधारा ( मु० चि० ६ । १ ) पाठः ।

( २ ) केन्द्रस्थायात्रिकोणे इति (ख) पाठः ।

स्त्यक्त्वा तथास्तनीचरिपुग्रहगविजितान् चन्द्रभौमगुरुशुक्रांश्च त्यक्त्वा अग्न्याधानं भवेदित्यर्थः ।

दीपिकायाम्—

"पुष्योत्तराविशाखासु ज्येष्ठान्त्यक्त्वाऽग्निचन्द्रभे ।
अग्न्याधानमरिक्तासु कार्यं विध्वर्कजेऽहनि" ॥

श्रीपतिः—

"कुजेन्दुजीवैरिपुराशिसंस्थैः
पराजितैर्नीचगृहोपगैर्वा ॥
अस्तंगतैर्वाऽग्नि(पि)परिग्रहं यः
करोति हास्यं विदुषां स याति ॥"

"आषाढं कार्तिकं पौषं भाद्रं चैवाधिमासकम् ।
शुक्रास्तमलसंक्रान्तिग्रहणादि विवर्जयेत्" ॥

इति गङ्गाधरः, ।

गृह्ये—

"पश्चिमायां दिशि सितो बालः स्याद्दशवासरः ।
वृद्धः पंचदिनान्यैन्द्र्यां त्रिदिनं पक्षमेव (च)सः ॥
शिशुवृद्धौ जीवसितावुभयत्राप्युदीरितौ ।
अन्यैः पञ्चदशाहानि दशान्यैः सप्त चापरैः ॥
उपरागनिवृत्तौ च यावत्स्याद्दिनसप्तकम् ।
रवीन्द्वोर्दृष्टिपाते च क्रूरग्रहयुते च भे ।
अग्न्याधेयं विवाहादि मङ्गलं न समाचरेत्" ॥

रत्नमालायाम्—

(१)"राशौ विलग्नेऽम्बुचरे घटे वा,
तदंशके वाऽप्यथवा शशाङ्के ।
(२)आधानकालो द्विजपुङ्गवानां
जातोऽपि निर्वाणमुपैति वह्निः" ॥

निर्वाणं नाशनम् ।

"अस्तं गतैः शुक्रशशिगुरुभौमपराजितैः ।
(३)विद्राशिगैर्वा निलये निष्फलोऽग्निपरिग्रहः ।
यस्यैवाधानलग्नस्थश्चन्द्रो वा भृगुनन्दनः ।
उपैति तस्य जातोऽग्निर्निर्वाणं सततं ज्वलन्" ॥

अन्यत्र—

"(४)स्यादग्निहोत्रविधिरुत्तरगे दिनेशे
मिश्रध्रुवान्त्यशशिशुक्रसुरेज्यधिष्ण्ये ।

---

(१) "नक्रे विलग्ने" इति पीयूषधारायां (मु० चि० ६।२) पाठः । विलग्नं लग्नपर्यायः । अम्बुचरे कर्के मीने मकरोत्तरार्द्धे च । मेषकर्कटतुलामकराश्च चरलग्नानि । घटे कुम्भलग्ने । तदंशके चरांशे कुम्भांशे च । शशाङ्के चन्द्रे चरराशिस्थिते कुम्भराशिस्थिते तदंशस्थिते चेत्यर्थः ।

(२) "आधानकाले द्विजपुङ्गवानाम्" इति पीयूषधारापाठः ।

(३) "विद्राशिगैर्नीचगैर्वा" इति (ग) पुस्तकपाठः

(४) उत्तरगे उत्तरायणगते उत्तरदिग्गते दिनेशे सूर्ये अग्निहोत्रविधिः स्यात् । यदाह नारदः—

"गृहप्रवेशवैवाहप्रतिष्ठामौञ्जिबन्धनम् ।
मखादि मङ्गलं कर्म विधेयं चोत्तरायणे" इति ।

रिक्तासु नो शशिकुजेज्यभृगौ न नीचे
नास्तंगते न विजिते न च शत्रुगेहे" ॥
"(१)नो कर्कनक्रझषकुम्भनवांशलग्ने
नोऽब्जे तनौ रविशशीज्यकुजे त्रिकोणे ।

---

मलस्याग्निहोत्रपूर्वकत्वात्तदारम्भोऽपि, विवाह एव वेव.हः । मिश्रे कृत्तिकाविशाखे ध्रुवाणि उत्तराफाल्गुन्युत्तराषाढाउत्तराभाद्रपदास्तिस्रउत्तराः रोहिणी च ( मु० चि० २।२ ) एतानि नक्षत्राणि अन्त्यं रेवती शशी मृगः शक्रो ज्येष्ठा सुरेज्यः पुष्यः एतेषामन्यतमेषु भेषु अग्निहोत्रविधिः स्यात् । रिक्ताश्चतुर्थीनवमीचतुर्दश्यः आसु अग्न्याधानं नो कार्यम् । चन्द्रमङ्गलगुरुशुक्रेषु नीचगतेषु तथाऽस्तंगतेषु तथा ग्रहान्तरैर्विजितेषु तथा शत्रुगृहस्थितेषु अग्न्याधानं नो कार्य ( मु० चि० ६।२ ) मिति ।

( १ ) कर्कः प्रसिद्धः नक्रो मकरः झषो मीनः कुम्भः प्रसिद्धः एतेषामन्यतमे लग्ने नवांशे वा अग्न्याधानं नो कार्यम् । तथा अब्जे चन्द्रे तनौ लग्नस्थे सति चाग्न्याधानं न कार्यम् । सूर्यचन्द्रगुरुभौमेषु त्रिकोणस्थितेषु सत्सु परैर्बुधशुक्रशनिराहुकेतुभिस्त्रिलाभषट्खस्थितैस्तृतीयैकादशषष्ठदशमस्थानस्थितैः सद्भिराधानं हितं स्यात् । निधनशुद्धियुते अष्टमस्थाने सकलग्रहराहित्यं निधनं मृतिः तथा युते सत्याधानं शुभं तस्मादष्टमस्थाने यः कश्चिद्ग्रहः स्यात् तदाऽशुभमेवेति ।

तथा च अधानादिशुभकर्मनिषेधकालः—

"गीर्वाणाम्बुप्रतिष्ठापरिणयदहनाधानचौलोपवीत-
क्षोणीपालाभिषेको दवसितविशनं नैव याम्यायने स्यात् ।
नो वा बाल्यास्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात्
पक्षं वार्धं च केचिज्जहति तमपरे यावदीक्षां तदुग्रे" ॥

केन्द्रत्रिषड्भवनगे च परैस्त्रिलाभ—
षट्खस्थितैर्निधनशुद्धियुते विलग्ने" ॥

अष्टशुद्धौ अष्टमस्थानगे सर्वग्रहरहितपापग्रहरहिते वाऽन्याधानं स्यात् ।

अन्यत्र—

"त्रिकोणकेन्द्रोपचयेषु सूर्ये
बृहस्पतौ शीतकरे कुजे वा ।
शेषग्रहेषूपचयस्थितेषु
धूमध्वजोत्पादनमामनन्ति" ॥

श्रीपतिः—

"चन्द्रे पत्नी मृत्युगे मृत्युमेति
क्षिप्रं वह्न्याधायकः क्ष्मासुते च ।

---

( मु० चिं० ५।२६ ) महेश्वरः—

"चूडाकर्मनृपाभिषेकनिलयाग्न्याधानपाणिग्रहा-
न्देवस्थापनमौञ्जिबन्धनविधीन्कुर्यान्न याम्यायने ।
देवेज्यास्फुजितोस्तथाऽस्तमितयोर्बाल्ये च वार्धे तयोः
केतावभ्युदिते तथा ग्रहणतो यावत्तिथिश्चाष्टमी" ॥

देवेज्यो गुरुः । आस्फुजिच्छुक्रः ।

"केतुनिर्घातभूकम्पविद्युत्स्तमितदर्शने ।
आधानं नहि कर्तव्यं सुधिया भूतिमिच्छता" ॥

"सर्वैर्धृतिश्च व्यतिपातनामा सर्वोऽप्यनिष्टः परिघस्य चार्धम्" ।

"विष्कम्भे घटिकास्तिस्रो नव व्याघातवज्रयोः ।
गण्डातिगण्डयोः षट् च शूले पञ्च न शोभनाः" ॥ इति ।

(१)वारे भानौ देवपूज्ये रवौ वा
रोगैर्युक्तो दुःखितः स्याद्द्विजेन्द्रः" ॥

वह्निमादधातीति वह्न्या(२)धायको यजमानः ।

"पापग्रहेषु धनगेषु धनेन हीनः
सौम्यग्रहेषु धनवानुडुपेऽब्दः स्यात् ।
लग्नस्थिते च सबुधार्कजभार्गवेन्द्रा—
वुत्पादितोऽग्निरचिरात् खलु नाशमेति" ॥

अथवाऽष्टशुद्धो कर्तुर्जन्मराशिजन्मलग्नाभ्यामष्टमो यो राशिर्यदा लग्ने नास्ति साऽप्यष्टशुद्धिस्तस्यां सत्याम् ।

कश्यपः—

"पञ्चाङ्गशुद्धिदिवसे चन्द्रताराबलान्विते ।
चन्द्रे शुद्धियुते लग्ने चाष्टमोदयवर्जिते" ॥

अथ जयपराजयलक्षणम् ।

अथाऽन्यद्भूतं जयपराजयलक्षणं सूर्यसिद्धान्ते—

"उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली ।

---

(१) "भानोः सुनौ देवपूज्ये रवौ वा रोगैर्जुष्टो" इति गदाधरभाष्ये पाठः ।

"नो कुर्याद् धुतभुक्परिग्रहमिनक्ष्मापुत्रजीवेन्दुभि-
र्नीचस्थैर्विजितैरिपोर्भवनगैरस्तङ्गतैर्वा द्विजः" ।

इति गदाधरभाष्येऽधिकः पाठः ।

(२) धा धातोः "ण्वुल् तृचौ (पा० ३।१।१३२) इति ण्वुल्" । आतो युक् चिण्कृतोः (पा० ७।३।३३) इति युगागमः ।

आसन्नावप्युभौ दीप्तौ भवतश्चेत्समागमः।
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ।
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी" ॥
अपसव्ये जितो युद्धे दूरेऽप्यणुरदीप्तिमान्।
(कुक्षौ) रुक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः"(१)॥

अथ यज्ञयोगमाह—श्रीपतिः—

"लग्नस्थे धनुषि गुरावथ क्रिये वा
भूसूनौ दशमगतेऽथ सप्तमे वा।
तिग्मांशौ सहजषडायगे विधौ वा
जाताग्निर्यजति न संशयं द्विजेन्द्रः ॥

अन्यत्रापि—

(२)"चापे जीवे तनुस्थे वा मेषे भौमेऽम्बरे द्युने।
षट्त्र्यायेऽब्जे रवौ वा स्याज्जातोऽग्निर्यजति ध्रुवम्" ॥

---

(१) सूर्यसिद्धान्ते अ० ७। २१—२३ ॥

(२) जीवे गुरौ चापस्थे धनुः संस्थे सति तनुस्थे आधानलग्ने धनुराश्ये गुर्वधिष्ठिते सतीत्यर्थः। अयमेको योगः। अथवा भौमे मेष-लग्ने सति, अयं द्वितीयो योगः। अथवा आधानलग्नस्थानस्थे सप्तम-स्थानस्थे वा भौमे सति योगद्वयमेतत्। अथवा अब्जे चन्द्रे षष्ठे तृ-तीयैकादशस्थानान्यतमस्थानस्थे योगत्रयमेतत्। अथवा सूर्ये षष्ठतृती-यैकादशान्यतमस्थानस्थे सति योगत्रयमप्येतत्। एवं विधे लग्ने जा-ताग्निः आधानकर्ता स्यात्, स ध्रुवं निश्चयेन यजति देवतोद्देशेनावदान-त्यागा (पू० मी० ४।२।१२॥ का० श्रौ० १।२।१-२) यागः, ज्योतिष्टो-मादिः तं करोतीत्यर्थः। यदाह कश्यपः—

माहेश्वरः—

(१)"चापस्थे तनुगे गुरौ क्रियगते सप्ताम्बरस्थे कुजे ।
शीतांशौ त्रिषडायगे दिनकरे वा स्यात्तदा दीक्षितः" ॥

किञ्च—

"कर्कनक्रघटमीनविलग्ने (२)वांशके तनुगतेऽथ तदीये ।
लग्नगे कुमुदनीदयिते वा नाशमेति जनितोऽपि हुताशः" ।
"अग्न्याधानं न कुर्वीत कर्कनक्रत्रये विधौ ।
लग्नगे धनगे पापे तथा रन्ध्रे ग्रहान्विते" ॥

अथ शिष्याय सुबोधार्थं मासादि स्पष्टीक्रियते ।

चैत्रादिद्वादशमासाः, नक्षत्राणि अश्विनी १ कृत्तिका २ रोहिणी ३ मृगशि० ४ पुनर्वसु ५ पुष्य ६ पूर्वा फ० ७ उत्तरा फ० ८ हस्त ९ चित्रा १० स्वाती ११ विशाखा १२ अनुराधा १३ ज्येष्ठा १४ पूर्वाषाढा १५ उत्तराषाढा १६ अभिजित् १७ श्रवण १८ धनिष्ठा १९ शत तारका २० पूर्वाभाद्रपदा २१ उत्तराभाद्रपदा २२ रेवती, २३ इति-नक्षत्राणि, नन्दाभद्राजयापूर्णास्तिथयः, जीवभृगुचन्द्रवाराः, शुभग्रहे

---

"लग्नस्थे चापगे जीवे मेषे वा सप्तकर्मगे ।
कुजेऽर्के त्रिषडायस्थे चन्द्रे वाग्निर्ज्वलत्यलम्" इति ।

(१) चापस्थे धनुराशिस्थिते । तनुगे लग्नस्थे । क्रियगते मेषराशिस्थिते । अम्बरस्थे दशमस्थे । आयगे एकादशस्थे । कन्यायां मिथुने च मङ्गलः शत्रुगृहस्थः । कन्यामिथुनतुलावृषेषु बृहस्पतिः शत्रुगृहस्थः, रविमङ्गलशनैश्चराः पापग्रहाः क्षीणचन्द्रश्च । धनगेषु द्वीतीयस्थेषु ।

(२) "वा गते तनुगतेऽथ तदीये" इति पीयूषधारा पाठः ।

अत्र लग्नगचन्द्रस्योपलक्षणत्वाच्छुक्रोऽपि-लग्ने निषिद्धः, तत्पूर्व मूले "वस्यैवाधान"मित्यादिनोक्तमेव ।

शुभलग्ने शुभे चन्द्रानुकूले पूर्वोक्तद्वादशभावविचारे दिवसेऽग्न्याधानं(१) कर्तव्यम् ।

---

( १ ) अग्निर्धीयते श्रौतेन स्मार्तेन वा कर्मविशेषेणेत्यग्न्याधानम्। केचित्पाणिग्रहणसमये एव अग्न्याधानमाहुः । अपरे भ्रातृभिः सह विभागकाले एवाहुः । उक्तं च "आवसथ्याधानं दारकाले दायाद्यकाल एकेषाम्" ( पा० गृ० १।२।१ ) । एतदेवाभिप्रेत्योक्तं माहेश्वरेण । "अग्न्याधानं दारकाले विधेयं कैश्चित्प्रोक्तं तच्च दायाद्यकाले" इति । अन्ये वसन्ताद्यृतुपुरस्सरेण वर्णविशेषानाहुः "वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यो वर्षासु रथकार आदधीत" इति (श्रुतिः) । इतरे तु श्रद्धोदये एवाहुः—

"यदहरेवैनꣳ श्रद्धोपनमेत्तदहरेवादध्यात्"इति (श्रुतिः) । एतच्च सोमाग्न्याधानविषयम् । यदाह आपस्तम्बः—

"सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रम्" इति । तत्र पाणिग्रहणकालस्य प्रागुक्तत्वात्तत्क्षणादारभ्यमाणाऽग्न्याधानार्थं न मुहूर्तगवेषणा । एवं पैतृकद्रव्यस्य भ्रातृभिः सह यस्मिन्काले विभागो जातः तस्मिन्यथाकथञ्चिद्व्यतीपातभद्रादिदोषरहिते आधानं कार्यमेव । तदा उत्तरायणादिकालशुद्धेर्नापेक्षा । तत्रापि यदि प्रतिबन्धवशादाधानाभावो जातस्तदा कालशुद्धिर्विचार्यैव । अथैषां वर्णानां वसन्ताद्यृतवः सोमयागाद्यर्थं नियता एवोक्तास्तेषां यद्यप्युत्तरायणविचारो नास्ति संभवव्यभिचाराभावात् तथापि शुक्रास्तादि दोषनिवारणार्थं मुहूर्तो गवेष्य एव । येषां तु श्रद्धोदये एवाधानमिति पक्षस्तेषां सोमसाधनमेव श्रद्धोदय इति यथा कथञ्चित्पञ्चाङ्गशुद्धिं विचार्य नर्तुनक्षत्रादि प्रतीक्षा वारादिर्वा । "वाजपेयेन यजेत" ( श० ब्रा० ५।१।१।८ ) इति वाजपेयादीनां यागानां ( "वाजपेयः शरद्यवैश्यस्य" का० श्रौ० १४।१।१ ॥ शाङ्खा० १५।१।१। ) शरदाद्यृतुविशेषविहितानामपि सौ-

अथ वर्ज्यानि

शनिरविभौमवाराः, भरण्यार्द्रासार्पमघामूलनक्षत्राणि, तिथयस्तु रिक्ताः, चतुर्थाष्टमद्वादशचन्द्राः, मकरकर्ककुम्भमीनलग्नानि, अधिकक्षयमासौ व्यतिपातवैधृतिविष्टिसङ्क्रमणगुरुशुक्रास्तादिरहिते ग्रहणानि वर्जयेत् ।

अथ होमाहुतिः, दुष्टग्रहमुखे होमफलं च ।

अत्र प्रसङ्गाद्धोमाहुतिः कश्यपः—

"नक्षत्रे यत्र भानुः स्यात्तदा(१)द्यं भत्रिकं त्रिकम् ।
सूर्यज्ञशुक्रसौरीणामिन्दुभौमबृहस्पतेः ॥
राहोः केतोश्च निर्दिष्टं वदनादौ शुभाशुभम् ।
सौख्यार्थनाशः सूर्ये स्यादिन्दौ(२) जलमयी कृषिः ॥
भौमेऽग्निदाहो राष्ट्रस्य बुधे बुद्धिविवर्द्धनम् ।
गुरौ लब्धिरभीष्टस्य राज्यं सौभाग्यनन्दितम् ॥
भार्गवे कार्यसम्पत्तिरैहिक्या(का)मुष्मिकी भवेत् ।
शनेर्मुखहुतौ ज्ञेयो राज्यभङ्गो धनक्षयः ॥
राहोर्मुखहुतौ हानिः स(स्य)र्वस्य परिकीर्त्तिता ।

---

ध्यायनप्रतीक्षामकृत्वा शुक्रास्तादिदोषराहित्यं विचार्यं, तदयमत्र निर्णयः सम्पन्नः । यत्र तु कालनियमेनाधानादिविहितं तदा न मुहूर्तविचारः । यदा तु कालनियमाभावस्तदा मुहूर्तो विचार्य एवेति शम् ।

(१) "आद्यत्रिकं त्रिकम्" इति पुस्तकत्रयपाठः । "तदाद्यं तत्त्रिकं त्रिकै" इति शान्तिसारे ( १३ पत्रे ) पाठः ।

(२) "सूर्येस्यादिन्दोर्जलमयी कृषिः" इति पुस्तकत्रयपाठः ।

केतोर्मुखाहुतौ ज्ञेयं दुर्भिक्षं देशविप्लवम् ॥
मरणं प्राणिनां चैव राज्यभङ्गं तथैव च ।
तस्मात्सर्वप्रयत्नेन ग्रहनक्षत्रसङ्क्रमे ॥
दुष्टे न कुर्याद्धवनमित्याहुर्गर्ग(१)भार्गवाः" ।

टोडरानन्दः—

"विवस्वदृक्षात्त्रिकमेकमेवंविधे स्थितेऽर्कज्ञसितार्कजानाम् ।
चन्द्रारजीवागुशिखाब्दास्ये होमाहुतिः पापमुखे निषिद्धा" ॥

इति सर्वत्राग्निस्थापनादौ विचार्यम् ।

दुष्टग्रहमुखे हवनशान्तिः ।

अथ दैवात् कृतस्य पापग्रहमुखे होमस्य शान्तिः विष्णुधर्मोत्तरे—

"क्रूरग्रहमुखे चैव संजाते हवने शुभे ।

---

(१) "मित्याहुर्भार्गवादयः" इति पीयूषधारायां शान्तिसारे च पाठः

"सूर्यभात्त्रित्रिभे चान्द्रे सूर्यविज्ज्ञुक्रपङ्गवः ।
चन्द्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले" ॥

( मु० चि० २।३५ ) इति । सूर्यः स्पष्टमानेन यन्नक्षत्रेऽस्ति तस्मात्त्रित्रिके आदितो भत्रयमेकत्रिकमेवं सप्तविंशतिभेषु नव त्रिकाणि भवन्ति तत्र सूर्यनक्षत्रादारभ्य प्रथमद्वितीयादित्रिकस्थे चन्द्रे सति क्रमाद्देवमुखे आहुतिः पतति, यथा प्रथमत्रिके सूर्यस्य ततो बुधस्य ततः शुक्रस्य ततः पङ्गोः = शनेस्ततश्चन्द्रस्य तत आरभ्य भौमस्य तत इज्यस्य गुरोस्ततोऽगोः = राहोः ततः शिखिनः = केतोः । एवं सति यद्दिने पापग्रहमुखे होमाहुतिः पतति सा नेष्टा न शुभदा । अर्थादेव शुभग्रहमुखे आहुतिपातः शुभफलदः । तदयमत्र निष्कृष्टोऽर्थः–सूर्याक्रान्तनक्षत्राच्चन्द्रनक्षत्रस्थत्रिकत्रिकगणनया पापमुखे आहुतिर्निन्द्या शुभग्रहमुखे समीचीना ।

शान्ति विधाय गां दद्यात् ब्राह्मणाय कुटुम्बिने ॥
आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीम् ।
गोमूत्रमधुगन्धाद्यैरर्चितां प्रतिमां ततः ॥
( कुण्डे ) श्वभ्रे निधाय सम्पूज्य तत्र होमो विधीयते" ॥

वह्निनिवासस्तत्फलं च ।

( अथाग्नेर्वसतिं तत्फलं चाह )

"शुक्ला(१)दिश्च तिथिः सैका वारयुक्ताब्धिशेषिता ।
खे गुणे भुवि वासोऽग्नेर्द्वयेकयोः स्याद्धो दिवि ॥
सौख्याय होमो शुन्यग्रावर्थप्राप्तिहृदन्यतः ।
नायं विचारः संस्कारनित्यनैमित्तिकादिषु ॥
निवासोऽग्नेश्च रूपेण वित्तप्राणविनाशकः ।
पा(२)ताले द्विकशेषेण धनसंचयनाशकः ॥

---

( १ ) "सैका तिथिर्वारयुता कृताप्ता शेषे गुणेऽभ्रे भुवि वह्निवासः ।
सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च" ।
( मु० चि० २।३६ ) शुक्लादिमासगणनया वर्तमानतिथिर्गण्यैक-युता वर्तमानवारयुता चतुर्भक्ता यच्छेषं तद्गुणमितं शून्यमितं-च तदा वह्नेर्वासो वसतिस्थानं भुवि वर्तते तत्र होमदिवसे भुवि वह्निवासः सौख्यजनको भवति, अथ शशियुग्मशेषे क्रमे-णैकद्विमिते शेषेऽग्निवासो दिविस्वर्गे तत्फलं कर्तुः प्राणनाशो म-रणं भवेत् । द्विमिते शेषेऽग्निवासो भूतले पातालेऽस्ति तफलं कर्तुरर्थनाशो द्रव्यनाशः । उक्तं च—

"तिथिवारयुतिः सैका वेदभक्तावशेषकात् ।
निवासोऽग्नेर्व्योम्नि रूपे वित्तप्राणविनाशकः" इति ।

( २ ) "पाताला द्विक" इति (क) (ग) पाठः ।

गुणवेदावशेषेण भूमौ विपुलसौख्यदः ।
संस्कारेषु विचारोऽस्य न कार्यो नापि वैष्णवे ॥
नित्ये नैमित्तिके कार्ये न चाब्दे मुनिभिः स्मृतः" ।

अब्दे वर्षविषये ।

अथ होमवर्ज्यं खेटकसुप्तमाह—

"खेटसुप्तं रविं चन्द्राद् बुधान्मन्दं सितात्कुजम् ।
गुरोरगुं गजाब्ध्यष्टनवमं च जगुः परे" ।

एतदुक्तं भवति ।

"अर्कश्चन्द्रादष्टमे ज्ञाच्चतुर्थे मन्दः शुक्रादष्टमेऽङ्गारकश्चेत् ॥
राहुर्धर्मे जीवतः (१)खेटसुप्ते होमे नाशः(२)पुत्रयोषिद्धनानाम्"

अस्यार्थः चन्द्राद्रविमष्टमं, बुधात् शनिं चतुर्थं, शुक्राद्भौममष्टमं, गुरो राहुं नवमं, होमकाले खेटसुप्ताख्यं दोषमाहुराचार्याः ।

इति शिवप्रसादकृते स्मार्तोल्लासे शुभाशुभमुहूर्तविचारः ।

---

अथ अग्न्याहरणार्थं योनिमाह पारस्करः—

"वैश्य(३)स्य बहुपशोर्गृहादग्निमाहृत्यारणिप्रदानमेके" ।

गृह्ये—

"विद्यते यस्य वैश्यस्य बहवः पशवो गृहात् ।

---

( १ ) "खे च सुप्ते" इति (ख) (ग) पाठः ।

( २ ) "पुत्रयोषिद्धनानि" इति (क) (ख) पाठः ॥

( ३ ) पशुभिः समृद्धस्य वैश्यस्य गृहादग्निं हृतोऽग्निरुत्तमसंस्कृत-

तस्यानलं हुतोच्छिष्टमाहरेत क्रियासमम् ॥
स च वैश्यो निरग्निश्चेदावसथ्याहितोऽपि वा ।
तस्यापि लौकिकं वह्निमाहरेद्वृत्तिनिर्मितम्" ॥

अत्र शाङ्खायनगृह्ये—

"बहुपशुविट्कुलाम्बरीषबहुयाजिनामन्यतमं तस्मादग्निमादधीतेति" (कौ०गृ० १ पत्रे)

---

वाऽऽनीयाधानं कुर्यात् एके ऽरणिप्रदानम् अरण्युपादानकमिच्छन्ति, अयमर्थः–प्रशब्दोऽत्रोपशब्दार्थेऽरणिप्रदानमुपादानकारणमुत्पत्तिस्थानं यस्याग्नेः सोऽरणिप्रदानस्तमग्निमादधीतेति ( पा०गृ०१।२।३ ) ।

छन्दोगपरिशिष्टे—

"वैश्यकुलाद्वाऽम्बरीषाद्वाऽग्निमाहृत्याभ्यादध्यादपि वा बहुयाजिन एवागारात् ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वाऽपि वा अन्यम्मथित्वाऽभ्यादध्यात्पुण्यस्त्वेवानर्धुको भवतीति यथा कामयेत तथा कुर्यात्स एवास्य गृह्योऽग्निर्भवति" (गो० गृ० सू० १।१।१६-२१) इति ।

तथा गृह्यान्तरं छन्दोगभाष्ये—

"ब्राह्मणकुलात्तु ब्रह्मवर्चसकामोऽग्निमाहृत्यादधीत राजन्यादोजोवीर्यकामो वैश्यात्पुत्रपशुकामोऽम्बरीषात् धनधान्यकाम आरण्यमुरुपुण्यकोशकाम" ( गो० गृ० १।१।१८ भाष्ये ) इति ।

कात्यायनः—

"वैश्यकुलाम्बरीषमहानसाद्वा" ( का० श्रौ० ४।७।१६ ) वैश्यकुलाद्वा लौकिकोऽग्निर्हुतोच्छिष्टो वा ग्राह्यः न तु परिगृहीत आवसथ्यादिः ( इति देवयाज्ञिकाः ) अथवा अम्बरीषात् भ्राष्ट्रात् महानसशब्देन धान्यादि पाकार्थं गृहमुच्यते यत्रानवरतमन्नपाकस्तस्मादानीयमाणोऽग्निर्भवति स ग्राह्य" इति ।

गोभिलसूत्रे—

"अम्बरीषाद्बहुयाजिनो ब्राह्मणस्य बहुपशोर्वैश्यस्य महानसाद्वाऽभिमानीयाग्निं धारयेत्" ।

अग्न्यनुगमने चाधाने या योनिरङ्गीकृता सैव भवति, अतोऽरणिप्रदाने विकल्पः । यस्मिन्पक्षे वैश्यकुलादग्न्याहरणं—तस्मिन्पक्षे यावज्जीवं वैश्यसन्निधौ वासः, वैश्याभावे गृहान्तरयोन्यपेक्षया वरम् अरणिप्रदाने विकल्पः स्वगृह्योक्तो ग्राह्यः ।

## अरणिलक्षणम् ।

अरणिलक्षणं चोक्तं यज्ञपार्श्वे गृह्यकारिकायाम्—

(१)"अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।

---

( १ ) "अश्वत्थशमीगर्भारणी प्रयच्छति" (का०श्रौ० ४।७।२२) शमीमध्य उत्पन्नोऽश्वत्थः शमीगर्भ उच्यते शम्या गर्भः शमीगर्भः अश्वत्थश्चासौ शमीगर्भश्च अश्वत्थशमीगर्भः तन्निर्मिते द्वे अरणी भवतः । तल्लक्षणं चैवम्, शमीगर्भस्याश्वत्थस्य प्राङ्मुख्या उदङ्मुख्या वा ऊर्ध्वगाया वा शाखायाः छेदं कृत्वा तन्मय्यावरणी कार्ये ते चतुर्विंशत्यङ्गुष्ठदीर्घे षडङ्गुष्ठविस्तारे चतुरङ्गुष्ठोच्छ्राये भवतः मानं मध्यमेनाङ्गुष्ठपर्वणा कर्त्तव्यम् ।

एवं विधैका अधरारणिः द्वितीयोत्तरारणिरिति ते चैते अरणी अग्निमन्थनार्थं परिगृह्येते ते एव सदा धार्ये अस्ते प्रतिपत्तिविधानात् "अरणी वृषल्योरिति" ( का० श्रौ० २५।७।३० ) अत एव कात्यायनेनोक्तम्—

"अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः ।
न तावत्पुनराधानमन्यारण्योर्विधीयते" ॥

( कर्मप्रदीप ३।१।१८ )

तस्य या प्राङ्मुखी शाखा (१)उदीची चोर्ध्वगापि वा ॥
शाखां तामाहरेद्विप्रः पृष्ठतोऽनवलोकयन् ।
अ(२)रणिस्तन्मयी कार्या तन्मध्येवोत्तरारणिः ॥
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते ।
अलाभे त्वशमीगर्भा(३)दाहरेदविलम्बितः ॥
(४)चतुर्विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला ।

---

इति, नाशक्षयदाहादिनिमित्तेष्वन्ययोः परिग्रहोपदेशाच्च,

"अरण्योर्दग्धयोर्वाऽपि नष्टयोः क्षीणयोस्तथा ।
आहृत्यान्ये समारोप्यपुनस्तत्रैव निर्मथेदिति" ॥

तथा च कात्यायनः—

"अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः ।
पालयेदुपशान्तेऽस्मिन्पुनराधानमिष्यत" ॥

( कर्मप्रदीप. ३।१।६ )

इति, एवं च निमित्ताभावे परिगृहीतयोररण्योरात्मेच्छया तावन्न परित्यागो यावत्कथमप्यग्निमन्थनसम्भवः ।

"अभावेऽगर्भस्य" ( का० श्रौ० सू० ४।७।२३ ) शमीगर्भस्याश्वत्थस्याभावेऽगर्भस्याश्वत्थमात्रस्य ।

( १ ) "औदीचीचोर्ध्वगाऽपि वा" इति मदनपारिजाते पाठः
"चोदीची चोर्ध्वगाऽपि वा" इतिं कात्यायनस्मृतौ (७।१) पाठः

( २ ) "अरणिस्तन्मयी ज्ञेया" इति गदाधरभाष्ये पाठः ।
"अरणिस्तन्मयी प्रोक्ता" इति कात्यायनस्मृतौ पाठः ।

( ३ ) "अलाभे त्वशमीगर्भाद्धरेदेवाविलम्बित" इति मदनपारिजातपाठः ।
"अलाभेत्वशमीगर्भादुद्धरेदविलम्बित" इति कात्या०स्मृ०पाठः ।

( ४ ) "चतुर्विंशतिरङ्गुष्ठैर्दैर्घ्ये षडपि पार्थिवम् ।

चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥
मूलादष्टाङ्गुलन्त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।
अन्त(रं)रा देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥
मूर्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।
अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते ॥
अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं तथा ।
एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥
ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् ।
अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः ॥
यत्तद्गुह्यमिति प्रोक्तं देवयोनिः स उच्यते ।
तस्यां यो जायते वह्निः स कल्याणकृदुच्यते ।
प्रथमे मन्थने ह्येष नियमो नेतरेषु च ।
अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद् द्वादशाङ्गुलम् ॥
(१)ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ।

---

चत्वार उच्छ्रये मानमरण्योः परिकीर्तितम्"
इति ( का०स्मृ० ७।४ ) पाठः ।
"उत्तरारणिनिष्पन्नः प्रमन्थः सर्वदा भवेत् ।
योनिसङ्करदोषेण युज्यते ह्यन्यमन्थकृत्"
( का०स्मृ० ७।१३ )

इति विशेषः । अधोभागे प्रमन्थकाष्ठसम्बद्धचात्रस्योपर्य्योवि-
लीं निधाय चात्रं नेत्रेण वेष्टयित्वा प्रमन्थनं कुर्यात् ।

( १ ) "औविली द्वादशैव" इति मदनपारिजाते पाठः ।
"सारवद्दारवञ्चात्रमौविली च प्रशस्यते"

(१)गोवालैः शणसम्मिश्रैस्त्रिवृद्वृत्तमनंशुकम् ॥
व्याममात्रं नेत्रं स्यात्तेन मथ्यो हुताशनः ।
चात्रमूर्ध्ने प्रमन्थाग्रं गाढं (२)धृत्वा विचक्षणः" ॥

बहुदिने मन्थनेन प्रमन्थनाशे तत्रैवोक्तम् ।

"उत्तराया अभावाद्धि प्राप्तो मन्थोऽधरारणेः ।
व्याख्यातं कैश्चिदेवं तन्निर्मूलत्वादुपेक्ष्यते" ॥

तत् (मान) प्रकारो यज्ञपार्श्वे—

"शिरश्चक्षुः कर्णमास्यं प्रथमेंऽशे प्रकीर्तितम् ।
द्वितीये कन्धरा वक्षुस्तृतीये तूदरं स्मृतम् ॥
चतुर्थे चैव योनिः स्यादुरुद्वन्द्वं च पञ्चमे ।
षष्ठे जङ्घे तथा पादौ पूर्वा चारणिरङ्गतः ॥
यदि मन्थेच्छिरस्यग्निं शिरोरोगैः प्रमीयते ।

---

सारवत् खादिरादि दृढकाष्ठनिर्मितमित्यर्थः ।
"चात्रं" यस्मिन् काष्ठे रज्जुर्वेष्टयित्वा प्रमथ्यते तत् ।
"ओविली" चात्रस्योपरि बिलयुक्तं तन्नियन्त्रणार्थं यद्दीयते तत् ।
"प्रमन्थः" चात्रस्याधो भागेऽरणिकाष्ठनिर्मितोऽग्निमन्थनार्थं-यद्दीयते स उच्यते

(१) "गोवालैः शणसंमिश्रैस्त्रिवृत्तममलात्मकम् ।
व्यामप्रमाणं नेत्रं स्यात्प्रमथ्यस्तेन पावकः"

इति ( का० स्मृ० ७।७ ) पाठः ।

"व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्" ( अमरकोषे २।-६।८७ ) एतत्प्रमाणा मन्थनरज्जुरिति ।

( २ ) "कृत्वा" इति गदाधरभाष्ये पाठः ।

यजमानस्तथा कण्ठे हंसे चैव विशेषतः ॥
(१)मन्थेद्यो यजमानस्तु पक्षहीनो भवेद् ध्रुवम् ।
यो मन्थत्युदरे कर्ता क्षुधया म्रियते तु सः ॥
देवयोन्यान्तु यो मन्थेद् देवसिद्धिः प्रजायते ।
मन्थेदूरुद्वये यस्तु राक्षसङ्कर्म तस्य तत् ॥
जङ्घायां यातुधानेभ्यः पादयोः स्यात्पिशाचके ।
प्रथमे मन्थने ज्ञेयं द्वितीयादौ न शोधयेत् ॥
अष्टाङ्गुलः प्रमन्थः स्याद्दीर्घो द्व्यङ्गुलविस्तृतः ।
उत्सेधो द्व्यङ्गुलस्तस्य त्वैशानपूर्व ऊर्ध्वगः ॥
एवमष्टादश प्रोक्ताः प्रमन्था ह्युत्तरारणेः ।
पादौ तस्याः स्मृतं मूलमग्रस्तु शिर उच्यते ।
अध्वर्युः प्राङ्मुखो मन्थेत् प्रत्यग्दिक्चरणा हि सा ॥
ओविली यजमानेन धृत्वा गाढं च मन्थयेत् ।
(२)मथ्नीयात्प्रथमं पत्नी यद्वा कश्चिद् दृढो द्विजः ॥

---

( १ ) "मन्थेद्यो" इति गदाधरः ।

( २ ) अग्निमन्थनप्रकारः—

"परिधायाहतं वासः प्रावृत्य च यथाविधि ।
बिभृयात्प्राङ्मुखो यन्त्रमावृता वक्ष्यमाणया ।
चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः ।
कृत्वोत्तराग्रामरणिं तद् बुध्नमुपरि न्यसेत् ।
चक्रा ( ग्र ) धः कीलकाग्रस्थामोविलीमुदगग्रकाम् ।
विष्ट(स्क)म्भाद्धारयेद्यन्त्रं निष्कम्पं प्रयतः शुचिः ।
त्रिरुद्वेष्टयाऽथ नेत्रेण चात्रं पत्न्योऽहतांशुकाः ।

मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।
अन्तरा देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥
मूलादङ्गुलमुत्सृज्य अग्रात्सार्धाङ्गुलं तथा ।
योनिमध्ये पुनर्मानं कृत्वा मथ्यो हुताशनः ॥
नान्यवृत्तेण मथ्नीयान्न कुर्याद्योनिसङ्करम् ।

( अग्राह्याऽरणिः )

क्लेदिता स्फुटिता चैव सुषिरा ग्रन्थिमस्तका ।
चतुर्विधाऽरणिस्त्याज्या श्रेयस्कामैर्द्विजातिभिः ॥
(१)क्लेदिता हरते पुत्रान् स्फाटिता शोकमावहेत् ।

---

पूर्वे मन्थत्यरण्यन्ते प्राच्यग्नेः स्याद्यथा च्युतिः" ( कात्यायन स्मृति० ८।१-४ ) । कर्मप्रदीपे (१।८।१-४) ( गृह्यकारिकायाञ्च, तथा गोभिलस्मृतिः प्र० १।९९-१०२ )

प्राङ्मुखेनैव मन्थनं कार्यमत्र त्रिकाण्डमण्डनः—

"उत्ताना प्राक्शिरा वेदिर्यथा वेदिस्तथाऽरणिः ।
अध्वर्युः प्राङ्मुखो मन्थेत् प्रत्यक्सुचरणा हि सा ।
प्राङ्मुखो विततो यज्ञः प्राङ्मुखेनैव हूयते ।
प्राक् प्रणीतादिपात्राणि पश्चादग्निस्तु मथ्यते ।
हव्यवाड् वरुणं दृष्ट्वा भीतः प्रत्यगुदङ्मुखत् ।
तमिच्छेत्पुनराधातुं तस्मात्प्रत्यङ् मथीत वै ।
अनुलोमा भवेद्योनेः पार्श्वभेदेन भिद्यते ।
अनुलोमेन मथितः सर्वान् कामान् प्रयच्छति"।(२३५पत्रे) इति

( १ ) "आर्द्रा ससुषिरा चैव घुणाङ्गी पाटिता (स्फुटिता) तथा । न हिता यजमानानामरणिश्चोत्तरारणिः" (का०स्मृ०७।१४) इति ।

ग्रन्थिमूर्द्धा हरेत्पत्नीं सुषिरा पतिमारिणी" ॥

इति स्मार्ताधानेऽरणिलक्षणम् ।

( अथाधानपत्रलक्षणम् )

तत्र यज्ञपार्श्वे गृह्यकारिकायाम्—

(१)"खादिरोऽस्याकृतिर्वज्रोऽरत्निमात्रः प्रशस्यते ।

---

"इतरेषु च संस्कारेष्वरणिर्द्वादशाङ्गुला ।
मूलात्त्रिभागजननिस्तदर्धेनोत्तरारणिः ॥
वक्ष्ये जातारणेः पक्षं कुमाराग्नेः प्रसिद्धये ।
निर्माय यन्त्रविहितं पिता संस्थाप्य यत्नतः ॥
जाते कुमारे मथ्नीयादग्निं यथाविधि स्वयम् ।
आयुष्यहोमान् जुहुयात्तस्मिन्नग्नौ समाहितः ॥
तत्रान्नप्राशनं चौलं मौञ्जीबन्धनमेव च ।
व्रतादेशश्च कर्तव्यास्तस्मिन्गोदानिकाः क्रियाः ॥
कुर्याद्वैवाहिको होमो वह्नौ तस्मिन्समाहितः ।
शालाग्निकर्म तत्रैव कुर्यात्पक्तिं च नैत्यिकीम् ॥
नित्यहोमं पञ्चयज्ञान् कुर्यात्तस्मिन्ननाहितः ।
स्मार्तसंस्थादिकं यच्च तत्सर्वं तत्र गद्यते" ॥

जातारणिपक्षस्तु युगान्तरे भवति न कलौ-

"प्रजार्थन्तु द्विजाग्र्याणां प्रजारणिपरिग्रह"-

इति कलिवर्ज्यत्वात् ।

"दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयात्" ( का० श्रौ० १।१०।१२। ) इति परिभाषितत्वात् यजमानसम्बन्धिना अङ्गुल्यादिना मानं कर्तव्यम् ।

( १ ) "खादिरः स्रुवः, स्फ्यश्च" ( का०श्रौ० १।३।३३-३४ ) स्रुवः

(१)आसनं ब्रह्मणः कार्यं वारणं वा विकङ्कतम् ।
हस्तमात्रं चतुःस्रक्ति मूलदण्डसमन्वितम् ॥
त्रिषडङ्गुलसङ्ख्याको मूलदण्डो विकङ्कतः ।
प्रस्थमात्रोदकग्राही प्रणीता च(२)मसो भवेत् ॥

---

खादिरः स्यात् । चकारात् स्फ्यो वज्रोऽपि खादिरः स्यात् "खादिरः स्फ्य" इति श्रुतेः ( श०ब्रा० ३।६।२।१२ ) "स्फ्योऽस्याकृतिः" ( का० श्रौ० १।३।३९ ) असिः खड्गः, असेरिवाकृतिर्यस्यासावस्याकृतिः खड्गसदृशः स्फ्यो वज्रो भवति । अरत्निमात्रः "अरत्निस्तुनिष्क- निष्ठेन मुष्टिना" ( अ० को० २।६।८६ ) "कृतमुष्टिकरो रत्निररत्निर- कनिष्ठिकः" अरत्निः प्रमाणमस्यासावरत्निमात्रः । स्फ्योऽरत्निप्रमा- णो भवति ।

( १ ) "आसनानि चारत्निमात्राणि वा प्रादेशमात्राणि वा प्रादेश- मात्रपृथूनि वा" इति देवयाज्ञिकाः । अग्निगृह्ये च—

"ब्रह्माचार्यप्रणीतानामासनञ्च त्रिभिः कुशैः ।
न द्वाभ्यां नैकदर्भेण ऋषयो बहवो विदुः" । इति ।

( २ ) कर्मप्रदीपे—

"द्वादशाङ्गुलदीर्घेण चतुरस्रः सगर्तकः ।
प्रस्थमात्रोदकग्राही प्रणीताचमसो भवेत्" ॥

अत्र प्रणयनाश्रितपात्रविशेषात्फलविशेषः, तथा च कात्यायनः—

"कांस्य-वानस्पत्य-मार्तिकैरभिचार-ब्रह्मवर्चस-प्रतिष्ठा-का- मा यथासङ्ख्यम्" ( का० श्रौ० सू० २।३।५ ) इति ।

यज्ञपार्श्वे—"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः ।
त्र्यङ्गुलस्तु भवेत्स्कन्धो विस्तारश्चतुरङ्गुलः" ( ६८ ) ।
( "त्र्यङ्गुलं तु भवेत्खातं विस्तारे चतुरङ्गुलम्" ।
इति हरिहरसम्मतः पाठः ) ।

वैकङ्कतं पाणिमात्रं प्रोक्ष(१)णीपात्रमुच्यते ।

---

"विकङ्कतमयाः श्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृताः ।
अन्येभ्यो वाऽपि (वा कार्याः) कार्यास्युस्तेषां दण्डेषु लक्षणम्" ।

"प्रागग्राह्दशचमसा" ( का० श्रौ० सू० ६।२।२२ ) नित्युक्तदशचमसानां दण्डास्तु—

"होतुर्मण्डल एव स्याद् ब्रह्मणश्चतुरस्रकः ।
उद्गातॄणां च त्र्यस्रिः स्याद्याजमानः पृथुः स्मृतः ॥
प्रशास्तुरवतष्टः स्यादुत्तष्टो ब्रह्मशंसिनः ।
पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद् द्विगृहीतकः ।
अच्छावाकस्य रास्ना (व) च आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्मणि ।
पालाशाद्वा वटाद्वाऽन्यवृक्षाद्वा चमसाः स्मृताः"

इति । पृथुर्हस्ताकारः । अवतष्टोऽधःप्रदेशे छिन्नः । उत्तष्टः ऊर्ध्वप्रदेशे छिन्नः । द्विगृहीतको वारद्वयं समन्तात्कृतरेखः । मयूखकस्तीक्ष्णाग्रः ।

मानवसूत्रे च—

"अथातश्चमसलक्षणानि व्याख्यास्यामोऽर्थात्परिमाणानि पात्राणि भवन्ति, त्र्यङ्गुलखाताश्चमसास्त्र्यङ्गुलदण्डाश्चतुरङ्गुलोच्छ्रायाः षडङ्गुलविस्ताराः प्रादेशमात्राश्च दीर्घत्वेन भवन्ति" इति ।

देवयाज्ञिकाः—

"प्रणयनचमसौ प्रास्थिकौ वितस्तिप्रमाणं पद्मप्रमाणमिति" ।

त्रिकाण्डमण्डनः—

"रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ।
कुर्वीत चमसांस्तेषामभावेऽन्यद्रुमोद्भवान्" ( २।६० ) ॥

( १ ) प्रोक्षणीपात्रं वारणं द्वादशाङ्गुलदीर्घं करतलमितखातं कमलमुकुलाकृति भवतीति हरिहरादयः ।

हंसवक्त्रप्रसेकं च त्वग्बिलं चतुरङ्गुलम् ॥
आज्यस्थाली तु कर्तव्या तैजसद्रव्यसम्भवा ।
(१)माहेयी वाऽपि कर्तव्या नित्यं सर्वाग्निकर्मसु ॥
आज्यस्थाल्याः प्रमाणं तद्यथाकामं तु कारयेत् ।
मृन्मय्यौदु(२)म्बरी वाऽपि चरुस्थाली प्रशस्यते ॥
तिर्यगूर्ध्वं समिन्मात्री दृढा नातिबृहन्मुखी ।
कुलालचक्रघटितमासु(३)रं मृण्मयं स्मृतम् ॥
तदेव हस्तघटितं स्थाल्यादि खलु वैदिकम् ।
यज्ञवास्तुनि मुष्टौ च स्तम्बे दर्भबटौ तथा ॥
दर्भसङ्ख्या न विहिता विष्टरास्तरणेषु च ।

---

तथा च कर्मप्रदीपे—

"वारणं पाणिमात्रं च द्वादशाङ्गुलविस्तृतम् ।
पद्मपत्राकृति वाऽपि प्रोक्षणीपात्रमीरितम्" इति ।

( १ ) "महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च"
इति छन्दोगपरिशिष्टे पाठः ॥

"आज्यस्थाली मृण्मयी वा प्रकर्तव्याग्निकर्मसु" इति कर्मप्रदीप-पाठः ।

( २ ) अत्र औदुम्बरं ताम्रम् । "उदुम्बरस्तु देहल्यां वृक्षभेदे च-पाण्डके । कुष्ठभेदेऽपि च पुमांस्ताम्रे तु स्यान्नपुंसकम्" (इति मेदिनी) "औदुम्बरं भवेत्ताम्रे फलादौ यज्ञशाखिनः", इत्यमरकोश (२।६।६७)-व्याख्यासुधाख्यायाम् ।

( ३ ) "कुलालचक्रनिष्पन्नं मृण्मयं ह्यासुरं भवेत्" ।
इति वा पाठः ।

अङ्गुष्ठपर्ववृत्तश्चारत्निमात्रः (१)स्रुवो भवेत् ॥

(१) "अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः" ( का० श्रौ०-१।३।४८ ) अरत्निः प्रमाणमस्यासावरत्निमात्रः स्रुवोऽरत्निप्रमाणो भवति पुनः कीदृशः अङ्गुष्ठपर्ववृत्तपुष्करः अङ्गुष्ठपर्वणो वृत्तमङ्गुष्ठपर्ववृत्तम्, अङ्गुष्ठपर्ववृत्तप्रमाणं वृत्तं पुष्करं मुखं यस्यासावङ्गुष्ठपर्ववृत्तपुष्करः, पर्वशब्दः सन्धिवाची सन्धिर्ग्रन्थिः, तदुक्तम्—

"अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते ।
तत्र तत्र बृहत्पर्वग्रन्थिभिर्मिनुयाद्बुधः" । इति ।

अतोऽङ्गुष्ठस्य बृहत्पर्वग्रन्थिप्रमाणं चतुरस्रं कृत्वा तदेव मण्डलं-चतुरस्रं चिकीर्षन्नित्युपायेन वृत्तं विधाय तत्प्रमाणं स्रुवस्य पुष्करम्,

नासिकावत्खातं च स्यात्, तदुक्तं कात्यायनेन ( कर्मप्रदीपे-१।८।१३ ) "स्रुवाग्रे घ्राणवत्खातं द्व्यङ्गुष्ठं परिमण्डलमिति" । तथा-"पुष्करार्धं भवेत्खात" इति च ।

पुरश्चर्यार्णवे वायवीयसंहितायां—

"स्रुक्स्रुवौ तैजसौ ग्राह्यौ न कांस्यायससैसकौ" ।

तत्रैव वशिष्ठसंहितायां—

"पलाशपत्रे निश्छिद्रे रुचिरे स्रुक्स्रुवौ मतौ ।
निदध्याद्वाऽश्वत्थपत्रे सक्षिप्ते होमकर्मणि" इति ।

"खादिरः स्रुवः" ( का० श्रौ० १।३।३२ ) स्रुवः खादिरः स्यात् ।
"खादिरोवाऽथ पार्णो वा द्विवितस्तिः स्रुवः स्मृतः" ॥

संग्रहे विशेषः—

"शमीमयः स्रुवः कार्यस्तदलाभेऽन्यवृक्षजः ।
खादिरस्तु स्रुवः कार्यः सर्वकामार्थसिद्धये" इति ।

शौनकेन तु विशेष उक्तः—

"खादिरेण स्रुवः कार्यः पालाशेन जुहूर्भवेत् ।

पुष्करार्धं भवेत्खातं पिण्डकार्द्ध (१) स्रुचस्तथा ।

---

तदभावे पलाशस्य पर्णाभ्यां हूयते हविः ।
पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः" ।
पलाशपर्णाभ्यामित्यत्र मध्यमपर्णेनेति वेदितव्यम् ।
"मध्यमपर्णेन जुहोतीति" ( श०ब्रा०२।६।२।८ ) श्रुतेः ।

( १ ) "बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिला हंस०समुखप्रसेका मूलदण्डा भवन्ति" (का०श्रौ०सू० १।३।३७) बाहुः (अ०को० २।६।८०)प्रमाणमासां ताः बाहुमात्र्यः बाहुप्रमाणाः स्रुचः (जुहूरुपभृद्ध्रुवाप्रचरण्यग्निहोत्रहवण्याद्याः ) भवन्ति तथा पाणिः "पञ्चशाखः शयः पाणिः" (अ. २।६।८१) प्रमाणमस्य तत्पाणिमात्रम् , पाणिमात्रं-पुष्करं मुखं यासां ताः पाणिमात्रपुष्कराः स्रुचः भवन्ति, त्वग्विलाः त्वक्प्रदेशे बिलं मुखं यासां तास्त्वग्बिलाः , तथा हंसमुखप्रसेकाः प्रसिच्यते स्राव्यतेऽनेनेति प्रसेकः प्रणालिका हंसमुखसदृशः प्रसेकः प्रणालिका यासां ताः हंसमुखप्रसेकाः सा च प्रणालिका एकैव भवति एकयाऽपि शास्त्रार्थस्य कृतत्वात् कार्यसिद्धेश्च न तु द्वे तिस्रो वा कुत्राप्यनुक्तत्वात् , तथा मूलदण्डाः मूले दण्डो यासां ता मूलदण्डा अर्थादग्रे पुष्करं सिध्यति एवंविधा स्रुचो भवन्ति ।

शाखान्तरे तु विशेषमुक्तम्, तथाहि—"यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोति" ( तै० सं० कां० ३ प्र० ५ अ० ७ ) ( जैमिनीयन्यायमाला ३।६।१ ) । आपस्तम्बः—

"खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवैतेषां वृक्षाणामेकस्य स्रुचः कारयेद्बाहुमात्र्यो ऽरत्निमात्र्योऽवाग्राग्रास्त्वक्तोबिला हंसमुख्यः, स्फ्यशम्याप्राशित्रहरणमिति खादिराणि वारणान्यहोमार्थानि भवन्तीति" ।

मानवे—

"खादिरं स्फ्यस्रुवं पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा मूलतो-

पिण्डकार्द्धमुष्टयर्धमित्यर्थः ।
यावताऽन्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते ।
तं वरार्थमतः कुर्यात्पूर्णपात्रमि(१)ति स्थितिः ॥

---

ऽरत्निमात्रदण्डाः पाणितलमात्रपुष्कराः स्रुचो बिला द्व्यङ्गुलखाताश्च-तुरङ्गुलोच्छ्रायाः प्रादेशमात्राणि प्रस्रवणानीति" ।

काठके—

अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्येन निर्वपणमि-तरासां बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमा-णानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा शमीभूर्जमय्यो-वा त्वक्कोबिला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्मसा रौहीतका वा सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यज्ञा यज्ञियानां पात्रीडाचमसं लोकाच्छेषस्य प्रतिपत्तिरि॰" ( देवयाज्ञिक-भाष्ये १।३।३६ )

त्रिकाण्डमण्डनः—

"अग्निहोत्रहवण्यत्र कार्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या तदभावेऽन्यवृक्षजा ।
आपस्तम्बोक्तवृक्षोक्ता भवेयुः क्रतुषु स्रुचः ।
शमीमय्योऽथवा भूर्जवृक्षमय्यः कठश्रुतेः ।
तदलाभे यथालाभमन्ययाज्ञिकवृक्षजाः" ( २।८७-८६ ) इति ।
"वैकङ्कती ध्रुवा प्रोक्ता आश्वत्थी चोपभृन्मता ।
जुहूः पलाशकाष्ठस्य खादिरस्य स्रुवो मतः"

( अर्थसंग्रहटीकायां ५३ पत्रे कृष्णनाथन्यायपञ्चाननभट्टाचा-र्याः" ) इति ।

( १ ) "प्रत्यये दक्षिणा देया या यत्र परिकीर्तिता ।
कर्मान्तेऽनुच्यमाना(पि)या पूर्णपात्रादिका भवेत् ॥

(१)यवैर्वा व्रीहिभिः पूर्णा भवेत्तत्पूर्णपात्रकम् ।
(२)वरोऽभिलषितं द्रव्यं सारभूतं तदुच्यते ॥

---

यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते ।
नावरार्ध्यमतः कुर्यात्पूर्णपात्रमिति स्थितिः" ॥

(का०स्मृ०१५।१-२ गो०स्मृ०२।६६॥कर्मप्रदीप०२।५।१-२) इति ।

कात्यायनः—

पूर्णपात्रो दक्षिणा ( का० श्रौ० ६।१०।३७ ) "पाकयज्ञेषु तण्डुलमुद्गगोधूमादियज्ञियधान्यपूर्णाः पूर्णपात्राः" इति देवयाज्ञिकाः । धान्यस्य मानपात्रं पल्ली श्वेतिकादिपूर्णा पूर्णपात्र इति कर्काचार्याः ।

पूर्णपात्रदाने विशेषः पुरश्चर्यार्णवे मेरुतन्त्रे—

"द्वात्रिंशत्पलमानेन निर्मितं पूर्णपात्रकम् ।
तण्डुलैस्तत्समापूर्य सहिरण्यं सदक्षिणम् ॥
दद्याद्विप्राय तत्तुष्ट्यै पूर्णपात्रमितीरितम्" ॥ इति ।

षट्पञ्चाशदधिकमुष्टिशतत्रयपरिमितं परार्ध्यं बहुभोक्तृपुरुषाहारपरिमितमवरार्ध्यं तण्डुलाधानं पूर्णपात्रमिति कुशकण्डिकाभाष्ये ।

( १ ) "यवैर्वा व्रीहिभिः पूर्णं शूर्पं तत्पूर्णपात्रकम्" इति ( पं० रामलालकृत ) कुशकण्डिकाभाष्ये पाठः ।

( २ ) "वरो वा" ( का० श्रौ ६।१०।३८ ) स्वाधीनं द्रव्यमभिरुचितं च वरशब्दवाच्यमिति भाष्ये कर्काचार्याः । वरोऽभीप्सितं वस्तु, इति वृत्तौ "गौर्ब्राह्मणस्य वरः, ग्रामो राजन्यस्य अश्वो वैश्यस्य" (पा०गृ०१।८।१५-१७) "एते वरा विवाहे एव प्रकरणात्" इति गदाधरः । "सर्वासु वरचोदनासु गवादयो वरशब्दवाच्याः" इति भर्तृयज्ञः ।

"यथा शक्तिहिरण्यादिद्रव्यं वाऽथ गवादिकम् ।
गौर्वरिष्ठतमा विप्रैर्वेदेष्वपि निगद्यते ।

अष्टमुष्टि भवेत्किञ्चित्किञ्चिदष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं (तदुच्यते) विधीयते ॥
(१)शूर्पं त्वरत्निमात्रं स्यादैषिकं वैणवन्तु वा ।
लम्बं त्वरत्निमात्रं स्यादुपला च दृषत्तथा ॥
विस्तारो दृषदः प्रोक्तो द्वादशाङ्गुलसङ्ख्यया ।
पालाशं जानुमात्रं स्यात्पृथुबुध्नमुलूखल(२)म् ॥

---

न ततोऽन्यद्वरं यस्मात्तस्माद्गौर्वर उच्यते ।
आसां गवामभावे तु दक्षिणा त्वभिधीयते ।
वरस्तत्र भवेद्दानमपि वाच्छादयेद् गुरुम्" ।
इति कुशकण्डिकाभाष्ये ।

( १ ) शूर्पं चात्र नडवंशेषीकान्यतममयं, श्रौते तन्मयस्यैव दृष्टत्वात् तथा च श्रुतिः । "अथ शूर्पमादत्ते वर्षवृद्धमसीति वर्षवृद्धं ह्येतद् यदि नडानां यदि वेणूनां यदीषीकाणाम्" (श०ब्रा०१।१।४।१९) इति ।

"शूर्पं च नडतृणमयमिषीकानिर्मितं वेणुदलनिर्मितं वा भवति" इति ( का० श्रौ० २।३।८ ) भाष्ये देवयाज्ञिकाः । तथा च—

"शूर्पं शम्यादर्वी शूलशङ्कवोऽधिषवणमसिशाखेध्माधृष्टिपरीशासावग्निरधरारणिः (प्रभृति) प्रादेशमात्राणि" इति (का०श्रौ०१।३।३६) भाष्ये देवयाज्ञिकाः ।

"शूर्पे शरेषीकावंशान्यतममये इच्छापरिमाणे" इति ( पा० गृ० सू० २।१४।११ ) भाष्ये हरिहरः । एवमेव "नडवेणुशरेषीकान्यतममये इच्छापरिमाणे इति ( पा० गृ० सू० २।१४।११ ) भाष्ये हरिहरः एवमेव "नडवेणुशरेषीकान्यतममये शूर्पे" इति गदाधरः ।

( २ ) "वैकङ्कतानि पात्राणि" (का० श्रौ० १।३।३१ ) यज्ञपात्राणि सर्वाणि वैकङ्कतानि विकङ्कतकाष्ठघटितानि भवन्ति "ततो विकङ्कतः

अर्द्धखातं बृहद्वक्त्रं मध्ये रास्नासमन्वितम् ।
खादिरं मुसलं प्रोक्तमरत्नित्रयसम्मितम् ॥

समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृत्त इति श्रवणात् ( श० ब्रा० २।२।४।१० ) सामान्यसूत्रमेतत् । अस्यापवादसूत्रमाह–"वारणान्यहोमसंयुक्तानि" ( का० श्रौ० १।३।३६ )होमेन संयुक्तानि, यैर्होमः क्रियते तानि होमसंयुक्तानि न होमसंयुक्तान्यहोमसंयुक्तानि, यैर्होमो न क्रियते तानि वारणानि भवन्तीत्यर्थः, परिशेषाद्यानि होमसंयुक्तानि होमसाधनानि यैर्होमः क्रियते तानि वैकङ्कतानि, तत्र वारणानि उलूखलमुसलकूर्चेडापात्री पिष्टपात्रीपुरोडाशपात्री शम्याशृतावदानाभ्युपवेषान्तर्धानकटप्राशित्रहरणषडवत्तब्रह्मयजमानासनहोतृषदनादीनि, तत्रोलूखलमुसलयोर्विशेषः—

"मुसलोलूखले वार्क्षे स्वायते सुदृढे तथा ।
इच्छाप्रमाणे भवतः शूर्पं वैणवमेव च" इति ॥

तथा—

"खादिरं मुसलं कार्यं पालाशः स्यादुलूखलः ।
यद्वोभौ वारणौ कार्यौ तदभावेऽन्यवृक्षजौ" (त्रि०सं० २।८९) इति

स्मृत्यर्थसारे—

"समित्पवित्रं वेदश्च मुसलोलूखलं महान् ।
नाभ्युखासन्द्युपरवाञ्छम्यास्रुक्पुष्कराणि च ॥
शाखास्वरुविषाणानि चरूणां मेक्षणानि च ।
कुर्यात्प्रादेशमात्राणि महावीरास्त्रयस्तथा" ।

प्रोक्षणकलशाधिषवणफलके स्रुग्दण्डपरिधिशूलानि स्फ्यशूर्पोपवेषेध्मानपि प्रणयनीयावपाश्रपण्यौ कुर्यादरत्निमात्राणीति । निगमे (२४) "नैयग्रोधाश्चमसाश्चतुरस्राः प्रस्योदकग्राहिणस्त्वग्बिला दण्डलक्षणाः परिमण्डलाश्चतुरस्रास्त्र्यस्त्रिः पृथुरवतष्टोत्तरविंशाक्षविगृहीतरास्नावमयूत-

प्रादेशमात्रं विज्ञेयं मे(१)क्षणं तु विकङ्कतम् ।
वृत्तमङ्गुष्ठपर्वाग्रमवदानक्रियाक्षमम् ॥

---

त्वक्रिया होतृब्रह्मसामगस्वामिप्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणाम् । द्रोणकलशः पलशतग्राही परिप्लवाकृतिः स्थाल्यर्धशतिकैकधना। त्रिंशतिका ग्रहाः पञ्चपलिकाः पुष्करा ग्रावाणो हस्तपर्णमात्राः जानुमात्रमुलूखलं पालाशं, पञ्चविंशतिपलमिडापात्रं, मुसलं खादिरं त्र्यरत्नि, दृषदरत्निप्रमाणा" इत्यादि ।

(१) मेक्षणं च होमसाधनत्वाद्वैकङ्कतम्, पालाशमपि भवति तथा च कात्यायनः—

इध्मजातीयमिध्मार्धप्रमाणं मेक्षणं भवेत् ।
वृत्तं ( वार्क्षं ) चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्" ॥
"एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे
दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनं च मेक्षणम्" ।
(कर्मप्रदीपे २।५।१४-१५) इति ।

इध्मजातीयं खादिरं पालाशं वा, विभीतकादिवर्जं यत्किंचिद्वनस्पतिमयं वा । तथा च गोभिलः—

"अथेध्मानुपकल्पते खादिरान् पालाशान्वा, खादिरपालाशालाभे विभीतकतिल्वकबाधकनीपनिम्बराजवृक्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्जं सर्ववनस्पतीनामिध्मो यथार्थः स्यादिति" ।

इध्मार्धप्रमाणं प्रादेशप्रमाणम् । इध्मस्य प्रादेशद्वयपरिमितत्वात् । तदाह छन्दोगपरिशिष्टे कात्यायनः—"प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितम्" इति ।वृत्तं वर्तुलदण्डम् । वार्क्षं वृक्षकाण्डनिर्मितं न तु शाखाभवम् । पृथ्वग्रं स्थूलाग्रम् । अवदानक्रियाक्षमम् अवदानग्रहणयोग्यम् । एषैव दर्वी यादृशं मेक्षणमुक्तं तादृश्येव दर्वी यो दर्वीगतो विशेषः तमहं वदामि दर्वी द्व्यङ्गुष्ठपृथ्वग्रा, अङ्गुष्ठद्वयपरिमितं पृथु वि-

ईदृश्येव भवेद्दर्वी विशेषस्तमहं ब्रुवे ।
वारण्यरत्निमात्रा स्याच्चतुर्थांशाधिकपुष्करा ॥
हस्ताकारा च पृथ्वग्रा अग्रे सर्पफणाकृतिः ।
(२)आकर्षफलकं हस्तमात्रं स्याद्धनुराकृतिः ॥
अग्रे सर्पफणाकारं खादिरं वा विकङ्कतम् ।
कङ्कतानि त्रिदन्तीनि वारणानि भवन्ति हि ॥
वारण्यरत्निमात्रा स्यादभ्रिः(३) शासन्दशाङ्गुलम् ।
द्वात्रिंशदङ्गुला शम्या(४) वारणीत्यभिधीयते ॥

---

स्तीर्णमग्रं यस्याः सा द्व्यङ्गुष्ठपृथ्वग्रा दर्वी भवति । तुरीयोनं च मेक्षणं, द्व्यङ्गुष्ठचतुर्थांशन्यूनपरिमाणपृथ्वग्रं मेक्षणं भवति एवं च प्रादेश-परिमाणा द्व्यङ्गुष्ठपरिमितपृथ्वग्रा खादिरपलाशादिमूलदण्डोद्भवा-दर्वी भवति । इध्मकाष्ठविषये त्रिकाण्डमण्डनः—

"पालाशः खादिरो वेध्मो मुख्यः स्यात्तदलाभतः ।
वनस्पतीनां सर्वेषामिध्मः कार्यो विशेषतः ।
तत्रैतान् वर्जयेद् वृक्षान् कोविदारविभीतकौ ।
कपित्थं करभं राजवृक्षं शाकद्रुमं तथा ।
नीपं निम्बं करञ्जं च तिलकं शाल्मलीमपि ॥
श्लेष्मातकमपि त्यक्त्वा ग्राह्योऽन्यः सकलो द्रुमः" ।
( त्रि० मं० २।८२–८४ ) ।

( १ ) "आकर्षफलकेन औदुम्बरेण बाहुप्रमाणेन सर्पाकृतिना" पारस्करगृह्यसूत्र ( २।१०।१७ ) भाष्ये जयरामहरिहरगदाधराः ।

( २ ) "अभ्रिररत्निमात्रस्तीक्ष्णमुखः" इति देवयाज्ञिकाः ।

( ३ ) "शम्या प्रादेशमात्री" इति दर्शपूर्णमासप्रकरणे ( का० श्रौ० १।३।३६ ) देवयाज्ञिकाः । "द्वात्रिंशदङ्गुलप्रमाणां शम्यां वारणीं-

श्री(श्रै)पर्णान् (१)परिधीन्कुर्याद्बाहुमात्रानपुष्करान् ।
श्रीपर्ण्यौ हस्तमात्रे च (२)श्रपण्यौ शूलमेव च ॥
तच्छूलं यस्य कस्यापि यज्ञियस्य तरोर्भवेत् ।
लौही वा मृण्मयी वा स्यात्पशूखा च यथार्थतः ॥

---

गृहीत्वेति" चातुर्मास्यप्रकरणे ( का० श्रौ० ५।३।२० ) देवयाज्ञिकाः । तत्रैव "सगर्ता" इति कात्या० श्रौ० वृत्तिविधायकाः ।

( १ ) तथा च कात्यायनः—

"परिधीन् परिदधात्यार्द्रानेकवृत्तीयान् बाहुमात्रान्पालाशवैकङ्कतकाश्मर्यबैल्वान्पूर्वालाभे पूर्वालाभ उत्तरोत्तरान् खादिरौदुम्बरान्वा" इत्यादि (का०श्रौ० २।८।१) । अशुष्कान् एकजातीयवृक्षसम्बन्धिनः त्रीनपि पालाशान् अथवा काश्मर्यमयान् श्रीपर्णीवृक्षावयवान् न तु मुख्यद्रव्यालाभेनैको द्वौ वा पालाशौ एको द्वौ वा वैकङ्कतौ, यजमानबाहुप्रमाणान् ( बाहुः प्रसारिताङ्गुलिर्हस्त आस्कन्धात् ) पूर्वपूर्वोक्तवृक्षजातीयानामलाभे अप्राप्तौ उत्तरोत्तरान्परिदधाति काष्मर्यालाभे त्रयाणामपि बैल्वखादिरौदुम्बराणां तुल्यविकल्पता पालाशादीनां पूर्वालाभे पूर्वालाभे उत्तरोत्तरोपादाने प्रायश्चित्ताभावः पूतिकावत्प्रतिनिधिनियमाभावात् । प्रतिनिधित्वे तु प्रायश्चित्तं भवति । परितः समन्ततः स्थाप्यन्त इति परिधयः ततश्च यौगिकोऽयं शब्दो न संस्कारनिमित्तो जातिनिमित्तो वा ।

परिधिलक्षणमाह कात्यायनः—

"बाहुमात्राः परिधयः ऋजवः सत्वचोऽव्रणाः"

परितो निधानाच्चेत्परिधय इति नाम तर्हि यदि त्रयाणां वचनं नास्ति तत्र चत्वारोऽपि भवन्तीति कर्कः । नेति सम्प्रदायः ।

( २ ) "वपाश्रपणीभ्यां श्रीपर्णीवृक्षावयवभूताभ्या"मिति ( का० श्रौ० ६।५।७ ) देवयाज्ञिकाः ।

लौही ताम्रमयी वापि कुर्याच्चैव यथार्थतः ।
पात्राणि वारणान्यत्र यानि प्रोक्तान्यसम्भवे ॥
वैकङ्कतानि कार्याणि सूत्रान्तरमतादपि ।
अभावे मुख्यवृक्षस्य यज्ञियस्य तरोरिह ॥
यत्किंचित्पात्रजातं तदिति भास्करसम्मतिः ।
अश्वत्थस्यारणी ग्राह्या नान्यस्मादेव वृक्षतः ।
एवं सर्वेषु शास्त्रेषु दृष्टा सूत्रान्तरेष्वपि" ॥

इति पात्रलक्षणम् ।

## ( आधानाकरणे प्रायश्चित्तम् )

अथ यदि कृते परिग्रहेऽपि समर्थतायां सत्यामावसथ्याधानं न गृहीतं तदा स प्रायश्चित्ती । तदुक्तम्—

"संवत्सरास्तु यावन्तो ह्यनग्निर्वर्तते द्विजः ।
तावन्त्येव तु कृच्छ्राणि चरन् विप्रः प्रशुद्ध्यति ॥
यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः ।
तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि ॥
यावत् कालं त्वहोमी स्यात्तावद्द्रव्यमशेषतः ।
तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तत्" ॥

## ( व्रतप्रकरणम् )

अथ प्राजापत्यलक्षणम् ( कृच्छ्रसंज्ञितमेव )

"त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।

त्र्यहं परं (तु) च नाश्नीयात् प्राजापत्यं चरेद् द्विजः(१)" ॥

(१) "चरन्द्विज" इति (म० स्मृ० ११।२११) "चरन् व्रतम्" इति (शङ्ख स्मृ०१८।३) पाठः ।

तथा च प्राजापत्यलक्षणे देवलः—

"त्रिदिनं च दिवाऽश्नीयात् त्रिदिनं रात्रिभोजनम् ।
अयाचितं स्यात् त्रिदिनं निराहारो दिनत्रयम् ।
कृच्छ्रमेतद्विजानीयाद्गोदानं गव्यभक्षणम् ।
ब्रह्महत्यादिपापानामेतत् कृच्छ्रं विशोधनम्" इति ।

मार्कण्डेयः—

"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन दानं गव्यस्य भक्षणम् (दे० स्मृ० ८५) ॥
एतत्त्रिरावृतं येन कृच्छ्रं स्यात् पाणिपूरणम् ।
ब्रह्महत्यादिपापानामितरेषां विशुद्धिदम्" इति ॥

गौतमः—

"प्राजापत्यकृच्छ्रमिदं सर्वपापप्रणाशनम् ।
त्रिदिनं स्याद्दिवा भुक्तिस्त्रिदिनं रात्रिभोजनम् ॥
अयाचितश्च त्रिदिनं त्रिदिनं वायुभक्षणम् ।
गोदानं पञ्चगव्यान्ते शुद्धिमाप्नोत्यनुत्तमाम्" इति ॥

आपस्तम्बः—

"त्र्यहं नक्ताशी दिवाशी ततस्त्र्यहं त्र्यहमयाचितव्रतं त्र्यहं नाश्नाति किञ्चन" इति ।

जाबालिः—

"दिनत्रयं दिवा भुक्तिस्तथा रात्रौ दिनत्रयम् ।
पञ्चगव्यं ततः पश्चाद् गौरेका च विशोधिनी ।
एवं कुर्याद् द्विजो यस्तु सर्वपापात् स मुच्यते" इत्यादि ।

## अथ (पाद)कृच्छ्रलक्षणम् ।

"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकैन पादकृच्छ्रः प्रकीर्तितः(१)" ॥

(१) या० स्मृ० ३।३१८) (देवलस्मृति० ८५) (निर्ण०सि०टी० १२५८ पत्रे) अत्रैव "यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते" । दिवैव मध्याह्नकाले सकृद्भोजनमेकभक्तं, सूर्यास्तमयानन्तरमेव सकृद्भोजनं नक्तं, दिवा रात्रौ वा भृत्यादिभ्योऽप्ययाचितस्य भोजनमयाचितम् । दिवैवेति केचित् । अहोरात्रमभोजनमुपवासः । अयं पादकृच्छ्रः । अत्र ग्राससङ्ख्या पराशरोक्तापस्तम्बोक्ता च मूले उक्तैव, तत्र शक्त्या विकल्पः । आपस्तम्बस्तु व्यवस्थया पादकृच्छ्रमाह—

"त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् ।
सायं त्र्यहं तथा पादः प्रातः पादस्तथा त्र्यहम् ॥
प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् ।
अयाचितं तु राजन्ये, त्रिरात्रं ब्राह्मणे स्मृतम्" ॥

(आ० स्मृ० १।१३-१४) इति । प्रातःपाद एकभक्तत्रयं, सायंपादो नक्तत्रयम्, अयाचितमयाचितत्रयं, त्रिरात्रमुपवासत्रयम् । अयाचितत्रयानन्तरमुपवासत्रयमर्द्धकृच्छ्रः । नक्तत्रयं विना पादत्रयं पादोनकृच्छ्रः, अयं पादकृच्छ्रो यथाकथञ्चित्त्रिगुणः प्राजापत्यः । यथाकथञ्चिदित्युक्तेः एकभक्तादीनामानुलोम्येन स्वस्थानवृद्ध्या एकः । स च—

"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥"

इति मनू (११।२११) क्तेः । तेषां प्रातिलोम्येन स्वस्थानवृद्ध्या द्वितीयः, स च "प्रातिलोम्येन चरेयुः" इति वसिष्ठोक्तेः,

"उपवासत्रयं कृत्वा कुर्याच्चायाचितत्रयम् ।

पराशरः—

"सायं तु द्वादश ग्रासाः प्रातः पञ्चदशैव तु ।
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतम्" ॥

आपस्तम्बः—

"सायं द्वाविंशतिर्ग्रासाः प्रातः (पञ्चदश) षड्विंशतिः स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः" ॥

ग्रासप्रमाणम्—

"अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य त्वमितं ब्रह्मचारिणः ॥
वक्त्रप्रमाणपिण्डांश्च ग्रासादेकैकशः पुमान् ।
वक्त्राधिकस्तु यः पिण्ड आत्मोच्छिष्टं तदुच्यते" ॥

---

नक्तत्रयादेकभक्तत्रयं स्यात्प्रातिलोम्यकम्" ॥

इति वचनात् । दण्डकलितवदावृत्या तृतीयः । स च—

"त्र्यहं प्रातरहर्नक्तमहरेकमयाचितम् ।
अहः पराकं तत्रैकमेवं चतुरहौ परौ" ।

इति वशिष्ठोक्तः । पराक उपवासः । अयमेव शिशुकृच्छ्रः—

"अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः ।
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुदाहरत्" ॥

इति तेनैवोक्तेः । प्रोक्तपक्षत्रयेऽन्यतमपक्षं जपहोमवर्ज्जं कुर्यादितिचतुर्थः ।

"तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम्" ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम्" ।

इत्यङ्गिरोवचनात् ।

अथार्द्धकृच्छ्रः—

यदा तु अयाचितोपवासात्मकं त्र्यहद्वयानुष्ठानं तत् अर्द्धकृच्छ्रः।

"सायं प्रातस्तथैकैकं दिनद्वयमयाचितम्"।

दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते॥"

(आ०स्मृ० ६।४३)

पादोनकृच्छ्रः—

"सायं प्रातर्वि(द्वि)नार्द्धं स्यात् पादोनं नक्तवर्जितम्।"

(१)नक्तैकभक्तत्र्यहद्वयं विना त्वर्धकृच्छ्रः। नक्तत्रयं विना पादत्रयं पादोनकृच्छ्र इत्यर्थः। कृच्छ्रं प्रजापत्यं च पर्यायशब्दौ। सोम चान्द्रायणं च पर्यायशब्दौ।

तप्तकृच्छ्रः—

"तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।

एकरात्रोपवासश्च तप्त(२)कृच्छ्रमुदाहृतम्"॥

---

(१) "नक्तैकभक्तत्र्यहं यद्द्वयं विना त्वर्धकृच्छ्रः। नक्तं विना त्र्यहं त्रयपादोनकृच्छ्र इत्यर्थः" इति (क० ख० ग०) पाठः।

(२) "तप्तकृच्छ्र उदाहृत" इति सटीकनिर्णयसिन्धौ (१२६२) पाठः (या० स्मृ० ३।३१७) पाठः। अयं चतुरहसाध्यः। तप्तक्षीरघृताम्बुभिः समस्तैः एकैकदिने वृत्तिः, तत एकोपवास इत्यर्थं तु त्र्यहसाध्यः। अथवा मनुः (११।२१४)

"तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्।

प्रति त्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः"॥

अत्र जलादिपरिमाणं "अपां पिबेत्तु त्रिपलम्" इत्यादि पराशरोक्तं ग्राह्यम्। अपां त्रिपलं त्रिरात्रं पिबेदित्यादि प्रतिवाक्यं त्रिरात्रमित्यस्य सम्बन्धः। मनुना पराशरेण च द्वादशरात्रनिर्वर्त्योऽभिहितः,

तत्प्रमाणम्—

"अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ।

पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतम्" ।। इति ।

त्रिरात्रं चोष्णमिति—त्रिरात्रस्य पूरणमुष्णोदकस्य वायुं(बाष्पं) पिबेदित्यर्थः ।

पराकः—

"द्वादशाहोपवासेन पराकः परिकीर्तितः" (या०स्मृ०३।३२०)

अतिकृच्छ्रः—

आद्यत्रयं च पाणिपूरणमात्रमन्नं भुञ्जीत ।

( "अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः" ( या० स्मृ० ३।३१९ ) इत्युक्तेः । )

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

एकरात्रोपवासश्च (जग्ध्वा परोपवासे च) कृच्छ्रं सान्तपनं स्मृतम् ।"

---

तथा हि पराशरः—

"त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत् ।

त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयम् ॥

षट्पलं तु पिबेदम्भः त्रिपलं तु पयः पिबेत् ।

पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते" ॥(प०स्मृ०४।७-८)

जलादिकं चेहोष्णमेव । यदा तु शीतं क्षीरादि पीयते तदा शीतकृच्छ्रः—

"त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत् ।

त्र्यहं शीतं घृतं पीत्वा वायुभक्षः परं त्र्यहम् ॥"

इति यमस्मरणादिति मिताक्षरा । अशक्तौ त्र्यहसाध्ये निष्कार्धं चतुरहः साध्ये एका धेनुः द्वादशाहसाध्ये तिस्रो गावः—

"पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा" । इत्युक्तेः ।

( गोमूत्रादिमानम् ) ।

"गोमूत्रे माषकास्त्वष्टौ गोमयस्य तु षोडश ।
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ॥
गोमूत्रं च घृतं स्वेच्छा तदूर्ध्वं तु कुशोदकम्" ।

इति प्राजापत्यकृच्छ्रलक्षणम् ।

( प्राजापत्यानुकल्पः )

अथ प्राजापत्यानुकल्पः—

तत्रैकप्राजापत्यस्थाने गायत्र्ययुतजपः, तिलहोमसहस्रं वा, द्वादशब्राह्मणभोजनं वा, तीर्थयोजनयात्रा, गोदानं वा,(१)

---

( १ ) प्राजापत्यस्य प्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः—

"कृच्छ्रो देऽव्ययुतं चैव प्राणायामशतद्वयम् ।
तिलहोमसहस्रं तु वेदपारायणं तथा ॥
विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ।
अथवा पवमानेष्टिः समान्याहुर्मनीषिणः" ॥

इत्यादि पराशरसंहितायां प्रायश्चित्तकाण्डे २ अध्याये द्रष्टव्याः ।
तथा च लिङ्गपुराणे ईश्वरः—

"प्राजापत्ये तु गौरेका द्वादशब्राह्मणार्चनम् ।
समुद्रगनदीस्नानं संहितामात्रमुच्यते ॥
प्राणायामाश्च त्रिशतं अयुतं जप उच्यते ।
तिलहोमः सहस्रं स्यात् प्रत्याम्नायस्तु सप्तधा" ॥ इति ।

अशक्तौ एकां धेनुं दद्यात् । तदभावे निष्कं दद्यात् ।

"गवामभावे निष्कं स्यात्तदर्द्धं पादमेव वा" ।

इत्युक्तेः । देशकालोचितं गोमूल्यं दद्यात ।

"द्वात्रिंशत्पणिका गावश्चतुष्कार्षापणो वरः ।

---

"प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद् द्विजोत्तमः ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः" ॥

इत्युक्तेः । यद्यपि "धेनुः स्यान्नवसूतिका" ( अ० को० २।९।७१ ) इत्युक्तं, तथापि धेनुदानाशक्तौ गोमात्रं दद्यात् । बहुस्मृतिषु गोपदस्याप्युपादानात् । विप्रभोजनं वा कार्यम् ।

ब्राह्मणभोजनसङ्ख्यानियमो महार्णवे चतुर्विंशतिमते—

"कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहः त्रिंशदेवं तृतीये
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ।
कृच्छ्रे सन्तापनाख्ये भवति षडधिका विंशतिः सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान्"॥इति।

अस्यार्थः—अहरह इत्यस्य प्रत्येकं सम्बन्धात् कृच्छ्रे अहरहः पञ्च ब्राह्मणान् भोजयेत् । ते च षष्टि(६०)र्भवन्ति । अतिकृच्छ्रे-प्रत्यहं पञ्चदश, द्वादशदिन मिलित्वा ह्यशीतिशतं (१८० ) विप्रा भवन्ति । कृच्छ्रातिकृच्छ्रे प्रत्यहं त्रिंशत्, मिलित्वा षष्ठ्युत्तरं त्रिशतम् ( ३६० ) । असमृद्धधान्ये तु त्रिगुणिता द्वादशेति मिलिताः षट्त्रिंशत् । तप्तकृच्छ्रे प्रत्यहं चत्वारिंशत्, द्व्यहसाध्येऽशीतिः ( ८० ), चतुरहसाध्ये षष्ठ्यधिकं शतम्, ( १६० ) द्वादशाहसाध्ये अशीत्यधिकं शतचतुष्टयम् ( ४८० ) । पराके प्रत्यहं षष्टिः, विंशत्यधिकं सप्तशतम् ( ७२० ) । सान्तपने प्रत्यहं षड्विंशतिः । चान्द्रायणे प्रत्यहं चतुर्विंशतिः, तत्र मासो यदि त्रिंशद्दिनस्तदा ( ७२० ) विंशत्यधिकसप्तशतं विप्रा भवन्ति । अधिकन्यूनदिनके तु सङ्ख्यासङ्कलनमूह्यम् । स्वल्पधान्यस्तु कृच्छ्रे द्वादशैव ब्राह्मणान् भोजयेत् "विप्रा द्वादश वा भोज्याः" इति चतुर्विंशतिमतात् । ब्राह्मणभोजनादिविधिस्तु हेमाद्रौ प्रायश्चित्तखण्डे ९११ पत्रे द्रष्टव्यः ।

वृषे षट् कार्षापणका अष्टावनडुहि स्मृताः ॥
दशकार्षापणा धेनुरश्वे पञ्चदशैव तु ।
हिरण्ये कार्षापणकः पणा नव तथाऽधिकाः ॥
वस्त्रे कार्षापणश्छागेऽष्टौ पणा द्वादशाविके ।
वृषल्यामथ पञ्चाशन्मूल्यं कार्षापणाः स्मृताः ॥
निष्के पञ्चाशदेव स्युर्गजे पञ्चशतानि तु ।
पञ्च कार्षापणाः प्रोक्ता दोलायां, षड्रथे तथा ॥
गृहेऽष्टौ कार्षापणकाः, ताम्रकर्षे पणः स्मृतः ।
ताम्रकर्षेऽपि च पणा इति मूल्यप्रकल्पना ॥
अधिकं कल्पयेन्मूल्यं नोनं वित्तानुसारतः" ।

इति मू(२)ल्याध्याये मुनिना निष्क्रय उक्तः । सुवर्णरूप्यनिष्कतदर्द्धतदर्द्धानां वा गोमूल्यानां वा शक्त्या दानम् ।

---

(२) महर्षिकात्यायनकृतमूल्याध्यायस्य विवृतिः परिशिष्टदीपके (११८ पत्रे) द्रष्टव्या, विस्तरभयादिह न लिख्यते । अत्र च धेनोर्यन्निष्कयादि मूल्यमुक्तं तदतिधनविषयम्, किञ्चित्किञ्चिद्धनविषयत्वे तूक्तं षट्त्रिंशन्मते—

"धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिका ।
कार्षापणैकमूल्या हि कनिष्ठानां प्रकीर्तिता" इति ।

द्वात्रिंशत्कृष्णलपरिमितं रजतं पुराणः । कार्षापणस्तु पूर्वस्यामुत्तरस्यां वा दिशि (अष्टौ टङ्कुकाः) षोडशपणाः स एकः कार्षापणः, तावता लभ्यं रूप्यं दक्षिणस्यां वा कार्षापणः । यत्तु—

द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेत्"

इति । तदल्पविषयमिति शूलपाणिः ।

शुष्ककेशस्य द्वादश स्नानानि वा, द्विगुणद्वादशामान्नदानं वा, संहिता-पारायणं वा, रुद्रैकादशिनी वा, प्राणायामशतद्वयं वा, अन्येऽपि शास्त्रा-न्तरदृष्टाः प्रत्याम्नायाः कल्प्याः, तत्र शक्तस्यामान्नं द्विगुणं द्रव्यं चतु-र्गुणमित्यादि योज्यम् । सुवर्णनिष्कस्य लोकशास्त्रयोरेकवाक्यतायां माषाः ४० तदर्द्धं २० तदर्द्धं १० तदर्द्धं ५ मिति स्मृत्यर्थसारे, एत-स्मान्न्यूनं न भवेदिति, तदशक्तौ रजतमाषाः ४०।२०।१०।५। ताम्रस्य तु—

"वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः" ॥

( इत्यनेन षोडशद्रम्ममितो निष्कः । )

एतदर्द्धार्द्धं वा। मुख्यं सुवर्णं तदशक्तौ रजतं तदशक्तौ ताम्रमित्या-दि । (१)एवमष्टप्राजापत्यैरेकं चान्द्रायणं, षड्भिस्तप्तकृच्छ्रः, त्रिभि-स्त्वर्धकृच्छ्रः, (अब्दे) त्रिंशत् संख्याकाः प्राजापत्याः । एवं विच्छित्ति-कालादारभ्य गणना कार्येति । इति कृच्छ्रप्राजापत्यानुकल्पाः ।

( होमद्रव्यदानम् )

## अथ होमद्रव्यदानम्(२) ।

ततः सायंप्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपरिमितमतिक्रान्त-

---

(१) "प्राजापत्ये तु गामेकां दद्यात्सान्तपने द्वयम् ।
पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।
अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा" इत्युक्तेः ।

(२) होमद्रव्यदानप्रसङ्गेन होमद्रव्यप्रमाणमप्युच्यते । सिद्धान्त-

शेखरे—

"होमद्रव्यप्रमाणानि वक्ष्यन्तेऽथ यथाक्रमम् ।
कर्षप्रमाणमाज्यं स्यान्मधु क्षीरं च तत्समम् ॥
तण्डुलानां शुक्तिमात्रं पायसं प्रसृतेः समम् ।
कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः ॥
अन्नं ग्राससमं ग्राह्यं शाकं ग्रासार्धमात्रकम् ।
मूलानान्तु त्रिभागः स्यात्कन्दानामष्टमोंऽशकः ॥
इक्षुः पर्वप्रमाणं स्यादङ्गुलद्वितयं लता ।
प्रादेशमात्राः समिधो व्रीहीणां मञ्जरीसमाः ॥
तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः ।
पत्रपुष्पफलानान्तु समानाहुतिरिष्यते ॥
चन्द्रश्रीखण्डकस्तूरीकुङ्कुमा(गु)गरुकर्दमाः ।
हरिमन्थसमाः प्रोक्ता गुग्गुलुर्बदरीसमः ॥
आहुतीनामिदं मानं कथितं वेदवेदिभिः" ॥ इति ।

हरिमन्थश्चणकः । मृगीमुद्रालक्षणमनुपदं वक्ष्यामः ।

पदार्थादर्शे—

"घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा ।
शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य तु ॥
खण्डत्रयन्तु मूलानां फलानां स्वप्रमाणतः ।
ग्रासमात्रन्तु होतव्या इतरेषां च तण्डुलाः ॥
अक्षतास्तु यवाः प्रोक्ता अभावे व्रीहयः स्मृताः ।
तदभावे तु गोधूमा न तु खण्डिततण्डुलाः ॥
सर्वप्रमाणामाहुत्या पञ्चाङ्गुलगृहीतया ।
कर्षमात्राणि भक्ष्याणि खाद्यानां खण्डपञ्चकम् ॥
चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्दमान्" ॥

यक्षकर्दमस्तु गारुडे—

"कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ।
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः" ॥
कलापसम्मितानेतान् गुग्गुलं बदरास्थिवत् ॥
द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः ।
स्रुवपूर्णा द्रवा प्रोक्ताः कठिना ग्रासमात्रकाः ॥
व्रीहयो यवगोधूमप्रियङ्गुतिलशालयः ।
स्वरूपेणैव होतव्या इतरेषां च तण्डुलाः ॥

शारदायाम्—

"अथात्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ।
तत्समं मधुदुग्धान्नमक्षमात्रमुदाहृतम् ॥
दधि प्रसृतिमात्रं स्यात् लाजाः स्युर्मुष्टिसम्मिताः ।
पृथुकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथोदिताः ॥
गुडं पलार्धमानं स्याच्छर्करापि तथा स्मृता ।
ग्रासार्द्धं चरुमानं स्यादिक्षुः पर्वावधिः स्मृतः ॥
एकैकं पत्रपुष्पादि तथा धूपादि कल्पयेत् ।
कदलीफलनारङ्गफलान्येकैकशो विदुः ॥
मातुलुङ्गं चतुःखण्डं पनसं दशधा स्मृतम् ।
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ॥
त्रिधा कृतं फलं बैल्वं कपित्थं खण्डितं द्विधा ।
उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा ॥
फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुला ।
दूर्वात्रयं समुद्दिष्टं गुडूची चतुरङ्गुला ॥
व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि ।

तण्डुलास्तु तदर्धांशाः कोद्रवा मुष्टिसम्मिताः ॥
गोधूमा रक्तकलमा विहिता मुष्टिमानतः ।
तिलाश्चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणतः ॥
शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः ।
पुरं बदरमानं स्याद्रामठं तत्समं स्मृतम् ॥
( पुरं गुग्गुलुः । ) चन्दनागरुकर्पूरकस्तूरी कुङ्कुमानि च ।
तिन्तिणीबीजमानानि समुद्दिष्टानि दैशिकैः ॥

शान्तिरत्ने—

"खण्डत्रयन्तु मूलानां फलानां स्वप्रमाणतः ।
ग्रासमात्रमथान्नस्य पञ्च सूत्राणि होमयेत् ॥
पनसस्य फलस्याथ शतं भागाः प्रकीर्तिताः ।
शतं तथैव भागाश्च कुष्माण्डस्य प्रकीर्तिताः ॥
नारिकेलस्य विद्वद्भिर्भागाः प्रोक्तास्तु षोडश ।
तावन्त एव भागाः स्युः कदलस्य क्रतूत्तमे ॥
खर्जूरी फलभागाश्च पञ्च प्रोक्ता मनीषिभिः ।
पत्रमेकैकमेव स्यात्तथा पुष्पं च हूयते ॥
तिला अशीतिसङ्ख्याकास्तथा षष्टिर्यवाः स्मृताः ।
व्रीहयश्च शतं ग्राह्या गोधूमाः षष्टिसंमिताः ॥
प्रियङ्गवश्च विज्ञेया बिडालपदमात्रकाः ।
तथैव तण्डुलाः प्रोक्ता होमलक्षणकोविदैः ॥
फलानि बदरादीनि पञ्च पञ्चैव हावयेत्" ।
आदिशब्देन बदरमात्राण्येव ।
"इक्षवः पर्वमात्राश्च पल्लवाः कोमलाः स्मृताः ।
शर्करा च गुडश्चैव बिडालपदमात्रकः ॥
अतिसूक्ष्माणि बीजानि फलान्यपि तथैव च ।
पञ्चकुण्डवसिद्धयर्थं पञ्चमात्राणि हावयेत् ॥

चतुर्धा बीजपूराणि दाडिमानि तथैव च ।
कन्दास्त्वेकैकशः प्रोक्ता आर्द्रमङ्कुरशः शुभम् ॥
कन्देष्वपि विशेषात्तु सूरणो दशधा भवेत् ।
जम्बीरामलकद्राक्षास्तथा भल्लातकाः कणाः ॥
अक्षाऽभयाऽत्र उर्वाद्याः प्रोक्ता ह्येकैकशो यजौ ।
दूर्वास्तिलाश्च होतव्याः समिधस्त्वेकिकाः स्मृताः ॥
अज्यं च पृषदाज्यं च दधि दुग्धं तथैव च" ।
( दधिमिश्रितमाज्यं पृषदाज्यम् )
"स्रुवचक्त्रप्रमाणन्तु होतव्यं यज्ञकोविदैः ।
एवं बृहस्पतेरुक्तिरथ मुद्रा निगद्यते ॥
मयूरी कुक्कुटी हंसी सूकरी च मृगी तथा ।
पञ्च मुद्रा विजानीयाद् धौम्यद्रव्यग्रहे बुधः ॥
न्युब्जेन पाणिना द्रव्यं तर्जनीरहितेन यत् ।
आदाय हूयते विप्रैर्मयूरीं तां विदुर्बुधाः ॥
अङ्गुष्ठयंत्रिताः सर्वा अङ्गुल्योत्तानलत्तिताः ।
हवनं क्रियते ताभिः कुक्कुरी सा प्रकीर्त्तिता ॥
विकनिष्ठा तु हंसी स्यान्मुकुलाऽऽभा च सूकरी ।
मध्यमाऽनामिकाङ्गुष्ठैर्मृगी सैवोपलक्षिता ॥
फलमूलयजौ श्रेष्ठा मुद्रा ज्ञेया शिखण्डिनी ।
जारणे मारणे तद्वत् कुक्कुटी परिकीर्त्तिता ॥
वश्योच्चाटनपूर्वाणां कर्मणां सूकरी मता ।
शान्तिके पौष्टिके कार्ये मृगी हंसी प्रशस्यते ॥
कुक्कुटी पत्रपुष्पाणां शालिहोमे तु सूकरी ।
यवानां च तिलानां च हंसी प्रोक्ता मनीषिभिः ॥
या यत्र विहिता मुद्रा तया तत्र तु होमयेत् ।
अन्यथा जुहुयाद्यस्तु न कर्मफलभाग्भवेत् ॥ इति ।

दिवसान् गणयित्वा विप्रेभ्यो दद्यात् । तन्मानं चन्द्रिकायाम्—

"षष्टिप्रस्थमितं धान्यं त्रिप्रस्थप्रमितं घृतम्" ।

इति संवत्सरस्योक्तम्,

"प्रसृतिद्वितयं मानं प्रस्थं मानचतुष्टयम्" ।

इति च । तन्मूल्यं वा दद्यात् । इतर–पक्षाद्यादिकर्मद्रव्यदाननिवृत्तिः "होम्यं दद्यादि"तिवचनादिति **रामवाजपेयिनः**, **हरिहरश्च** । **गङ्गाधरस्तु**—सायम्प्रातर्होमपक्षादिकर्मपिण्डपितृयज्ञाद्यनुष्ठानसाधनभूतहोमद्रव्यमिति लिखितवान् ।

( होमद्रव्यमानम् )

द्रव्यमानं **मदनरत्ने** भविष्य(पु)त्पुराणे—

"पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ।
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥
आढकैस्तैश्चतुर्भिस्तु द्रोणस्तु कथितो बुधैः ।
कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश" ॥

द्रोणद्वयस्यैव संज्ञान्तरं शूर्प इति ।

**वाराहपुराणे**—

"पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतम् ।
अष्टमुष्टि भवेत् किञ्चित् किञ्चिदष्टौ च पुष्कलम् ॥
पुष्कलानि च चत्वारि आढकः परिकीर्तितः ।
चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणम्" ॥

विष्णुधर्मोत्तरे—

"पलं च कुडवः प्रस्थ आढको द्रोण एव च ।
धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः ॥
द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते ।
कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता" ॥

विंशत्येत्यत्र द्रोणैरित्यनुषज्यते । तेन "कुम्भो द्रोणद्वयम्"इति पूर्वोक्तपक्षा"द्विशतिद्रोणमितः कुम्भः" इत्यपरः "पलसहस्रपरिमितः कुम्भ" इति केचित् । एतेषां पक्षाणां देशकालशक्त्याद्यपेक्षया व्यवस्था । द्रवद्रव्यमानं तु स्कन्दपुराणे—

"पलद्वयेन प्रसृतं द्विगुणं कुडवं स्मृतम् ।
चतुर्भिः कुडवैः प्रस्थ आढकश्च चतुर्गुणैः ॥
चतुराढको भवेद्द्रोण इत्येतद्द्रवमानकम्"इति ।

द्रवमानन्तु घृततैलादेरित्यर्थः ।

ग्रन्थान्तरे—

"लाजापायसनारिकेलसलिले मूत्रे जले काञ्जिके-
द्वात्रिंशत्पलकोपलैर्घृतमिति प्रस्थो (गु)कुडः सम्मितः ॥
तैलक्षौद्रघृतेषु विंशतिपलैर्दध्नस्तु पञ्चोत्तरैः
प्रस्थक्षीरगतो बुधैर्निगदितस्त्रिंशत्पलैरेव तु" ॥

घृत(धृति)मष्टादश । गोपथब्राह्मणे—

"पञ्चकृष्णलको माषस्तैश्चतुः षष्टिभिः पलम् ।

(१)पलैर्द्वात्रिंशता प्रस्थो मागधः परिकीर्त्तितः
आढकस्तैश्चतुर्भिः स्यात् द्रोणः स्याच्चतुराढकः" ॥

इति मानप्रमाणम् ।

( होमद्रव्यगणनाप्रकारः )

दारकालाद्यदिनपर्यन्तं होमद्रव्यगणनाप्रकारः । प्रत्यहं चतस्र-आहुतयः द्वे प्रातर्द्वे सायं एकैकस्यामाहुतौ शतं तण्डुलाः वा अशीति तिलाः चतुःषष्टिस्तदर्धं वा एवं यस्य द्रव्यदाने शक्तिस्तेन तद्गणनया होमद्रव्यं दर्शपूर्णमासस्थालीपाकद्रव्यं वैश्वदेवद्रव्यं च यथासम्भवमाज्यं चाग्निविच्छेददिनगणनया ब्राह्मणाय दद्यात् ।

( क्रमकारिका )

अथ क्रमकारिका लिख्यते—

"पूर्वेद्युः क्षौरपूर्वं स्नपनमथ शरत्सङ्ख्यकृच्छ्रात्मशुद्धिः-
पुण्याहे मातृपूजाभ्युदयिकवरणं यातहौम्यप्रदानम् ।
कृत्वाऽरण्योस्तु मानं ह्यवयवसहितं पूजनं स्वीकृतिश्च
धृत्वा तत्रोपमन्थं चलदलवपुषम्मन्थयेदावसथ्यम् ॥
कृत्वा ब्रह्मासनादि सुविधिमथ जुहोत्याहुतीः सर्पिषाक्ता
आघारावाज्यभागा उपयमनकुशस्त्वन्न इत्यष्टमन्त्रैः ।
अग्न्याधेयश्चतस्रश्चरुत इति पुनः पूर्ववच्चाष्ट हुत्वा
स्विष्टायास्येति भूरादि च कुशहवनं प्राशनं विप्र(भुक्तिः)भोज्यम्"॥

(१) "पलैर्द्वात्रिंशद्भिः प्रस्थो मागधेषु प्रकीर्तितः" इति दानमयूखे ( २२ प० ) पाठः ।

दानभागवते—

“प्रायश्चित्तं पुरा कृत्वा अग्न्या(१)धानदिने ततः ।
कुर्यान्माध्याह्निकं स्नानं देवतापूजनान्तिकम् ॥
श्राद्धं हौम्यस्य दानं च कुर्यात् सङ्कल्पमेव च ।
वैकल्पिकपदार्थांश्च माननिर्देशपूजनम् ॥
स्वीकारो मन्थनिष्पत्तिः खरशुद्धिश्च मन्थनम् ।
अग्निस्थापनमृष्यादिस्मरणं च ततो भवेत् ॥
देवतानामभिध्यानं वरणं ब्रह्मणस्ततः ।
प्रणीय च परिस्तीर्य पात्रासादनमिष्यते ॥
छित्वा पवित्रके द्वे तु संस्कृत्य प्रोक्षणीस्ततः ।
पात्रप्रोक्षणमाज्यस्य निर्वाप(२)श्चरुपात्रके ॥
आसिच्योदकनिर्वापस्तण्डुलानां च तत्र वै ।
अधिश्रित्योभयं तत्तु पर्यग्निकरणं ततः ॥
श्रपणं च चरोरेव कुर्यादर्धश्रिते ततः ।
स्रुवप्रतपनादि स्यादुद्वास्योभयमेव च ॥
उत्पूयावेक्ष्य चाज्यं तु प्रोक्षणयुत्पवनं ततः ।
कुशादानं समित्क्षेपः प्रोक्षणीवारिणा ततः ॥
पर्युक्ष्याग्निं पवित्रे द्वे प्रणीतासु निधाय च ।
निपात्य दक्षिणं जानुं ब्रह्मान्वारभते कुशैः ॥
वाग्यतो जुहुयाच्चाथ स्रुवेणाज्यादिकं हविः ।

( १ ) “ह्याधानस्य दिनात्तत” इति स्मार्तगङ्गाधरे पाठः ।
( २ ) “निर्वपेच्चरुपात्रके” इति स्मार्तगङ्गाधरे पाठः ।

आघारावाज्यभागौ च त्वन्न इत्यादि चाष्टकम् ॥
सुचेणाज्येन चैवैता जुहुयाद् द्वादशाहुतीः ।
स्थालीपाकाक्तस्रुस्तु त्वन्न इत्यादिकाः पुनः ॥
स्विष्टकृच्छेषेण देवागातुविदस्ततः ।
(१)अग्न्यादि नव भूराद्या बर्हिर्होमस्ततो भवेत् ॥
संस्रवप्राशनं कुर्यान्मार्जनं प्रतिपादनम् ।
वरदानं प्रणीतानां विमोको(२)विप्रभोजनम् ॥
यान्तु मातृगणा उक्त्वा विसृजेन्मातृकं गणम् ।
एतावत्कर्म युक्तं तु आवसथ्यमिहोच्यते ॥

इति शिवप्रसादकृते स्मार्तोल्लासे परिभाषाप्रकरणं समाप्तम् ।

(अधुना) अथ सर्वप्रायश्चित्तप्रयोग उच्यते ।

आधानात्पूर्वदिनेऽसम्भवे तस्मिन्दिने वा अधिकारसिद्ध्यर्थं यजमानेन षडब्द–चतुरब्द–त्र्यब्द–सार्द्धाब्दैकाब्दपञ्चदशकृच्छ्राणा-मन्यतमं वा यथाशक्ति प्रा(३)यश्चित्तं यथाविधि कर्तव्यम् । अब्दे

---

( १ ) "आज्येन नव भूराद्या" इति स्मार्तगङ्गाधरे पाठः ।

( २ ) "विप्रपूजनमि"ति स्मार्तगङ्गाधरे पाठः ।

( ३ ) प्रायश्चित्तशब्दश्च रूढ्या योगेन च पापनिवर्तनक्षमं धर्मविशेषमाचष्टे । प्रायश्चित्तशब्दश्चायं पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः—इत्याहुः सम्प्रदायविदो निबन्धनकारादयः॥ योगस्त्वङ्गिरसा दर्शितः-

"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयोगात् प्रायश्चित्तं तदुच्यते ॥
प्रायशश्च समं चित्तं चारयित्वा प्रदीयते ।

पर्षदा कार्यते यत्तु प्रायश्चित्तमिति स्मृतम्" ॥ इति ।

अनुष्ठितेन द्वादशवार्षिकव्रतादिनाऽवश्यं पापं निवर्तते—इति विश्वासो निश्चयः, तेन संयुक्तं व्रतानुष्ठानलक्षणं तपः प्रायश्चित्तम् । पापिनोऽनुतापिनश्चित्तं व्याकुलं सत् विषमं भवति । तत्र पर्षदा येन व्रतानुष्ठानेन प्रायशोऽवश्यं समं कार्यते तद्व्रतं प्रायश्चित्तम् । चित्तसमीकरणोपपादनं "चारयित्वा प्रदीयते" इति । व्रतं चारयित्वा चित्तवैषम्यनिमित्तं पापं प्रदीयते खण्ड्यते विनाश्यते इत्यर्थः । यद्वा परिषद्युपविष्टानां सर्वेषां चित्तं यथा समं भवति तथा चारयित्वैकमत्येन विचार्य प्रदीयते विधीयते कार्यते अनुष्ठाप्यते—इत्यर्थः । तदिदं प्रायश्चित्तं नैमित्तिकम् । अत्रेदमवधेयम्—श्रुतौ हि वैगुण्यं निमित्तीकृत्य वाक्येन विधीयमानानि प्रायश्चित्तानि वैगुण्यनाशाय प्रत्येकं समर्थानि विज्ञायन्ते । तेषां विकल्पसमुच्चयविचारे अदृष्टार्थत्वात्समुच्चये प्राप्ते एकैकेन वाक्येन निरपेक्षविधानाद् द्वारैक्याद्विकल्प एव न समुच्चयः । तदुक्तं द्वादशाध्याये तृतीयपादे जैमिनिना—"प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घात" इति । अस्यार्थः—प्रायश्चित्तेषु विकल्पः स्यात्, कुतः । ऐकार्थ्यात् कथमैकार्थ्यम् । यत एकेषां निष्पन्नेन दोषेण केवलस्य तस्याभिसंयोगो "यद्यृक्तो यत आर्तिमियाद् भूः स्वाहेति गार्हपत्ये जुहुयात्" (श० ब्रा० ११।५।८।६। गो० ब्रा० ३।३) इति । तस्मात्सर्वस्य दोषस्यैकेन निर्घातः एकेन चेन्निर्हृतो दोषस्तर्हि द्वितीयादीनि प्रयोगान्तरार्थानि भवन्ति । माधवेनाप्युक्तम्—

"वैश्वानरे पथिकृति साहित्यं वा विकल्पनम् ।

साहित्यं स्याददृष्टाय विकल्पः स्यात्समाधये" इति ।

अत्र द्वितीयं जैमिनिसूत्रम् "समुच्चयस्त्वदोषनिर्घातार्थेषु" ( जै० १२ । ३ । १७ ) यानि पुनर्न दोषनिर्घातार्थानि तेषु समुच्चयः । कानि पुनस्तानि । यानि न शिष्टस्याक्रियायां प्रतिषिद्धस्य करणे वा

प्राजापत्यानित्रिंशत्(१) ३० षडब्दे अशीत्युत्तरशतम् । १८० । त्र्यब्दे-

विधीयन्ते, तथा "यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियान्मैत्रं चरुं निर्व-पेत्सौर्यमेककपालम्"। "यस्या हुतमग्निहोत्रꣳ-सूर्योऽभ्युदियादग्निꣳ-समाधाय वाचं नियम्य दम्पती सर्वाहमुपासीयाताम्" इति । यत्र दोषो न दृश्यते दोषस्याभावान्निर्घातार्थता च नास्ति केवलमभ्युदये निमित्ते कर्म विधीयते तत्रैनिमित्तिकं कर्मणः प्रकरणे उत्पन्नत्वात् कर्माङ्गं विज्ञायते यत्र यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन सङ्गृ-ह्यन्ते । अतस्तेषां समुच्चयः । तथाहि माधवः—

"भिन्नस्कन्नादिहोमादेर्विकल्पो वा समुच्चयः ।
विकल्पः पूर्ववन्नैवमदोषे विहितत्वतः" इति ।

कात्यायनश्च—"प्रायश्चित्तेषु दोषनाशात्, नाश्रुतेः, प्रत्यक्षाच्च, स्याद्वा दर्शनात्, नान्यार्थत्वात्" ( का श्रौ० १ । ८ । ११—१५ ) इति । तदेवं जैमिनेः सिद्धान्तः—प्रमादापतितस्य वैगुण्यस्य समा-धानार्थानां विकल्पः, निमित्ते सति कर्माङ्गाणां समुच्चयः । एवं स्मार्ते-ऽपि द्रष्टव्यमिति सङ्क्षेपः ।

प्रायश्चित्तेतिकर्तव्यतायां विष्णुः वशिष्ठश्च—

"सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकम् ।
ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते ॥
दिनान्ते नखरोमादीन्प्रवाप्य स्नानमाचरेत् ।
भस्मगोमयमृद्वारिपञ्चगव्यादिकल्पितैः ॥
मलापकर्षणं कार्यं बाह्य(बाह्य)शौचप्रसिद्धये ।
दन्तधावनपूर्वेण पञ्चगव्येन संयुतम् ॥
आचम्यातः परं मौनी ध्यायन् दुष्कृतमात्मनः ।
मनः सन्तापनात्तीव्रमुद्वहेच्छोकमन्ततः" ॥

इत्यादि प्रायश्चित्तमयूखे मिताक्षरायां ( ४८६ पत्रे ) च ।

( १ ) "कृत्वार्वाग् ब्रह्महत्यायाः षडब्दं व्रतमाचरेत् ।

नवतिः ९० । सार्द्धद्वे पञ्चचत्वारिंशत् ४५ । एवं योज्यानि । तद्यथा—चत्वार एको वा वेदवित् धर्मशास्त्राध्यात्मशास्त्रविदो ब्राह्मणस्य (१)पर्षत्वेनोपवेशनम् । अनुतापवता देशकालसङ्कीर्तनान्ते

---

प्रत्याम्नाये गवां देयं साशीति धनिना शतम्" ॥

इति षडब्दप्रत्याम्नायमूलवाक्यं मिताक्षराया ( ४८६ पत्रे ) म् ।

( १ ) "चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ।

सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः" ॥

( या० स्मृ० १ । ९ ) इति याज्ञवल्क्योक्तपर्षल्लक्षणलक्षितानां वेदधर्मशास्त्रविदां चतुर्णां एकस्य वेदत्रयाभिज्ञस्य वा धर्मशास्त्राध्यात्मशास्त्रविदो ब्राह्मणस्य वा पर्षत्वेनोपवेशनम् ।

पाराशरः—"चातुर्वैद्यो विकल्पी च अङ्गविद्धर्मपाठकः ।

त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा" ॥

इति । अत्र चातुर्वैद्यादिशब्दानामर्थानङ्गिरा विवृणोति—

"चतुर्णामपि वेदानां पारगा ये द्विजोत्तमाः ।

स्वैस्वैरङ्गैर्विनाऽप्येते चातुर्वैद्या इति स्मृताः ॥

धर्मस्य पर्षदश्चैव प्रायश्चित्तक्रमस्य च ।

त्रयाणां यः प्रमाणज्ञः स विकल्पी भवेत् द्विजः ॥

शब्दे छन्दसि कल्पे च शिक्षायां च सुनिश्चितः ।

ज्योतिषामयने चैव सनिरुक्तेऽङ्गविद्भवेत् ॥

वेदविद्याव्रतस्नातः कुलशीलसमन्वितः ।

अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः ॥

ब्रह्मचर्याश्रमादूर्ध्वं विप्रोऽयं मुख्य उच्यते" ।

इति चातुर्वैद्यत्वाद्युक्तविशेषणविशिष्टा गार्हस्थ्याद्यन्यतमाश्रमवर्तिनो दश सङ्ख्याकाः विप्राः परिषच्छब्दवाच्याः । दशसंख्या अवरा यस्यां परिषदि सा दशावरा । दशत्वमवरः पक्षः गोवधादिषु ।

गोवधादर्वाचीनविषये बहवः पक्षाः दर्शिताः पराशरेण—

"चत्वारो वा त्रयो वाऽपि वेदवन्तोऽग्निहोत्रिणः ।
ब्राह्मणानां समर्था ये परिषत् साऽभिधीयते ॥
अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः ।
पञ्च त्रयो वा धर्मज्ञाः परिषत् सा प्रकीर्तिता ॥
मुनीनामल्पविद्यानां द्विजानां यज्ञयाजिनाम् ।
वेदव्रतेषु स्नातानामेकोऽपि परिषद्भवेत् ॥
पञ्च पूर्वं मया प्रोक्तास्तेषां चासम्भवे त्रयः ।
स्ववृत्तिपरितुष्टा ये परिषत् सा प्रकीर्तिता" ॥

अङ्गिरापि—"एषा लाघवकार्येषु मध्यमेषु तु मध्यमा ।
महापातकचिन्तासु शतशो भूय एव च ।"

बृहस्पतिरपि—"लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा ॥
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा ।" इति

सेयं परिषद् ब्राह्मणस्य प्रायश्चित्तित्वे सत्यवगन्तव्या । यदा क्षत्रियवैश्यौ प्रायश्चित्तिनौ तदा विशेषमङ्गिरा आह—

"परिषद्या ब्राह्मणानां सा राज्ञां द्विगुणा मता ।
वैश्यानां त्रिगुणा चैव पर्षच्च व्रतं स्थितम् ॥
ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः ।
वैश्यानां याजकश्चैव त एव व्रतदाः स्मृताः" ॥

यथा क्षत्रियवैश्ययोः परिषद्वृद्धिः तथा व्रतमपि वर्धते । इयं च व्रतवृद्धिरुत्तमजातिहनने द्रष्टव्या । इतरविषये व्रतह्रासस्याभिधानात् । तथा च चतुर्विंशतिमते दर्शितम् ।

"प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः ।
पादोनं क्षत्रियः कुर्यादर्धं वैश्यः समाचरेत्
शूद्रः समाचरेत् पादमशेषेष्वपि पाप्मसु" ॥ इति ।

अत्र क्षत्रियस्य पादोनं वैश्यस्यार्धं शूद्रस्य पादमिति प्राय-

प्रारोप्सितप्रायश्चित्ताङ्गतया विहितं सचैलस्नानं करिष्ये । इति (१)स-

श्चित्तस्य न्यूनत्वं ज्ञानतारतम्याभिप्रायेणोक्तम् । सर्वशास्त्रेषु प्राय-श्चित्तप्रकरणे ज्ञानवतो दोषाधिक्यमज्ञानिनो दोषाल्पत्वमाहुर्महर्षयः । वर्णज्यैष्ठ्यात् सर्वविद्याधिकारित्वाच्च ज्ञानवतो ब्राह्मणस्य पूर्णं ततोऽवरस्य क्षत्रियस्य पादोनं ततोऽप्यवरस्य वैश्यस्यार्धं सर्वेभ्यो जघन्यस्य शूद्रस्य पादम्प्रायश्चित्तम् । अनेन शूद्रादप्यधमानां चाण्डालादीनां तारतम्येन प्रायश्चित्तह्रास उपलक्षणीयो धर्मविद्भिरित्यलं प्रसक्तानुप्रसक्तेन ।

(१) क्रियमाणकर्मादौ निमित्तोल्लेखपूर्वकः करिष्ये होष्ये यक्ष्ये इत्यादि पदोच्चारणसमकालीनदक्षिणहस्तकरणकपात्राधिकरणकजलादिप्रक्षेपसहितकरिष्यमाणकर्मानुष्ठानप्रतिज्ञारूपं मानसं कर्म सङ्कल्प इत्युच्यते । अयं च कर्मादावावश्यकः—

"सङ्कल्पेन विना विप्र यत्किञ्चित्कुरुते नरः ।
फलं चाप्यल्पकं तस्य धर्मस्यार्धक्षयो भवेत्" ॥ इति वाक्यात् ।

देवलः—

मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्वशः ।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्" ॥ इति ।

सर्वश इति व्यापकानां व्याप्यानां, येषामार्यावर्तकाश्यन्तर्गृहादीनां कार्तिकपौर्णमास्यादीनां देशानां कालानां च वाक्यान्तरैः फलं श्रुतं तेषां सर्वेषामुल्लेखः कार्य इत्यर्थः । अतएव प्रभवादौ तिलादिदानोक्तेस्तेषामपि निर्देशः मासादीनान्तु निमित्तत्वाऽभावेऽपि अन्यथा वैयर्थ्यात्, मासपक्षतिथयः प्रयोगाधिकरणभूताः सर्वेऽपि, यत्त्वनेकदिनसाध्ये कर्मणि आद्यदिने सङ्कल्पकालीनां तिथिमधिकरत्वेनोल्लिख्य ज्योतिष्टोमेनाहं यक्ष्ये इत्यादि सङ्कल्पवाक्यं प्रयुञ्जते यायजूकाः तत्तु पदानामन्वयायोगादनादर्तव्यम् । यद्यपि केचित्तेन तेन रूपेण प्रयोगाङ्गतया विहितानामेव मासादीनामुल्लेख इति, तदपि न भावाभा-

कूल्यपूर्वकं सचैलस्नानं कृत्वा, अशक्तौ तु पादयोः पाण्योश्च प्रक्षा-
लनं वा, अथ (१)वाग्यतेनाऽम्बु(२)ज्ञानेन शक्तिश्चेत् क्लिन्नवाससा

---

वात्, अविहितमासादिक आधानादौ मासपक्षतिथीनां ज्योतिष्टोमे एकादशी व्रतादौ च मासपक्षयोरुल्लेखाऽभावप्रसङ्गाच्च। अतो ज्योतिष्टोमादावेकादश्यादिपूर्णिमान्तानामुल्लेखः एवमन्यत्रापीति दिक्।

(१) वाग्यमनलोपे वैष्णवमन्त्रजपो विष्णुस्मरणं वा प्रायश्चित्तम्। तथा च कात्यायनः—"व्याहृत्य वैष्णवं मन्त्रं जपेत्" (का० औ० २।२।६) इति। याज्ञवल्क्यः--

"यदि वाग्यमलोपः स्याज्जपादिषु कथञ्चन।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्।
अज्ञानाद्यदि वा मोहात्प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः"।

तथा च शतपथश्रुतिः-"स यद्वाचं यमो व्याहरति तस्मादुहैष विसृष्टो यज्ञः पराङावर्तते। तत्र वैष्णवीमृचं वा यजुर्वा जपेत्" (श० ब्रा० १।१।६।४)। अत्र "उरुविष्णो" (शु० य० सं०-५।३) इति ऋक्। "ध्रुवा असदमिति" (शु० य० सं०-२।७) यजुः, "विष्णो हव्यꣳ रक्ष" इति वा यजुः। अत्र द्राह्यायणः "अयज्ञियां वा व्याहृत्य महाव्याहृतीर्जपेत्। इदं विष्णुरिति वा ऋचम्" (द्रा० गृ०, प्र०१ख० २सू०२४-२५) इति।

(२) उपवासोऽप्यधिकारिविशेषणम्--

"स्नानं सन्ध्या तर्पणादि जपहोमामरार्चनम्।
उपवासवता कार्यं सायं सन्ध्याहुतीर्विना"॥ इति वराहात्,
"अलस्यापि नरश्रेष्ठ प्राशनाद्भेषजादृते।
नित्यक्रिया निवर्तेत काम्यनैमित्तिकैः सह"॥

इति कालिकापुराणाच्च।

पर्षत्समीपे गमनम् । शक्तौ सत्यां पर्षदं प्रदक्षिणीकृत्य चरणयां (१)साष्टाङ्गप्रणामेत् । द्विजास्तं पृच्छेयुः ।

"किन्ते कार्यं वदास्माभिः किं वा मृगयसे द्विज ।
तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः ॥
अस्माकं चैव सर्वेषां सत्यमेव परं बलम् ।
यदि चेद्रक्ष्यसे सत्यं नियतं प्राप्स्यसे शुभम् ॥
यथागतोऽसि सत्येन तत्त्वं शुद्ध्यसि कर्हिचित्"(२) ।

---

(१) अष्टाङ्गलक्षणं वीरमित्रोदये—

"दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा तथा ।
मनसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः" ॥ तथा-
"पद्भ्यां कराभ्यां शिरसा पञ्चाङ्गा प्रणतिः स्मृता ।
अष्टाङ्ग उत्तमः प्रोक्तः पञ्चाङ्गो मध्यमः स्मृतः" ॥

अष्टाङ्गलक्षणं पुराणान्तरे--

"उरसा शिरसा दृष्ट्या मनसा श्रद्धया तथा ।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग उच्यते" ।

(२) अत्र पराशरसंहितायां विशेषः—

"सत्येन द्योतते राजा सत्येन द्योतते रविः ।
सत्येन द्योतते वह्निः सर्वं सत्ये प्रतिष्ठितम् ॥
भूर्भुवःस्वस्त्रयो लोकास्तेऽपि सत्ये प्रतिष्ठिताः ।
तस्मात्तद्वद ? यत्सत्यमादिमध्याऽवसानिकम् ॥
एवं तैः समनुज्ञातः सर्वं ब्रूयादशेषतः ।
तस्मिन्निवेदिते कार्ये निष्कामो यस्तु कार्यवान् ॥
तस्मिन्नुत्सारिते पापे यथावद्धर्मपाठकाः ।
ते तथा तत्र जल्पेयुर्विमृशन्तः परस्परम् ॥

इति द्विजैः पृष्टेन प्रायश्चित्तिना गोवृषयोः प्रत्येकं प्रत्याम्नायत्वेन यथाशक्ति द्रव्यं पर्षत्पुरतो निधाय करिष्यमाणप्रायश्चित्ताङ्गत्वेनेदं गोवृषनिष्क्रयद्रव्यं (१) सभ्येभ्यो दातुमहमुत्सृजे। न ममेति तद्दानम्।

---

आपद्धर्मेषु यत्प्रोक्तं यच्च सानुग्रहं भवेत्।
परिषत्सम्पदश्चैव कार्याणां च बलाबलम्॥
प्रा(प्तं)प्य देशं च कालं च यच्च कार्यान्तरं भवेत्।
पर्षत् सश्चिन्त्य तत्सर्वं प्रायश्चित्तं विनिर्दिशेत्॥
सर्वेषां निश्चितं यत्स्याद्यच्च प्राणान्न घातयेत्।
आहूय श्रावयेदेकः पर्षदा यो नियोजितः॥
शृणुष्व भो इदं विप्र ? यत्ते आदिश्यते व्रतम्।
तत्प्रयत्नेन कर्तव्यमन्यथा ते वृथा भवेत्॥
यथा भवेत्तथा चीर्णे तदा शुद्धिप्रकाशनम्।
कार्यं सर्वं प्रयत्नेन शक्त्या विप्राभिभाषितम्"॥

इति। एतत्सर्वं कस्यचित् देवतायतनस्य शैवस्य वैष्णवस्य वा पुरः स्थित्वा निर्देष्टव्यम्। "देवतायतनाग्रतः" इत्येतत्पुण्यतीर्थादेरप्युपलक्षणम्। एवं प्रायश्चित्तं निर्दिश्यानन्तरं निर्देष्टारः सर्वेप्यात्मविशुद्ध्यर्थं तत्प्रायश्चित्तानुसारेण स्वल्पमधिकं वा किंचित्कृच्छ्रं चरित्वा तदन्ते वेदमातरं गायत्रीं यथाशक्ति जपेयुरिति।

एतदेव हारीतोऽप्याह—

"प्रायश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते।
यत्पवित्रं विजानीयात् जपेद्वा वेदमातरम्"॥ इत्यादि।

(१) सभ्याश्च यजमानेन प्रदत्तं गोवृषनिष्क्रयद्रव्यं विभज्य गृह्णीयुः। अत्र च "पापं विख्यापयेत्पापी दत्वा धेनुं तथा वृष" मिति पराशरवचनात् सति सम्भवे प्रत्यक्षत एव गोवृषयोर्दानं प्रतीयते तथापि निष्क्रयेणैव तद्दानम्।

ततोऽमुकस्य मे जन्मप्रभृत्यद्यदिनं यावज्ज्ञा(ना)ताज्ञा(त)त-का-
माकाम—सकृदसकृत्(कृत)—कायिक—वाचिक—मानसिक—सांसर्गिक—
भुक्ताभुक्त—स्पृष्टास्पृष्ट—पीतापीत—सकलपातकातिपातको(१)पपातक-

"बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ।
विभक्तदक्षिणा ह्येता दातारं पातयन्ति हि ॥"

इत्यङ्गिरसा बहुभ्यः प्रत्यक्षैकगोदानस्य प्रतिषिद्धत्वात् । इदं गोवृषदानमेकप्राजापत्यकृच्छ्ररूपप्रायश्चित्तदाने ज्ञेयम्, पादतो ह्रासे तु विष्णुः—

"पादव्रते वस्त्रदानं कृच्छ्रार्द्धे तिलकाञ्चनम् ।
पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतम्" इति ।

अत एव महापातकादिष्वधिकं कल्प्यमिति मिताक्षरायाम् । अनयैव दिशा शक्त्याद्यपेक्षया दक्षिणाधिक्यमिति महार्णवे ।

( १ ) उपपातकानि याज्ञवल्क्येन परिगणितानि—

"गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया ।
अनाहिताग्निता पण्यविक्रयः परिवेदनम् ॥
भृताद्ध्ययनादानं भृतकाध्यापनं तथा ।
पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया ॥
स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् ।
नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः ॥
धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम् ।
पितृमातृसुतत्यागस्तडागारामविक्रयः ॥
कन्यासन्दूषणं चैव परिविन्दकयाजनम् ।
कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् ॥
आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् ।
स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च ॥

लघुपातक—सङ्करीकरण—मलिनीकरण—पात्रीकरण(१)जातिभ्रंशक-र(२)—प्रकीर्णक—पातकानां मध्ये सम्भावितानां पातकानां नि(रसना)रासार्थं तथा सपत्नीकस्य मेऽमुकवर्षपर्यन्तमनाहिताग्नितजनितप्रत्य-वायपरिहारार्थं स्मार्ताऽऽधाने(श्रौताधाने वा)ऽधिकारसिद्ध्यर्थं चानुग्रहं कृत्वा (अग्निविच्छेद) प्रायश्चित्तमुपदिशन्तु भवन्त इत्युक्त्वा ब्राह्म-

---

इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् ।
हिंस्रयन्त्रविधानञ्च व्यसनान्यात्मविक्रयः ॥
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् ।
तथवानाश्रमे वासः परान्नपरिपुष्टता ॥
असच्छास्त्राधिगमनमाकरेष्वधिकारिता ।
भार्याया विक्रयश्चैषामेकैकमुपपातकम् ॥"
(या० स्मृ० प्रायश्चित्ताध्याये श्लो० २३४-२४२ । मनुस्मृ० ११।५९-६६)

(१) मनुना जातिभ्रंशकरादीनि निमित्तानि परिगणितानि—
"ब्राह्मणस्य रुजःकृत्या घ्रातिरघ्रेयमद्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥
खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ।
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥
निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥
कृमिकीटवयोहत्या मद्यानुगतभोजनम् ।
फलैधःकुसुमस्तेयमधैर्यञ्च मलावहम्" ॥ (११ । ६७-७०) ।

(२) महापातक-( या० स्मृ० प्रायश्चित्ताध्या० २२७ ) अतिपा-तक—अनुपातक-( पितृपितृव्यादिभार्यागमनादीनि ) उपपातक-( या० स्मृ० प्रा० २३४ ) भिन्नं पातकं प्रकीर्णमुच्यते ।

णान् प्रार्थयेत्(१) ॥

"आब्रह्मस्तम्बपर्यन्तं भव(द्वश्य)द्वंशमिदं जगत् ।
यत्तरक्षःपिशाचादि सदेवासुरमानुषम् ॥
सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः १ ॥
मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ।
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छ(थ)त ॥
पूज्यैः कृत(तः-)पवित्रोऽहं भवेयं द्विजसत्तमै"रिति ।

पुत्रादिश्चेत् प्रायश्चित्तकर्ता तदाऽस्मच्छब्दस्थाने तन्नामनिर्देशः, स यथा मम देहस्येत्यत्रास्य देहस्य संशुद्धिमित्यूहः, मया कृतमित्यत्रैतत्कृतमिति, प्रसादः क्रियतां मह्यमित्यत्र क्रियतामस्मै इति, पवित्रोऽहं भवेयमित्यत्र पवित्रोऽयं भवेच्चेति, ततो मामनुगृह्णन्तु भवन्त इति प्रणमेत् मामित्यत्र ए(न)तमित्यन्यकर्तृके । ततश्चन्दनपुष्पादिभिः पुस्तकपूजां सभ्यानुवादकपूजां (च) विधाय निबन्धपूजात्वेन किञ्चिद्द्रव्यं निधाय कृताञ्जलिपुटस्तिष्ठेत् । अनुवादकाय किञ्चिद्दक्षिणां दद्यात् ।

ततोऽनुवादकः-"अमुकशर्मणस्तव जन्मप्रभृत्यद्यदिनं यावज्ज्ञाताज्ञात—कामाकाम—सकृदसकृत्कायिक—वाचिक—मानसिक—सांसर्गि-

---

(१) तत्तदेकपापे तु "किं ते कार्यमि"ति प्रश्ने मयाऽमुकवधः कृतः अमुकभक्षणं वाऽमुकागम्यागमनं कृतमित्यादि प्राक्कृतमेव पापमुच्चार्य तत्प्रायश्चित्तमुपदिशन्तु भवन्त इति वदेत् । "जन्मप्रभृति अद्य याव"-दित्यादिकं न वदेत् ।

क–स्पृष्टास्पृष्ट–भुक्ताभुक्त–पीतापीत–सकलपातकातिपातकोपपातक–लघुपातक–सङ्करीकरण–मलिनीकरणापात्रीकरण–-जातिभ्रंशकर–प्रकीर्णकपातकानां (१)महापातकव्यतिरिक्तानां मध्ये सम्भावितपातकानां निरासार्थं तथा सपत्नीकस्य तव अनाहिताग्निताजनित-

---

(१) महापातकिनो तत्समपातकिनश्च याज्ञवल्क्येनोक्ताः। तथाहि—

"ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः।
एते महापातकिनो यश्च तैः सह संविशेत्॥
गुरूणामभ्यधिक्षेपो वेदनिन्दा सुहृद्वधः।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम्॥
निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम्।
रजस्वलामुखास्वादः सुरापानसमानि तु॥
अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा।
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितम्॥
सखिभार्याकुमारीषु स्वयोनिस्वन्त्यजासु च।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम्।
पितुः स्वसारं मातुश्च मतुलानीं स्नुषामपि।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।
लिङ्गं छित्वा वधस्तस्य सकामायाः स्त्रिया अपि"।

(३।२२७-२३३)

इति। महापातकिनां द्वादशाब्देन शुद्धिर्भवति। तथाहि याज्ञवल्क्यः—

"शिरः कपाली ध्वजवान्भिक्षाशी कर्म वेदयन्।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्"॥ (३।२४३)

इत्यादि तत्रैव द्रष्टव्या।

प्रत्यवायपरिहारार्थं स्मार्ताधानेऽधिकारसिद्ध्यर्थं च प्राण्योदीच्या-ङ्गसहितेनामुकप्राजापत्यात्मकप्रायश्चित्ताचरणेन तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यसि" इत्युपदिशेत्त्रिः । ततो निवेदितं प्रायश्चित्तमोमित्यङ्गीकृत्य पर्षदं विसर्जयेत् । तस्मिन्नहनि शक्तेनो-पवासः इतरेण (१)हविष्याशनम् । ततस्तस्मिन्नन्यस्मिन्नेवाहनि

---

(१) हविष्याणि पृथ्वीचन्द्रोदये भविष्ये--

"हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ।
कलायकङ्गुनीवारवास्तूकं हिलमोचिका ॥
षष्टिका कालशाकं च मूलकं केमुकेतरत् ।
कन्दः सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारं च पनसाम्रहरीतकी ।
पिप्पली जीरकं चैव नागरङ्गं च तिन्तिणी ॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्याणि प्रचक्षते" ॥ तथा—
"नारिकेलफलं चैव कदली लवली तथा ।
आम्रमामलकं चैव पनसं च हरीतकी ॥
व्रतान्तरप्रशस्तं च हविष्यं मन्यते बुधाः" ।
(निर्ण० सि० मूल० ८५ पत्रे)
"चरुभैक्ष्यं शक्तुकणाः शाकं दधि घृतं मधु ।
श्यामाकाः शालिनीवाराः यावकं मूलतण्डुलम् ॥
हविष्यव्रतनक्तादावग्निकार्यादिके हितम् ।
मधुमांसं विहायान्यद् व्रते च हितमीरितम्" ॥

चरु-भैक्ष्य-सक्तुकण-यावक-शाक-पयो-दधि-घृत-मूलोदकानि हवींष्युत्तरोत्तरप्रशस्तानि । पयो दधिघृतं च गव्यं ग्राह्यमिति निर्ण-यसिन्धौ । अन्यदपि तत्रैव—

रिक्तायामसम्भवेऽन्यस्यां वा तिथौ कृतमाध्याह्निकः सायाह्ने गङ्गादि तीर्थे स्नात्वाचम्य त्रीन् प्राणायामान्कृत्वा 'देशकालौ संकीर्त्यामुकशर्मणो मम जन्मप्रभृति अद्यदिनं यावज्ज्ञाताज्ञातकामाकाम-सकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्त-पीतापीतसकलपातकातिपातकोपपातकसङ्करीकरणमलिनीकरणापात्री-करणजातिभ्रंशकरप्रकीर्णकपातकानां मध्ये सम्भावितपातकानां नि-रासार्थं तथा सपत्नीकस्य ममानाहिताग्नितजनितप्रत्यवायपरिहारार्थं स्मार्ताधानेऽधिकारसिद्ध्यर्थं चामुकप्राजापत्यात्मकममुकप्रत्याम्नायद्वारा प्रायश्चित्तं पूर्वोत्तराङ्गसहितं यथाशक्ति करिष्ये, इति सङ्कल्पं कृत्वा प्रारीप्सितप्रायश्चित्तस्य प्राच्याङ्गानि करिष्ये, इत्यपरः सङ्कल्पः कार्यः ।

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
(१)केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम् ॥

---

"क्षारं क्षौरं च लवणं मधु मांसं च वर्जयेत्" । क्षारास्तु—"तिलमुद्गादृते शैम्ब्यं सस्ये गोधूमकोद्रवौ । धान्यकं देवधान्यं च शमीधान्यं तथैवयवम् । स्विन्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृत" ( नि० मू० प० १३ ) इत्यादि । अन्यान्यपि हविष्याणि निर्ण० सि० एकादशी—चातुर्मास्यादि प्रकरणे देवयाज्ञिकभाष्ये च द्रष्टव्यानि ।

(१) अत्र श्मश्रूणि केशाश्च मिलिताः सन्तस्त्रयो लक्षा विज्ञेयाः । तदुक्तम्—

"त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम् ।
सप्तोत्तरं मर्मशतं द्वे च संधिशते तथा" ॥

( या० स्मृ० ३ । १०२ ) इति । प्राचीनपद्धतौ विशेषः—

"आत्मनः शुद्धिकामो वा पितॄणां तृप्तिहेतवे ।

आत्मनः शुद्धिकामो वा यज्ञानां सिद्धिहेतवे ।
वपनं कायशुद्ध्यर्थं भवतात्तव सन्निधौ ॥

इति मन्त्रेण शिखाकक्षोपस्थवर्जं नखरोमाणि वापयित्वा प्रथमतो दक्षिणकर्णमारभ्य वामकर्णपर्यन्तमुदक्संस्थं केशवापनम् । ततः श्मश्रुलोमनखानां क्रमेणोदक्संस्थानां वापनम् । केषांचिन्मते दक्षिणश्मश्रुपूर्वकं वामश्मश्रुपर्यन्तमादौ ततो दक्षिणकर्णमारभ्य वामकर्णसमाप्तिर्यथा भवति तथा केशानां वापनम् । तदुक्तं (हेमाद्रिप्रायश्चित्तखण्डे—)

प्रेतकृत्ये राजदण्डे वपनं केशपूर्वकम् ।
अग्निहोत्रे च तीर्थे च वपनं श्मश्रुपूर्वकम् ॥

ब्रह्महत्यादिमहापापेषु सशिखं वपनं सर्वाङ्गलोम्नां च, यतिविधवादीनां सशिखं वपनम् । सधवानां तु सर्वान् केशान् समुद्धृत्य प्रान्तकेशानां क्षुरेण द्व्यङ्गुलच्छेदनमेव(१) वपनम् ।

---

वपनं कारयिष्यामि तीरेऽहं तव जाह्नवि ? ।
महापापोपपापाभ्यां केशलोमनखादिजाः ।
क्षुरादिछिन्नसर्वाङ्गास्ते मे दोषाः पतन्त्वधः ।

(१) वपने विशेषमाह वशिष्ठः—

"कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत् । अक्षिरोमशिखावर्जमिति"। काम्यकृच्छ्रादौ वपनं नेति मदनपारिजाते। अभ्युदयार्थे प्रायश्चित्ते च वपनाभाव इति रुद्रकल्पद्रुमे ।

अत्र विशेषमाह संवर्तः—

"पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च ।
त्रिपादे तु शिखावर्जं सशिखं तु निपातने" इति ।

सधवानां विशेषमाह वशिष्ठः—

"केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः ।
गोवधादिषु सर्वेषु छेदयेदङ्गुलद्वयम् ।
सधवानां तु नारीणामलङ्काराय सर्वदा ।
केशसंधारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमै"रिति ।

अङ्गुलत्रयमपि क्वचित्पाठः । अत्र सधवापदाद्विधवानां सर्ववपनम् । अत्र विशेषमाह पराशरः—

"वपनं नैव नारीणां नानुव्रज्या जपादिकम् ।
न गाष्ठे शयनं तासां न वसीरन् गवाजिनम् ।
सर्वान् केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
सर्वत्रैव हि नारीणां शिरसोऽमुण्डनं स्मृतम्" ।

आदिपदं प्रायश्चित्तान्तरपरम् । अत्र सर्वशब्दश्च सर्वप्रायश्चित्तपरः । तेन प्रयागादौ "मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधि"रिति देवजानुक्तेः सर्वमुण्डनमेव, "वेण्यां वेणीप्रदानेने"ति लिङ्गादाचाराच्च । तीर्थान्तरे न भवतीत्यन्यदेतत् । अपरार्के—

"उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् ॥
दक्षिणं कर्णमारभ्य कर्मार्थी पापसंक्षये ।
शिखाद्यं नवसंस्कारे शिखाद्यन्तं शिरो वपेत्" ॥

पापसंक्षये तन्निमित्ते प्रायश्चित्ते शिखामादौ कृत्वाऽधस्तात्सर्वतो वपेत्सोदक्संस्थम् । नवसंस्कारे चूडाकरणे दक्षिणकर्णाच्छिखान्तं शिखामारभ्य वामकर्णान्तं च वपेदित्युत्तरपद्यार्थः । तैत्तिरीयके आसुरं वपनं निन्दित्वा दैवे क्रम उक्तः, देवान्प्रक्रम्य "त उपकक्षावग्रेऽवपन्त अथ श्मश्रूण्यथ केशानि" इति । मानुषेऽपि तत्रैव मनुं प्रक्रम्य "स श्मश्रूण्येवाग्रे वपन्त अथोपकक्षावथ केशा"निति । शतपथब्राह्मणे च—"तत्केशश्मश्रु च वपते नखानि च निकृन्ततेऽ-

राजतत्पुत्रबहुश्रुतविप्राणामिच्छया वपनाभावः तदा द्विगुणं प्रायश्चित्तम्, दक्षिणा द्विगुणा, अभ्युदयार्थे प्रायश्चित्ते च वपनाभावः, न च (ततो) दक्षिणायां द्विगुणम्। तदुक्तं आत्रेये—

"राजा वा राजपुत्रो ब्राह्मणो वा (बहुश्रुतः) विशेषतः।
केशानां रक्षणार्थं तु द्विगुणं गोव्रतं चरेत्॥
यस्य न द्विगुणं दानं केशान वाञ्छति रक्षितुम्।
केशानां रक्षणार्थाय छेदयेदङ्गुलद्वयम्"॥

ततः 'क्षौरनिमित्तं शीतोदकेन स्नानं करिष्ये' इति सङ्कल्पपूर्वकं स्नात्वाचम्य प्राङ्मुखेनोदुम्बरद्वादशाङ्गुलदन्तकाष्ठाभिमन्त्रणम्।

"ॐ आयुर्बलं यशो वर्चः प्रजाः पशु वसूनि च।
ब्रह्म प्रज्ञां च मेधां च त्वं नो (दे)धेहि वनस्पते॥
मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये।

---

स्ति वै पुरुषस्यामेध्यं यत्रास्यापो नोपतिष्ठन्ते केशश्मश्रौ च वा अस्य नखेषु चापो नोपतिष्ठन्ते तद्यत्केशश्मश्रु च वपते नखानि च निकृन्तते मेध्यो भूत्वा दीक्षा" (श० ब्रा० ३।१।२।२)। इति। अत्राधाने (का० श्रौ० ४।७।११) ष्टि (का० श्रौ० २।१।६) सोमे (का० श्रौ० ७।२।१३) वैधम्। तत्र तस्य विधानात्, प्रायश्चित्ते तु दैवमानुषे विकल्पेन। इदं च वपनं निषिद्धकालेऽपि कार्यम्।

"क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम्।
पित्रादिमृतियात्रासु प्रायश्चित्तेषु तीर्थक" इति स्मृतेः।

केशवपननिषेधा वीरमित्रोदये समयमयूखे च उक्तास्तत एवावगन्तव्याः। इयं च वपनाद्येतिकर्तव्यता प्राजापत्यप्रभृतिष्वेव भवति न ततोऽल्पेष्विति प्रायश्चित्तमयूखे नीलकण्ठभट्टाः।

ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम्" ॥

"ॐ अन्नाद्याय व्यूहध्वꣳ सोमो राजायमागमत् ।

स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेति" ॥ (१)

अनेन काष्ठाग्रं किञ्चिद्भक्षयित्वा तेन प्रदेशेन दन्तानां विशोधनम् । तावत्प्रमाणेन काष्ठान्तरेण च जिह्वोल्लेखनम् । काष्ठद्वयमपि प्रक्षाल्य किञ्चिद्भग्नं कृत्वा स्ववामभागे तस्य निक्षेपः । तूष्णीं स्नात्वाचम्य, (अथ)देशकालौ सङ्कीर्त्य करिष्यमाणप्रायश्चित्ताङ्गत्वेन(२) भस्मस्नानम् ।

---

(१) औदुम्बरेण दन्तान्धावेत (पा०गृ० २।१७) । औदुम्बरेण काष्ठेन दन्तान् शोधयेत् । अन्नाद्यायेति मन्त्रेण । मन्त्रार्थः–हे दन्ताः ? यूयं अन्नाद्याय = अन्नादनाय व्यूहध्वं = निर्मला भवत यतोऽयं राजा सोमश्चन्द्रः काष्ठरूपेणागमत् आगतः । अतः स एव सोमो मे = मम मुखं प्रमार्क्ष्यते = शोधयिष्यति केन यशसा = सत्कीर्त्या भगेन = भाग्येन च । "दन्तधावनस्य नित्यकाम्यत्वादुभयफलसम्बन्ध" इति मुरारिः ।

(२) "भस्मादिभिर्दश स्नानानि करिष्ये । इति सङ्कल्पः । तत्राद्यौ" इति पाठोऽधिकः कल्पनीयः । भस्मादिस्नानप्रकारः । लैङ्गे—

"ईशानेन शिरोदेशे मुखं तत्पुरुषेण तु ।

हृदोदेशमघोरेण गुह्यं वामेन सुव्रत ॥

सद्येन पादौ सर्वाङ्गं प्रणवेन तु शोधयेत्" ।

अत्रेशानादिपदेनेशानः सर्वविद्यानामित्यादयो मन्त्रा उच्यन्ते इति मयूखः । चतुर्थ्यन्तानि नमोन्तानीशानादि पदान्येव मन्त्रा इत्यन्ये । तत्रायं विस्तृतः प्रयोगः । "सद्यो जातमि"त्यस्य सद्योजात ऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता, "वामदेवाये" त्यस्य वामदेव ऋषिः जगती छन्दः विष्णुर्देवता, "अघोरेभ्य" इत्य-

तद्यथा—नर्यसम्भवस्य गृह्याग्निसम्भवस्य वा भस्मनो ग्रहणम् । ॐ ईशानः सर्वविद्यानामिति शिरसि । ॐ तत्पुरुषायेति मुखे । ॐ अघोरेभ्य इति हृदये । ॐ वामदेवायेति गुह्ये । ॐ

---

स्य अघोर ऋषिः अनुष्टुप् छन्दः रुद्रो देवता, "तत्पुरुषाये"त्यस्य तत्पुरुष ऋषि : गायत्री छन्दः रुद्रो देवता, "ईशान" इत्यस्य ईशान ऋषिः अनुष्टुप् छन्दः रुद्रो देवता सर्वेषां भस्मपरिग्रहणे विनियोगः ।

"ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः । भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः" ॥१॥ "ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमो सर्वभूतदमनाय नमो मनोन्मनाय नमः" ॥२॥ "ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः शर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः" ॥४॥ "ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचादयात्" ॥३॥ "ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम् ॥५॥ ( कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रपाठक १० अनु० ४३-४७ । एतेषामर्थास्तत्रैव द्रष्टव्याः) । इति पञ्चभिर्मन्त्रैः श्रौतस्मार्ताग्निजं भस्म तदभावेऽन्यद्वा भस्मन सव्यहस्ते परिग्रहणीयम् । दक्षिणहस्तेनाच्छादनम् । अग्निरित्यादि भस्माभिमन्त्रणम् । ॐ अग्निरित्यादिमन्त्राणां पिप्पलाद ऋषिः गायत्री छन्दः कालाग्निरुद्रो देवता भस्माभिमन्त्रणे विनियोगः । "ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानि ( तस्माद् व्रतमेतत्पाशुपतं यद्भस्मनाङ्गानि संस्पृशेत्तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय )" इति मन्त्रेण त्रिःकृत्वो भस्मनोऽभिमन्त्रणम् । "आपो ज्योति" रित्यस्य प्रजापति ऋषिर्यजुः ब्रह्माग्निर्वायुःसूर्याश्च देवताः

सद्योजातमिति पादयोः । प्रणवेन सर्वाङ्गे धारणम् ।

अथ गोमयस्नानम् । प्रातर्गोभिरुत्सृष्टस्य गोमयस्यान्तरिक्ष-स्थस्य ग्रहणम्, भूमिष्ठं चेदुपर्यधश्च सन्त्यज्य मध्यस्थस्य ग्रहण-म् ॥ "ॐ अग्रमग्रं चरन्ती(१)नामि"ति गोमयस्या(२)भिमन्त्रणम् ।

---

भस्मन्यप आसेचने विनियोगः । "ॐ आपो ज्योतीरसोऽमृतं ब्रह्म-भूर्भुवः स्वरोम्" । इति मन्त्रेण जलाभिपं विष्णुमभिध्यायन् भस्मन्य-पामासेचनम् "ॐ नमः शिवाये"ति षडक्षरेण वा, ततः सम्मर्दनम् । सर्वाङ्गे भस्मोद्धूलनम्, तद्यथा—ईशान इत्यस्य ईशान ऋषिः अनु-ष्टुप् छन्दः रुद्रो देवता मुखे भस्मोद्धूलने विनियोगः "ओं ईशानः सर्वविद्यानाम्" मिति शिरसि । तत्पुरुषायेत्यस्य तत्पुरुष ऋषि-र्गायत्री छन्दः रुद्रो देवता मुखे भस्मोद्धूलने विनियोगः । "ॐ तत्पुरुषायेति" मुखे । अघोरेभ्य इत्यस्य अघोर ऋषिः अनु-ष्टुप् छन्दः रुद्रो देवता हृदये भस्मोद्धूलने विनियोगः । "ॐ अघोरेभ्य" इति हृदये । वामदेवायेत्यस्य वामदेव ऋषिः जगती छन्दः विष्णुर्देवता गुह्ये भस्मोद्धूलने विनियोगः । "ॐ वामदे-वायेऽति" गुह्ये । सद्योजातमित्यस्य सद्योजात ऋषिः त्रिष्टुप् छन्दः ब्रह्मा देवता पादयोर्भस्मोद्धूलने विनियोगः । "ॐ सद्योजातं प्रपद्यामि०" इति पादयोः । इति रुद्रकल्पद्रुमे विशेषः ।

(१) अग्रमग्रं चरन्तीनामोषधीनां रसं वने ।
तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥
तन्मे रोगं च शोकञ्च नुद गोमय सर्वदा ।

(२) अभिमन्त्रणादीनां लक्षणानि—
"जपमुच्चारणं विद्यात्कस्त्वर्थमपि तद्भवेत् ।
अर्थतः कार्यलाभश्चेदर्थ एव कृतोर्भवेत् ॥

सूर्याय प्रदर्शनम् । "ॐ मानस्तोक(१)" इत्यनेन मन्त्रेण गोमयेन दक्षिणहस्तगृहीतेन शिरसो नाभ्यन्तं, वामहस्तगृहीतेन नाभितः

---

मन्त्रमुच्चारयन्नेव मन्त्रार्थस्त्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥
एतदेवाभिमन्त्रस्य लक्षणं चेक्षणाधिकम् ।
अद्भिः संस्पर्शनाधिक्यात्तदेवाऽऽप्यायनं स्मृतम् ॥
उपस्थानं तदेव स्यात्प्रणतिस्थानसंयुतम्" ।

इत्याश्वलायनश्रौतसूत्रीयनारायणीवृत्त्युक्तानि बोध्यानि ।

(१) "मानस्तोके तनये मा न आऽयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मानोव्वीरान् रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे" ( शु० य० सं० १६।१६ इति ) अत्र रौद्रमन्त्राभिधानादुदकं स्पृशेत् । "रौद्रꣳ राक्षसमासुरमाभिचरणिकंमन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदप उपस्पृशेदपः" (का० श्रौ० १।१०।१४) इत्युक्तेः । तथा हि याज्ञवल्क्यः—

"रौद्रपित्र्यासुरान्मन्त्रांस्तथा चैवाभिचारिकान् ।
व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत्" इति । विष्णुः—

"अग्रमग्रमिति स्मृत्वा मानस्तोकेन वा पुनः ।
गोमयैर्लेपयेत्प्राज्ञः सोदकैर्भानुदर्शित" इति ॥

योगियाज्ञवल्क्यः—

"त्रिधा कृत्वा मृदं तान्तु गोमयं वा विचक्षणः ।
अधमोत्तममध्यानामङ्गानां क्षालनं च तैः" ॥

गोमयप्रमाणं कौर्मे—

"गोमयस्य प्रमाणन्तु येनाङ्गं लेपयेत्तत" इति ।

अत्र प्रायश्चित्तेन्दुशेखरे विशेषः-"गोमयमादाय प्रणवेन दिक्षु दक्षिणभागं तीर्थेचोत्तरभागं प्रक्षिप्य शेषं मानस्तोक(शु०य०सं०१६।१६)

पादान्तं विलेपनम्(१) ।

अथ मृदा स्नानम् ॐ "अश्वक्रान्तेरथ"(२) इति मृदुद्धरणम् ।

---

इत्यभिमन्त्र्य गन्धद्वारा (ऋ० प० ५।८७।६) मिति मन्त्रेण "अग्रमग्रं चरन्तीना" मिति सर्वाङ्गमालिप्य "हरिण्य शृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्न इन्द्रो वरुणो बृहस्पतिः सविता पुनन्तु पुनः पुनः" ॥ इति द्वाभ्यां ॐ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि सिश्रथः कृतानि ॥ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम ( ऋ० १।२४।१४-१५ ) इति द्वाभ्यां "साम्राजे" इति सूक्तेन ( अथर्व० १७।१।२२ ) च तीर्थं प्रपद्य "या प्रवतो वित उद्वत" इति तीर्थमभिमृश्य स्नात्वा द्विराचमेत् । "हिरण्यशृङ्ग" मित्यादितीर्थप्रार्थनादिकं सर्वं दशविधस्नानान्ते एव कार्यमिति मयूखे ।

( १ ) अत्र देशभेदान्मन्त्रावृत्तिः "भेदे मन्त्रावृत्तिः सान्निपातित्वा- ( का० श्रौ० सू० ८।३।२६।तथा ८।५।२० ) दि"त्युक्तेः ।

( २ ) अत्र प्रायश्चित्तमयूखोक्तानि मूलवाक्यानि यथा ।

मृत्तिकास्नाने जमदग्निः—

"अश्वक्रान्तेति वै शुद्धां मृत्तिकामाहरेच्छनैः ।
नमो मित्रस्येत्यादित्याय दर्शयेत्समृदौ करौ ॥
गन्धद्वारामिति जप्त्वा स्वान्यङ्गान्यनुलेपयेत् ।

शिवपुराणे—

"अश्वक्रान्त इति स्मृत्वा मन्त्रेणामन्त्र्य मृत्तिकाम ।
उद्धरेदुद्धृतासीति मन्त्रेण सुसमाहितः" ॥
नमो मित्रस्येति ऋचा दर्शयित्वा च भानवे ।

आरुह्येति च गात्राणि समालभ्य द्विराचमेत्" इति ।

अनुलेपने मन्त्रान्तरमाह योगी—

"आलभेत मृदाङ्गानि इदं विष्णुरिति तृचा" इति ।

मृत्परिमाणं कौर्मे—

"मृत्तिका च समुद्दिष्टा त्वार्द्रामलकमात्रिका" इति ।

क्रम उक्तो नान्दे—

"आयुष्कामः शिरोलेपं मृदा कुर्याद् द्विजः पुरा ।
श्रीकामः पादयोः शौचं मृदा पूर्वं समाचरेत्" ॥

पारस्करः—

"एकया तु शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि ।
मृद्भिश्च तिसृभिः कार्यं षड्भिः पायुस्तथैव च ।
कटिवस्त्यूरुजङ्घं च पादौ च तिसृभिस्ततः ।
तथा हस्तौ परिक्षाल्य द्विराचामेत्समाहितः" । इति ।

योगी—

"मृद्भिरद्भिश्च गात्राणि क्रमतस्त्ववनेजयेत् ।
शीर्षाद्यानाभि सर्वाणि स्मरन् विष्णुमनामयम् ॥
कटिवस्त्यूरुजङ्घं च चरणौ च त्रिभिस्त्रिभिः ।
तथैव हस्तावाचम्य नमस्कृत्य जलं ततः ॥
"यत्किंचेदमि"ति मन्त्रेण नमस्येत्प्रयताञ्जलिः" इति ।

( यत्किंचेदमित्यथर्वसं० कां १ । सू० ५५ । मं० ३)

अत्र विरुद्धानां मृत्सङ्ख्यादीनां यथाशाखं व्यवस्थेति हेमाद्रिः ।
अथ मन्त्राः—"अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
शिरसा धारयिष्यामि रक्ष मां त्वं पदे पदे" ॥ इत्यभिमन्त्रणम् ।

"उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिवन्दिता ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।

"ॐ नमो मित्रस्ये"ति (१) अनया सूर्याय प्रदर्शनम् "ॐ इदं विष्णु-रि"(२)त्यनया दक्षिणहस्तगृहीतया मृदा शिरसो नाभिपर्यन्तानामा-(लेप)लम्भनम् । अत्रापि मन्त्रावृत्तिः(३) ॥

---

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ।
त्वया हतेन पापेन जीवामि शरदां शतम्" इति मृदुद्धरणम् ।

( १ ) "ॐ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्य्यत । दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत" । ( ऋ० ७।३७।१ शु० य० सं० ४।३५ )

( २ ) "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा" (ऋ० १।५२२।१७। शु० य० सं० ५।१५) ॥

( ३ ) अत्रायं विस्तृतः प्रयोगः--

"बळित्था पर्वतानां खिद्रम्बिभर्षि पृथिवि ।
प्रया भूमिम्प्रवत्वति मह्ना जिनोषि महिनि" ॥
( ऋ० ५।८४।१ ) इति भूमिं प्रार्थ्य ॥

"ॐ मा वो रिषत्खनिता यस्मै चाहङ्खनामि वः ।
द्विपाच्चतुष्पादस्माकꣳ सर्व्वमस्त्वनातुरम्" ।
( ऋ० १०।६७।२० य० सं० १२।६५ ) इति खनित्वा ॥

"ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म्म सप्रथाः" ( ऋ० १।२२।१५ )
( शु० य० सं० ३५।२१॥३६।१३ ) इति मृदमादाय ॥

"ॐआपनेते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे" ॥

इति दूर्वामादाय गायत्र्याभ्युक्ष्य भूमौ मृदभिधाय कुशोदकेनाभ्युक्षेत् । ततो दिक्षु मृदं क्षिपेत् ।

"ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।

ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः"। ( ऋ० ६।४७।११ ) इति पूर्वस्याम्।

"ॐ यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः पूर्वेभ्यः पथिकृद्भ्यः"। ( ऋ० १०।१४।१५ शु० य० सं० २०।५० ) इति दक्षिणतः।

"ॐ तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः"। (ऋ० १।२४।११। शु० य० सं० १८।४९ तथा–२१।२) इति पश्चिमतः।

"ॐ व्वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि"। ( ऋ० १०।५७।६ शु० य० सं०३।५६ ) इत्युत्तरस्याम्।

"ॐ तत्सूर्यं रोदसी उभे दोषावस्तोरुपब्रुवे। भोजेष्वस्माँ अभ्युच्चरा सदा"। ( ऋ० ८।२५।२१ )। इत्युपरिष्टात्।

"ॐ अधः पश्यस्व मोपरि सन्तरां पादकौ हर। मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ" (ऋ० ८।३४।१९) इत्यधः। ततोऽङ्गेषु–

"ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्"। ( ऋ० १०।९०।१। य० ३१।१ ) इति शिरसि।

"ॐ अक्षिभ्यान्ते नासिकाभ्याङ्कर्णाभ्याञ्छिबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वया विवृहामि ते'। (ऋ० १०।१६४।१) इति मुखे।

"ॐ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मन्दोषण्यमंसाभ्यां बाहुभ्यां विवृहामि ते"(ऋ०१०।१६४।२)। इति ग्रीवायाम्।

"ॐ आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते"। ( ऋ० १०।१६४।३ ) इति हृदये।

"ॐ नाभा नाभिं न आददे चक्षुश्चित्सूर्ये सचा। कवेरपत्यमादुहे" ( ऋ० ६।१०।८ )। इति नाभौ।

"ॐ त्वमिन्द्र सजोषसमर्कं बिभर्षि बाह्वोः। वज्रं शिशान ओजसा" ( १०।१५३।४ )। इति बाह्वोः।

## अथ शुद्धोदकस्नानम्(१)।

"ॐ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः"। (ऋ० १।१८।१ शु० य० सं० ३।२८) इति कक्षयोः।

"ॐ यः कुक्षिः सोमपातमः समुद्र इव पिन्वते। उर्वीरापो न काकुदः" (ऋ० १।८।७)। इति कुक्ष्योः।

"ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य। इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः" (ऋ०६।७५।५ शु० य० सं० २६।४२) इति पृष्ठे।

"ॐ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते"(ऋ०१०।१६३।४) इत्यूर्वोः।

"ॐ मेहनाद्वनं करणाल्लोमभ्यस्ते नखेभ्यः। यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते" (ऋ० १०।१६३ ५) इति जान्वोः॥

"ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि"। (ऋ० १०।९०।३ य० ३१।३) इति पादयोः।

"ॐ यस्य विश्वानि हस्तयोः पञ्च क्षितीनाम्वसु। स्पाशयस्व यो ऽस्मध्रुग्दिव्ये वा शनिर्जहि" (ऋ० १।१७६।३) इति हस्तयोः।

"ॐ अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि। यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते" (ऋ० १०।१६३।६) अनेन मन्त्रेण "सहस्रशीर्षे" (ऋ० १०।९०।२) ति सूक्तेन च सर्वाङ्गोद्वर्तनम्। इति प्रायश्चित्तेन्दुशेखर–प्रतिष्ठेन्दुशेखरयोर्विशेषः।

(१) चतुर्थं वारिस्नानमुक्तं तत्र मन्त्रो ब्रह्माण्डपुराणे–"आपो अस्मानिति द्युक्त्वा भास्कराभिमुखस्थितः। इदं विष्णुर्जपित्वा (वै)प्रतिस्रोतो निमज्जति" इति। महार्णवे तु वैकल्पिकौ द्वौ मन्त्रावुक्तौ "इदमापः प्रवहते"ति ऋक् "आपोहिष्ठे"ति ऋचो वा। अनन्तरं पञ्चगव्यस्नानान्युक्तानि तत्र तद्ग्रहणमन्त्रा मात्स्ये–"सावित्र्यादाय गोमूत्रं गन्धद्वा-

"ॐ आपो हि ष्ठे"ति तिसृभिः (१)सूर्याभिमुखेन स्नानम् ।

---

रेति वै शकृत् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि । तेजोसीति घृतं तद्वद्देवस्यत्वेति चोदकम् । कुशमिश्रं जपेद्विद्वान्पञ्चगव्यं भवेत्तत" इति । पाराशर्ये तु—"तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् । पञ्चगव्यमृचा पूतं स्थापयेदग्निसन्निधौ" इति द्वितीयश्लोक उक्तः । देवस्यत्वेत्यनन्तरमभिषिञ्चामीति वाक्यशेषः पूरणीय इति निबन्धकृतः । यद्यपि मात्स्ये देवप्रतिष्ठायां देवस्नानार्थपञ्चगव्यग्रहणे एते मन्त्रा उक्ताः, पराशरेण च ब्रह्मकूर्चप्रकरणे तथाप्युभयत्रापि कुशोदकसहितानां षण्णां गोमूत्रादीनां पञ्चगव्यं भवेत्तत इति । पञ्चगव्यमृचापूतमिति च पञ्चगव्यपरिभाषेति गम्यते तस्याश्च प्रकरणेन नियमाभावाद्यत्र पञ्चगव्यविनियोगस्तत्रैतदेव मन्त्राद्यवगन्तव्यम् । अन्यथा गव्यमिति तद्धितस्य गव्यशृङ्गतक्रादिसाधारण्येन तेनापि स्नानं स्यात् । केचित्तु–"मलापकर्षणं कार्यं बाह्यशौचप्रसिद्धय" इति बाह्यशरीरमलशोधनमात्रार्थत्वादमन्त्रकाण्येव तानीत्याहुरिति ।

(१) अत्रेयं मीमांसा-मूले आपो हि ष्ठेति तिसृभिः ऋग्भिः प्रायश्चित्तिनः शुद्धोदकस्नानमुक्तं तत्रायं संशयः "आपो हि ष्ठा" "यो वः" "तस्मा अरम्ः" (११ । ५०–५२) इति ऋक्त्रय्याः विकल्पः कर्तव्य उत समुच्चयः कर्तव्यः । अत्रोच्यते श्रुतौ यथा पुराडाशविभागकरणविनियुक्तेषु "पूषा वां विभजतु" "भगो वां विभजतु" अर्यमा वां विभजतु" इति मन्त्रत्रये केनाप्येकेन मन्त्रेण विभागे सिद्धे समुच्चयस्यावकाशाभावात् विकल्पः यथा च स्मार्ते उपनयनप्रकरणे ब्रह्मचारिणो मेखलाबन्धनमन्त्रप्रयोगे त्रयः पक्षा उक्ताः "मेखलां बध्नीते इयं दुरुक्तमिति, युवा सुवासा इति वा, तूष्णीं वा," ( पा० गृ० २ । २ । ८–१० ) इति । अत्रापि एकेनैव मन्त्रेण कार्यसिद्धेर्व्रीहियववद्विकल्पाधिकरण ( १२ । ३ । ४ ) न्यायेन विकल्पः एवमत्रापि विकल्पः कर्तव्य इति प्राप्ते–ब्रूमः । "चतुर्भिरभ्रिमादत्ते" ( श्रुतिः ) इतिवत्

## अथ गायत्र्या(१)गोमूत्रेण स्नानम् ।

"आपोहिष्ठेति तिसृभिः" इत्यत्र पूर्वोक्तविभाग-मेखलाबन्धनमन्त्रवत् प्रतिमन्त्रं पृथक्करणं नास्ति चतुः संख्यायाः त्रिसंख्यायाश्च समूहे करणत्वप्रतीतेः तस्मात् मन्त्रान्ते कर्मसन्निपातस्याबाधेनैव समुच्चयः स्यादिति सिद्धान्तः । तथा हि जैमिनिः—

"सङ्ख्याविहितेषु समुच्चयोऽसन्निपातित्वात" (१२।३।४) इति ।

सायणाचार्याः—

"चतुर्भिरग्निमादत्ते विकल्पो वा समुच्चयः ।
विकल्पः पूर्ववन्मैवं समूहे करणत्वतः" इति ।

अथ स्नानमन्त्राः । ॐ आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ ॐ योवः शिवतमोरसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ ॐ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । ऋ० १०।९।१-३ (य० ३६।१४-१६) इति ।

अथवा-"ॐ आपो अस्मानि"त्युक्त्वा सूर्याभिमुख "इदं विष्णुरि"ति मन्त्रेण प्रवाहाभिमुखो मज्जेदिति प्रायश्चित्तेन्दुशेखरे । तत्र मन्त्रः—"ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳहि रिप्रम्प्रवहन्ति देवीः । (ऋ० १०।१७।१० य०सं० ४।२ ) इति ॥

अत्र पुराणमन्त्रः—

"विष्णुपादाग्रसम्भूते गङ्गे त्रिपथगामिनि ।
धर्मद्रवेति विख्याता पापं मे हर जाह्नवि ।
सरस्वत्यादिनद्यम्बुपावनं पापनाशनम् ।
शरीरस्य विशुद्ध्यर्थं स्नास्यामि व्रतसिद्धये" । इति ॥

( १ ) "ॐ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ (ऋ० ३।६२।१० शु० य० सं० ३ । ३५ )

अथ "ॐ गन्धद्वारा"(१)मिति अनेन गोमयेन पूर्वाङ्गान्यनुलिप्य स्नानम्। "ॐआप्यायस्वे"(२)ति क्षीरेण स्नानम्। "ॐ दधि-क्राव्ण"(३)इत्यनेन दध्ना मूर्द्धादिपादान्तान्यनुलिप्य स्नानम्। "ॐतेजोसीति"(४)आज्येन मस्तकादिपादान्तान्यनुलिप्य स्नानम्।

---

पुराणमन्त्रः—

"गोशरीरात्समुद्भूतं पवित्रं क्लेशनाशनम्।
स्नानार्थन्तु प्रगृह्णामि गोमूत्रम्मलनाशकम्"। इति॥

( १ ) "ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्"।
( ऋ० ४ अष्ट० ४ अध्या० ४३ वर्गान्तरे परिशिष्टे। )

पुराणमन्त्रः—

"गोमये सुस्थिता लक्ष्मीः पवित्रं सर्वमङ्गलम्।
स्नानार्थं संस्कृतं शुद्धं पापं मे हर गोमय"। इति।

( २ ) "ॐ आप्यायस्व समेतु ते व्विश्श्वतः सोम व्वृष्ण्यम्। भवाव्वाजस्य सङ्गथे"। (ऋ० १।९१।१६॥ य० सं० १२।११२) इति।

पुराणमन्त्रः—

पयो मिष्टं पुष्टिदं च सौरभेयं सुनिर्मलम्।
शरीरस्य विशुद्ध्यर्थमघौघस्य प्रणाशकम्॥

( ३ ) "ॐ दधिक्राव्णो अकारिषञ्जिष्णोरश्श्वस्य व्वाजिनः। सुरभि नो मुखा करत्प्र णऽ आयूꣳषि तारिषत्॥ ( ऋ० ४।३९।६। य० सं० २३।३२ )। पुराणमन्त्रः—

दुग्धसारं तु मङ्गल्यं चन्द्रकान्तिसमं शुभम्।
दधि सर्वगुणोपेतं स्नानार्थं गृह्यते मया॥

( ४ ) "ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवा-नामनाधृष्टं देवयजनमसि" ( य० सं० १। ३१ )।

"ॐ देवस्य त्वे"ति(१) कुशोदकेन स्नानम् । एतानि दश स्नानानि ॥

अथवा—"घृतङ्घृतपावानः पिबत व्वसां व्वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिशऽआदिशो व्विदिशऽउद्दिशो दिग्भ्यः स्वाहा ( य० सं ६ । २६ ) इति ॥

पुराणमन्त्रः—

"पयसा मन्थितं हृद्यं श्लक्ष्णं तेजोविवर्धकम् ।
सर्वकल्मषनाशाय स्नास्यामि हितकाम्यया ॥

(१) "ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो-हस्ताभ्याम् । अभिषिञ्चामि" । "आपो हि ष्ठे"ति (य० सं० ११।५०) वा । पुनन्तु मा" (शु० य० सं० १६।३६) इति वा ।

पुराण मन्त्रः—

विष्णुदेहसमुत्पन्नः ब्रह्मणा स्वकरे धृतः ।
त्वत्संलग्नैः कुशाग्रैस्ते जलैः स्नास्यामि शुद्धये ॥
मच्छरीरं पावयन्ति निर्मलानि जलानि वै ।
आपः शुद्धाः ब्रह्मरूपाः रुद्ररूपाः समीरिताः ॥
मां पुनन्तु च पापेभ्योऽ पकृष्टेभ्यो द्विजस्तुताः ।
अभिषिञ्चामि शुद्ध्यर्थं शरीरं दुःखभाजनम् ॥

ततो "ॐ नमो नारायणाय" इति जलमध्ये चतुरस्रं तीर्थं प्रकल्प्य शिखां विमुच्य केशान्द्विधा कृत्वाङ्गुलीभिः श्रोत्रदृङ्नासिकमुखं पिधाय "इदं विष्णु" (य० सं० ५।१५) रिति मन्त्रेण "ॐ नमो नारायणाये"ति-वा विष्णुं सम्पूज्य नद्यां प्रवाहाभिमुखोऽन्यत्र सूर्याभिमुखो निमज्जेत् । एवं त्रिः षट्कृत्वो द्वादशकृत्वः निमज्य पुनर्जले निमग्नः सत्यं च ( ऋ०१०।१९०।१) ति सूक्तस्य त्रिः सकृद्वा जपेनाघमर्षणं विदध्यात् । स्त्रीशूद्राघमर्षणे तु—"नमो भगवते वासुदेवाये"ति मन्त्रं वारत्रयं पठन् परमात्मानं भगवन्तं विचिन्त्याघमर्षणं कुर्यादिति साम्प्रदायिकाः ।

स्त्रीशूद्राणाममन्त्रकाणि । ततो नित्यस्नानविधिना (१)स्नानं केचिदाचरन्ति । अत्र हेमाद्रिप्रयोगं(२) केचित्पठन्ति ।

---

(१) नित्यस्नानविधिस्तु—"अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखो यज्ञोपवीत्याचम्योरुर्ठं०हीति तोयमामन्त्र्यावर्त्तयेद्ये ते शतमिति सुमित्रिया न इत्यपोऽञ्जलिनाऽऽदाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं वस्त्यूरु जङ्घे चरणौ करौ मृदा त्रिभिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिर्मापि उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेदापो हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुपदादिव शं नो देवीरपाठं० रसमपो देवीः पुनन्तु मेति नवभिश्चित्पतिर्म्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवाऽऽयं गौरिति वा त्र्यृचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम्" इति। अत्र स्नानभेदाः-आग्नेयादयः स्नानानुकल्पाः-मुख्यं वारुणस्नानं तदनुकल्पाश्च-अशक्तौ अशिरस्कस्नानं-तीर्थस्नानमन्त्राः-स्ताननिमित्तानि—कात्यायनोक्तः स्नानप्रयोगः, योगियाज्ञवल्क्योक्तः स्नानविधिः, गोभिलीयस्नानविधिः, पद्मपुराणीयस्नानविधिः वासिष्ठस्नानविधिः क्रियास्नानविधिः बोधायनोक्त-शौनकोक्त विष्णवायुक्तस्नानविधिस्तु वीरमित्रोदयाह्निकप्रकाशे ( पृ० १८६-२४३ ) द्रष्टव्यः ।

(२) श्रीरस्तु अस्य श्रीमहाभगवतः सच्चिदानन्दरूपस्य श्रीमदादिनारायणस्याऽचिन्त्यापरिमितशक्त्या भ्रियमाणानां महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽस्मिन् अव्य-

ततः स्नानाङ्गतर्पणम् । ब्रह्मादयो देवास्तान् देवाँस्त-

क्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते महति ब्रह्माण्ड-कटाहान्तरसकलजगदाधारशक्तिकूर्म्मवराहानन्तैरावृत—पुण्डरीक-वामन-कुमुदाञ्जन-पुष्पदन्त-सार्व्वभौम-सुप्रतीकाष्टदिग्गजोपरिप्रति-ष्ठितस्यातलवितल(सुतल)तलातलरसातलमहातलपातालाख्यसप्तलोको-परिभागे भूर्लोकभुवर्लोकस्वर्लोकजनोलोकतपोलोकसत्यलोकाख्यलोकष-ट्कस्याऽधोभागे महाकालायमानफणिराजशेषसहस्रफणमण्डलविधृते दिग्दन्तिशुण्डादण्डादन्तर्बहिरन्धतमसावृतेनान्तःसूर्य्यप्रकाशितेन लो-कालोकाचलेन वलयिते लवणेक्षुसुरासर्पिर्दधिक्षीरस्वादूदकाख्यसप्तसा-गरावरणपरिवेष्टिते जम्बूप्लक्षकुशक्रौञ्चशाल्मलिशाकपुष्कराख्यसप्त-द्वीपविराजिते स्वर्णप्रस्थचन्द्रकश्वेतावर्तरमणसिंहलमहारमणपारसी-कपाञ्चजन्याद्युपद्वीपसहित एवंविधसरोरुहाकारपञ्चाशत्कोटियोजन-विस्तीर्णभूमण्डले हिमाचलहेमकूटनीलश्वेतशृङ्गिगन्धमादनपारिजा-ताद्यष्टसीमाचलैर्विभक्ते तन्मध्यवर्त्तिभारतकिम्पुरुषहरिवर्षैलावृतरम्य-कहिरण्मयकुरुभ(द्रा)श्वकेतुमालाख्यनववर्षशोभिते जम्बूद्वीपे नाना-वर्णकेसराचलशिखररत्नवीजाश्रितभूसरोरुहकर्णिकायमानस्य मेरोर्द-क्षिणदिग्भागे दक्षिणोदधिहिमाचलयोर्मध्यप्रदेशे नवसहस्रयोजनविभ-क्तेन्द्रद्वीपकशेरुताम्रपर्णीगभस्तिनागसौम्यगान्धर्वारुणभारताख्यनव-खण्डान्तर्गतेऽस्मिन् भारतवर्षे दक्षिणोदधिप्रभृतिसहस्रयोजनायामवति भरतखण्डे सम्भवति कुरुक्षेत्रादिसमभूमध्यरेखायाः अमुकदिग्भागे अयोध्यामथुरामायाकाशीकाञ्च्यवन्तिकाद्वारवत्यादिमुक्तिक्षेत्रवत्या-मस्यां कर्म्मभूमौ भागीरथीविन्ध्याचलगोदावरीणां दक्षिणदिग्भागे कावेरीमलयाचलरामसेतूनामुत्तरदिग्भागे श्रीशैलहेमकूटकिष्किन्ध्या-गरुडाचलारुणगिरिहस्तिगिरिप्रभृतिपुण्यशैलवति दण्डकारण्ये नाना-पुण्यतीर्थवत्यस्मिन् देशविशेषे स्वगृहे (वा) देवालये-तीर्थनदीतीरे(वा) स्वेष्टदेवतासन्निधौ (वा) अनेककोटिब्रह्माण्डघटनायासव्योमविचरस्य

र्पयामि । भूर्देवाँस्तर्पयामि । भुवर्देवाँस्तर्पयामि । स्वर्देवाँस्तर्पयामि । भूर्भुवः स्वर्देवाँस्तर्पयामि । कण्ठं कृत्वा । कृष्णद्वैपायनादयो ये ऋषयस्तानृषींस्तर्पयामि । भूः ऋषींस्तर्पयामि । भुवः ऋषींस्तर्पयामि । स्वःऋषींस्तर्पयामि । भूर्भुवः स्वः ऋषींस्तर्पयामि । अपसव्यम् । कव्यावाडनलादयो ये पितरस्तान् पितॄँस्तर्पयामि भूः पितॄँस्तर्पयामि, भुवः पितॄँस्तर्पयामि, स्वः पितॄँस्तर्पयामि । भूर्भुवःस्वः पितॄँस्तर्पयामि ।

---

विराड्रूपिणो भगवतो महापुरुषस्य शेषपर्य्यङ्कशायिनः श्रीमहाविष्णोराज्ञया प्रवर्तमानस्य तन्नाभिस्थानीयसरोरुहादुत्पन्नस्य सकलवेदनिधेः सकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणः प्रथमपरार्द्धे श्वेतवाराहकल्पे प्रथमवर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अहनि उदयादित्रयोदशघटिकास्वतीतासु स्वायम्भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषाख्येषु षट्सु मनुषु व्यतीतेषु उपरितनघटिकायां सप्तमे वैवस्वतमन्वन्तरे सप्तविंशतिमहायुगेषु गतेषु अष्टाविंशतितमे महायुगे प्रथमपादे बौद्धावतारे शालिवाहनशके सौरचान्द्रमानप्रभवादिषष्टिसंवत्सरान्तर्गतप्रथमविंशत्यां वर्तमाने व्यावहारिके अमुकसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवारे अमुकनक्षत्रे अमुकयोगे अमुककरणे एवं गुणविशिष्टपुण्यकाले काश्यपगोत्रस्यामुकनक्षत्रे अमुकराशौ जातस्य देवदत्तनामधेयस्य मम जन्माभ्यासाजन्मप्रभृत्येतत्क्षणपर्य्यन्तं मध्यवर्त्तिनि काले सम्भावितानां प्रकाशकृतमहापातकानां रहस्यकृतमहापातकादीनां प्रकीर्णकान्तानां सर्वेषां पापानामपनोदकं साशीतिसहस्रसङ्ख्याकप्राजापात्यकृच्छ्रात्मकं षड्गुणितषडब्दसर्व्वप्रायश्चित्तं परिषदुपदिष्टं पूर्वोत्तराङ्गकलापसहितं विहितशक्यप्रत्याम्नायरूपेणाहमाचरिष्य, इति सङ्कल्पः । 'ततो नान्दीश्राद्धवैष्णवश्राद्धे कुर्य्यात्" इति हेमाद्रिः ( प्रा० ख० १०१६ पत्रे ) ।

यन्मया दूषितं तोयं शारीरमलसञ्चयात् ।
तस्य पापस्य शुद्ध्यर्थं यक्ष्माणं तर्पयाम्यहम् ॥

ततो यज्ञोपवीत्याचम्य धौते वाससी परिधाय मृदोरूकरौ प्रक्षाल्य द्विराचम्योर्ध्वपुण्ड्र(१)धारणम् । देशकालौ स्मृत्वा विष्णुप्रीत्यर्थं श्रीविष्णोः पूजनमहं(२) करिष्ये । पुरुषसूक्तेन षोड-

---

(१) अथवा वर्णक्रमेणोर्ध्वपुण्ड्रत्रिपुण्ड्रार्धचन्द्रवृत्ततिलकं विदध्यात् । यत्रैतत्स्नानं गृहे भवति तत्रैतावत्कर्मवर्जम् । तत्राह यमः—

"नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ।
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः" ॥

परोदकैः परकृतजलाशयस्थोदकैः पञ्च पिण्डानुद्धृत्येत्यर्थः । तथा च—

"गृहस्नाने न कुर्वीत मार्जनं चाघमर्षणम् ।
नान्तरा तर्पणं कुर्यात्पश्चादाचम्य शुध्यति ॥
गृहे स्नानं यदा कुर्याद् वस्त्रमूर्ध्वं परित्यजेत् ।
अधश्चाग्रेण संपीड्य पाराशर्यवचो यथा" इति ॥

(२) पूजा नाम देवतोद्देशेन द्रव्यत्यागात्मकत्वाद्याग एव, तत्र यद्यपि केषाञ्चिदावाहनादीनामयागात्मकत्वात् पूजात्वं न स्यात्, न च तेषां पूजात्वं नास्त्येवेति वाच्यम् । षोडशस्वप्युपचारेषु शास्त्रकाराणां पूजाशब्दप्रयोगात् । तथापि यागायागसमुदाये पूजाशब्दो गौरवितप्रीतिहेतुक्रियात्वेनोपाधिना रूढ एव । यथा इष्टिपशुसोमसमुदाये राजसूयशब्दः । यद्यपि ईश्वरे यागायागसमुदायक्रियया जीववदन्तः करणवृत्तिरूपा प्रीतिर्नोत्पद्यते, अन्तः करणाभावात् । तथापि मायावृत्तिविशेष एव प्रीतिः सुखादिवत् । सा च यद्यपि उत्पन्नध्वंसा नश्यति तथापि फलं यावत्तिष्ठति । अन्येषां मते अपूर्ववदिति वीरमित्रोदये ।

शोपचारैः सम्पूज्य पापापहमहाविष्णुप्रीत्यर्थं चत्वार्यामान्नानि

यद्यपीदं विष्णुश्राद्धं श्राद्धनिबन्धेषु कुत्रापि न विहितं तथापि प्रायश्चित्तविधौ "विधाय वैष्णवं श्राद्धं साङ्कल्पं निजकाम्यया।" इत्यादि वचनमाश्रित्य श्राद्धमयूखरुद्रकल्पद्रुमादिभिरुक्तत्वाच्छिष्टस-(दा)माचाराच्चास्माभिरपि लिख्यते।

कृतकुशोपग्रहेण पार्वणेन विधिना विष्णुश्राद्धम्। विष्णोर्देवतात्वेन श्रवणान्नात्र पित्रादीनां देवतात्वम्। साङ्कल्पत्वाच्चार्घावाहनाग्नौकरणविकरणावनेजनपिण्डाक्षय्योदकस्वधावाचनानामभावः। अत्र सर्वे देवधर्माः सर्वेष्वपि विप्रेषु विष्णोरेव पूजनम्। तत्रैवं क्रमः—सगोमतीचक्रशालिग्रामशिलादौ यथोक्तविधिना पुरुषसूक्तेन ( शु० य० ३१ अ० )

"आवाहनासने पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीते च गन्धपुष्पे च धूपकम्॥
दीपो नैवेद्यमाख्यातं प्रदक्षिणनमस्कृती।
विसर्जनमिति प्रोक्ता उपचारास्तु षोडश" इति॥

एतैः षोडशोपचारैश्च श्रीविष्णोः पूजनम्( अत्र शालिग्रामशिलाजातीयार्चने आवाहनविसर्जनयोः शास्त्रतो बाधात् अबाधितोपचारस्यैव कर्तव्यतया षोडशत्वमौपचारिकम् )। ततः स्वागतं वः सुस्वागतं नः इति प्रश्नोत्तरपूर्वकं विप्रनिमन्त्रणं तद्यथा ॐ दैवेक्षणः क्रियतां "ॐ तथा प्राप्नोतु भवान् प्राप्नवानि" इति निमन्त्रणम्। ॐ "अक्रोधनैरि०"ति नियमश्रावणम्। धूरिलोचनौ विश्वेदेवाः एष वोऽर्घः। ॐ प्रद्युम्नसङ्कर्षणवासुदेवाः एष वोऽर्घः। स्थलान्तरे पादप्रक्षालनं एतदाचमनीयमित्युदकदानेन ब्राह्मणान् द्विराचमय्य स्वस्यापि द्विराचमनम्। ॐ भूर्भुवः स्वः समाध्वमित्युक्त्वा दैवपूर्वं श्राद्धदेशे ब्राह्मणोपवेशनम्। "ॐ इदं विष्णु"रित्यचारात् दिग्बन्धः विष्णुश्राद्धोपहाराः शुचयो भवन्त्वि"त्युपहारप्रोक्षणं देशकालपात्रद्रव्यश्रद्धा-

सम्पद्यस्तु भस्त्विति प्रत्युक्ते त्रीन् प्राणायामान् कृत्वा देशकालयोः सङ्कीर्त्तनान्ते "प्रायश्चित्ताङ्गं विष्णुश्राद्धं करिष्य" इति सङ्कल्पः "कुरुष्वे"ति प्रतिवचनम्, "ॐ धूरिलोचनयोः विश्वेषां देवानामेतदासनमि"त्यासनं दत्वा हस्तप्रक्षालनार्थमुदकदानपूर्वकमुपग्रहार्थं कुशदानम्। "ॐ प्रद्युम्नसङ्कर्षणवासुदेवानामेतदासनं" इति दत्त्वा । हस्तप्रक्षालनार्थमुदकद्दानपूर्वकमुपग्रहार्थं कुशदानं "ॐ धुरिलोचनौ विश्वेदेवाः यथादत्तं गन्धाद्यर्चनमक्षयं वः स्वाहा नमः ॐ प्रद्युम्नसङ्कर्षणवासुदेवा एतद्यथादत्तं गन्धाद्यर्चनमक्षयं वः स्वाहा नमः" इति गन्धादिदानं आचमनं ॐ "धुरिलोचनौ विश्वेदेवाः यथाकालं दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नमक्षयं वः स्वाहा नमः। ॐप्रद्युम्नसङ्कर्षणवासुदेवाः यथाकालं दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नमक्षयं वः स्वाहा नमः" इति ब्राह्मणभोजनसङ्कल्पः, अथवामान्नं द्विगुणं त्रिगुणं चतुर्गुणमसम्भववे समं वा तन्निष्क्रयभूतं हिरण्यं वाक्षयं वः स्वाहा नम इति सङ्कल्पः सकृत्सकृदपोदानं, अश्नत्सु जपो यथोक्तः तृप्तान् ज्ञात्वा सकृत्सकृदपोद ानं गायत्र्यादिभिः सकृद्वा जपः आचान्तेषु ब्राह्मणेषूदकदानं "ॐ शिवा आपः सन्त्विति"मन्त्रेण। "ॐ सौमनस्यमस्त्वि"ति मन्त्रः पुष्पाणाम्। "ॐ अक्षतं चारिष्टं चास्त्वि"त्यक्षतानाम्। "ॐ अघोराः प्रद्युम्नसङ्कर्षणवासुदेवाः सन्त्वि"ति प्रार्थना "सन्त्वि"ति विप्रैः प्रत्युक्ते "गोत्रं नो वर्धता"मिति ब्रूयात्। वर्धतामिति प्रत्युक्ते, "ॐ दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमन्बहु देयं च नोऽस्तु" इति मन्त्रस्य पाठः। "ॐधुरिलोचनौ विश्वेदेवाः इमां (हिरण्यं तन्निष्क्रयं वा) दक्षिणामक्षयं वः स्वाहा नमः" ॐ प्रद्युम्नसङ्कर्षणवासुदेवाः इमं हिरण्यं तन्निष्क्रयं वा दक्षिणामक्षयं वः स्वाहा नमः। इति दक्षिणादानम्। "ॐ विश्वेदेवाः प्रीयन्तामि"ति वाचयित्वा "ॐ वाजे वाजेऽवत व्वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभि-

दातुमहमुत्सृजे, तेन पापापहा महा(१)विष्णुः प्रीयतां न मम ।

ततो गोदानम् । ततः कर्ता देशकालौ सङ्कीर्त्य करिष्यमाणगोदानाङ्गभूतं श्रीविष्णोः पूजनं करिष्ये (२)पञ्चोपचारैर्विष्णुं सम्पूज्य ततो गवाद्युपचाराः शुचयो भवन्त्विति गवाद्युपचाराणां प्रोक्षणम् । देशकालौ स्मृत्वा 'प्रारीप्सितप्रायश्चित्तपूर्वाङ्गतया विहितं गोदानं करिष्ये, इति सङ्कल्पः ।

ततो ब्राह्मणवरणम् । गोत्रं प्रवरं शाखाध्यायिनममुकशर्माणं गोदान(३)प्रतिगृहीतारं त्वां वृणे । वृतोऽस्मीति प्रतिवचनम् । ततः

---

र्देवयानैः । ( शु० य० ९।१८ ) आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे । आमागन्तांपितरामातराचामा सोमोऽमृतत्वेन गम्यात्" ( शु० य० सं० ९।१९ ) इत्यनुगमनम् । इति रुद्रकल्पद्रुमोक्तं श्राद्धमयूखोक्तं च विष्णुश्राद्धम् ।

( १ ) नारायणभट्टैस्तु—'विष्णुपूजनानन्तरं विष्णुबुध्या त्रिभ्योऽधिकानां युग्मब्राह्मणानामभ्यर्चनं, देशकालयोः सङ्कीर्तनान्ते त्रिभ्योऽधिकान् युग्मान् ब्राह्मणान् विष्णोरुद्देशेन भोजयिष्य इति सङ्कल्पपूर्वकं तावतां ब्राह्मणानां भोजनदानं, आमान्नदानं वा इदमेव प्रायश्चित्ताङ्गं विष्णुश्राद्धमित्यभिधीयते' इत्युक्तम् ।

( २ ) "गन्धपुष्पे धूपदीपौ नैवेद्य इति पञ्चकम्" इति पञ्चोपचाराः ।

( ३ ) दानं प्रश्नपूर्वकं न देयम् । तदुक्तं शातातपेन—

"प्रश्नपूर्वन्तु यो दद्याद् ब्राह्मणाय प्रतिग्रहम् ।
स पूर्वं नरकं याति ब्राह्मणस्तदनन्तरम्" ॥ इति ।

प्रश्नपूर्वमित्यस्य "एतमध्यायं यदि त्वमस्खलितं पठसि तदा तुभ्यमेतावद्ददामि" इत्युक्त्वा तथा पठितवते यद्दद्यादित्यर्थः ।

पाद्यार्घ्यादिना पूजयित्वा गोः(१)प्राङ्मुख्या अवस्थापनम् । ॐ गवे नमः इति तस्या गोर्गन्धवस्त्रमाल्यादिना पूजनम् । (२)ब्राह्मणहस्ते

---

नन्दिपुराणे—

"किंत्वं वेत्सीति वक्तव्यो न दात्रा ब्राह्मणः क्वचित् ।
सोऽपि पृष्टः स्वयं तेन दानार्थं तं न कीर्तयेत्" ॥ इति ।

'यदि त्वमेतत्पठसि तदा तुभ्यमेतद्ददामि' इति साक्षात्परीक्षणमत्र निषिध्यते । पात्रत्वबोधार्थमुपायान्तरेण परीक्षणं त्वनुमतमेव । तदुक्तं यमेन—

"शीलं संवसनाज्ज्ञेयं शौचं संव्यवहारतः ।
प्रज्ञा संकथनाज्ज्ञेया त्रिभिः पात्रं परीक्ष्यते" ॥ इति ।
संकथनं शुद्धभावेन विद्याकथा ।

(१) गोदाने विश्वामित्रः—

"प्राङ्मुखीं गामवस्थाप्य सवत्सां तां सुपूजिताम् ।
पुच्छदेशे तु दाता वै स्नातो बद्धशिखो भवेत् ॥
उदङ्मुखस्तु विप्रः स्यात्पात्रलक्षणलक्षितः ।
आज्यपात्रं करे कृत्वा कनकेन समन्वितम् ॥
निक्षिप्य पुच्छं तस्मिंस्तु घृतदिग्धं प्रगृह्य च ।
सतिलं विप्रपाणिं तु प्रागग्रं तु निधापयेत् ॥
सतिलं सकुशं चापि गृहीत्वा दानमाचरेत् ।
अनेनैव तु मन्त्रेण पात्रहस्ते जलं क्षिपेत्" ॥ इति ॥

(२) सत्पात्रे गवादिदानं देयं तथा चोक्तम्—

"गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम् ।
नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता" ॥ इति ॥ (या० स्मृ० १ । २०१ ) पात्रलक्षणन्तु—

सर्वस्य प्रभवो विप्राः श्रुताध्ययनशीलिनः ।
तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः ॥

# THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, (किरणावलीभास्कर) [वैशेषिक],
a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1-12

No. 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त],
by Raṅgoji Bhaṭṭa,
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-12

No. 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त],
by Madhusūdana Sarasvatī.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1-12

No. 4—The Kusumāñjali Bodhanī, (कुसुमाञ्जलिबोधिनी) [न्याय],
a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A. Rs. 2-0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-2

No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा],
by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)—Ditto Ditto Rs. 0-12

No. 7-(Part I)-The Yoginīhṛdaya dīpikā, (योगिनीहृदयदीपिका)
[तन्त्र], by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-8

No. 7—(Part II) Ditto Ditto Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.

Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)-The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on S'āṇḍilyas Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-15

No. 10-(Part I)-The Siddhāntaratna, (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part II)—Do. Do. Rs. 2-12

No. 11-The S'rī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, (सिद्धसिद्धान्तसंग्रह) [नाथमार्ग], by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, ( त्रिवेणिका ) [अलङ्कार], by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part I)-The Tripurārahasya. ( Jñāna Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड) [शाक्तदर्शन],
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A Rs. 0-14

No. 15-( Part-II )—Do. Do. Rs. 2-4

No. 15-( Part III )—Do. Do. Rs. 2-0

No. 15-( Part IV )—Do. with Introduction, etc. by Gopinath Kaviraj, M. A.

No. 16-The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1-2

No. 17–The Nyāya Kalikā, (न्यायकलिका) [न्याय], by Bhaṭṭa Jayanta. Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A. D. Litt. Rs 0–14

No. 18–(Part I)–The Gorakṣa Siddhānta Saṅgraha. (गोरक्षसिद्धान्तसंग्रह) [नाथमार्ग], Ed. with a Prefatory Note by Gopinath Kaviraj, M. A., Rs. 0–14

No. 19–( Part. I )–The Prākṛita Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण], by Vararuchi with the Prākṛita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda. Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A. Rs 2–4

No. 19–( Part.II ) Ditto Ditto Rs. 2–12

No 19—( Part. III ) Introduction etc. ( In Preparation. )

No. 20–The Mānsatattvaviveka ( मांसतत्त्वविवेक ) [ धर्मशास्त्र ], by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya. Edited with Introduction etc. by Pandit Jagannatha S'āstri Hoshing Sāhityopādhyāya, with a Foreword by Pandit Gopi Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0–12

No. 21–( Part I ) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [ न्याय ], by Jayarāma Nyāya Pañchānana Bhaṭṭāchārya. Edited with Introduction etc. by Dr. Mangal Deva S'āstrī, M. A., D. Phil. ( Oxon ), Librarian, Govt. Sanskrit Library, Sarasvati Bhavana, Benares. Rs. 1–4

No. 21–( Part–II ) Ditto Ditto Rs. 2–0

No. 22–The Dharmānubandhi S'lokachaturdaśī ( धर्मानुबन्धिश्लोकचतुर्दशी) [धर्मशास्त्र], by S'ri S'eṣa Kṛṣṇa with a Commentary by Rāma Pandit. Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1–0

No. 23–The Navarātrapradīpa (नवरात्रप्रदीप) [धर्मशास्त्र ], by Nanda Pandit Dharmādhikārī. Ed. with Introduction etc. by Vaijanātha S'āstrī Varakale, Dharmaśāstra–S'āstrī, Sādholāl Research Scholar, Sanskrit

College, Benares, with a Foreword by Pandit Gopinath Kaviraj, M. A., Principal, Government Sanskrit College, Benares. Rs. 2-0

No. 24–The S'ri Rāmatāpiniyopaniṣad (रामतापिनीयोपनिषद्) [उपनिषद्], with the Commentary called Rāma Kāśikā in Pūrvatāpinī and Ānandanidhi in Uttaratāpinī by Ānandavana.
Ed. with Introduction etc. by Anantarāma S'āstrī Vetāla Sāhityopādhyāya, Post-Āchārya Scholar, Govt. Sanskrit College, Benares, with a Foreword by Pandit Gopī Nātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs 3-12

No. 25–The Sāpiṇḍyakalpalatikā ( सापिण्ड्यकल्पलतिका ) [ धर्मशास्त्र ], by Sadāśivadeva alias Āpadeva with a commentary by Nārāyaṇa Deva.
Edited with Introduction etc. by Jagannātha S'āstrī Hośinga, Sāhityopādhyāya, Sādholāl Research Scholar, Govt. Sanskrit College, Benares. Rs. 1-4.

No. 26–The Mṛgāṅkalekhā Nāṭikā ( मृगाङ्कलेखानाटिका ) [नाटिका], by Viśvanātha Deva Kavi.
Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityācharya, Asst. Librarian, Government Sanskrit Library, Benares. Rs. 1-0

No. 27–The Vidvachcharita Pañchakam ( विद्वच्चरितपञ्चकम् ) [निबन्ध], By Nārāyana S'āstri Khiste, Sāhityacharya, Assistant Librarian, Govt. Sanskrit College, Sarasvati Bhavana Library, Benares. With an Introduction by Gopināth Kaviraja, M.A., Principal, Govt. Sanskrit College, Benares. Rs. 2-0

No. 28–The Vrata Kos'a (व्रतकोश) [धर्मशास्त्र], by Jagannātha S'āstri Hośinga Sāhityopādhyāya, late Sadholal Research Scholar, Sanskrit College, Benares. With a Foreword by S'rī Gopinātha Kaviraja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 4-0

No. 29–The Vṛitti dīpikā (वृत्तिदीपिका) [व्याकरण], By Mauni S'rī Kṛṣṇa Bhatta.
Edited with Introduction etc. by Pt. Gangadhara S'astri Bhāradvāja, Professor, Govt. Sanskrit College, Benares. Rs. 1-2

No. 30–The Padārtha Maṇḍanam ( पदार्थमण्डनम् ) [ वैशेषिक ], By S'rī Venīdatta.

Edited with Introduction etc. by Pandit Gopāla S'āstri Nene, Professor, Govt, Sanskrit College, Benares. Rs. 0–14

No. 31 ( Part I )–The Tantraratna ( तन्त्ररत्न ) [ मीमांसा ], by Pārtha Sārathi Mis'ra.

Edited by M. M. Dr. Ganganatha Jha, M. A., D. Litt, Vice-Chancellor, Allahabad University Allahabad Rs. 1–14

No. 31–( Part II ) Ditto. Ditto.

Edited by Pt. Gopāl S'āstri Nene, Govt. Sanskrit College, Benares.

No. 32–The Tattvasāra ( तत्त्वसार ) [ न्याय ], by Rākhāldasa Nyāyaratna.

Edited with Introduction etc. by Harihara S'astri, Benares Hindu University. Rs. 1-0.

No. 33–( Part I ) The Nyaya Kaustubha ( न्यायकौस्तुभ ) [ न्याय ], by Mahadeva Puntamkar.

Edited with Introduction etc by Umes'a Misra, M. A., Allahabad University, Allahabad. Rs. 3–4

No. 34–( Part I ) The Advaita Vidyātilakam ( अद्वैतविद्यातिलकम् ) [ शाङ्करवेदान्त ], by S'rī Samarapuṅgava Dikṣita.

With a Commentary by S'rī Dharmayya Dikṣita.

Edited with Introduction, etc, by Ganapati Lal Jha, M. A., Sadholal Research Scholar, Govt. Sanskrit Library, Benares. Rs. 1–4

No. 35–The Dharma Vijaya Nāṭaka ( धर्मविजयनाटक ) [ नाटक ], by Bhūdeva S'ukla.

Edited with Introduction etc, by Pandit Nārāyaṇa S'astri Khiste, Asst. Librarian, Govt. Sanskrit Library, Benares. Rs. 1 4

No. 36–The Ānanda Kanda Champū ( आनन्दकन्दचम्पू ) [ चम्पू ], by Mitra Miśra.

Edited, with a Foreword by Gopinath Kaviraj, M. A., by Nanda Kishore Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 3–8

No. 37–The Upanidāna Sutra ( उपनिदानसूत्रम् ) [ वेद ],

Edited with Introduction by Dr. Mangaldeva S'āstri, M. A., D. Phil. Rs. 1–0

No 38–The Kiraṇāvali prakās'a dīdhiti ( Guṇa ), ( किरणावली-प्रकाशदीधिति ) [ वैशेषिक ], by Raghunāth S'iromani.

Edited by Pandit Badrināth Sāstri, M. A., Lucknow University. Rs. 1–12

No. 39–The Rāma Vijaya Mahākavya, ( रामविजयमहाकाव्य ) [ काव्य ], by Rupanātha.
Edited by Pt. Ganapatilal Jha, M. A. Rs. 2–0

No. 40–(Part I) The Kālatattva Vivechana (कालतत्त्वविवेचन) [धर्मशास्त्र], by Raghunātha Bhaṭṭa.
Edited with a Foreword by Gopinātha Kaviraja M.A. by Nanda Kishore S'arma Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No, 40 ( Part II ) Do Do

No. 41–(Part I) The Siddhānta Sārvabhauma (सिद्धान्तसार्वभौम) [ज्यौतिष], by S'rī Munīśvara.
Edited with Introduction etc. by Jyautiṣāchārya Pandit Murlidhara Thakkura, late Sadholal Scholar, Sanskrit College, Benares. Rs 3–0

No. 42–The Bheda Siddhi (भेदसिद्धि) [न्याय], by Vis'vanātha Panchānana Bhaṭṭachārya.
Edited with notes etc., by Nyāya Vyākaranāchārya Pandit Sūrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College Benares.

No. 43–( Part I ) The Smārtollāsa ( स्मार्तोल्लास ) [ कर्मकाण्ड ], by S'iva Prasāda.
Edited with Introduction, notes, etc, by Vedāchārya Pandit Bhagavat Prasad Miśra, Professor, Govt. Sanskrit College, Benares.

No. 44–( Part I ) S'ūdrāchāra S'iromaṇi (शूद्राचारशिरोमणि) [धर्मशास्त्र],
Edited by Sāhityāchārya Pandit Narayan S'astri Khiste.

No. 45–( Part I ) Kiranāvalī Prakāśa (Guna) (किरणावली प्रकाश-गुण) [ वैशेषिक ], by Vardhamāna.
Edited with a Foreword by Pt. Gopinath Kaviraj, M., A., by Pandit Badrinath S'astri, M. A., Lucknow University.

No. 46–( Part I ) Kāvya prakāśa dīpikā (काव्यप्रकाशदीपिका) [अलङ्कार], by S'rī Chandī Dāsa.
Edited by S'rī S'ivaprasāda Bhaṭṭachārya, M. A., Professor, Presidency College, Calcutta.

No. 47–Bhedajayaśrī ( भेदजयश्री ) [ माध्ववेदान्त ], by S'rī Tarkavāgīśa Bhaṭṭa Venīdattāchārya.
Edited with Introduction etc, by Pandit Tribhuvan prasad Upādhyāya, M. A., Inspector of Sanskrit Pāṭhashalas, United Provinces, Benares.

# THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its Evolution, by Gaṅgānātha Jhā.

(b) The View-point of Nyāya Vaiśeṣika Philosophy, by Gopinath Kaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 1-12

Vol. II—

(a) Paraśurāma Miśra alias Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) S'tudies in Hindu Law (2):—its sources, by Gaṅgānāth Jha

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha S'armā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj.

(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇa S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgā nātha Jha.

(c) Theism in Ancient India, by Gopinath Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭācharya.

(f) Indian Dramaturgy, by P. N. Patankar. Rs. 5.

**Vol. IV—**

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgānātha Jha.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Ṛgveda-Prātiśākhya, by Maṅgala Deva S'āstri.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Ramayanic Age, by Manmatha natha Roy

(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj.

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expansion of the Aryans. by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools, by G.L. Sinha. Rs 5

Vol. V—

(a) Ancient Home of the Aryans and their migration to India, by A. C. Ganguly.

(b) A Satrap Coin, by Shyamalal Mehr.

(c) An Estimate of the Civilisation of the Vanaras as depicted in the Rāmayaṇa, by Manmatha nātha Roy.

(d) A Comparison of the Contents of the Ṛgveda, Vajasaneya, Taittirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva S'āstri.

(e) Formal Training and the Ancient Indian Thought, by G.L. Sinha.

(f) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinath Kavirāj.

(g) A Descriptive Index to the names in the Rāmāyaṇa, by Manmatha nātha Roy.

(h) Notes and Queries, (1) Virgin Worship, by Gopinath Kaviraj. Rs. 5

Vol. VI—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob..

(b) Some Aspects of the History and Doctrines of the Nāthas, by Gopinath Kaviraj.

(c) An Index etc. the Ramayana, by Manmatha nātha Roy.

(d) Studies in Hindu Law by M. M. Gaṅganatha Jha.

(e) The Mimamsa manuscripts in the Govt. Sanskrit Library (Benares), by Gopinātha Kavirāj.

(f) Notes and Queries, by Gopinātha Kavirāj.

Vol. VII.

(a) Bhāmaha and his Kāvyālaṅkāra, by Baṭukanātha S'armā and Baladeva Upādhyāya.

(b) Some variants in the readings of the Vais'eṣika Sūtras, by Gopinātha Kavirāj.

(c) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinātha Kavirāj.

(d) An attempt to arrive at the correct meaning of some obscure Vedic words, by Sītāram Joshi.

(e) A comparison of the contents of the Rig Veda, Vajasaneya, Taittiriya, and Atharva Veda (Chāturadhyāyika) Prātis'ākhyas, by Mangal Deva Shāstri.

(f) An Index to the Ramayaṇa, by Manmatha Nāth Roy.

(g) An Index to S'abara's Bhāṣya, by the late Col. J. A Jacob.

(h) Gleanings from the Tantras, by Gopinātha Kavirāj.

(i) The date of Madhusudana Saraswati, by Gopinātha Kavirāj.

(j) Descriptive notes on Sanskrit Manuscripts, by Gopinātha Kavirāj.

(k) A note on the meaning of the word Parārdha, by Umes'a Mis'ra.

Vol. VIII.

(a) Indian Philosophy, by Taraknath Sanyal.

(b) An Index to the Rāmāyaṇa, by Manmatha Nath Roy.

(c) Index to S'abara's Bhāṣya, by the late Col. J. A Jacob

(d) Hari Svāmi, the commentator of S'atapatha Brāhmana and the date of Skanda Svami the commentator of the Rigveda, by Mangaladeva S'āstri.

(e) Mysticism in Veda, by Gopināth Kaviraj.

(f) The Deva dāsī: a brief history of the Institution, by Manmatha Nātha Roy.

Vol. IX (In progress)

(a) The Life of a Yogin, by Gopinātha Kavirāj.

## THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

( SANSKRIT )

## SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M. A.

**Kirana 1** ( In progress )

(a) Mangalam, etc, by Nārāyaṇa S'āstri Khiste.

(b) Mimansaka mata saṃgraha, by Haranchndra Bhaṭṭācharya.

(c) S'rimad Ācharya Mandana Mis'ra by Chinna Swami S'astri

(d) Bhagavato Buddhasya Charitam Upades'as'cha : by Gopinatha Kaviraj

**Kirana I** ( Supplement )

Sanskrita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma.

**Kirana II** ( In progress )

(a) S'āradā Prasādanam by Nārāyana S'āstri Khiste.

(b) Chūḍāmaṇi Dars'anam by S'as'adhara Tarkachūḍāmaṇi.

To be had of
The Superintendent
Government Press, U. P.,
Allahabad.

THE

PRINCESS OF WALES

# SARASWATĪ BHAVANA TEXTS

*No. 43*

( PART II )

—o—

EDITED BY

Mahāmahopādhyāya

GOPĪ NĀTHA KAVIRĀJA, M. A.

---

THE

# SMĀRTOLLĀSA

( PART II )

*Printed by Jai Krishna Das Gupta*
*Vidya Vilas Press, Benares City.*

---

1935

# स्मार्त्तोल्लासः

## श्री शिवप्रसादकृतः

( द्वितीयो भागः )

वेदाचार्य पण्डित श्रीभगवत्प्रसादशर्मणा
टिप्पण्यादिभिर्विभूष्य संशोधितः ।

---

THE

# SMĀRTOLLĀSA

BY

S'RĪ S'IVAPRASĀD.

( PART II )

EDITED WITH NOTES

By

VEDACĀRYA
BHAGVATPRASADA S'ARMĀ
Professor, Govt. Sanskrit College, Benares.

---

1935.

सुप्रोक्षितादिकरणम् । प्राङ्मुखः कर्ता उपविश्य प्रतिगृहीता उदङ्मुख उपविश्य कर्त्रा यथाशक्तिसुवर्णाज्यान्वितकांस्यपात्रे गोपुच्छनिक्षेपणम् । दक्षिणहस्तेन सपुच्छाज्यपात्रसतिलयवकुसुमजलानां च दानम् । देशकालयोरुच्चारणान्ते—

ॐ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।

न विद्यया केवलया तपसा वापि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ।

( या० स्मृ०१। १९९-२०० ) भविष्यपुराणे—

क्षान्तिः स्पृहा दया सत्यं दानं शीलं तपः श्रुतम् ।
एतदष्टाङ्गमुद्दिष्टं परमं पात्रलक्षणम् ॥ वशिष्ठः—

"स्वाध्यायाढ्यं योनिमन्तं प्रशान्तं वैतानस्थं पापभीरुं बहुज्ञम् ।
स्त्रीषु क्षान्तं धार्मिकं गोशरण्यं व्रतैः क्लान्तं तादृशं पात्रमाहुः" ।

"योनिमान्" प्रशस्तकुलोद्भवः । "वैतानस्थः" अग्निहोत्रादिकर्मपरः। "स्त्रीषु क्षान्तः" स्त्रीविषये क्षान्तः। "गोशरण्यः" गोशुश्रूषारतः ।

"स्वाध्यायवान्नियमवाँस्तपस्वी ध्यानान्वितश्च यः ।
क्षान्तो दान्तः सत्यवादी विप्रः पात्रमिहोच्यते" । महाभारते—

"साङ्गांस्तु चतुरो वेदान् योऽधीते वै द्विजर्षभः ।
षड्भ्यो निवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः ॥
किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे" ॥ बृहस्पतिः—

"ब्रह्मचारी भवेत्पात्रं पात्रं वेदस्य पारगः ।
पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदरे" । व्यासः-

"असङ्कीर्णं च यत्पात्रं तत्पात्रं तारयिष्यति" । इति ।

असङ्कीर्णं=योन्यादिसङ्कररहितम् । विशेषस्तु पात्रापात्रनिर्णयो हेमाद्रिदानखण्डे द्रष्टव्यः ।

यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥
गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥
यज्ञसाधनभूता या विश्वस्याघौघनाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

इत्युक्त्वाऽमुकगोत्रायाऽमुकप्रवरायाऽमुकशर्मणे ब्राह्मणायाऽमुकगोत्रोऽमुकशर्माऽहं प्रारीप्सितप्रायश्चित्तसाद्गुण्यकाम इमां गां सवत्सां (१)रुद्रदैवत्यां यथाशक्त्यलङ्कृतां तुभ्यं सम्प्रददे इत्युक्त्वा ति-

(१) अत्र प्रसङ्गाद् द्रव्यदेवताः लिख्यन्ते । तैत्तिरीये—

सोमाय वासः । रुद्राय गाम् । वरुणायाऽश्वम् । प्रजापतये पुरुषम् । मनवे तल्पम् । त्वष्ट्रेऽजम् । पूष्णेऽविम् । निर्ऋत्या अश्वतरगर्दभौ । हिमवते हस्तिनम् । गन्धर्वाप्सरोभ्य स्रगलङ्करणे । विश्वेभ्यो देवेभ्यो धान्यम् । वाचेऽन्नम् । ब्रह्मणे ओदनम् । समुद्रायापः । उत्तानायाऽङ्गिरसायानः । वैश्वानराय रथम् ।

विष्णुधर्मोत्तरहेमाद्रिदानमयूखेषु—

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता ।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः ॥
तथा चैकशफं सर्वं कथितं यमदैवतम् ।
महिषाश्वास्तथा याम्या उष्ट्रो वा नैर्ऋतो भवेत् ॥
रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत् ।
मेषं तु वारुणं विद्याद्वराहं वैष्णवं तथा ॥
आरण्याः पशवः सर्वे कथिता वायुदेवताः ।
जलपात्रांस्तु सर्वांस्तु वारिधानीं कमण्डलुम् ॥
कुम्भं च करकं चैव वारुणानि निबोधत ।

तिलकुशकुसुमजलाज्यपात्रान्वितगो(१)पुच्छस्य ब्राह्मणहस्ते दानम्।

समुद्रजानि सर्वाणि वारुणानि द्विजोत्तमाः ॥
आग्नेयदैवतं प्रोक्तं सर्वलोहानि चाप्यथ।
प्राजापत्यानि सस्यानि पक्वान्नमपि वै द्विज ॥
ज्ञेयास्तु सर्वगन्धा वै गान्धर्वाश्च विचक्षणैः।
बार्हस्पत्यं स्मृतं वासः सौम्या ज्ञेया रसास्तथा ॥
पक्षिणश्च तथा सर्वे वायव्याः परिकीर्त्तिताः।
विद्या ब्राह्मी विनिर्द्दिष्टा विद्योपकरणानि च ॥
सारस्वतानि देयानि पुस्तकादीनि पण्डितैः।
सर्वेषां शिल्पिभाण्डानां विश्वकर्मा तु दैवतम् ॥
द्रुमाणामथ पुष्पाणां शाकैर्हरितकैः सह।
फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः ॥
मत्स्यमांसे विनिर्द्दिष्टे प्राजापत्ये तथैव च।
छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ॥
उपानहौ च यानं च यच्चान्यत् प्राणिवर्जितम्।
तत्तु चाङ्गिरसत्वेन प्रतिगृह्णीत मानवः ॥
शूरोपयोगि यत् सर्वं शस्त्रवर्मध्वजादिकम्।
रणोपकरणं सर्वं विज्ञेयं सर्वदैवतम् ॥
गृहं तु सर्वदैवत्यं यदनुक्तं द्विजोत्तम।
विज्ञेयं विष्णुदैवत्यं सर्वं वा द्विजसत्तमाः ॥

हेमाद्रौ—यजुः पाठानन्तरं "राजा त्वा वरुणो नयतु देव दक्षिणे अमुकस्मै अमुकान्तेनामृतत्वमश्यां मयो दात्रे मयो मह्यमस्तु प्रतिग्रहीत्रे"। ततः कामस्तुतिः। ॐस्वस्तीति विशेषः।

(१) विष्णुधर्मोत्तरे—

"भूमेः प्रतिग्रहं कुर्याद्भूमिं कुर्वन् प्रदक्षिणम्।
करे गृहीत्वा कन्यां च दासदास्योर्द्विजोत्तमाः ॥

करं तु हृदि विन्यस्य धर्म्यो ज्ञेयः प्रतिग्रहः ।
आरुह्यतु गजस्योक्तः कर्णे वाश्वस्य कीर्त्तितः ॥
तथा चैकशफानां तु सर्वेषां च विशेषतः" । तथा कर्णः—
प्रतिगृह्णीत तान् शृङ्गे पुच्छे कृष्णाजिनं तथा ॥

तान् एकशफान् । अत्र शृङ्गिणामेकशफानां शृङ्गे इतरेषां कर्णे इति तु व्यवस्था ।

कर्णेऽजः पशवः सर्वे ग्राह्याः पुच्छे विचक्षणैः ।
गृह्णीयान्माहिषं शृङ्गे खरं वै पृष्ठदेशतः ।
प्रतिग्रहमथोष्ट्रस्य यानानां चाधिरोहणात् ।
बीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः ॥
वस्त्रं दशान्तादादद्यात् परिधायाथवा पुनः ।
आरुह्योपानहौ मञ्च आरुह्यैव तु पादुके ॥
धर्मध्वजौ तु संस्पृश्य प्रविश्य च तथा गृहम् ।
अवतीर्य च सर्वाणि जलस्थानानि वै द्विजाः ॥
ईषायां तु रथो ग्राह्यश्छत्रं दण्डे तथैव च ।
द्रुमांश्च प्रतिगृह्णीयान्मूलन्यस्तकरो द्विजः ॥
आयुधानि समादाय तथाऽऽमुच्य विभूषणम् ।

परिशिष्टे तु,—

प्रतिगृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे ॥
मूर्ध्नि दासीमजं चैव पृष्ठेऽश्वतरगर्दभौ ।
अश्वं कर्णे सटे वाऽपि अन्नमुद्दिश्य धारयेत् ॥
शय्यासनं गृहं क्षेत्रं संस्पृश्यादाय काञ्चनम् ।
उष्ट्रं च ककुदे स्पृष्ट्वा मृगांश्च महिषादिकान् ।
गोधामश्वविधानेन पुच्छे संस्पृश्य पक्षिणः ॥
दंष्ट्रिणो दंशिनश्चैव तथा क्षुद्रमृगाश्च ये ।
ओजस्विनां च सर्वेषामेष एव विधिः स्मृतः ॥

ॐ देवस्य त्वा सवितुरित्यादि पूष्णो हस्ताभ्यामित्यन्तं(१) मन्त्रं पठित्वा

छत्रं च चामरं मूले फलं संगृह्य गौरवात् ।
प्रगृह्योपानहौ मन्त्रं वाचयेत् प्रतिमुच्य वै ॥
वासस्त्वथ समादाय कन्यां शीर्ष्ण्यथ वै करे ।
रतिभार्यां परपूर्वां प्रतिगृह्णीत चाक्षताम् ॥
पुत्रमुत्सङ्गमारोप्य प्रतिगृह्णीत दत्तकम् ।
रथं रथमुखे स्पृष्ट्वा प्रतिगृह्णीत कूबरे ॥
कूबरो युगाधारकाष्ठम् ।
युग्यकाञ्चनवस्त्राणामङ्गयुक्ते प्रतिग्रहः" ॥ इति ॥

"हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा"(या०स्मृ०१।२०४)

"यथाकथंचिद्दातव्या धेनुं वाऽधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते" । इति ।

हेमाद्रौ व्यासः—

"न व्यङ्गां रोहिणीं वन्ध्यां न कृशां मृतवत्सकाम्
न वामनां वेहतां च दद्याद्विप्राय गां नरः" । इति ।

हेमाद्रौ देवलः—

"विवत्सां रोगिणीं रूक्षां स्थविरां खङ्गभीषणाम् ।
क्षीणां क्षीणशरीराङ्गीं दत्त्वा दोषमवाप्नुयात्" । इति ।

(१) "ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्" ।। मन्त्रार्थः—सवितुर्देवस्य प्रसवे = प्रेरणे सति तेन प्रेरितोऽहं त्वा = त्वां गृह्णामि । काभ्याम् अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां च । अंसमणिबन्धयोर्मध्यभागो दीर्घदण्डाकारो बाहुः । पञ्चाङ्गुलियुक्ताग्रभागो हस्तः । अश्विनौ हि देवानामध्वर्यू पूषा हि देवानां भागभुक् । अतो ग्रहणसाधनयोः स्वबाह्वोरश्विबाहुभावना कार्या ।

"रुद्राय त्वेति गाम्(१) "प्रतिगृह्णामी"त्युक्त्वा प्रतिग्रहणम्(२)"ॐ

हस्तयोस्तु पूषहस्तभावनेति भावः। किञ्च "सत्यं देवा अनृतं मनुष्या" इति श्रुतेः ( श० ब्रा० १।१।२।१७ ) देवानां सत्यरूपत्वात् तदनुस्मृतिपूर्वकं कर्म फलपर्यवसायित्वात् सत्यं भवति।देवतास्मृत्यभावे तु मनुष्याणामनृतरूपत्वात्तत्कृतमनुष्ठानं निष्फलत्वादनृतं भवतीति देवतास्मरणमित्यभिप्रायः। भावनानुकूला च सिद्धिर्भवति।

यथोक्तम्—"मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।

यादृशी भावना यस्य सिद्धिर्भवति तादृशी" इति।

प्रकृतमन्त्रे सवित्र्यश्विपूषशब्दानां नावमिकन्यायेना ( जै० ६। १। १२ ) नूह-इति प्रासङ्गिकम्।

( १ ) "रुद्राय त्वेति गाम्"( का० श्रौ० १०। २। २६ ) प्रतिगृह्णीयात्। "ॐरुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्र एधि मयो मह्यं प्रतिगृहीत्रे"। ( शु० य० सं० ७। ४७। इति। अत्र श्रुतिः—"अथ गौः प्राणमेवैतयात्मनस्त्रायते प्राणो हि गौरन्नꣳ हि गौरन्नꣳ हि प्राणः"इति। अथ मन्त्रार्थः-हे गौः रुद्ररूपाय मह्यं वरुणः त्वां ददातु सोऽहममृतत्वं प्राप्नुयाम्। हे गौः त्वं दात्रे यजमानाय प्राणः प्राणरूपा एधि मह्यं प्रतिगृहीत्रे वयोऽन्नं पशुर्वा भव। दुग्धदध्यादिरूपेणान्नं सन्ततिद्वारा पशुश्च भवेत्यर्थः।

( २ ) प्रतिग्रहविधिः ब्रह्माण्डपुराणे—

"शुचिः पवित्रपाणिश्च गृह्णीयादुत्तरामुखः।
अभीष्टदेवतां ध्यायन् मनसा विजितेन्द्रियः॥
कृतोत्तरीयको नित्यमन्तर्जानुकरस्तथा।
दातुरिष्टमभिध्यायन् गृह्णीयात्प्रयतः शुचिः॥ इति॥

प्रचेता—

"दक्षिणहस्तमध्ये ब्राह्मणस्याग्नेयं तीर्थं आग्नेयेन प्रतिगृह्णीयात्" इति। विष्णुधर्मोत्तरे—

प्रतिग्रहीता सावित्रं सर्वत्रैवानुकीर्तयेत् ।
ततस्तु कीर्तयेत्सार्द्धं द्रव्येण द्रव्यदेवताम् ॥
समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
तदन्ते कीर्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयम्" ।

सावित्रं सवितृदैवतं यजुः "देवस्य त्वा" इत्यादि । कामस्तुतिः "कोऽदात्" इत्यादिका ( शु० य० सं० ७।४८ ) ।

आदित्यपुराणे—

ॐ कारमुच्चरन् प्राज्ञो द्रविणं सकुशोदकम् ।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्तयेत् ॥
प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ।
मन्द्रं पठेत्तु राजन्ये उपांशु च तथा विशि ॥
मनसा तु तथा शूद्रे स्वस्तिवाचनमेव च ।
सोङ्कारं ब्राह्मणे कुर्यात् निरोंकारं महीपतौ ॥
उपांशु च तथा वैश्ये मनसा स्वस्ति शूद्रजे ।

प्रतिग्रहं प्रतिग्रहमन्त्रम् । मन्द्रं मध्यमस्वरम् । ब्राह्मणे दातरि सोङ्कारं स्वस्तिवाचनं कुर्यादित्यर्थः । एवं महीपतौ इत्यादा-वपि योज्यम् ।

अत्रायं विचारः । "प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् । मन्द्रं पठेत्तु राजन्ये उपांशु च तथा विशि । मनसा तु तथा शूद्रे स्व-स्तिवाचनमेव च" इत्यत्र ध्वनेरुच्चावचीभावः किं परमापूर्वप्रयुक्त उत अवान्तरापूर्वप्रयुक्त इति संशयः । तत्र परमापूर्वस्य फलवत्त्वा-दाद्यः पक्ष इति प्राप्ते--वाक्यगतमवान्तरापूर्वं सन्निकृष्टं तद्-द्वारकं परमापूर्वं विप्रकृष्टं । तस्मात्--अवान्तरापूर्वप्रयुक्ता एते धर्मा इति ( जैमिनेः ९।१।२ ) सिद्धान्तः ।

"ॐ कोऽदादित्यस्य स्वस्ती" त्यन्तस्य(१) पठनम्। सुवर्णपरिमितस्य यथाशक्ति सुवर्णस्य सतुलसीदलस्य दक्षिणात्वेन दानम्। "कृत-गोदानस्य प्रतिष्ठासिद्ध्यार्थं इमां हिरण्यदक्षिणां तुभ्यमहं सम्प्रददे न मम" "ॐ देवस्य त्वे"ति मन्त्रान्ते "ॐ अग्नये त्वे"(२)ति हिरण्यम्। "ॐ प्रतिगृह्णामी"तिपूर्ववत्प्रतिग्रहणम्। "ॐ द्यौस्त्वा-ददात्वि"ति मन्त्रेण वा प्रतिग्रहणम्। "ॐ को दादितिमन्त्रस्योंस्वस्ती" त्यन्तस्य पठनम्। ब्राह्मणाशिषां च ग्रहणमिति(३) गोदानम्।

(१) "ॐ कोऽदात् कस्मा अदात् कामोऽदात्कामायादात्। कामो दाता कामः प्रतिग्रहीता कामैतत्ते" (शु० य० सं० ७।४८)इति। कामदेवत्यम्। दातुर्दानाभिमानाभावाय स्वस्य च प्रतिग्रहज-दोषाभावाय च देहेन्द्रियात्मसङ्घाते कामं विविनक्ति। को नरोऽदाद्दत्तवान् कस्मै नरायादात् प्रश्नद्वयस्योत्तरमाह। कामोऽदात्कामायैवादात् न त्वं दाताऽहं प्रतिग्रहीता त्वत्कामाभिमानी देवो मत्कामाभिमानिनेऽदात्। एवं च काम एव दाता काम एव प्रति-गृहीता नान्यः। हे काम एतद् द्रव्यं ते तव दातृप्रतिगृहीतृत्वात्। इति मन्त्रार्थः।

(२) ॐ अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्र एधि मयो मह्यं प्रतिगृहीत्रे (शु०य० सं० ७।४७) इति। हिरण्यदैवतम्। हे हिरण्य वरुणेन कनकाद्यग्न्यादिभ्यो दत्तमतस्तेन तेनात्मना प्रति-गृह्णानो विप्रो न नश्यतीति देवतादेशः। अनेन विधिना गृह्णानः सोह-ममृतत्वमारोग्यमशीय व्याप्नुयाम्। हे हिरण्य त्वं दात्रे आयुर्जीवन-मेधि भव प्रतिग्रहीत्रे प्रतिग्रहकर्त्रे मह्यं मयः सुखमेधि दाता युष्मान् भवतु अहं सुखीस्यामिति भावः। इति मन्त्रार्थः।

(३) अथ प्राच्याङ्गधेनुप्रतिग्रहप्रायश्चित्तमाह, कूर्म्मपुराणे--

"प्रायश्चित्ताङ्गिनी धेनुः सा प्रच्याङ्गमुदीरिता।

प्रत्यक्षगोदानासम्भवे यथाशक्तितन्मूल्यदानम् । तत्रेत्थं प्रयोगः
प्रायश्चित्तपूर्वाङ्गतया विहितगोदानप्रत्याम्नायत्वेन यथाशक्तिगोमूल्यं

सर्वदा न प्रतिग्राह्या द्विजैर्धर्मपरायणैः" ॥

मत्स्यपुराणे—

"प्राच्याङ्गधेनुदाता च सर्वपापविवर्जितः ।
स याति ब्रह्मणः स्थानं पुनरावृत्तिदुर्लभम् ॥
धेनुं तां प्रतिगृह्णीयाद् द्विजो लोभपरायणः ।
कर्त्तुः सर्वाणि पापानि शीघ्रमाप्नोति निश्चितम् ॥
महान्तं नरकं गत्वा सूनुजन्म समेति च" ।

लिङ्गपुराणे—

"प्राच्याङ्गधेनुं गृह्णीयाद् द्विजः परमधार्म्मिकः ।
स याति नरकं घोरं यमलोके महत्तरे ॥
पश्चात् सूनुर्भवेत् सोऽपि यदि तां निष्कृतिं विना ।
प्राच्याङ्गधेनुं गृह्णीयाद् द्विजः परमधार्म्मिकः" ॥

तत्प्रतिग्रहे प्रयश्चित्तमाह रेणुकाखण्डे—

"प्राच्याङ्गभूर्यदा धेनुः सा धेनुः पापदायिनी ।
प्रतिग्रहीतुः सा सद्यः सर्वश्रेयोविनाशिनी ॥
ब्राह्मणैरभ्यनुज्ञातश्चरेच्चान्द्रायणत्रयम् ।
पश्चान्मनसि पूतात्मा पञ्चगव्यं पिबेत्ततः ॥
एवं शुद्धिमवाप्नोति नाऽन्यथा शुद्धिरीरिता" ।
इति हेमाद्र्युक्तं प्राच्याङ्गधेनुप्रतिग्रहप्रायश्चित्तम् ॥

अथोदीच्याङ्गधेनुप्रतिग्रहप्रायश्चित्तमाह लिङ्गपुराणे—

"द्विजो यः परितुष्टात्मा प्रायश्चित्ते नृपोत्तम ।
धेनुं द्वितीयां गृह्णीयाद् उदीच्याङ्गपयस्विनीम् ॥
तस्येह निष्कृतिर्नास्ति दानैस्तीर्थावगाहनैः ।
चान्द्रायणत्रयं कुर्य्यात् पूर्ववद्राजसत्तम ॥

तुभ्यमहं सम्प्रददे न ममेति, नात्र दक्षिणादानम्(१) ।

अथ महाव्याहृतिहोमकर्ता स्थण्डिलसमीपे उपविश्याचम्य प्राणा-नायम्य देशकालौ सङ्कीर्त्य प्रारीप्सितप्रायश्चित्तस्य पूर्वाङ्गतया विहितं महाव्याहृतिभिराज्येनाष्टोत्तरशतमष्टाविंशति वा होमं करिष्ये, इति सङ्कल्प्य स्थण्डिले पञ्च भूसंस्कारान् कृत्वा अत्र विटपनामाग्नेः स्थापनम् । अथ वैकल्पिकं स्मरेत् । तत्र पूर्वेण ब्रह्मणो गमनादि पूर्णपात्रान्तं पूर्ववत् ।

अथ ऋष्यादिस्मरणम् । इरावती वसिष्ठस्त्रिष्टप् (विष्णुः) पृथिवी,इदं विष्णुर्मेधातिथिर्गायत्री विष्णुः, मानस्तोक इति कुत्सो जगती रुद्रो, ब्रह्म जज्ञानं प्रजापतिस्त्रिष्टुप् (आदित्यः) ब्रह्मा, तत्सवितुर्विश्वामित्रो गायत्री सविता, ओङ्कारस्य ब्रह्मा गायत्री परमात्माग्निर्महाव्याहृतीनां प्रजापतिर्दैवीगायत्री दैवीउष्णिक्दैवीगायत्र्यग्निवायुः सूर्यो देवता सर्वेषां प्रायश्चित्ताङ्गपञ्चगव्यहोमे विनियोगः । ॐभूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निर्वायुः सूर्यो देवता, त्वन्नः सत्वन्नः अयाश्चाग्ने ये ते शतमिति मन्त्राणां वामदेव ऋषिः त्रिष्टुप्छन्दः अग्नीवरुणौ देवते द्वयोस्तृतीयस्याग्निश्चतुर्थस्य वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का, उदुत्तममिति शुनः-

ततः शुद्धिमवाप्नोति परत्राऽमुत्र च ग्रहात् ।

इति हेमाद्र्युक्तं उदीच्याङ्गधेनुप्रतिग्रहप्रायश्चित्तम् ॥

(१) नात्र दक्षिणादानमनवस्थानात् । दक्षिणायां दीयमानदक्षिणाया अपि सदक्षिणत्वावश्यकतया तत्रापि दक्षिणा दानप्रसक्तेस्तस्या अपि दानरूपत्वेन दक्षिणान्तरप्रसक्तिरिति रीत्यानवस्थापत्तेः ।

शेपस्त्रिष्टुप् वरुणो देवता सर्वेषामाज्यहोमे विनियोगः ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोममाज्येन अग्निं वायुं सूर्यं प्रजापतिमष्टोत्तरशतं वाष्टाविंशतिं वा आज्येन, पुनरत्र प्रधानम् पृथिवीं विष्णुं रुद्रं ब्रह्माणं अग्निं सोमं सूर्यं परमात्मानं प्रजापतिं अग्निं स्विष्टकृतं पञ्चगव्येनैकैकमाहुतिभिः, अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं प्रजापतिमेता देवता आज्येनास्मिन् प्रायश्चित्तकर्मणयहं यक्ष्ये ।

ततो ब्रह्मोपवेशनादि पात्रासादनान्ते उपकल्पनीये विशेषः- सुवर्णादिपात्रं पद्मपलाशादिपात्रं वा यज्ञियकाष्ठं हरितानि सप्त कुशपत्राणि पञ्चगव्यञ्च गोमूत्रादिपृथक्पृथगिति, तत आज्यभागान्ते ऽष्टोत्तरशतमष्टाविंशतिर्वाज्यहुतीनां व्यस्तसमस्ताभिर्होमः (१) ॥

ॐभूः स्वाहा इदमग्नये न मम । ॐभुवः स्वाहा इदं वायवे न मम । ॐस्वः स्वाहा इदं सूर्याय न मम । ॐभूर्भुवः स्वः स्वाहा

(१) केचिन्महाव्याहृतिहोमे गृह्योक्तसाधारणहोमेतिकर्तव्यतां नेच्छन्ति तदयुक्तं "एष एव विधिर्यत्र कचिद्धोमः" (पा० गृ० १।१।५) इत्यनेन "अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यंᳵस्विष्टकृच्च, एतन्नित्यं० सर्वत्र (पा० गृ० १।५।३-४) इत्यनेन च प्राप्ताया होमेतिकर्तव्यताया अपवादमन्तरेण बाधायोगात् । अन्ये तु निरूप्याज्यमग्नावधिश्रित्य कुशैः स्रुवं सम्मृज्योद्वास्य पवित्राभ्यामुत्पूयावेक्ष्य कुशानुपगृह्याग्निं पर्युक्ष्य जुहुयादि (श्रौ० ४।१०।५) त्येवमत्रपूर्णाहुतिमिच्छन्ति तदप्ययुक्तं श्रौतानां पूर्णाहुतिधर्माणां वचनमन्तरेण स्मार्तकर्मण्यप्रवृत्तेः ।

इदं प्रजापतये न मम । केचिदत्र सर्वत्र इदं महाविष्णवे पापघ्ने इति त्यागं वदन्ति, एवं सप्तवारं कृते अष्टाविंशतिराहुतयः सप्तविंशतिवारं कृतेऽष्टोत्तरशतमाहुतयश्च भवन्ति ।

अथ ब्रह्मकूर्चेन होमः सुवर्णादिपा(१)त्रे पद्मपलाशादि पात्रे

---

(१) ब्रह्मकूर्चे पात्रं प्रजापतिराह—

"पालाशं पद्मपत्रं वा ताम्रं वाऽथ हिरण्मयम् ।

गृहीत्वाऽऽस्वादयित्वा च ततः कर्म समाचरेत्" ॥ इति ।

ब्रह्मकूर्चाङ्गभूतानां गोमूत्रादीनां पञ्चानां कारणभूताः याः पञ्च गावस्तासां वर्णविशेषाः—

"गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् ।

पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ॥

कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वा ॥"

गोमूत्रादीनां कुशोदकान्तानां षण्णां द्रव्याणां प्रत्येकं परिमाणविशेषः—

"मूत्रमेकपलं दद्यादङ्गुष्ठार्धं तु गोमयम् ।

क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते ॥

घृतमेकपलं दद्यात् पलमेकं कुशोदकम्" ॥ इति ।

इदं परिमाणं हेमाद्रि ( प० १०२३ ) सम्मतम् ।

विष्णुधर्मोत्तरे परिमाणमन्यथोक्तम्—

गोमूत्रं भागतस्तस्मार्द्ध शकृत्क्षीरस्य च त्रयम् ।

द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिजः ॥

अन्यकथाकालादिविषये गोमूत्रादीनां परिमाणमन्यथोक्तम् । वृद्धपराशरः—

"गोमूत्रे माषकान्यष्टौ गोमयस्य तु षोडश ।

क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ॥

वा ताम्राया: कृष्णाया: वा गोः पलमितस्याष्टमाषमितस्य वा गोमूत्रस्य गायत्र्या ग्रहणम् । ॐगन्धद्वारामिति मन्त्रेण श्वेताया: गोः अङ्गुष्ठार्धमितस्य षोडशमाषमितस्य वा(१)गोस्त्रिपलस्य दशमाषपरिमितस्य वा गोमयात्पञ्चगुणस्य गोमूत्राद् द्विगुणस्य वा दध्नो ग्रहणम् । ॐतेजो(२)सीति मन्त्रेण कपिलाया: नीलाया: वा गोरेकप-

गोमूत्रवद् घृते ज्ञेयं तदर्धं तु कुशोदकम् ।"

प्रजापतिः—

"गोमयाद् द्विगुणं मूत्रं सर्पि दद्याच्चतुर्गुणम् ।
क्षीरमष्टगुणं देयं दधि पञ्चगुणं तथा" ॥ इति ।

गोमूत्रादीनाम्मन्त्राः पराशरेणोक्ताः—

"गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णस्तथा दधि ॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।
पञ्चगव्यमृचा पूतं स्थापयेदग्निसन्निधौ" ॥

शालाग्निसत्त्वे तु जाबालिः—

"आरम्भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः ।
आज्येनैव तु शालाग्नौ जुहुयाद् व्याहृतीः पृथक्" इति ।

इति वचनाच्छालाग्नौ होमः ।

(१) "गोमयस्य ग्रहणम् । ॐ आप्यायस्वेति ताम्राया: (श्वेताया: वा ) हेमवर्णाया वा गोः सप्तपलमितस्य द्वादशमाषमितस्य वा गोमयाच्चगुणस्य गोमूत्रत्रिगुणस्य वा क्षीरस्यादानम् । ॐ दधिक्राव्ण इति रक्ताया: कृष्णवर्णाया वा" इति पाठः सर्वादर्शपुस्तकेषु त्रुटितः ।

(२) पञ्चगव्यग्रहणमन्त्राः—

"ॐ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्" । ( शु० य० सं० ३।३५ ) ।

लस्याष्टमाषमितस्य वा गोमयाच्चतुर्गुणस्य वा आज्यस्य ग्रहणम् । ॐदेवस्य त्वेत्यादिकेन पूष्णो हस्ताभ्यां गृह्णामीत्यन्तेन मन्त्रेण पलमितस्याष्टमाषमितस्य वा तदर्द्धं कुशोदकग्रहणम् । गोमूत्रादि कपिलाया ग्राह्यम्, अलाभे गव्यमात्रम्, ततः प्रणवेन हस्तेनालोडनम्, प्रणवेनैव यज्ञियकाष्ठेन निर्मन्थनम्, प्रणवेनाभिमन्त्रणम्, पञ्चगव्येन हरितैः सप्त कुशपत्रैर्दशाहुतिभिर्होमः(१) । ॐइरावती० स्वैः स्वाहा ।

"ॐ गन्धद्वारां दुराधर्षां" ( पूर्वं ६५ पत्रे टिप्पण्याम् )

"ॐ आप्यायस्व समेतु ते व्विश्श्वत꣡ सोम वृष्ण्यम् ॥ भवा व्वाजस्य सङ्गथे" ॥ ( शु० य० सं १२।११२ ) ॥

"ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्श्वस्य व्वाजिन꣡ ॥ सुरभि नो मुखा करत्प्र णऽ आयू꣡षि तारिषत्" (शु०य०सं०२३।३२)

"ॐ तेजो ऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियन्देवानामनाधृष्टन्देवयजनमसि" ( शु० य० सं० १।३१ ) ।

"ॐ देवस्य त्वा" पूर्वं १०६ पत्रे द्रष्टव्यः ।

(१) अत्र पञ्चगव्यहोमेऽवदान होमसाधनानां स्रुवादीनामभावात् केनावदाय होतव्यमित्याशङ्कायाम्—

"सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ।
एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि" ॥

इति । सप्तसङ्ख्या अवरा अधमा येषां दर्भाणां ते सप्तावराः । सप्ताष्टाद्यधिकदर्भसङ्ख्या गृहीतव्या । न तु षट् पञ्चादि न्यूनसङ्ख्येत्यर्थः । तैर्दर्भैरवदाय पलाशपत्रेण होतव्यम् ।

तथा च प्रजापतिः—

"स्थापयित्वा तु दर्भेषु पालाशैः पत्रकैरथ ।
तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमम् ॥

इति दर्भेष्वित्यभिधानात् पात्रस्याधस्तादपि दर्भानास्तृणुयात् ।

इदं पृथिव्यै न मम । "ॐ इदं विष्णुः० सुरे" स्वाहा । इदं विष्णवे न० । "ॐ मानस्तोके० महे स्वाहा" इदं रुद्राय न० । उदकोपस्पर्शः । "ॐ ब्रह्म जज्ञानं० वः" स्वाहा इदं ब्रह्मणे न० । अग्नये स्वाहा-

---

पञ्चगव्यहोममन्त्रस्तु—

"इरावती इदं विष्णुर्मानस्तोकेति शंवती ।
एताभिश्चैव होतव्यं हुतशेषं पिबेत् द्विजः ॥

इति । इरेत्यादीनि त्रीणि प्रसिद्धानि । शमित्येष शब्दो यस्या-मृचि अस्ति सा शंवती "शन्नोदेवीरभिष्टये" इति मयूखे प्रदर्श्या । शंवतीत्यनेन "शन्न इन्द्रा" इति मन्त्रो महार्णवे । एतच्चाग्नये स्वाहेत्या-दीनामप्युपलक्षणम् ।

अत एव प्रजापतिः—

अग्नये चैव सोमाय सावित्र्यै च तथव च ।
प्रणवेन तथा हुत्वा स्विष्टकृच्च तथैव च ।
एवं हुत्वा च तच्छेषं पिबेच्चैव समाहितः"

पानस्येतिकर्त्तव्यता—

"आलोड्य प्रणवेनैव निर्मन्थ्य प्रणवेन तु ।
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु" ॥

पानमन्त्रः—

"यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
ब्रह्मकूर्चो दहेत् सर्वं प्रदीप्ताग्निरिवेन्धनम्" ।

ब्रह्मकूर्चस्य कालविशेषे प्रजापतिः—

"चतुर्दश्यामुपोष्याथ पौर्णमास्यां समाचरेत् ।"

जाबालिरपि—

"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमिति स्मृतम्" ॥

इदमग्नये न० । सोमाय स्वाहा इदं सोमाय न० । "ॐ तत्सवितु र्व्यात् स्वाहा इदं सवित्रे न० । ॐ स्वाहा इदं परमात्मने न० । ॐ भूर्भुवः

देशविशेषाः—

नदीतीरेषु गोष्ठेषु पुण्येस्वायतनेषु च ।
तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेत् ॥

ब्रह्मकूर्चस्य सर्वपापदाहकत्वम्—

"पवित्रं त्रिषु देवेषु देवताभिरधिष्ठितम् ।
वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः ॥
दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविः"

इति वरुणादिभिरधिष्ठितत्वात्पापदाहकत्वमुपपन्नम् ।

अथ पञ्चगव्यहवनमन्त्राः—

ॐइरावती धेनुमती हि भूत ठं० सूयवसिनी मनवे दशस्या ॥ व्यस्कभ्नारो दसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा" ( शु०य०सं०५।१६ ) ॥

"ॐइदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ॥ समूढमस्य पाᳪसुरे स्वाहा" ( शु०य०सं०५।१५ ) ॥

ॐमा नस्तोके तनये मा नऽआयुषिमानो गोषुमानो ऽअश्वेषु रीरिषः ॥ मा नोव्वीरान्रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ( शु०य०सं०१६।१६ )

ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः । ( शु०य०सं०१३।३ ) ॥

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः । ( शु०य०सं०३६।१२ )

स्वः स्वाहा ॥ इदं प्रजापतये न मम ॥ ॐअग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते न० ॥ ततो भूराद्यानवाहुतयः ।

ततः संश्रवप्राशनादि प्रणीताविमोकान्तं कृत्वा प्रायश्चित्तहोमस्य साद्गुण्यतासिद्ध्यर्थं ब्रह्मणे पूर्णपात्रं वरो वा दक्षिणां तुभ्यमहं सम्प्रददे । ततः तारकोदये व्रतग्रहणं करिष्ये, इति सङ्कल्पः । द्विजान् पृष्ट्वा कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत् । तस्मिन् दिने उपवासः । अशक्तस्य हविष्यान्नं तत उत्तराङ्गानि कुर्यात् । देशकालौ सङ्कीर्त्यामुकशर्मणो मम जन्मप्रभृतिअद्यदिनं यावदित्यादि ( पूर्वं ८० पत्रे ) निरासार्थमेतावत्सङ्ख्याकान् प्राजापत्यानमुकप्रत्याम्नायद्वारा अहमाचारिष्ये । इति प्रधानसङ्कल्पः ।

प्रक्रान्तप्रायश्चित्तस्योत्तराङ्गानि करिष्ये । इति सङ्कल्पः । व्याहृतिभिराज्यहोमः, प्रायश्चित्ताङ्गविष्णुश्राद्धगोदानं च पूर्ववत् (पत्र१००–११२) कृत्वा ततो "यस्य स्मृत्ये"ति विष्णुं स्मृत्वा मयाऽऽचरितेन प्राच्योदीच्याङ्गसहितेन ( प्रायश्चित्तेन ) पापापहा महाविष्णुः प्रीयतां न मम ।

अथ शक्तौ सत्यां दश दानानि कार्याणि । तानि च —

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।

रौप्यं लवणमित्याहुर्दशदाना( नि पण्डिताः ) न्यनुक्रमात् ॥

आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मया आचरितप्रायश्चित्तस्य साद्गुण्यकामः सुखेन पुण्यलोकप्राप्तिकामो महाविष्णुप्रीतिकामो वा गवादिदशदानान्यहं करिष्ये । इति सङ्कल्प्य ततः

गोदानम् मन्त्रादि (पूर्वे १०३ पत्रे) गोदानवत् ।

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥

द्वात्रिंशत्पाणिका गावः(१) ।

अथ भूमिदानम् ।

अमुकसगोत्रं अमुकप्रवरं अमुकशाखाध्यायिनं अमुकशर्माणं ब्राह्मणं भूमिदानप्रतिगृहीतारं त्वामहं वृणे । इति विप्रवरणम् । भूमिदानपात्रभूत ब्राह्मण एष ते पाद्यम्, एष ते अर्घः, पादप्रक्षालनम्, एष ते गन्धः, एतत्ते पुष्पम्, स्वकीयपादौ प्रक्षाल्याचम्य गन्धमाल्यादिभिरर्चनम्, सकुशयवतिलजलदानम्, देशकालसङ्कीर्तनान्ते—

ॐ "सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्त(सस्य)पुण्यफलदा अतः(ततः) शान्तिं प्रयच्छ मे ॥"

इत्युक्त्वा अमुकसगोत्रायामुकशर्मणे ब्राह्मणायामुकसगोत्रोऽमुकशर्माहं आचरितप्रायश्चित्तसादगुण्यकामः सुखेन पुण्यलोकप्राप्तिकामो वा इमां निवर्तनमितां भूमिं(२) विष्णुदैवत्यां तुभ्यमहं

---

(१) गोनिष्क्रयस्तु—"द्वात्रिंशत्पाणिका गाव"इति (५५ पत्रे) कात्यायनेन मूल्यपरिशिष्टेऽप्युक्तं तत्ताम्रमानेन वराटकमानेनाथवा रौप्यरजतसुवर्णमानेन दातव्यम् ।

(२) कात्यायनः—

न चोषरां न निर्दग्धां महीं दद्यात् कथंचन ।
न श्मशानपरीतां च न च पापनिषेविताम् ॥

सम्प्रददे । इत्युक्त्वा ब्राह्मणहस्ते कुशादियुक्तजलप्रक्षेपः । "ॐदेव-स्यत्वे"ति "द्यौस्त्वे"ति वा मन्त्रं पठित्वा विप्राय भूमिम् । "ॐप्र-तिगृह्णामी"त्युक्त्वा भूमेः प्रदक्षिणां कृत्वा प्रतिग्रहणम् । "ॐ

---

पापाः=हिंस्रप्राणिनो व्याघ्रादयः । विष्णुधर्मोत्तरे—

सोषरां तस्कराकीर्णां तथा व्यालवतीं भुवम् ।
न दद्यात्तु द्विजश्रेष्ठो या च सन्धिषु संस्थिता ॥

( १ ) दानप्रतिष्ठायां हिरण्यदक्षिणा ।

प्रसङ्गतः देयहिरण्यादीनां परिमाणं निरूप्यते ।

तत्र दानकमलाकरे शातातपीये कर्मविपाके उक्तम्—

निवर्तनमिता भूमिर्द्रोणत्रय ( द्वय ) मितास्तिलाः ।
कर्षमात्रं सुवर्णं स्यादाज्यं सप्रस्थमाढकम् ॥
वाससी द्वितयं दद्याद् गुडं च पलषष्टिकम् । ६० पलमितम् ।
निष्कत्रयमितं रौप्यं लवणं सार्धखारिकम् ॥

कर्षचतुष्टयमितं रजतं रजतनिष्कः । तत्त्रयमितं १२ कर्षमितं रजतं । १६ पलाधिक—७७ सेटकमितं लवणं सार्धखारिकं भवति । सेटकश्च अशीतिकर्षात्मकः । वस्त्रं च सूक्ष्ममष्टहस्तायतं द्विहस्त-विशालम् ।

सार्धखारीमितं (द्वयं)धान्यं परिमाणं प्रकीर्तितम् । इति ।

मिताक्षराटीकायां दानप्रकरणे पुराणान्तरे—

भूमिरल्पो यथाशक्ति तिलद्रोणो द्वयं तथा ।
गौः सुशीला च दोग्ध्री च कुम्भैराज्यं च पञ्चभिः ॥
कुम्भो द्रोणद्वयम् ।
पलमेकं तु रौप्यस्य सुवर्णस्य सुवर्णकः ॥

सुवर्णकः कर्षः—

दशावस्त्रैर्महादानं दातव्यं च मुमुक्षुणा ॥ इति ।

कोऽदादि''त्यादि ''कामैतत्ते'' ''ॐस्वस्ती'' त्यन्तं मन्त्रपठनम् ।
''दशहस्तेन दण्डेन त्रिंशद्दण्डनिवर्तनमि''ति निवर्तनस्वरूपम् ।

अथ तिलदानम् ।

तत्र विप्रवरणादिदेशकालोच्चारणान्वितेषु वक्ष्यमाणेषु ज्ञेयम् ।

महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः ॥
तस्मादेषां प्रदानेन मम पापं व्यपोह(१)तु'' ।

इत्युक्त्वा अमुकसगोत्रायेत्यादि अमुककाम इत्यन्तं पूर्ववदुच्चार्य द्रोणत्रयपरिमितानेतांस्तिलान् प्रजापतिदैवत्यान्तुभ्यमहं सम्प्रददे । ब्राह्मणहस्ते जलाद्यन्वितमुष्टिमात्रतिलदानम् । ''ॐ देवस्य त्वे''ति मन्त्रान्ते ''प्रजापतये''ति तान् ''प्रतिगृह्णामी''त्युक्त्वा प्रतिग्रहणम् । ''कोऽदादि''त्यादि ''ॐ स्वस्ती''त्यन्तं मन्त्रपठनं च ।

अथ हिरण्यदानम् ।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे(२) ॥

---

(१) हेमाद्रौ तु—

''तिलाः पापहराः नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानादसत्यं मे पापं नाशय केशव'' ।

(१०२६ पत्रे) इति तिलदानमन्त्रः । दानप्रतिष्ठायां हिरण्यं देयम् ।

(२) हेमाद्रौ हिरण्यदानमन्त्रः—

''स्वर्णं पवित्रममलं स्वर्णं पापप्रणाशनम् ।
स्वर्णं हि शङ्करो यस्मादतः शान्तिं प्रयच्छ मे'' ॥ इति

अत्र दानप्रतिष्ठायां रजतदक्षिणा देया ।

इत्युक्त्वा अमुकसगोत्रायेत्यादि अमुककाम इत्यन्तं पूर्ववदुच्चार्य निष्कपरिमितमिदं सुवर्णमग्निदैवतं तुभ्यमहं सम्प्रददे । ब्राह्मणहस्ते जलादियुक्तसुवर्णदानम् । "ॐ देवस्य त्वेति अग्नय" इदं सुवर्णं प्रतिगृह्णामि "कोऽदादि"ति । "निष्कं सुवर्णाश्चत्वार" इति निष्करूपम् ।

## अथाज्यदानम् ।

कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारमतः शान्तिं प्रयच्छ मे ॥

अमुकगोत्रायेत्यादि प्रस्थाधिकाढकपरिमितमिदमा(१)ज्यं

---

हिरण्योत्पत्तिः—

"आपो वरुणस्य पत्न्य आसन् ता अग्निरभ्यध्यायत्, ताः सम्भवत्, तस्य रेतः परापतत्, तद्धिरण्यमभव" (तै० सं० ५।५।४।१) दिति । "अग्निरेतसं वै हिरण्यम् (श० ब्रा० ३।२।४।३) इति हिरण्यदानफले श्रुतिः—"हिरण्यदा अमृतत्वम्भजन्ते"

(ऋ० १०।१०।७।२)

हिरण्यधारणमपि श्रुतौ विहितम्—

"न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत् । यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः । (शु० य० ३४।५१)

(१) आज्यदाने दानप्रतिष्ठायां हिरण्यं दक्षिणा देया । अत्र किमाज्यशब्दो निर्वापादिसंस्कार निमित्त उत जाति निमित्त इति, तत्र संस्कृतऽआज्ये प्रायेणाज्यशब्दप्रयोगदर्शनात् संस्कारनिमित्त इत्येवं प्राप्ते-इदमुच्यते आज्ये विहिते घृतं प्रतीयात् असंस्कृतमेव घृतं गृह्णीयात् जातिनिमित्तोऽयमाज्यशब्दो न संस्कारनिमित्त इत्यर्थः

सोमदैवतं तुभ्यमहं सम्प्रददे । इति जलान्विताज्यपात्रस्य विप्रहस्ते-
दानं, "देवस्य त्वे"ति सोमायाज्यं प्रतिगृह्णामि स्वस्तीति पूर्ववत् ।

---

यतोऽसंस्कृतेऽपि जातिमात्रे प्रयोगो लोके वेदे च दृश्यते क्रय्यमाज्यम् क्षीणमाज्यम् तैलमुपसेचने वर्तते जातिं विना लोके वेदे च प्रयोगो नास्ति विना संस्कारं लोके प्रयोगोऽस्ति अतो जातिनिमित्त एवेति, प्रयोजनं श्रौते "आज्येन यूपमनक्ति" (श०ब्रा० ३।८।१।११) "आज्य-मासिच्यौदुगात्रे सौम्यं प्रयच्छति" इत्यादौ पञ्चगव्यादावाज्यग्रहणे आज्यदानादौ च संस्कारा न कर्तव्याः ।

तथा हि जैमिनिः—

"बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः" ( १।४।१० ) ।

कात्यायनश्च—

"घृतमाज्ये" ( का० श्रौ० १।८।३६ ) इति । सर्वत्र आज्यं सति सम्भवे गव्यं ग्राह्यम् । अत्र कात्यायनः—

"लिङ्गात्" ( का० श्रौ० १।८।३७ ) मन्त्रलिङ्गादाज्यं गव्यं भवति गवां सम्बन्धि भवति किं लिङ्गं "महीनां पयासी"ति (शु०य० सं० ४। १) "मह्य इति ह वा एतासामेकं नाम यद् गवा" (श०ब्रा० ३।१।३।६) मिति ।

"नियते सामान्यतः प्रतिनिधिः स्यात्" ( का० श्रौ सू० १।४।२ ) इति सूत्रात्—

"द्रव्ये प्रतिनिधिर्नास्ति विद्यते वा, न विद्यते ।
मानाभावादस्ति कर्मचोदनाऽऽक्षेपिका यतः" ।

( जै० न्यायमाला ६।३।४ ) इति न्यायाच्च गव्याज्याभावे माहि-षाद्यपि ग्राह्यम् । अतश्चोक्तं मण्डनमिश्रैः—

"घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् ।
आजं वा तदभावे तु साक्षात्तैलं ग्रहीष्यते ॥

### अथ वस्त्रदानम् ।

शीतवातोष्णसन्त्राणं लज्जानिर्हरणं परम् । ( लज्जाया रक्षणं परम् ) ॥

---

तैलाभावे ग्रहीतव्यं तैलं जर्तिलसम्भवम् ।
तदभावेऽतसीस्नेहः कौसुम्भः सर्षपोद्भवः ॥
वृक्षस्नेहोऽथवा ग्राह्यः पूर्वालाभे परः परः ।
तदभावे यवव्रीहिश्यामाकान्यतमोद्भ(वः) वम् ।
पिष्टमालोड्य यत्नेन घृतार्थे योजयेत्सुधीः ॥
वृक्षतैलेषु पुन्नागनिम्बैरण्डोद्भवं त्यजेत्" ।

अस्मिन्नेवार्थे भरद्वाजमतम्—

"भरद्वाजोऽन्यथा प्राह घृतप्रतिनिधिं मुनिः ।
गव्याज्याभावतश्छागमहिष्यादेर्घृतक्रमात् ॥
तदभावे गवादीनां क्रमात्क्षीरं विधीयते ।
तदलाभे दधि ग्राह्यमलाभे तैलमिष्यते ।
यत्राज्यमञ्जनाद्यर्थे न लभ्येत कथञ्चन ।
तत्र क्षीरमनादृत्य साक्षात्तैलं ग्रहीष्यते ॥
यत्र मुख्यं दधिक्षीरं तत्रापि तदभावतः ।
अजादेः क्षीरदध्यादि तदभावे तु गोघृतम् ॥
मुख्यासन्नोऽथवा ग्राह्यः कार्यकारणसन्ततौ ।
अत एव घृताभावे पूर्वं दधि ततः पयः ॥

इति ( त्रि० मं० २१४२-५० ) तथा—

"येषां केषांचिदन्येषां हविषामप्यसम्भवे ।
सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतात्" इति ।

प्रतिनिध्युपादानेऽपि मुख्यशब्देनैव तदुपादानम् । अत्र कात्यायनः—
"शब्देऽविप्रतिपत्तिः" ( का० श्रौ० सू० १।४।६ ) ।

देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥

अमुकगोत्रायेत्यादि इमे सूक्ष्मे(१) वाससी बृहस्पतिदैवते तुभ्यमहं सम्प्रददे कुशजलान्विताया वस्त्रदशाया विप्रहस्ते दानम् । "ॐ देवस्य त्वेति, बृहस्पतये वाससी प्रतिगृह्णामि कोऽदादि"ति स्वस्ती"त्यन्तं पूर्ववत् ॥

अथ धान्यदानम् ।

सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥

---

प्रतिनिधावुपात्तेऽपि विहितद्रव्यवाचिनि शब्देऽविप्रतिपत्तिरविपरिणामः = अनूहो भवति कुतः प्रतिनिधिः श्रुतद्रव्यबुद्ध्या गृह्यते न तु द्रव्यान्तरबुद्ध्येति ।

तथाहि यज्ञपार्श्वपरिशिष्टे वचनम्--

"घृतं वा यदि वा तैलं पयो दधि च यावकम् ।
संस्कारयोगादेतेषु आज्यशब्दो विधीयते" इति ।

मण्डनश्च--

"मुख्याभिधायकान्मन्त्राननूहेनैव कीर्तयेत् (२।१०८) इति ।

विशेषस्तु प्रतिनिधिविषये जैमिनीयपूर्वमीमांसायाः षष्ठाध्यायस्य तृतीयः पादः, त्रिकाण्डमण्डनस्य द्वितीयं प्रतिनिधिनिरूपणात्मकं काण्डं च द्रष्टव्यम्

( १ ) अत्र शोभनं वस्त्रं दातव्यं तथाहि श्रुतिः--

"शोभनठं० ह्येतस्य वासः स यो हैनठं० शोभनेनोपचरति शोभते हास्य" ( श०ब्रा० ३।३।२।३ ) "वासोदानफलम् "वासोदश्चन्द्रसालोक्यम्" इति मिताक्षरा ( १।२१० ) । श्रुतिरपि "वासोदाः सोमप्रतिरन्त आयुः ( ऋ० १०।१०।७।२ ) वासोदाने दानप्रतिष्ठायां हिरण्यं दक्षिणा देया ।

प्राणिनां जीवनं यस्मादतः शान्तिं प्रयच्छ मे ॥

अमुकसगो० सार्द्धखारीपरिमितमिदं(१) धान्यं विश्वेदेवादैवतं तुभ्यमहं सम्प्रददे । कुशजलान्वितमुष्टिमात्रधान्यस्य ब्राह्मणहस्ते दानम् । "ॐ देवस्य त्वे"ति विश्वेभ्यो देवेभ्य इदं धान्यं प्रतिगृह्णामि "ॐ कोदादि"त्यादि "स्वस्ती"त्यन्तम् ।

## अथ गुडदानम् ।

"यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसोत्तमः ॥
मम तस्मात् परां लक्ष्मीं ददस्व गुड सर्वदा" ॥

अमुकसगोत्रषष्टिपलपरिमितमिमं गुडं तुभ्यमहं सम्प्रददे । ब्राह्मणहस्ते सजलगुडदानम् । "ॐदेवस्य त्वे"ति सोमायेमं गुडं प्रतिगृह्णामि "ॐस्वस्ती"त्यन्तं पूर्ववत्(२) ।

---

(१) अत्रेयं परिभाषा—

"सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।
आमान्नं वितुषं ज्ञेयं पक्कमन्नमुदाहृतम् ॥

(गदाधरभाष्ये ४१६)। हेमाद्रौ धान्यदानमन्त्रः—

"धन्यं करोषि दातारमिह लोके परत्र च ।
तस्मात्समुच्यसे धान्यमतः शान्तिं प्रयच्छ मे" इति ।
अत्र दानप्रतिष्ठायां हिरण्यं दक्षिणा देया ।

(२) हेमाद्रौ गुडदानमन्त्रः—

"यस्माद् रसानां प्रवरं इक्षुदण्डसमुद्भवम् ।

अथ रौप्यदानम् ।

"प्रीतिर्यतः पितॄणां च विष्णुशङ्करयोस्सदा ।
शिवनेत्रोद्भवं रूप्यमतः शान्तिं प्रयच्छ मे" ॥

अमुकसगोत्र० निष्कत्रयपरिमितमिदं रूप्यं रुद्रदैवत्यं तु० । ब्राह्मणहस्ते जलान्वितरौप्यदानम् । "ॐ देवस्य त्वे"ति रुद्राय रौप्यं प्रतिगृह्णामि "ॐस्वस्ती"ति पूर्ववत्(१) ।

अथ लवणदानम् ।

यस्मादन्नरसा सर्वे नोत्कृष्टा लवणं विना ।
शम्भोः प्रीतिकरं नित्यमतः शान्तिं प्रयच्छ मे ॥

अमुकसगो० सार्द्धखारीपरिमितमिदं लवणं सौमदैवतं तुभ्य०

---

तस्मान्मम परां लक्ष्मीं प्रयच्छ गुड सर्वदा" । इति ॥

अत्र दानप्रतिष्ठायां हिरण्यं दक्षिणा देया ।

आज्यादीनां प्रतिनिधिरप्युक्तः शान्तिरत्ने (११ पत्रे) विष्णुधर्मोत्तरे—

यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवाभावे तु गोधूमा व्रीह्यभावे च तण्डुलाः ॥
दध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः ।
घृतप्रतिनिधिं कुर्यात्पयो वा दधि वा नृप ॥

पैठीनसिः—

सर्वालाभे यवप्रतिनिधिः । मैत्रपरिशिष्टे—

घृतमन्यार्थे प्रतिनिधिस्तदलाभे दधि पयो वा" इति ।

(१) हेमाद्रौ रौप्यदानमन्त्रः—

"रुद्रनेत्रसमुद्भूतं लवणं पितृवल्लभम् ।
तस्मादस्य प्रदानेन प्रीणातु मम शङ्करः" ॥ इति ।

अत्रापि दानप्रतिष्ठायां सुवर्णं दक्षिणा देया ।

ब्राह्मणहस्ते जलादिदानम् । "ॐ देवस्य त्वे"ति० । सोमावेदं लवणं प्रतिगृह्णामि जलादेर्हस्ते ग्रहणम् । "ॐ कोदादि"ति स्वस्तीत्यन्तं (१)पूर्ववत् ।

---

( १ ) हेमाद्रौ लवणदानमन्त्रः—

"लवणे वै रसाः सर्वे लवणे सर्वदेवताः ।
सर्वपाकाद्यधिष्ठानं लवणं मेऽस्तु सौख्यदम्" ॥ इति ।

अत्रापि दानप्रतिष्ठायां सुवर्णदक्षिणा ।

तथा हि हेमाद्रिः—

"अन्येषां चैव दानानां सुवर्णं दक्षिणा स्मृता ।
सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते" ॥ इति ।

केचित्तु—

"कानकाश्वतिलागावो दासीरथमहीगृहाः ।
कन्या च कपिलाधेनुर्महादानानि वै दश" ॥

इति कूर्मोक्तानि वा देयानीति वदन्ति । दशदानपरिमितस्य द्रव्यस्य प्रमाणम् ।

सुवर्णं निष्कमात्रं च घृतं वै प्रस्थमात्रकम् ।
सूक्ष्मं वस्त्रद्वयं चैव गुडमाढकसम्मितम् ॥
सार्द्धखारीद्वयं (मितं) धान्यं लवणं सार्द्धखारिकम् ।
निवर्तनमितां भूमिमेकद्रोणमितास्तिलाः ॥
निष्कत्रयमितं रौप्यं दशदानप्रमाणकम् ।

अथवा यथाशक्त्या तद्दानमूल्यन्देयम् । तत्रेत्थं प्रयोगः । अद्येत्याद्युच्चार्य गो-भू-तिल-हिरण्या-ज्य-वासोधान्य-गुड-रौप्य-लवणेति दशद्रव्यनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे । निष्क्रये दक्षिणाभावः ।

केचन दशद्रव्यसमुच्चयदानं कुर्वन्ति तत्र ( दशद्रव्यसमुच्चयदान-

पत्रे ) इत्थं प्रयोगः। सर्वदानद्रव्याणि गृहीत्वा सर्वान्मन्त्रान् पठित्वा "एतेभ्यो ब्राह्मणेभ्यो इमानि द्रव्याणि श्रीमहाविष्णुप्रीतिं कामयमानोऽहं सम्प्रददे, न मम" इति दद्यात्। अतः परमाचरितसर्वप्रायश्चित्तसाद्गुण्यार्थं भूरिदानं करिष्ये, इति सङ्कल्प्य "हिरण्यगर्भ" इति ( १२४ पत्रे ) मन्त्रं पठित्वा इमां भूरिदक्षिणां श्री विष्णुप्रीतिं कामयमानः दीनान्धकृपणेभ्यः ब्राह्मणेभ्यो वा सम्प्रददे न ममेति दद्यात्।

दानान्ते प्रार्थना—

प्रायश्चित्तीयपापस्य हारकाः परिकीर्त्तिताः।
ब्रह्मविष्णुशिवादेवा गामेकां ददतो मम॥
पूर्वजन्मसहस्रेषु पूर्वजन्मशतेषु च।
कृतांहो नाशमायातु गामेकान्ददतो मम॥
धेनुके सर्वभूतानामसि त्वं पापनाशिनी।
तस्मात् पापार्णवे मग्नान् समुद्धर नमोऽस्तु ते॥
इमानि दश दानानि दत्तानि मलशुद्धये।
दानेन यज्ञपुरुषः प्रीयतान्न ममेति च"॥
एतानि दश दानानि सभामध्ये द्विजातिषु।
तानि देयानि श्रद्धातः तस्मात्सर्वप्रदो भवेत्॥

तदसम्भवेऽन्येभ्योऽपि दद्यात्। यन्मया कृतममुकप्रायश्चित्तं तदच्छिद्रमस्तु। अस्त्वच्छिद्रमिति ब्राह्मणाः वदेयुः।

यथा—

"मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यत्कृतम्।
ईशप्रसादात्तत्सर्वमच्छिद्रं पूर्णमस्तु मे"।

इति ब्राह्मणप्रार्थना।

"व्रतच्छिद्रं तपच्छिद्रं यच्छिद्रं यज्ञकर्मणि।
सर्वं भवतु तेऽच्छिद्रं जगदीशप्रसादतः"।

इति प्रतिवचनम्।

एवं दश दानानि(१) विधाय गोनिष्क्रयद्रव्यं एकस्मै ब्राह्मणाय

---

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।
यन्मम त्रुटितन्देव परिपूर्णन्तदस्तु मे॥
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वाऽनुसृतस्वभावात्।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि॥

अत्र ब्राह्मणभोजनमपि कार्यम्। तथा हि पराशरः—

"प्रायश्चित्तेषु सर्वेषु कुर्याद् ब्राह्मणभोजनम।
शक्त्या वित्तानुसारेण प्रायश्चित्तानुरूपतः"॥ इति।

(१) अथ दशदानप्रतिग्रहे प्रायश्चित्तमाह हेमाद्रिः। कूर्मपुराणे—

प्रायश्चित्ते व्रते शान्तौ प्रतिष्ठासु मुनीश्वराः।
तटाकारामग्रामाणां तत्तत्पुण्यप्रपूर्त्तये॥
दशदानानि विप्रेभ्यः देयानि फलसङ्ख्यया।

दशदानानि यथा—

गोभूतिलहिरण्याज्यवासोधान्यगुड़ानि च।
रजतं लवणञ्चैव दशदानान्यनुक्रमात्॥

एतत्प्रतिग्रहे प्रायश्चित्तम्। सुखाप्तये तत्तदङ्गत्वाञ्च दोषबाहुल्यम्। अतः प्रतिग्रहीतॄणां प्रायश्चित्तमाह। लैङ्गे—

धेनुप्रतिग्रहे भूमेश्चान्द्रमेकं विशोधनम्।
तिलप्रतिग्रहे तप्तकृच्छ्रत्रयमुदीरितम्॥
पराकं मुनिभिः प्रोक्तं सुवर्णस्य प्रतिग्रहे।
रजतस्य विशुद्ध्यर्थं यावकं कृच्छ्रमीरितम्॥
लवणे पञ्चसाहस्रं जपेद्देवीमनुक्रमात्।

एतत्प्रायश्चित्तं यस्य दानस्य यावत्परिमाणमुक्तं परिभाषायां

दद्यात् । न बहुभ्यः तदुक्तमङ्गिरसा—

बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ।
एतानि तु विभक्तानि दातारं पातयन्ति हि ॥

बहुभ्यः प्रत्यत्तैकगोदानस्य प्रतिषिद्धत्वात् । इदं च गोवृषदानमेकप्राजापत्यकृच्छ्ररूपप्रायश्चित्तदाने ज्ञेयम्(१) ।

इति स्मार्त्तोल्लासे सर्वप्रायश्चित्तप्रयोगः ।

तावत्पूर्णश्चेदेतदुक्तं प्रायश्चित्तं, असामर्थ्यश्चेत् तत्र द्रव्यस्य प्रतिग्रहे स्नात्वा सहस्रं जपेत् ।

(१) अथ विप्रस्त्रियाः प्रायश्चित्तप्रयोगः ॥

स्त्रीणां होमः कृताकृतः । करणपक्षे विधवायाः क्षौरान्ते पूर्ववत्कृत्वा अमन्त्रकाणि दशस्नानानि । सधवायास्तु सङ्कल्पान्ते दन्तधावनं कृत्वा तूष्णीं दशस्नानानि ॥ वस्त्रपरिधानान्ते विष्णुश्राद्धगोदाने कृत्वा "प्रायश्चित्तहोमार्थमाचार्यं त्वां वृणे" इति विप्रं वृत्वा पूर्ववद्विप्रद्वारा सर्वं पूर्वाङ्गं कारयित्वा स्वयं पञ्चगव्यं तूष्णीं प्राश्य मुख्यप्रत्याम्नायद्रव्यं विसृज्योत्तराङ्गानि कारयेत् ॥ होमाभावपक्षे दशविधस्नानान्ते विष्णुश्राद्धगोदाने कृत्वा विप्रेण पञ्चगव्यं कारयित्वा तूष्णीं प्राश्य प्रायश्चित्तद्रव्यं सङ्कल्प्य दत्वोत्तराङ्गविष्णुश्राद्धगोदानदशदानानि कुर्यात् ॥

अथ शूद्रस्य सङ्कल्पान्तमविकृतं प्राग्वत् । ततः क्षौरान्ते अमन्त्रकदशस्नानानि वस्त्रतिलकधारणान्ते विष्णुश्राद्धगोदाने कृत्वा विप्रद्वारा पञ्चगव्यं कारयित्वा स्वयं तूष्णीं पिबेत् । शूद्रेण कपिलायाः पञ्चगव्यानि न पेयानि । नास्य विप्रद्वारापि होमः । प्रायश्चित्तद्रव्यं सङ्कल्प्य दत्वा उत्तराङ्गविष्णुश्राद्धगोदानानि दश दानानि कुर्यात् ॥

इति स्त्रीशूद्रप्रयोगः ॥

अथ गोवधाद्येकैकपापे प्रायश्चित्तप्रयोगः । पर्षदं प्रदक्षिणीकृत्य साष्टाङ्गं प्रणमेत् । विप्रैः "किं ते कार्यमि"त्यादिपृष्टे गोवृषनिष्क्रयं सङ्कल्प्य निधाय "मयाऽमुकगोवधः कृतोऽथवा पलाण्डुगृञ्जनादिभक्षणं कृतं यद्वाऽमुकस्त्रीगमनं कृतं तत्प्रायश्चित्तमुपदिशन्तु भवन्तः" इति यथापापमुच्चार्य स्पष्टं वदेत् । ततः "सर्वे धर्मविवेक्तार" इत्यादि । कर्त्रा निबन्धपूजाऽनुवादकपूजने कृते सभ्यानुवादकमुखेन प्रायश्चित्तं कथयेयुः । त्वया अमुकगोवधः कृतस्तत्प्रायश्चित्तं त्रैमासिकव्रतं सप्तदशप्राजापत्यप्रत्याम्नायद्वारा वा सप्तदशगोदानतन्मूल्यदानेन वा पूर्वोत्तराङ्गसहितं त्वयाऽऽचरितव्यं तेन तव शुद्धिर्भविष्यति, इत्यादि । तथाऽभक्ष्यभक्षणे— त्वयामत्या अभ्यासेन पलाण्डुगृञ्जनं कुक्कुटमांसं वा भक्षितं तत्प्रायश्चित्तं यतिचान्द्रायणं पुनः संस्कारसहितं प्राच्योदीच्याङ्गसहितमाचरणीयं तेन तव शुद्धिर्भविष्यतीत्यादि ॥ एवमगम्यागमनादावूह्यम् । ततः कर्त्ता देशकालौ सङ्कीर्त्य पर्षदुपदिष्टं गोवधप्रायश्चित्तं त्रैमासिकममुकप्रत्याम्नायेन प्राच्योदीच्याङ्गसहितमहमाचरिष्ये । ततो वपनदन्तधावनदशविधस्नानपूर्वाङ्गविष्णुश्राद्धगोदानाज्यहोमपञ्चगव्यप्राशनान्ते यथासङ्कल्पितं मुख्यप्रायश्चित्तं कृत्वोत्तराङ्गानि कुर्यात् । इदं सामान्यम् । ततो विशेषोक्तं स्वामिमते गोदानपार्वणश्राद्धादि । एवमभक्ष्यभक्षणेऽपि पलाण्डुगृञ्जनकुक्कुटमांसादिभक्षणजनितपातकनिरासार्थं पर्षदुपदिष्टं पुनः संस्कारसहितं यतिचान्द्रायणममुकप्रत्याम्नायेन प्राच्योदीच्याङ्गसहितमाचरिष्ये । इति सङ्कल्प्य क्षौरादिपञ्चगव्यप्राशनादि पूर्ववत्कृत्वा चान्द्रायणप्रत्याम्नायपुनरुपनयनं च कृत्वोदीच्याङ्गानि कुर्यात् । एवमगम्यागमनादौ द्रष्टव्यम् । रहस्यप्रायश्चित्ते तु न पर्षदुपस्थानं सभ्यानुवादकपूजनादिकं किन्तु तत्प्रायश्चित्तं स्वयमेव ज्ञात्वाऽथवा व्याजान्तरेण किञ्चित्पृष्ट्वा रहस्योक्तं प्रायश्चित्तं स्वयमेव रहसि सङ्कल्प्य महच्चेत्क्षौरसहितमन्यथा क्षौररहितमाचरेदिति ॥

अथ सुवासिनीनां प्रायश्चित्ताचरणे मृत्तिकास्नानशालाग्निहोम-पञ्चगव्यहोमाद्याचरणं ब्राह्मणेन कारयेत्। वपननान्दीश्राद्धवैष्णव-श्राद्धानि न सन्त्येव, पापनिवेदने प्रकीर्णकेषु परमात्मस्मरणराहि-त्यान्तं मुक्त्वा स्वार्थपरार्थधर्मक्रियानुकूलक्रियानिरोधन-क्रियानिन्दन-भर्तृक्रियानिन्दन—भर्तृवच उल्लङ्घन—श्वश्रूश्वसुरदेवरादिवचउल्लङ्घन-सावित्रीव्रतराहित्य-साभिलाषपरपुरुषनिरीक्षण-सम्भाषण-परिहस-न-सहयानासनशयनावस्थानाज्ञातपरपुरुषसंसर्ग-पैतृकव्रतोपवा-सादिनिषिद्धदिनसङ्गम-रहोऽवस्थान-भर्तृदेवतासूर्यादिग्रहादर्शन-भ-र्तृसम्भाषणराहित्य-गृहोपकरणादिद्रव्यादर्शनोदक्याशूद्रग्रामान्त्यज-स्पर्शन-चाण्डालनिरीक्षण-वाक्यश्रवण-प्रतिकूलवचन भर्तृश्वसुरश्व-श्रूदेवाग्निराहित्य शिशुताडन क्षुत्परीतशिशुस्तन्याप्रदान-भर्तृश्वसुरा-दिमैत्रीभेदन-पङ्क्तिभेदव्यञ्जनादिप्रदान-भर्तृवशीकरणदोषचिन्तन-देवब्राह्मणगुरुदूषण-भर्तृप्रवासकालद्विवारभोजन-परगृहयान-देहली-वास-परगृहवास-कुड्यजालवातायनादिविचरण-रथ्योपसर्पण-स-माजोत्सवदर्शन-जननीगृहयान-दिवास्वाप-भर्तृश्वसुरश्वश्रूदेवरादि-समानासन-शय्याद्यवस्थान-तदभिवादनराहित्य-धान्यगृहोपकरणा-दिविक्रय-भर्त्रननुज्ञातव्रतोपवासनियमाचरण-देहलीगृहाद्यलङ्काराणरा-हित्य-सदा निष्ठुरभाषण-वृथाक्रोधनक्रोधनोरःशिरोमुखताडन-क्षुधित-दासीदासपशूपेक्षण-भक्ताप्रदान-ताम्बूलाञ्जनहरिद्रालेपनतिलकमङ्गल-सूत्रादिराहित्यकेशप्रसाधनराहित्य-सदामलिनवस्त्रधारण-स्वेच्छाका-मुकत्व-भर्तृत्वङ्कारहुङ्कारतिरस्कार-स्वयं प्रथमभोजन शयनप्रबोधन-भर्तृविस्तारअनादिप्रकीर्णकानां, ज्ञानतोऽज्ञानतश्चेत्यादि यथा यथं अनुवादः कार्यः।

अथ विधवानां पापनिवेदने पापविशेषः कथ्यते। सुवासिनीस्व प्रयुक्तस्वाथपरत्वभर्तृविस्तारअनान्तं मुक्त्वाऽस्नानभोजन द्विवारभोज-न-पर्युषितान्नभोजन-कांस्यपात्रभोजन-रात्रिभोजन-पुत्राद्युच्छिष्टान्न-

अथ व्रताङ्गभूतयमनियमधर्माः कथ्यन्ते । तदुक्तं स्मृतिसङ्ग्रहे-

"ब्रह्मचर्य-दया-क्षान्तिर्दानं (१) सत्यम(कौटिलम्) कल्कता।
अहिंसाऽस्तेयमाधुर्ये दमश्चेति यमा दश ॥

---

भोजन-मदकरद्रव्यभक्षण-ताम्बूलचर्वण-बलीवर्दारोहण-कुसुम्भरक्त-चित्रवस्त्रादिधारण-तिलकाञ्जनगन्धकस्तूरीकर्पूरघुसृणसुरभिपुष्पादि-धारण-भर्तृस्मरणतर्पणादिराहित्य-भर्तृनिन्दाश्रवण-स्वशरीरपोषणादिप्रकीर्णकानां यथायथं निवेशः । दासीकुलटावेश्यामैत्रीकरण-सत्कथाश्रवणराहित्य-भ्रातृभार्यादिमैत्रीभेदन-स्वाधीनपरमैथुनशब्दश्रवण-वीक्षण खट्वाशयनयानारोहणोष्णोदकस्नान-तीर्थाचरणराहित्य-भर्तृनिन्दाश्रवण-स्वशरीरपोषणादि प्रकीर्णकानां च यथायथं निवेशः ; ज्ञानतोऽज्ञानतश्चेति समानम् । अनुवादकवचने-अस्नानभोजनादिस्वशरीरपोषणादिप्रकीर्णकेभ्य इति ज्ञानतोऽज्ञानतश्चेत्यनुवादः। विधवानां प्रायश्चित्ताचरणे शिरोमात्रवपनं पाणिपादनखनिकृन्तनं मृत्तिकास्नानं दशविधस्नानानि च सा स्वयमेव कुर्यात् । नान्दीश्राद्धं वैष्णवश्राद्धं च अस्त्येव, पञ्चगव्यहोमं ब्राह्मणेन कारयेत् शेषमन्यत्समानमिति हेमाद्रिः ।

(१) सत्यवदने फलश्रुतयः—

"एकं ह वै देवा स व्रतं चरन्ति सत्यमेवः तस्मादेषां जितमनपजय्यं, तस्माद्यशः एवं ह वा अस्य जितमनपजय्यमेवं यशो भवति य एवं विद्वान्सत्यं वदति" ( श० ब्रा० ३।३।३।८ ) "सत्यसंहिता वै देवाः" ( ऐ० ब्रा० १।१।६ ) ।

"द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतञ्च सत्यमेव देवा अनृतं मनुष्याः" ( श० ब्रा० १। प्र १। ब्रा १।४ ) ।

"तस्य वा एतस्याऽग्न्याधेयस्य सत्यमेवोपचारः स स यः सत्यं वदति यथाग्निं समिद्धं घृतेनाभिषिञ्चेदेवर्ठ० हैनर्ठ० स उद्दीपयति

स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
गुरूणां शुश्रुषा शौचाक्रोधाऽप्रमादता दश(१)" ॥

कात्यायनः–

"सदो(२)पवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्" ॥

तस्य भूयो भूय एव तेजो भवति श्वः श्वः श्रेयान् भवत्यथ योऽनृतं वदति यथाग्निं समिद्धं तमुदकेनाभिषिञ्चेदेवं हैनं स आसयति तस्य कनीयः कनीय एव तेजो भवति श्वः श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत्" । (श० ब्रा० २।२।२।१९ मूलपुस्तके)

(१) "नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता" इति (या० स्मृ० ३।३१३) पाठः ।

(२) "तस्माद्यज्ञोपवीतीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वा दक्षिणत उपवीय" (तै० आ० २।१) इति श्रुतेः । "उपवीतिनः" (का० श्रौ० १।७।२४) "यज्ञोपवीतम्" (ग्रा० गृ० १।१।४) इति सूत्राभ्यां यज्ञोपवीतस्य कर्माङ्गत्वं=क्रत्वर्थत्वम् । एवं च कर्मकालादन्यत्र तस्य धारणं न प्राप्नोति तत्राह "सदोपवीतिनेति" सर्वदा उपवीतिना सर्वदा बद्धशिखेन च भवितव्यम् । अनेन दधित्वादिरादिवत् (जै० ४।३।३) यज्ञोपवीतधारणस्य शिखाबन्धनस्य च पुरुषार्थतोक्ता, तदत्र शिखाबन्धनोपवीतधारणयोः संयोगपृथक्त्वन्यायेन क्रतुपुरुषोभयार्थत्वमवगम्यते ।

संयोगपृथक्त्वन्यायः—

"एकस्य तूभयत्वे संयोगपृथक्त्वम्, शेष इति चेत्, नार्थपृथक्त्वात्" (जै० सू० ४।३।५-७) इति । न्यायमाला च—

"दध्नाग्विन्द्रियकामस्य नित्येऽप्युत तद्धि ।
अन्यत्स्यात्पूर्वमेवं संयोगस्य पृथक्त्वतः" (न्याय०मा०४।३।३) इति ।

भृगुः—

"मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् ।
नोद्धरेच्च ततः प्राज्ञो य इच्छेच्छ्रेय आत्मनः ॥
सकृदुत्तारणात्तस्य प्रायश्चित्ती भवेद्विजः ।
तैत्तरीयाः कठा काण्वाश्चरका वाजसनेयिनः(१) ॥

एवं च क्रतुपुरुषोभयार्थत्वे सति विशिखेन व्युपवीतिना च कर्मणि क्रियमाणे कर्मणोऽपि वैगुण्यं भवति । एवं च क्रतुपुरुषोभयार्थोपचारप्रयुक्तं प्रायश्चित्तद्वयमत्र बोध्यम् । तद्यज्ञोपवीतं "सौत्रम्" ( द्रा० गृ० १।२।५ ) कर्पाससूत्रकृतं रज्जुर्वासो वा स्मृत्यन्तराच्छेषावगतिः । "कौशं वेति" ( द्रा० गृ० सू० १।१।६ ) कुशविकृतं वा भवति । तथा मनुः—

"कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रजम्" ( २।४४ ) । त्रिवृन्नवसूत्रजम् । नव वै त्रिवृदिति श्रुतेः । पैठीनसिरपि-कार्पासञ्चोपवीतं सर्वेषामिति । विष्णुरपि-कार्पासशाणाविकान्युपवीतानि वासांसि चेति । "ग्रीवायां प्रतिमुच्य दक्षिणं बाहुमुद्धृत्य यज्ञोपवीती भवति" ( द्रा० गृ० सू० १।१।७ ) इति सूत्रात् "उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे" ( अम० २।७।४६ ) इति कोशाच्च दक्षिणबाहुना उद्धृतं सव्यांशस्थितं स्मृत्युक्तरीत्या निर्मितं यज्ञोपवीतमित्युच्यते ।

यज्ञोपवीतनिरुक्तिः स्मृतिसारे—

"यज्ञार्थः परमात्मा य उच्यते चैव होतृभिः ।
उपवीतं ततोऽस्येदं तस्माद्यज्ञोपवीतकम्" । इति ।

(१) शुक्लयजुर्वेदस्य पञ्चदश भेदाः सन्ति । (१) काण्वा (२) माध्यन्दिनाः (३) जाबाला (४) बौधायनाः ( बौ ( बु ) धेया )

कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः ।
बह्वृचाः सामगाश्चैव ये चान्ये यजुः शाखिनः ।
कण्ठादुत्तार्य सूत्रं चेत्पुनरर्हति संस्क्रियाम्" ।
"पुनः संस्क्रिया"मिति मन्त्रेण उपवीतान्तरधारणमेव ॥

(५) शाफेया (६) स्तापनीयाः (७) कपोलाः (८) पौण्ड्र (एण्डर) वत्साः (९) आवटिकाः (१०) परमावटिकाः (११) पाराश (रीयाः) राः (१२) वै (णे) नेया (१३) वैधेयाः (१४) औधेया (१५) गालवाश्चेति, एते सर्वे वाजसनेयिन इति व्यपदिश्यन्ते । एतद्वेदस्य मानमुक्तं चरणव्यूहे—

"द्वे सहस्रे शतं न्यूने मन्त्रे वाजसनेयके ।
ऋग्गणः परिसंख्यातं ततोऽन्यानि यजूंषि च ।
तावन्मानेन सङ्ख्यातं बालखिल्यं सशुक्रियम् ।
ब्राह्मणन्तु समाख्यातं प्रोक्तमानाच्चतुर्गुणम्" इति ॥

वाजसनेयिनां ब्राह्मणं शतपथसंज्ञकं तच्चार्वाचीनमिति भट्टोजिदीक्षितमतं सिद्धान्तकौमुद्यां—"पुराणप्रोक्तेषु ब्राह्मणकल्पेषु" (४।३।१०५) इति सूत्रे भाल्लविनः शाट्यायनिन इत्युदाहृत्य पुराणेति किम् । याज्ञवल्क्यानि ब्राह्मणानि इति प्रत्युदाहृतं, तत्स्वारस्याद्याज्ञवल्क्यो न पुराणो मुनिरिति प्रतीयते तथापि "शाट्यायनि तुल्यकालत्वाद् याज्ञवल्क्यादिभ्यः प्रतिषेध तद्विषयता च नेति" वचनमेतत्सूत्रभाष्ये पतञ्जलिनोपन्यस्तम् । तत्स्वारस्येन याज्ञवल्क्यः पुराण एवेति लभ्यते, अन्यथा वचनारम्भो व्यर्थः स्यात् पुराणपदेनैव तद्व्यावृत्तेः सिद्धत्वात् । याज्ञवल्क्यस्य वैशम्पायनान्तेवासित्वेन शाट्यायनादितुल्यकालभवत्वाच्च । स्पष्टं चेदमग्रेव सूत्रे शब्देन्दुशेखरे इति माध्यन्दिनशाखाप्रकाशे ।

वराहः—

"सुस्नातः सम्यगाचान्तः कृतसन्ध्यादिकक्रियः ।
कामक्रोधविहीनश्च पाखण्डस्पर्शवर्जितः ॥
जितेन्द्रियः सत्यवादी सर्वकर्मसु शस्यते ।"

कात्यायनः—

"ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।
अहतं तद्विजानीयात् सर्वकर्मसु पावनम्" ॥

हेमाद्रिः—

"प्रागग्रमुदगग्रं वा धौतं वासः प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनाच्छुचिः" ॥

आपस्तम्बः—

"आर्द्रवासास्तु यः कुर्यात् जपहोमप्रतिग्रहान् ।
सर्वं तद्राक्षसं विद्यात् बहिर्जानु च यत् कृतम्" ॥

विष्णुपुराणे—

"होमे दैवार्चनाद्यासु क्रियास्वाचमने तथा ।
नैकवस्त्रः प्रयुञ्जीत (प्रवर्तेत) द्विजवाचनके जपे" ॥
द्विजवाचनके स्वस्तिवाचनादौ ।

व्याघ्रपादः—

"नैकवस्त्रो द्विजः कुर्याद् भोजनं तु सुरार्चनम् ।
तत्सर्वमसुरेन्द्राणां ब्रह्मा भागमकल्पयत्" ॥

शातातपः—

"सन्ध्यावस्त्रपरिभ्रष्टं कठिवेष्टधृताम्बरम् ।

एकवस्त्रं तु तद्विद्यात् दैवे पित्र्ये च वर्जयेत्" ॥

गृह्यरेणुः—

"एकवस्त्रा तु या नारी मुक्तकच्छः व्यवस्थिता ।
न साऽधिकारिणी तत्र दैवे पित्र्ये च कर्मणि" ॥

पारस्करगृह्ये—

"एकं चेत्पूर्वस्योत्तरवर्ग प्रच्छादयीत" ( २।६।२२ )

मार्कण्डेयः—

"चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् ।
एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम्" ॥

हारीतः—

"आचामेत्प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टं तु भवेत्तं तु भुक्तशेषं तु वर्जयेत्" ॥

(१)वसोः पवित्रमित्यनेन धारणम् । पवित्रेण पवित्रयुक्तपाणिरित्यर्थः । येन तु पवित्रेण सह भोजनं कृतं तदेवोच्छिष्टं तस्याज्यं नान्यत् ।

प्रयोगपारिजाते—

"नित्ये नैमित्तिके वापि कर्मोपक्रमणे द्विजः ।
धृतं पवित्रं कर्मान्ते ग्रन्थि मुक्त्वा तु तत्त्यजेत्" ॥

शातातपः—

"जपे होमे तथा दाने स्वाध्याये पितृतर्पणे ।
"अशून्यं तु करं कुर्यात् सुवर्णरजतैः कुशैः" ॥

---

( १ ) वसोः पवित्रमसि संहितायां (शु० य० सं० १।२) द्रष्टव्यः ।

काश्यपः—

"स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे॥

सपवित्रौ (२) सदर्भौ वा करौ कुर्वीत नान्यथा" ॥

---

(२) अथ स्नानजपहोमादेर्दर्भपाणिना कर्त्तव्यत्वात्प्रसङ्गेन संक्षिप्य दर्भविधिरुच्यते । तत्र हारीतः—

"अच्छिन्नाग्रान् सपत्रांश्च समूलान् कोमलान् शुभान् ।

पितृदेवजपार्थं तु समादद्यात् कुशान् द्विजः ॥

कुशहस्तेन यज्जप्तं दानं चैव कुशैः सह ।

कुशहस्तस्तु यो भुङ्क्ते तस्य सङ्ख्या न विद्यते" ॥ इति ।

पुराणेऽपि—

"कुशपूतं भवेत् स्नानं कुशेनोपस्पृशेत् द्विजः ।

कुशेन चोद्धृतं तोयं सोमपानेन सम्मितम्" ॥ इति ।

गोभिलोऽपि—

"कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः ।

कुशाग्रे शङ्करं विद्यात् त्रयो देवा व्यवस्थिताः" ॥ इति ।

कौशिकः—

"शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः ।

ॐकारेणैव मन्त्रेण कुशाः स्पृश्या द्विजोत्तमैः" ॥ इति ।

उत्पाटनमन्त्रस्तु—

"विरञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज ।

नुद पापानि सर्वाणि दर्भ स्वस्तिकरो मम" ॥ इति ।

वर्णभेदेन विनियोगभेदमाह कात्यायनः—

"हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः ।

समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः" ॥

( का० स्मृ० २. ३. ) इति ।

कुशाभावे शङ्खः—

"कुशाभावे द्विजः श्रेष्ठः काशैः कुर्वीत यत्नतः ।
तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृताः" ॥

यमोऽपि—

"कुशाः काशा यवा दूर्वास्तथा व्रीहयश्च एवच ।
बल्वजाः पुण्डरीकाश्च सप्तधा बर्हिरुच्यते" ॥ इति ।

ब्रह्मपुराणे—

"काशाः कुशा बल्वजाश्च तथान्ये तीक्ष्णरोमशाः ।
मौञ्जाश्च शाड्वलाश्चैव षड्दर्भाः परिकीर्तिताः" ॥

इति दर्भाणां षड्विधत्वमुक्तम् ।

वर्ज्यानाह हारीतः--

'चितौ दर्भाः पथि दर्भा ये दर्भायज्ञभूमिषु ।
स्तरणासनपिण्डेषु षट् कुशान् परिवर्जयेत् ॥
ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृतर्पणे ।
हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते ॥
अपूता गर्हिता दर्भा ये संच्छिन्नानखैस्तथा ।
क्वथितानग्निदग्धांश्च कुशान् यत्नेन वर्जयेत्' ॥
पिण्डार्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टैर्धृता ये च त्यागस्तेषां विधीयते' ।

कुशोत्पाटने कालनियममाह हारीतः—

"मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः" इति ।

यातयामं जीर्णं तत् यन्न भवति तदयातयामं सवीर्यं कार्यक्षममिति यावत् । "मासे नभस्यमावास्या" एतस्माद्वचनात् भाद्रपदमासामावास्यायामाहृतानामेव दर्भाणामयातयामतया पुनः पुनर्नियो-

कात्यायनः—

“यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते ॥
दक्षिणस्तत्र विज्ञेयः कर्मणां (णः) पारगः करः ।
यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु ॥
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्या पराजिता” ॥
ऐन्द्री पूर्वा, सौम्योदीची, पराजिता ऐशानी, इति ।

परिशिष्टे कात्यायनः—

“पित्र्यमन्त्रानुद्रवणे आत्मालम्भे ( अवेक्षणे ) ऽधमेक्षणे ।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥
मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसम्भवे ।

---

ज्यत्वमिति बहुसम्मता व्यवस्था । शङ्खोऽपि--

‘दर्भाः कृष्णाजिनम्मन्त्रा ब्राह्मणा(हविरग्नयः)श्च विशेषतः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः’ ॥ इति ।

पवित्रधारणे फलमाह मार्कण्डेयः--

‘कुशपाणिः सदा तिष्ठेत् ब्राह्मणो दम्भवर्जितः ।
स नित्यं हन्ति पापानि तूलराशिमिवानलः’ ॥ इति ।

पवित्रप्रकारमाह कात्यायनः—

‘अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्’ ॥ इति

( का० स्मृ० १. २. १० )

अत्रिः--

‘ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थि विधीयते ।
भोजने वर्त्तुलः प्रोक्त एवं धर्मो न हीयते’ ॥ इति ।

निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्"(१) ॥

अनुद्रवणमुच्चारणम् । आत्मालम्भो हृदयस्पर्शः । अवेक्षणमपि तस्यैव । अपां स्पर्शनमेवाचमनमिति हेमाद्रिणा व्याख्यातम् ।

---

(१) कौषीतकिगृह्ये—"रौद्रं तु राक्षसं पित्र्यामासुरं चाभिचारिकम् । उक्त्वा मन्त्रं स्पृशेदप आलभ्यात्मानमेव च" इति ( कौ० गृ० ५ पत्रे ) ।

अत्र मन्त्रोच्चारणात्मालम्भावेक्षणानि यज्ञादौ विहितान्येव ग्राह्याणि न लौकिकानि, अन्तरङ्गत्वेन तन्निषेधस्यैवोचितत्वात् । प्रहासे महतिहासे न स्मितमात्रे, मार्जारस्पर्शे मार्जारकृत एव, स्वयं कृते तु स्नानस्योक्तत्वात्, इत्युक्तमाचारादर्शे। आक्रुष्टे परुषभाषणे क्रोधसम्भवे मानसिककोपे । अपः स्पृशेदित्यनेन अपां स्पर्शनमेव विवक्षितं नत्वाचमनमिति भर्तृयज्ञपितृभूतिकर्कोपाध्यायवासुदेवगर्गश्रीअनन्तदेवयाज्ञिकादयः सर्वे कल्पसूत्रभाष्यकारा व्याख्यातवन्तः सम्प्रदायादयः पद्धतिकाराश्च । अत्र सर्वेषु वाक्येषु अपः स्पृशेदिति पाठात् अपः स्पर्शो जलस्पर्श एव याज्ञिकसम्प्रदायाविरुद्धः येषूतूपस्पृशेदिति पाठस्तत्र तूपस्पर्शनमाचमनमित्युक्तमाचारादर्शे ।

अत्र कात्यायनः—

"रौद्रᳬ राक्षसमासुरमाभिचारणिकं मन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योऽपस्पृशेदप उपस्पृशेदप" ( का० श्रौ० सू० १।१०।१४ ) इति ।

कश्चिच्च श्रुतिरपि अपामुपस्पर्शनं दर्शयति—

"यज्ञस्य यदुग्रियं तदेवैतन्निर्मिमीतेऽथाप उपस्पृशति शान्तिरापस्तदद्भिः शमयतीति ( श० ब्रा० १।७।४।९ ) ।

पुनरेत्याप उपस्पृशति रुद्रियेणेव वा एतदचारिषुः शान्तिराप स्तदद्भिः शान्त्या शमयन्त इति ।

वाशिष्ठः—

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
पञ्चस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेत्" ॥

पराशरः—

"(१)क्षुते निष्ठीविते चैव दन्तश्लिष्टे तथाऽनृते ।
पतितानां च सम्भाषे दक्षिणं श्रवणं स्पृशेत् ॥
प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे सन्तीति मनुरब्रवीत् ॥
आदित्यो वरुणः सोमो वह्निर्वायुस्तथैव च ।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः" ॥

इति संक्षिप्तधर्माः, विशेषस्तु ग्रन्थान्तरेऽवगन्तव्यः विस्तरभयादिह न लिख्यते ।

अथ नान्दीश्राद्धम् । तच्च त्रिविधं विवाहादिनित्यनैमित्तिकम्, पुत्रजन्माद्यनियतनिमित्तम्, अग्न्याधानादिनिमित्तं चेति । तत्र विवाहादिनिमित्तं प्रातः कार्यम् । अग्न्याधानादिनिमित्तं त्वपराह्णे कार्यम् । तदाह गालवः—

"पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमि"ति ।

---

(१) क्षुते कृते, निष्ठीवने = श्लेष्मादिनिरसने कृते, दन्तोच्छिष्टे = दन्तलग्नोच्छिष्टे, तथा अनृते = मिथ्यावचने कथिते, पतितानां सम्भाषे च दक्षिणं कर्णं स्पृशेत् । स खल्वयं कर्मकाले विधिः । दक्षिणकर्णस्पर्शे हेतुमाह गृह्यासंग्रहकारः—

"मरुतः सोम इन्द्राग्नी मित्रावरुणौ तथैव च ।
एते सर्वे च विप्रस्य श्रोत्रे तिष्ठति दक्षिणे" ( २।६० ) इति ।

अग्न्याधाननिमित्तं वृद्धिश्राद्धमपराह्णे कुर्यादित्यर्थः। पुत्रजन्मादौ निमित्तान्तरमेव तत्कार्यम्। प्रातः शब्देन सार्द्धप्रहरात्मके काले कालवचनं तदाह गार्ग्यः—

"ललाटसम्मिते भानौ प्रथमः प्रहरः स्मृतः॥
स एव (१)सार्द्धसंयुक्तः प्रातरित्यभिधीयते"

निर्णयामृते—

"वैवाहिकं तु पूर्वाह्णेऽपराह्णे त्वाग्निकं स्मृतम्" इति।

यदि तु सुलग्नेऽग्निस्थापनं पूर्वाह्णे पराह्णे तदा तु पूर्वेदिन एव स्वपरं विधाय मातृपूजनश्राद्धादिविधाय व्रतं कुर्यात्। श्वः स्नात्वा शुभकालेऽग्निं मन्थयेत्। यदि चेच्चतुर्थे यामे सायं वाऽधानकालस्तर्हि गृह्यकारमतमवलम्बनीयम्। सायमग्न्याधानस्य प्राधान्यात्। यद्येवमुच्यते नापराह्णेग्न्याधानस्य प्राधान्यात् यद्येवमुच्यते नापराह्णेऽग्न्याधेयं (धानं) विधेयम्, तदसत्, लग्नानुसन्धानात् श्राद्धनिर्णयाच्च, तस्मिन्नेवाहनि तदेवाग्निमुपसमाधायेति वचनात्, "वैवाहकोऽग्निर्गृह्योऽग्निरि"ति वचनात्, अर्द्धरात्रौ प्राप्तायां श्वो विदध्यादिति साङ्ख्यायनानुयायिसम्मतात्।

अथेदानीं प्रयोग उच्यते—

पूर्वोक्तपर्वाधाने वा नक्षत्राधानदिवसे वा पूर्वाह्णे माध्याह्निकं कर्म देवतार्चनान्तं कृत्वा तद्दिने श्राद्धात् पूर्वं वैश्वदेवं कृत्वा एवमुक्तम्। न तु श्राद्धोत्तरं पाकेनैव वैश्वदेवः कर्तव्यः, किन्तु

---

(१) 'स एवाऽध्यर्धसंयुक्त' इति कल्पद्रुमपाठः।

वैश्वदेवार्थं पाकं कृत्वा श्राद्धं कर्तव्यम् ।

ततः शुचिः सभार्यः प्राङ्मुख उपविश्याचम्य प्राणाना-यम्य देशकालौ सङ्कीर्त्य पित्राद्यैरस्खलिताधिकारानुसन्धानार्थमेकां गामहं सम्प्रदास्ये, वा तन्मूल्यन्दद्यात् ।

ततः देशकालौ स्मृत्वा, आधानाकरणजनितदोषपरिहारार्थ-मतीतवर्षसङ्ख्याकान् यथाशक्तिद्रव्यमत्याम्नायद्वारा कृच्छ्रानहमाचरिष्ये । पुनर्देशकालौ स्मृत्वा तत्सत् परमेश्वरप्रीत्यर्थं आवसथ्याधानमग्निका-न्वधानवैश्वदेवसायं प्रातर्होमान्तानि कर्माणि कर्तुं गणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूर्वकनान्दीश्राद्धं करिष्ये ॥ श्राद्धं समाप्य पश्चाद्धोमद्रव्यदानम् । एवं यस्य द्रव्य-दाने शक्तिस्तेन तद्गणनया होमद्रव्यदर्शपूर्णमासस्थालीपाकद्रव्यं वै-श्वदेवद्रव्यं यथासम्भवमाज्यं चाग्निविच्छेददिनगणनया ब्राह्मणाय दद्यात् । ततो देशकालौ स्मृत्वा अधिकारे सत्यकृतसायंप्रातर्होमपक्षा-दिकर्मपिण्डपितृयज्ञपञ्चमहायज्ञाद्यनुसन्धानार्थं होमद्रव्यदानमहं करिष्ये ।

ततो ब्राह्मणहस्ते ताम्रपात्रे वा शिवा आपः सन्तु, सौमनस्य-मस्तु, अक्षतं चारिष्टं चास्तु, ततोऽक्षतपुष्पसहितमुदकं गृहीत्वा हिरण्यगर्भेति मन्त्रं पठित्वा अथाऽग्नित्यागदिनादारभ्यैतावन्तं का-लमग्निविच्छेदेन लुप्तानां सायं प्रातर्होमानां दर्शपू(पौ)र्णमासस्थाली-पाकानां च पिण्डपितृयज्ञानां च पञ्चमहायज्ञानां च सम्पत्तिप-र्याप्तं व्रीह्याज्यादिरूपं द्रव्यं तन्निष्क्रयं वाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्पददे ।

इति होमद्रव्यदानम् ।

ततःशालाप्रवेशः—

तदुपयोगी कुण्डकारिका—

"स्मार्त्ते सार्द्धत्रिभू १३ । ४ मितैः परिमितं व्यासार्द्धसूत्रं लिखेत्

कुर्याचद्वलयं त्रिमेखलमिति रामाङ्गुलैर्विस्तृतम् ।
उच्चं द्वादशसङ्ख्यकं ऋतुमितं द्विर्मेखलं स्यात्तथा
यद्वाऽधो नवसङ्ख्यकं करमितं कुण्डं तु वेदाङ्गुलैः" ॥

अन्यच्च—

"पादोनयूकात्रयसार्द्धयुक्तं (१३।४।२।६)
विश्वाङ्गुलव्यासदलेन वृत्तम् ।
नर्यस्य तन्मध्यगचिह्नकं स्यात्
स्मार्तस्य सभ्यस्य तथैव वृत्ते" ॥
"अर्काङ्गुलोन्नतयुगाङ्गुलविस्तृताद्या
नन्दाङ्गुलोन्नतभुजाङ्गुलविस्तृतान्या ॥
सन्मेखलाद्वयमिदं त्वथवादिमैका
कुण्डाकृतिर्निगदिता खलु खातवर्जम्" ॥

अथाङ्गुलप्रमाणम् । कात्यायनश्रौतसूत्रे—

"दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीया" (१।१०।१२) दिति परिभाषितत्वाद्यजमानाङ्गुलादि ग्राह्यम् ।

"अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते ।
तत्र तत्र बृहत्पर्व ग्रन्थिभिर्मिनुयात्सदे'ति—

छन्दोगपरिशिष्टम् । बृहत्पर्वणा=मध्यमपर्वणा, तन्मूलप्र-

न्थयो यत्राङ्गुष्ठनोदना तत्राङ्गुष्ठस्य, अङ्गुलिनोदनायामङ्गुलीनाम् । छन्दोगानां परिशिष्टोक्तत्वादङ्गुष्ठेनारणीमानम् । वाजसनेयिनां तु–यज्ञपार्श्वादङ्गुलैरिति । सूत्रोक्तपक्षस्तु–"यजमानेनोदूर्ध्वबाहुप्रपदोच्छ्रितेन समस्थितेन वे ( का० श्रौ० १६।७।३२ ) ( श० ब्रा० १०।२।२।६ ) ति, पञ्चारत्निर्दशवितस्तिर्विंशतिशताङ्गुलः पुरुष" इति सूत्रात्तु ( शुल्बसू० ५।६। ) पुरुषस्य पञ्चमोंऽशोऽरत्निः तच्चतुर्विंशोङ्गुलमिति रामवाजपेयिभिराधानप्रकरणे उक्तम् ।

ततः सुस्नातया पत्न्या सह सालङ्कारया सुस्नातो द्विजेन्द्रो ( जितेन्द्रियो ) ऽनेन मन्त्रेण शालां प्रविशेत् ।

"ॐ देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे । यस्माहमस्मि न तमन्तर्यामि स्वम्म इष्टॅं स्वॅं श्रान्त स्वर्ठ० सुहुतमस्तु" ( का० श्रौ० ४।७।१७ ) इति जपित्वा शालां प्रविशेत् । इत्यनेन ( श० ब्रा० श्रुत्या० २।२।३।२ ) देवान् पितॄंश्चोपाह्वयतीत्यर्थः । प्रविश्य भूमिशोधनं विधाय "रक्षोहणं वलगहन" ( शु० सं० ५।२३ ) मित्यादिना सर्षपान्विकीर्यासनमास्तीर्याचम्य प्राणानायम्य ब्राह्मणैः स्वस्ति वाचयित्वा ग्रन्थिम्बध्वा मङ्गलतिलकं विधाय पूर्वाभिमुखः सन् कुशयवादिगृहीत्वा देशकालौ स्मृत्वाद्यामुकवेदस्यामुकशाखाध्यायी अमुकशर्माऽहं अग्न्याधानकृतश्रुतिस्मृतिपुराणोक्तजन्यपुण्यफलप्राप्तये आवसथ्याधानं करिष्ये । तदङ्गब्रह्मवरणं करिष्ये ।

ब्रह्मवरणं कृत्वा तं मधुपर्कादिभिः पूजयेत् । हरिहरमते

ब्रह्मवरमरणिप्रदानं च, प्रदानाभावेपि धारणं भवत्येवेति गदाधरः। ततः अहतवस्त्रपरिधाने पत्नी च गन्धमाल्यमाशीश्च दद्यात्। ततो यजमानः वैकल्पिकं स्मरेत्। तत्र मथिताग्नेः स्थापनम्, पूर्वेण ब्रह्मणो गमनम्, उत्तरेण पात्रासादनम्, द्वे पवित्रे ताम्रमयी आज्यस्थाली ताम्रमयी चरुस्थाली पालाश्यः समिधः प्राञ्चाघारौ, समिद्धतमे आज्यभागौ, पूर्णपात्रं दक्षिणा, एतान् वैकल्पिकपदार्थानहं करिष्ये।

ततोऽरणिमानम्। कुशास्तृतायां भूमौ पत्नीयजमानयोः पुरस्तात्प्रागग्रे संस्थाप्य अहतवस्त्रद्वयेन परितो वेष्ट्य ततो दक्षिणसव्यहस्ताङ्गुष्ठेन अग्रादिमूलपर्यन्तं प्रथमादिचतुर्विंशतिपर्यन्तं दैर्घ्यमानम्, प्रथमादिषष्ठपर्यन्तं विस्तारमानम्, प्रथमादिचतुर्थपर्यन्तमुच्छ्रायमानम्,

ततोऽधरारण्या मूलाग्रपर्यन्तं विस्तारमानम्। अवयवकल्पनं दक्षिणसव्यहस्ताङ्गुष्ठेन ततोऽङ्गुष्ठमेकं पादौ ततोऽङ्गुष्ठत्रयं जङ्घे, ततोऽङ्गुलचतुष्टयमूरू, ततोऽङ्गुलद्वयं देवयोनिः, ततोऽङ्गुलद्वयं वस्तिः, ततोऽङ्गुलमेकं कटिः, ततोऽङ्गुलत्रयमुदरम्, ततोऽङ्गुलमेकं हृदयम् ततोऽङ्गुलद्वयं वक्षः, ततोऽङ्गुलमेकं ग्रीवा, ततोऽङ्गुलमेकं मुखं, ततोऽङ्गुलमेकं कर्णौ, ततोऽङ्गुलमेकं नेत्रे, ततोऽङ्गुलमेकं शिरः, एवं सावयवमरणीद्वयं विचिन्त्य निर्देशेत्। स्मार्तकर्मसाधनभूतस्याग्नेर्योनिभूते इमे अरणी तत्रेयमधरेयमुत्तरा इत्युच्चार्य हस्तेनारणीद्वयं स्पृशेत्। ततो गन्धादिभिः सम्पूज्य देशकालौ सङ्कीर्त्य ममामुकवेदस्यामुकशाखाध्यायिनोऽमुकशर्मणोऽग्न्याधानीयफलप्राप्तये अरण्योः पूजनमहं करिष्ये। अग्न्येर्योनिरूपाभ्यामरणीभ्यां नमः। पाद्यमर्घ्यमाचमनं मधुपर्कं पुन-

राचमनीयं स्नानीयमाचमनीयं समर्प्य वस्त्रादिना समर्चयेत् । ततः कुसुमाक्षतैः सम्पूज्य पुष्पादि ताम्बूलादि निवेद्य नमस्कारः।

ततो ब्रह्मा अरणिद्वयं हस्ते धृत्वा स्मार्तकर्मसाधनभूतस्याग्नेर्योनिरूपे इमे अरणी तत्रेयमधरेयमुत्तरा प्रतिगृह्यतामिति तद्धस्ते प्रयच्छेत् , इमानि च यज्ञपात्राणि गृह्यन्ताम् , परिगृह्यन्ते पत्नी तद्धस्तादधरारणिं गृहीत्वाऽङ्के निदधाति यजमानोऽप्यङ्के निधाय पुनः कुङ्कुमपुष्पैः सम्पूजयेत् ।

ततो यजमानाभ्यां गन्धादिर्माङ्गल्यं विधाय आशीर्दद्यात् । ततो मन्थनम् , भूमौ दर्भास्तृतायामधरारणिमुत्तरां च निधायोत्तरास्योरीशानदिक्स्थमष्टाङ्गुलप्रमन्थं छित्वा पात्रे बुध्नगर्तमध्ये प्रवपति ।

ततो देवयोनिस्थाने मन्थनं कृत्वा प्राच्यामग्निनिस्सारणाय वाहिनीं कृत्वा ततो यजमानः प्राङ्मुख ओविलीं धारयति प्रत्यङ्मुखी पत्नी मन्थनं करोति पत्न्या मन्थनाशक्तौ ब्राह्मणेन केनचिन्मन्थनं कार्यम् । प्रथममन्थने योनिनियमः द्वितीये तु न नियमः अग्नौ जाते वरदानं, यज्ञियकाष्ठैः प्रज्वालनम् , ततः खरे पञ्च भूसंस्कारान् कृत्वा, अत्र गोमये विशेषः, रेणुकारिकायाम्—

"अमेध्यसेवनी–वन्ध्या–प्रसूताभ्यो न गोमयम् ।
जीर्णायाश्चैव लेपार्थमाहरेन्न तु माहिषम्" ॥

शुभे मुहूर्ते सुनवांशे सकलग्रहानुकूले कालेऽग्निमुपसमादधाति । भो द्विजनामाग्ने ! अत्रागच्छागच्छ तिष्ठ तिष्ठेति यजमानः सपत्नीको वदेत् । आहरणपक्षश्चेत्तदा यजमानः सपत्नीकः ब्राह्मणैः सह मृत्स्थालीमादाय वेदघोषमङ्गलगीतवाद्यादिभिर्जनितोत्साहो वैश्यस्य

बहुपशोर्गृहात् सूत्रान्तरमतेनाम्बरीषाद् बहुयाजिनो ब्राह्मणस्य गृहाद्वा बहुयाजकाद् ब्राह्मणमहानसाद्वा स्थाल्यामग्निं गृहीत्वा तथैव गृहमागत्य पञ्च भूसंस्कारान् कृत्वा कुण्डे प्राङ्मुखे निदध्यात् इत्याहरापस्तः ॥

ऋष्यादिस्मरणमत्रेति रेणुकारिकागङ्गाधरहरिहराः । तच्च विचारणीयम् । कर्मकाले प्रतिमन्त्रस्मरणमुत? पूर्वमेव स्मरणं कृत्वा कर्मारम्भः । ततः सर्वानुक्रमसूत्रे—

"ऋषिदैवतछन्दांऽस्यनुक्रमिष्याम" इति प्रकृत्याह "एता-न्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजति याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तरा श्वगर्तं वाऽऽपद्यते स्थाणुं वर्च्छति प्र मीयते वा पापीयान् भवति । अथ विज्ञायैतानि योऽधीते तस्य वीर्य( वत् । अथ योऽर्थवित्तस्य वीर्य )वत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यत" ( पत्र १८–१२) इति ।

मदनरत्ने कात्यायनः—

"आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः" ॥

गङ्गाधरस्तु—

"ऋषिमादौ प्रयुञ्जीत छन्दो मध्ये नियोजयेत् ।
देवतामवसाने च मन्त्रज्ञो मन्त्रसिद्धये" ॥

सर्वानुक्रमण्यामुक्तत्वात्तत्तत्पदार्थज्ञानमात्रमपेक्षितं न तु कर्मकाले उच्चारणम् , यथार्थज्ञानं वैकल्पिकं, अथवा ज्ञात्वोपयजेदिति प्रत्येकमभिसम्बध्यते । तेन तत्तन्मन्त्रस्य ऋष्यादिकं तत्तन्मन्त्रप्रयोगात् प्राक् ज्ञातव्यमित्यर्थः। एतच्च ऋष्यादिज्ञानं वैकल्पिकं दर्शपौ-

प्रमासपद्धतौ तदीयायां च दीपिकायां वैद्यनाथमिश्राः । प्राच्यग्रन्थेषु अध्ययनाध्यापनान्तर्जलजपेषु नियमोऽन्यत्र पुरुषार्थता न कर्मवैगुण्यमिति । क्वचिदस्यापवादः कृष्णंभट्टीये—

"न च स्मरेदृषिं छन्दः श्राद्धे वैतानिके मखे" इति ।

अन्यत्र—

"अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा ।
होमकाले न दृश्यन्ते प्रायश्छन्दर्षिदेवताः ॥
शान्तिकादिषु कार्येषु मन्त्रपाठक्रियादिषु ।
होमे नैव प्रकर्तव्याः कदाचिदृषिदेवताः" ॥

ततो देवताभिध्यानं रेणुः—

"देवतानामभिध्यानं न करोति विमूढधीः ।
वृथा तस्य भवेत् कर्म पूर्वाचार्या वदन्ति हि" ॥

अथ ऋष्यादिस्मरणम् । 'त्वन्नः' 'सत्वन्न' इति द्वयोर्वामदेवस्त्रिष्टुप् अग्नीवरुणौ, 'इमम्मे' 'तत्वा यामी'ति द्वयोः शुनश्शेपगायत्री त्रिष्टुभौ वरुणौ, 'ये ते शतमयाश्चाग्ने'द्वयोः वामदेवस्त्रिष्टुप् वरुणो, 'उदुत्तममि'ति शुनश्शेपस्त्रिष्टुप् वरुणो 'भवतन्न' इति प्रजापतिः पङ्क्तिर्जातवेदसौ, 'अयास्यग्न' इति गौतमो गायत्री देवागातुविदा देवता सर्वेषामाज्यहोमे विनियोगः। 'भूर्भुवः स्वरि'ति महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निर्वायुः सूर्यो देवता 'त्वन्न' 'सत्वन्न' 'अयाश्चाग्ने'ये ते शतमि'ति मन्त्राणां वामदेवस्त्रिष्टुबग्नीवरुणौ दैवते द्वयोस्तृतीयस्याग्निश्चतुर्थस्य वरुणः

सविता विष्णुर्विश्वेदेवामरुतः स्वर्का 'उदुत्तममि'ति शुनः शेपस्त्रि-ष्टुप् वरुणो देवता सर्वेषामाज्यहोमे विनियोगः ॥

अथ देवताभिध्यानम् । तत्र प्रजापतिं, इन्द्रं अग्निं, सोमं, अग्नी-वरुणौ, अग्नीवरुणौ, वरुणं, वरुणं, वरुणं सवितारं विष्णुं विश्वा-न्देवान्मरुतः स्वर्कान्, अग्निं वरुणं आदित्यं अदितिं, जात-वेदसौ' एता देवता आज्येन, अग्निं पवमानं, अग्निं पावकं, अग्निं शुचिं, अदितिं, एता प्रधानदेवताश्चरुणा, अग्नीवरुणौ वरुणं वरुणं वरुणं, सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् अग्निं वरुणं जातवेदसौ एता देवताः पुनराज्येन अग्निं स्विष्टकृतं चरुशेषेण देवागातुविदं, अग्निं, वायुं, सूर्यं, अग्नीव-रुणौ, अग्नीवरुणौ, अग्निं, वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान्, वरुणं, प्रजापतिं, एता देवता आज्येन एता अङ्गप्रधानार्था देवता अस्मिन् स्मार्ताधानाख्ये कर्मण्यहं यक्ष्ये ।

ततो दक्षिणतो ब्रह्मासनम्, उत्तरे ब्रह्माणं वृत्वा प्राग्दक्षि-णयेनोप(वेशनम्,)विशेत्, उत्तरतः प्रणीताप्रणयनम्, अन्तरिक्षे पूरणम्, आत्माभिमुखं पूरयेत्, तत्रैव स्थापनम्, आलम्भनम्, अग्नेरुत्तरतो निधानम्, तृणैरग्नीन् परिस्तीर्य पुरस्तात्प्रथमन्दक्षि-णतः, पश्चादुत्तरतः, अग्नेरुत्तरतः पात्रासादनम्, तदुक्तम्—

प्रागग्रोदग्बिलं तस्य उत्तरासादनेऽग्नितः ।
पात्रजातं प्राग्बिलं तदुदगग्रं तु पश्चिमे ।

पवित्रच्छेदनादर्भास्त्रयः, पवित्रे द्वे, प्रोक्षणीपात्रं, आज्यस्थाली, चरुस्थाली, सम्मार्गकुशाः पञ्च, उपयमनकुशाः सप्त, समिध-

स्तिस्रः, स्रुवः, आज्यं, तण्डुलाः, दक्षिणा, पूर्णपात्रं, पवित्रच्छेदनैः पवित्रकरणम्, द्वयोरुपरि त्रीणि निधाय द्विमूलेन द्विकुशौ प्रदक्षिणीकृत्य सर्वान् युगपद्धस्ताभ्यामनामिकाङ्गुष्ठाभ्यां धृत्वा मध्यमपर्वभ्यां छित्वा तानुत्तरतः क्षिपेत्। प्रोक्षणयामपः कृत्वा उत्पवनं, ताः स्थानं तयोः सव्यहस्तकरणं, दक्षिणेनोदिङ्गनम्, ताभिस्तासामेव प्रोक्षणम्, आज्यस्थाल्याः प्रोक्षणम्, चरुस्थाल्याः प्रोक्षणम्, सम्मार्गकुशानां प्रोक्षणम्, उपयमनकुशानां प्रोक्षणम्, समिधां प्रोक्षणम्, स्रुवस्य प्रोक्षणम्, आज्यस्य प्रोक्षणम्, तण्डुलानां प्रोक्षणम्, पूर्णपात्रस्य प्रोक्षणम्, असञ्चरे प्रोक्षणीनिधानम्।

प्रोक्षणमुक्तं पारिशिष्टे—

"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्।
तिरश्चावोक्षणं प्रोक्तं नीचेनाभ्युक्षणं स्मृतम्"॥

आज्यस्थाल्यामाज्यनिर्वापः, चरुस्थाल्यां तण्डुलानोप्य त्रिः-प्रक्षालनम्, दक्षिणत आज्याधिश्रयणम्, उत्तरतश्चरोरधिश्रयणम्, ईशानाद्युल्मुकेन उभयोः पर्यग्निकरणम्, श्रपणम्, अर्द्धशृते स्रुवस्य प्रतपनं न्युब्जपुष्करेण, तदुक्तं लघुविष्णुना—

"चरुपाकं ततः कार्यमाचार्येण यथाविधि।
अर्द्धशृतं चरुं ज्ञात्वा स्रुवञ्चोपप्रतापयेत्"॥

सम्मार्गकुशैः सम्मार्जनम्, प्रणीतोदकेनाभ्युक्षणम्, सम्मार्गकुशानां प्रक्षेपः। तदुक्तं परिशिष्टे—

"तान् कुशान्कृतसम्मार्गान्प्रोक्ष्याग्नौ प्रहरेदथ।
पुनः प्रतपनं मन्त्रदर्भानग्नौ(प्रतप्यते)विनिक्षिपेत्"॥

पुनः प्रतपनम्, जघनदेशे निधानम्, आज्योद्वासनम्, पूर्वेण चरोरुद्वासनम्, पृष्ठतः पवित्रेणाज्योत्पवनम्, अवेक्षणम्, अपद्रव्यनिरसनम्, प्रोक्षण्याः प्रत्युत्पवनम्, उपयमनकुशादानम्, समिदादानम्, तिष्ठन्त्समिधः प्रक्षेपः, समिधोऽभ्याधाय 'स्वाहा' उपविश्याम्बुहस्तेन प्रोक्षण्युदकशेषेणाग्नेः पर्युक्षणं, पवित्रयोः प्रणीतासु निधानम्, एष एव विधिर्यत्र क्वचिद्धोमः। दक्षिणं जान्वाच्य ब्रह्मान्वारब्धः स्रुवेण होमः। गृह्यकारिकायाम्—

"प्रणीतासु पवित्रे ते कृत्वा जान्वाच्य दक्षिणम्।
अन्वारब्धकृते होमे ब्रह्मणा दक्षिणे करे" ॥

(१) स्रुवधारणं कारिकायाम्—

"अग्रे धृत्वाऽर्थनाशाय मध्ये चैव मृतप्रजाः।
मूले च म्रियते होता स्रुवस्थानं कथं भवेत् ॥

---

(१) स्रुवस्य चतुरङ्गुलं त्यक्त्वा शङ्खमुद्रया धार्यः। तथा च—मत्स्यपुराणे—

"मूले हानिकरं प्रोक्तं मध्ये शोककरं तथा।
अग्रे व्याधिकरं प्रोक्तं स्रुवं धारयते कथम् ॥
कनिष्ठाङ्गुलिमानेन चतुर्विंशतिकाङ्गुलम्।
चतुरङ्गुलं परित्यज्य अग्रे चैव द्विरष्टकम् ॥
चतुरङ्गुलं च तन्मध्ये धारयेच्छङ्खमुद्रया।
हीयते यजमानो वै स्रुवमूलस्य दर्शनात् ॥
तस्मात्संगोपयेन्मूलं होमस्थले स्रुवस्य तु" ॥ इति।

शङ्खमुद्रालक्षणम्—

"वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना।
कृत्वोत्तानं तथा मुष्टिमङ्गुष्ठं तु प्रसारयेत् ॥

अग्रम(ध्यं)ध्याच्च यन्मध्यं मूलम(ध्ये च)ध्याच्च मध्यतः ।
स्रुवं च धारयेद्विद्वान् ज्ञातव्यं च सदा बुधैः ॥
तर्जनीं च बहिः कृत्वा कनिष्ठां च बहिस्तथा ।
मध्यमानामिकाङ्गुष्ठैः स्रुवं च धारयेद् द्विजः ॥
स्रुवहोमे सदा त्यागः प्रोक्षणीपात्रमध्यतः ।
पाणिहोमे न दातव्यो विना प्रोक्षणिकां तथा ।
सपवित्राम्बुहस्तेन वह्निं कुर्यात्प्रदक्षिणम् ।
हव्यवाट् सलिलं दृष्ट्वा विभीतः संमुखो भवेत् ॥
आघारौ नासिके ज्ञेयौ आज्यभागौ च चक्षुषी ।
वक्त्रं चोदरकुक्षौ च व्याहृतिस्तदनन्तरम् ॥

---

वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः ।
दक्षिणाङ्गुष्ठसंस्पृष्टा मुद्रा शङ्खस्य चोदिता" ॥
(वीरमित्रोदये पूजाप्रकाशे १२४ पत्रे) इति ।
"अग्रे धृत्वा तु विफलं मध्ये धृत्वा प्रजाक्षयः ॥
मूलेन म्रियते होता स्रु(क्)वस्थानं (च) कथं भवेत् ।
अग्रान्मध्याच्च मध्ये तु मूलान्मध्याच्च मध्यतः ॥
स्रुवस्तु धार्यो विद्वद्भिर्निर्वाहः कर्मसिद्धये ।
अग्निः सोमश्च सूर्यश्च रुद्रश्चैव प्रजापतिः ॥
षष्ठन्तु यमदैवत्यं देवतास्तु स्रुवे सदा ।
अग्निभागेऽग्निसन्तापश्चान्द्रे संक्लेश एव च ॥
सूर्ये तु धननाशः स्याद्रुद्रे रौद्रभयं भवेत् ।
प्रजापतिविभागेन प्रजावृद्धिर्भविष्यति ।
यमभागे तथा मृत्युर्दैवताफलमीदृशमि"
ति रत्नावल्यां विशेषः ।

हस्तौ पादौ तथा कुक्षी पञ्चवारुणाकेन तु ।
हुताशनशरीरन्तु ज्ञातव्यं सर्वदा बुधैः ॥
अप्रदीप्ते सधूमे च हूयते चेद्धुताशने ।
यजमानो भवेदन्धो ब्राह्मणश्च विशेषतः ॥
पयश्चापोघृतं चैव स्नेहपक्वं तथैव च ।
हस्तेन जुहुयाद्विप्रः स विप्रो ब्रह्महा भवेत् ॥
न शूर्पेण धमेदग्निं वस्त्रेणैव च पाणिना ।
मुखेन धमयेदग्निं मुखादग्निरजायत ॥
वस्त्रेण च भवेद्व्याधिः सूर्पेण धननाशनम् ।
हस्तेन च भवेन्मृत्युः कर्मसिद्धिर्मुखेन च ॥
नाग्नि(ग्नौ) मुखं विना होमो लौकिकः श्रुतिसम्भवः ।
वेणोरग्निः (ग्नेः)प्रसूतत्वाद्वेणुरग्नेश्च पावनः ॥
तस्माद् वेणुधमन्यैव धमेदग्निं विचक्षणः इति ।
'सधूमः कर्णमित्याहुः सकृज्ज्वाला तु नासिके ॥
सधूमाग्निस्तु नेत्राणि प्रज्वाल्यन्तु मुखं स्मृतम् ।
कर्णाहुते तु दारिद्र्यं सुहृद्दुखं तु नासिके ॥
नेत्रः स्थानानि नाशः स्याद्वक्त्रे वर्द्धयते प्रजाः ।
स्वर्णसिंदूरबालार्ककुङ्कुमक्षौद्रसन्निभः ॥
पावकस्य शुभ्रवर्णः शोभनः परिकीर्त्तितः ।
भेरीवाजीनहस्तीन्द्रध्वनिवक्त्रे शुभावहाः ॥
पद्मेन्दीवरकल्हारसर्पिगुग्गुलनाशने ।
खरस्वरसमो वह्नेर्ध्वनिः सर्वं विनाशयेत् ॥

शुष्काग्ने च भवेत् कुष्ठिः उष्णे व्याधिः प्रजायते ।
रूक्षे निर्धनतां याति द्वारं हुत्वा व्रजत्यधः ॥
यत्किञ्चिज्जुहुयादग्नौ तत्सर्वं त्यागपूर्वकम् ।
अन्यथा कुरुते यस्तु नरकं प्रतिपद्यते" ॥

इति स्रुवाग्निनिर्णयः ।

अथ होमनिर्णयः । तत (१)ईशान्ये मनसा(२) "ॐ प्रजा-

---

( १ ) प्रसारितसंहताङ्गुलिसव्यहस्तं सोपग्रहं हृदि निधाय दक्षिणहस्तेन जुहुयात् । अग्नेरुत्तरविभागे पूर्वाघारं प्राक्संस्थं ऋजुं सन्ततं दीर्घं दक्षिणविभागे उत्तराघारमीदृशमेवेति स्मार्तगङ्गाधरे ।

अत्र ऋजुत्वादीनां भिन्नोपकारकाणां गुणानां समुच्चयः कर्तव्यः न तु विकल्पः । तथा हि जैमिनिकात्यायनौ—"एककर्मणि शिष्टत्वाद् गुणानां सर्वकर्म स्यात्" ( जै० सू० १२।३।६ ) "धर्ममात्रेषु समुच्चयोऽविरोधे" ( का० १।७।८ )इति ।

"ऋजुत्वादय आघारे विकल्प्यन्ते न वाऽग्रिमः ।
एकार्थत्वाददृष्टार्थभेदात्सम्भवतोऽन्तिमः" ॥ इति ।

( जै० न्या० १२।३।३ )

पूर्वतन्त्रस्य द्वादशाध्याये तृतीयपादे—ऋजुमाघारयति, सन्ततमाघारयति, ऊर्ध्वमाघारयति, ( तै० सं० २।५।११ ) इति विषयवाक्यमादाय ऋजुत्वादीनामाघारोपकारद्वारा कार्यस्यैकत्वाद्विकल्प इति पूर्वपक्षयित्वा दृष्टद्वारभेदाभावेऽप्यदृष्टद्वारभेदात्सहानुष्ठानसम्भवाच्च विकल्पो न किन्तु समुच्चय एवेति सिद्धान्तितत्वात् ।

( २ ) "तस्माद्यत्किञ्चित्प्राजापत्यं यज्ञे क्रियतऽउपांशुवेव तत् क्रियत" ( श० १।४।५।१२ ) इति वाक्यशेषादस्य प्रजापतिहोमस्योपांशुत्वम् ।

पतये स्वाहा। इदं प्रजापतये न मम। आग्नेये—ॐ इन्द्राय स्वाहा। इदमिन्द्राय न मम। उत्तरपूर्वार्द्धे—ॐ अग्नये स्वाहा। इदमग्नये न मम। दक्षिणपूर्वार्द्धे—ॐ सोमाय स्वाहा। इदं सोमाय न मम। वैकल्पिके प्राज्ञावाघारौ समिद्धतमे आज्यभागौ हुत्वा, अष्टर्चहोमः नान्वारम्भः।

"ॐ (१)त्वन्नो अग्ने० । इदमग्नीवरुणाभ्यां न मम।

ॐ (२)सत्वन्नो अग्ने० । इदमग्नीवरुणाभ्यां न मम।

ॐ (३)इमम्मे० चके स्वाहा। इदं वरुणाय न मम।

ॐ त(४)त्वा यामि०मोषीः स्वाहा। इदं वरुणाय न मम।

---

आहुतेः पश्चात् सर्वत्र स्रुवसाध्ये होमे प्रत्याहुति प्रोक्षणीपात्रे संस्रवप्रक्षेपः।

(१) "ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो विश्वाद्वेषाᳬंसि प्र मुमुग्ध्यस्मत्स्वाहा। इति प्रथमा (सं० २१।३)।

(२) ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्या उषसो व्युष्टौ। अवयक्ष्व नो व्वरुणᳬं० रराणो व्वीहि मृडीकᳬं०सुहवो न ऽएधि स्वाहा। (शु० य० सं० २१।४) इति द्वितीया।

(३) ॐ इमम्मे व्वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके। (शु० य० सं० २१।१) इति तृतीया।

(४) ॐ तत्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशᳬं० समान ऽआयुः प्रमोषीः (शु० य० सं० २१।२) इति चतुर्थी।

ॐ ये ते(१)शतं वरुण०ं स्वर्काः स्वाहा । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ।

"ॐ अया(२)श्चाग्ने०जꣳस्वाहा । इदमग्नये अयसे न मम ।

"ॐ उदु(३)त्तमं० । इदं वरुणायादित्यायादितये न मम ।

'ॐ (४)भवतन्नः० मद्य नः स्वाहा। इदं जातवेदोभ्यां न मम।

ततः स्थालीपाकमभिघार्य स्रुवेण होमः । ॐ अग्नये पव(५)मानाय स्वाहा । इदमग्नये पवमानाय न मम । ॐ अग्नये पावकाय स्वाहा । इदमग्नये पावकाय न मम । ॐ अग्नये शुचये स्वाहा । इदमग्नये शुचये । ॐ अदित्यै स्वाहा । इदमदित्यै न मम । 'त्वन्नः' 'सत्वन्नो अग्ने' इत्याद्यैः पूर्वोक्तैरष्टभिर्मन्त्रैः पुनरष्टाज्याहुतयः । ततो

---

( १ ) ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो ऽद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ( का०श्रौ०सू०अ० २५ कं० १ सू० ११ ) इति पञ्चमी ।

( २ ) ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि अया नो यज्ञं वहास्यया नो धेहि भेषजꣳस्वाहा ( का० श्रौ०२५।१। २१ ) इति षष्ठी ।

( ३ ) ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय । अथा वयमादित्यव्रते तवानागसो अदितये स्याम । ( शु० य० सं० १२।१२ ) इति सप्तमी ।

( ४ ) ॐ भवतन्नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳहिꣳसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवत मद्य नः । ( शु० य० सं० ५।३ ) इत्यष्टमी ।

( ५ ) पवमानपावकशुच्याख्याग्निदेवताश्रयणाख्यानं ( शा० ब्रा० कां० २ प्र० १ ब्रा० ५ ) स्पष्टम् ।

ब्रह्मणान्वारब्धः उत्तरार्द्धात् स्रुवेण चरुमादायाग्नेरुत्तरार्द्धे—ॐअग्न-ये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। ततो दशाज्या हुतयः अथानन्वारब्ध आज्येन ॐअयास्यग्नेर्वषट्कृतं यत्कर्मणात्य-रीरिचं देवागातुविदः स्वाहा। इदं देवागातुविद्भ्यो न मम।

अथ ब्रह्मा( ह्मणा )न्वारब्धः, अन्वारम्भस्तु चतुर्दशाज्याहुतिषु भवति नान्यत्र। ॐ भूः स्वाहा इदमग्नये। ॐभुवः स्वाहा इदं वायवे। ॐ स्वः स्वाहा इदं सूर्याय। ॐ त्वन्नो अग्ने०। ॐ सत्वन्नो अग्ने०। ॐ अयाश्चाग्ने। ॐ ये ते शतं वरुण०। ॐ उदुत्तमं०। ॐ(१)प्रजा-पतये स्वाहा। ततो बर्हिर्होमः ॐ स्वाहेति। इदं प्रजापतये न मम। बर्हिर्होमे प्रजापतिर्देवता अनिरुक्तत्वात् "अनिरुक्तो वै प्रजापतिः"।

"मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थिति"

रिति कात्यायनोक्तेश्च। बर्हिर्होमश्चात्रैव नान्यत्र।

ततः सर्वहोमशेषाणां संस्रवप्राशनम्। पवित्राभ्यां मार्जनम्, पवित्रयोरग्नौ प्रक्षेपः, ब्रह्मणे दक्षिणादानम्, ब्रह्मन्! आवसथ्या-धानकर्माङ्गतया विहितोऽयं वरः प्रतिगृह्यताम्। द्यौस्त्वा(२)ददा-त्विति प्रतिगृह्णाति। अत्र वरशब्देन त्रि(३)वर्षा गौर्वरः।

प्रणीताविमोकः, आपः शिवा इत्युदकवन्दनम्, एकं ब्राह्म-णभोजनम्। वा स्मृत्युक्तं ब्राह्मणभोजनम्। आवसथ्याधानक-

(१) एवं स्मार्ताधाने पञ्चत्रिंशदाहुतयः।

(२) द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।

(३) 'गौर्ब्राह्मणस्य वरः, ग्रामो राजन्यस्य अश्वो वैश्यस्येति। (पा० गृ० सू० १।८।१५-१७) सूत्रात्।

र्मणः साङ्गतासिध्यर्थं त्रयस्त्रिंशद्ब्राह्मणान् भोजयिष्ये। तेन श्री यज्ञपुरुषः प्रीयताम् ।

अत्र संस्रवप्राशने कृते पश्चाद्वैश्वदेवं कथं भवेदिति, ननु "अकृते वैश्वदेवे त्वि"त्यादिवचनाद्वैश्वदेवात् प्राक् स्थालीपाकानुष्ठानं प्राप्तम्, तत्र च संस्रवद्रव्यप्राशनं विहितं एतत् कृत्वा कथं माध्याह्निके वैश्वदेवादिकर्मण्यधिकार इति चेत् शेषप्राशनस्य कर्माङ्गत्वेन विधानात् अप्राशने कर्मवैगुण्यात्, नोत्तरकर्माधिकारनिवृत्तिः, बर्हिर्होमस्य विधानसामर्थ्यात् । तदुक्तं रेणुकारेण—

"मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च ।
यागत्यागेषु सर्वेषु नोच्छिष्टं मनुरब्रवीत्" ॥

ब्राह्मणभोजने(षु) तु यज्ञपार्श्वेनोक्तम्—

"गर्भाधानादिसंस्कारे ब्राह्मणान् भोजयेद्दश ।
शतं विवाहसंस्कारे पञ्चाशन् मेखलाविधौ ॥
आवसथ्ये त्रयस्त्रिंशच्छ्रौताधाने शतात्परम् ।
अष्टकं भोजयेद्भक्त्या तत्तत्संस्कारसिद्धये ॥
सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ।
चातुर्मास्ये च चत्वारि शतानि पञ्च सुराग्रहे ॥
अयुतं वाजपेये च ह्यश्वमेधे चतुर्गुणम् ।
आग्रयणे प्रायश्चित्ते ब्राह्मणान्दश पञ्च चे"ति ॥

( अथ मणिकावधानम् । )

अथ मणिकावधानम् । मणिकावधानपञ्चमहायज्ञसायम्प्रातर्होमनिमित्तं च श्राद्धचतुष्कं तद्दिन एव कृत्यमिति हरिहरः ।

याज्ञिकसम्प्रदायस्तु आवसथ्याधानतन्त्रेण सह कृत्वा न पृथक्करणम् ।

ततः शुचिः सभार्यः प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य उदकसिद्ध्यर्थं मणिकावधानं करिष्ये। देवस्य त्वेति प्रजापतिर्गायत्री अभ्री देवताऽभ्यादाने विनियोगः। ॐ (१)देवस्य त्वा॰भ्यामाददे नार्यसीति ( य॰ सं॰ ६।१ ) अभ्यादानम्। "ॐ इदमहꣳ रक्षसाङ्ग्रीवा अपि कृन्तामी" (य॰ सं॰ ६।१)त्यनेन उत्तरपूर्वस्यां खननम्। प्राच्यां दिशि पांशूनामुद्वपनम्, अवटे कुशास्तरणम्, यवाक्षतारिष्टसर्षपदधिदूर्वाप्रक्षेपः हरिद्रादीनां च । ततो मणिकं गृहीत्वा 'समुद्रोऽसीति' साध्या वा यजुर्वायुः मणिकस्य स्थापने विनियोगः। ॐ 'समुद्रोऽसि नभस्वानार्द्रदानुः शम्भू'(य॰ सं॰ १८।४५) रित्यनेन अवटे माणिकनिधानम्, दृढीकरणम्, आपो

---

( १ ) अत्र पारस्करः—आवसथ्याधानं दारकाले। दायाद्यकाल एकेषाम्। वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य। चातुष्प्राश्यपचनवत्सर्वम्। अरणिप्रदानमेके। पञ्च महायज्ञा इति श्रुतेः। अग्न्याधेयदेवताभ्यः स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति। त्वन्नोऽअग्ने सत्वन्नो अग्न इमम्मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्न उदुत्तमं भवतन्न इत्यष्टौ पुरस्तात्। एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति। स्विष्टकृते च। अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवागातुविद इति। बर्हिर्हुत्वा प्राश्नाति ततो ब्राह्मणभोजनम्। ( पा॰ गृ॰ १।२।१-१३ ) इति।

( २ ) ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। आददे नार्यसि ( य॰ सं॰ ६।१ )।

रेवतीति परमेष्ठीप्रजापतिस्त्रिष्टुप् आपो देवता उदकासेके विनियोगः । "ॐ(१)आपो रेवतीः०वयोधा" (पा० गृ० ३।५।३) इत्यनेन मणिके एकेन कलशेनोदकमासिञ्चेत्।आपो हि ष्ठे(य०सं० ३६।१४) ति तिसृणां सिन्धुद्वीप गायत्री आपो देवता उदकासेके विनियोगः(२) ॐ आपो हि ष्ठेति तिसृणां कलशोदकमासिञ्चेत् । अत ऊर्ध्वं श्रौतकर्मक्रियापाकश्च मणिकोदकेनैव कार्यः । असन्निधाने तु पुत्रः शिष्यो वा पत्नी वा उदकासेकं कुर्यात् । ततो ब्राह्मणभोजनम् । मणिकावधानसाङ्गतासिद्ध्यर्थं ब्राह्मणमेकं भोजयिष्ये(३) । अस्मिन् स्मार्ताधानाख्ये कर्मणि यत्कृतं तन्न्यूनातिरिक्तोऽयं भवतां ब्राह्मणानां वचनात् श्रीविष्णोः प्रसादात् सम्पूर्णोऽयं विधिर्भवतु। (४)यस्य स्मृत्येति

---

( १ ) ॐ आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयोधात् ।

( २ ) आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

( ३ ) अत्र सूत्रम् । अथातो मणिकावधानम् । उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकांश्चान्यानि चाभिमङ्गलानि च तस्मिन् मिनोति मणिकं० समुद्रोऽसीति । अप आसिञ्चति आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतं च रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद् गृणते वयोधादिति। आपो हि ष्ठेति च तिसृभिः । ततो ब्राह्मणभोजनम् । (पा०गृ०३।५।२-५) इति ।

( ४ ) "यस्य स्मृत्या" इति पूर्वं ( पत्र १३३ ) टिप्पण्यां द्रष्टव्यः ।

क्षमापनम्(१) ।

क्षमस्वेति श्रुत्युक्तम् । ॐ घृताची स्थो धुर्य्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् । यज्ञ नमश्च त उप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्व ( य० सं० २।१९ ) ।

स यत्र शम्योराह तदभिमृशति यज्ञ नमश्च तऽउप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्वेति स यदतिरेचयति तन्नमस्कारेण शमयत्यथ यदूनं करोत्युप चेति तेन तदन्यूनं भवति यज्ञस्य शिवे सन्तिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तच्छिवं तेन तदुभयꣳ शमयति स्विष्टे मे सन्तिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तत् स्विष्टं तेनो तदुभयꣳ शमयत्येवमु हास्यैतेन यज्ञेनान्यूनातिरिक्तेनैवेष्टं भवति य एवं विद्वानेवमभिमृशति तस्मादेवमेवाभिमृशेत्तेह ते गन्धर्वा आसुः सूर्पं यवमान्कषिरुद्वालवान्धानान्तर्वान्" ( श० ब्रा० ११।२।३।९ ) इति । (२)चतुर्भिश्च० ।

---

( १ ) उद्धृत्याग्निं पचेदन्नं वारिणा शुचिना सुधीः ।
मातृपूजा ततः श्राद्धं सङ्कल्प्य ऋषिदेवताः ॥
स्मृत्वाऽभ्यादानमवटं परिले(लि)ख्य स्पृशेदपः ।
खननोद्वपने चात्र कुशादीनां स्तृतिस्ततः ॥
अवटे मणिकाधानमुदकासेचनं त्विह ।
भोजनं ब्राह्मणे दद्यान्मातॄणां च विसर्जनम् ॥

( २ ) चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥

अस्यार्थः-ओश्रावयेति चतुरक्षरमस्तु श्रौ३षडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः एष सप्तदशा०

(१)प्रमादात् कुर्वतां० । (२)कायेन वाचा० । श्रीविष्णवे नमः !

इति एरण्डवल्लीपुरवासिशिवप्रसादकृते स्मार्तोल्लासे

आवसथ्याधानप्रयोगः समाप्तः ।

# अथ पाकयज्ञनिर्णयः ।

अथ पाकयज्ञनिर्णय उच्यते ( अयं ) अन्वहं पाकस्तु गृह्याग्नौ कार्यः "चत्वारः पाकयज्ञा" इति सूत्रे(गृ० सू० १।४।१) पच्यतेऽन्वहमनेनेत्यस्मिन्निति वा, पाक इत्यन्वर्थसंज्ञया पाकस्य गृह्याग्नौ कर्तव्यताप्रतीतेः ।

"वैवाहिकेऽग्नौ कुर्वीत (गृह्यं)गार्ह्यं कर्म यथाविधि ।
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही"ति—

मनूक्तेश्च (३।६७) । गृह्यकारैरुक्तं कर्म (गृह्यं) गार्ह्यं विवाहोत्तरकालक्रियमाणत्वेन गृह्याग्नेर्विवाहसम्बन्धाद्वैवाहिकत्वं न पुनर्विवाहहोमाधिकरणत्वेन विवाहहोमस्य भार्यार्थसिद्ध्यर्थत्वेनाग्निसिद्ध्यर्थत्वाभावात् । अत एव भगवता पारस्कराचार्येणा "वसथ्याधानं दारकाल" (१।२।१) इत्यादिनौपासनाग्निसिद्धये आवस-

अरात्मकः ( म०भा०६।३१ ) प्रजापतिः तस्मै यज्ञात्मने प्रजापतये नमः । इति ।

( १ ) प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

( २ ) "कायेन वाचा" पूर्वं ( १३३ पत्रे ) टिप्पण्यां द्रष्टव्यः ।

ध्याधानं पृथक् समाम्नातम् । यद्यपि "पक्तिं चान्वाहिकीं गृही"ति मनुना (३।६७) अन्वाहिक एव पाको गृह्याग्नावुक्तस्तथापि पाकत्वाविशेषात् श्राद्धस्य पाकयज्ञत्वाच्च श्राद्धार्थपाकोऽप्यत्रैव कार्यः । अतएव शावजननाशौचयोर्वैश्वदेवाभावेऽप्यत्रैवावश्यमहरहः पाकः कर्तव्यः ।

तदाह यज्ञपार्श्वे कात्यायनः—

"पचनाग्नौ पचेदन्नं सूतके मृतकेऽपि वा ।
अप(चेन्नै)चन्नेकरात्रेण पुनराधनमर्हति" ॥

पाकस्य गृह्याग्निसाध्यत्वात् गृह्याग्नेरेकदेशं महानसे कृत्वा पाकः कार्यः ।

तदुक्तं चतुर्विंशतिमते—

"प्रातर्होमं तु निर्वृत्य समुद्धृत्य हुताश(नम्)नात् ।
शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥
तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत् ।
ततोऽस्मिन् वैश्वदेवादिकर्म कुर्यादतन्द्रित" इति ।

शेषोऽग्नेरेकदेशः ।

शाङ्खायनकारिकायामपि—

"नित्यपाकस्य शालाग्नेरेकदेशस्य कार्यतः ।
पाकार्थमुल्मुकं हृत्वा तत्र पक्त्वा महानसे ॥
वैश्वदेवोऽन्यगारे स्यात्पाकार्थे(र्थः) सोऽप्यलौकिकः ।
भूरिपाको भवेद्यत्र श्राद्धादावुत्सवेषु च ॥
कृतेऽपि वैश्वदेवेऽपि(तु) लौकिको नैव कार्यतः ।

होमेनान्तरिते केचिदाहुः सर्वत्र लौकिकः ॥

न तत् समञ्जसं तेषामुपयद्धोम (का०श्रौ०६।७।८॥६।६।१०) दर्शनात् ।

समासं चोल्मुकस्याहुरग्न्यागारे महानसात् ॥
पाकान्ते वैश्वदेवात् प्राक् नैतदप्युपपद्यते ।
आहृतेऽप्युल्मुके पाकः शामित्रे दृश्यते पशौ ॥
वचनादाहृतिः सा तु लौकिकस्त्वपवर्गतः ।
धूपको दीपकश्चैव तापार्थो यश्च नीयते ॥
सर्वे ते लौकिका ज्ञेयास्तावन्मात्रापवर्गतः" ॥ इति ।

समासे कृते महानसेऽवशिष्टादग्नेर्धूपाद्यर्थं नीतानामग्नीनां लौकिकत्वमित्यर्थः । तस्य लौकिकस्यापि अन्यस्य दाने अन्यपाके शूद्रस्पर्शे महादोषः, यदा स्वगृहेष्वावसथ्याग्नौ पाककरणासम्भवो भवेत्तदा केशवस्वामिना अनुकल्प उक्तः ।

वैश्वदेवार्थे महानसा(द)ग्निमुद्धृत्य पाकानन्तरं संसर्गे कृते सति तच्छेषाग्निर्लौकिको भवेत् तल्लौकिकाग्निपाके न दोषः, तत्पचितान्नभोजने न दोषो न प्रायश्चित्तम्, किन्तु कृते वैश्वदेवे अन्नोपघाते सति पुनः पाकस्तुलौकिकाग्नावेव, न गृह्ये ।

तदाहापरार्के बौधायनः—

"अचोदितेन पाकेन कृतेनोद्धरणेन वा ।
लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हती"ति ॥

पुनर्भोजने वैश्वदेवो न कर्तव्यः । तदाह—

वैश्वदेवस्य निर्वृत्तेर्यदन्योऽतिथिराव्रजेत् ।

तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ॥

तदा पुनः पाकं कृत्वा तस्मै दद्यान्न बलिं हरेद्वैश्वदेवं न कुर्यादित्यर्थः । एवं रात्रावपि । तेन महायज्ञवैश्वदेवकर्मणोरेकत्वाद्वाजसनेयीनां वैश्वदेवाख्यं कर्म दिवैव भवति न रात्रौ ।

अत एवोक्तं यज्ञपार्श्वे कात्यायनेन—

"अग्निमा(न)नग्निमान् कुर्यादिमांस्तु प्रत्यहं सकृत् ।
अन्यथा प्रत्यवायी स्याद्रौरवं नरकं व्रजेदि"ति ॥

स्मृतिरत्नावल्यां हरिहरभाष्ये च वचनान्तरमुदाहृतम् ।

"न हन्तर्ति न होमं च न स्वाध्यायं न तर्पणम् ।
नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित्" ॥

हन्तर्तिर्मनुष्ययज्ञः, होमो वैश्वदेवः, स्वाध्यायो ब्रह्मयज्ञः, तर्पणं पितृयज्ञः ।

यत्तु मदनपारिजाते—

"धर्मविन्नाचरेत्स्नानमाह्निकं तु पुनः पुनः ।
तर्पणं ब्रह्मयज्ञं च वैश्वदेवं च नाचरेत् ॥
सायम्प्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च ।
अनश्नताऽपि सततमन्यथा किल्बिषी भवेत्" ।

इत्युक्तं तच्छन्दोगविषयं न च वाजसनेयिविषयं, तस्माद्वाजसनेयिभिः प्रत्यहं सकृदेव पञ्चमहायज्ञाः कर्तव्या इति । यद्येवं तर्हि श्रुतिस्मृतिविहितं सायंकालीनं द्वितीयभोजनं कथं सिद्ध्येत् स्वात्मार्थे पाकनिषेधादिति चेदिति सत्यं ब्राह्मणादिभ्यो भिक्षादिदानार्थत्वेन

पाकस्य स्वात्मार्थत्वाभावान्निषेधाप्रवृत्तेः, पाकसंस्कारार्थम् । तदाह स्मृत्यन्तरे--

"वैश्वदेवा(संभवे)द्यभावे तु कुक्कुटाण्डप्रमाणकम् ।
अन्नमग्नौ सम्प्रहृत्य किल्विषात्तु विमुच्यते" ॥

सायंकालीनपुनर्भोजनपाकस्तु लौकिकाग्नावेव न गृह्ये ।

"अचोदितेन पाकेन कृते(नो)चोद्धरणेन वा ।
लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति" ॥

इति बौधायनवचनात् । यत्तु सायंप्रातर्वैश्वदेवः कर्तव्य इति बह्वृचविषयं, कातीयानां न सायमिति पुनः पाके सति । तथा च विष्णुपुराणे—

"पुनः पाकमुपादाय सायमप्यवनीपते ।
वैश्वदेवनिमित्तं तु पत्न्यमन्त्रं बलिं हरेत् ॥
तत्रापि श्वपचादिभ्यस्तथैवान्नापवर्जनम्" ॥

मनुरपि—

सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् ॥
( ३।१२१ ) इति ।

तथोक्तं काशीखण्डे—

"माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमाचरेत् ।
पत्नी सायं बलिं दद्यात् सिद्धान्नैर्मन्त्रवर्जितम् ॥
एतत्सायंतनं नाम वैश्वदेवं गृहाश्रमे ।
सायंप्रातर्भवेदेवं वैश्वदेवं प्रयत्नतः" ॥

तदाग्निमतोऽपि द्विर्भोजने न दोषः, किं तदपि श्रुत्या उक्तम् ।

"सायंप्रातर्वोऽश्नमिति (श०ब्रा०२।४।२।३) श्रुतेः" ।

तस्मादु सायंप्रातराश्येव स्यात्स यो हैवं विद्वान्त्सायंप्रातरा-श्नी भवति सर्वठं० हैवायुरेति यदु ह किं च वाचा व्याहरति तदु हैव भवति ( श० ब्रा० २।४।२।३। ) इति श्रुतेः ।

स्मृतिश्च—

"आहिताग्निरनड्वांश्च यतिश्च ब्रह्मचारिणः ।
एतेषामश्नतां सिद्धिरिति वेदविदो विदुः" ॥

ततः प्रातःशब्दश्चाष्टधाविभक्तस्याह्नः पञ्चमभागपरः ।

तथा च दक्षः--

पञ्चमे तु तथा भागे संविभागो यथार्हत. ।
देवपितृमनुष्याणां कीटानां चोपजीविनाम् ॥
संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत्" ।
सायंशब्दश्च सार्द्धप्रहरतो रात्रेरर्वाक् द्रष्टव्यः ॥

परिशिष्टे कात्यायनः—

ऋषिभिर्द्विरसनमुक्तं विप्राणां मर्त्यवासिनां नित्यम् ।
अहनि च तथा तमस्विन्यां सार्द्धं प्रथमयामान्तः (१३।९) ॥

ततः पाकार्थमेकदेशं महानसे कृत्वा ततो गच्छेत् वा कुण्ड-स्थितो गच्छेत् ।

तदाह यज्ञपार्श्वे—

"आवसथ्यः खरस्थानात्पाकार्थमाहृतोऽनलः ।
यदि खरस्थितो गच्छेत् वैश्वदेवः कथं भवेत् ॥
सर्वोद्धृत्य खरे कृत्वा आवसथ्यं विचक्षणाः ।

पञ्चयज्ञक्रियां कुर्यात् सायंहोमोऽपि तत्र वै ॥
पश्चाग्निर्मथ्य संस्थाप्य प्रातर्होमादिकाः क्रियाः" ॥ इति ।

यदा महानसाग्निं गच्छेत्तदा पुनरुद्धृत्य पाकं कृत्वा, ( कुर्यात् । ) विशेषस्तु ग्रन्थान्तरेऽवगन्तव्यः । अत्र विस्तरभयान्न लिख्यते । प्रवासनिर्णयस्त्वग्रे वक्ष्यामः ।

इति स्मार्तोल्लासे पाकनिर्णयः समाप्तः ॥

## अथ वैश्वदेवप्रयोगः ।

कारिकायाम्—

"अह्नोऽष्टधा विभक्तस्य चतुर्थे स्नानमाचरेत् ।
पञ्चमे पञ्च यज्ञा स्युर्भोजनं च तदुत्तरम् ॥
अह्नोऽष्टधाविभक्तस्य विभागः पञ्चमः स्मृतः ।
कुतश्चित्कारणान्मुख्यकालाभावे तदन्यथे"ति ॥

अथ देवयज्ञः ।

महानसादग्निमुद्धृत्य कुण्डे निधाय ताम्रपात्रे वैश्वदेवादन्नमुद्धृत्य घृतेनाभिघार्य ।

तदुक्तं घृताभावे—

"घृतं वा यदि वा तैलं पयो वा यदि वा दधि ।
घृतस्थाने नियुक्तानां घृतशब्दो विधीयते" ॥

(१)"यद्देवा" ( शु० य० सं० २०।१४-१६ ) इति तिसृभिर्ऋग्भिर्मणिकोदकेन क्षुद्रदृष्टिपातजनितदोषपरिहारार्थमुद्धृतान्नप्रोक्षणम्। कृतकुशोपग्रहेण पवित्रपाणिनाऽऽचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य (२)पञ्चसूनाजनितैनोनिबर्हणपूर्वकनित्यकर्मानुष्ठानसिद्धिद्वारा परमेश्वरप्रीत्यर्थं वैश्वदेवाख्यं कर्म करिष्ये।

ततोऽग्निपूजनम्। पावकनामाग्निं ध्यात्वा (३)'एषो ह देव' ( शु० य० सं० ३२।४ ) इत्यासनम्। (४)'ॐस नः पिते'ति ( शु० य० सं० ३।२४ ) पञ्चोपचारैर्वह्निरग्निं सम्पूज्य—

"मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक्तथा।
पितॄणां च नमस्तस्मै विष्णवे पावकात्मने"॥

इत्यग्निं प्रणमेत्।

ततो देवताभिध्यानम्। तत्र ब्रह्माणं प्रजापतिं गृह्याः कश्यपं

---

( १ ) ॐयद्देवा देवहेडनन्देवासश्चकृमा व्वयम्। अग्निर्म्मातस्मादेनसो व्विश्वान्मुञ्चत्वᳪं हसः॥ यदि दिवा यदि नक्तमेनाᳪंसि चकृमा व्वयम्। व्वायुर्म्मातस्मादेनसो व्विश्वान्मुञ्चत्वᳪं हसः॥ यदि जाग्रद्यदि स्वप्नऽएनाᳪंसि चकृमा व्वयम्। सूर्यो मा तस्मादेनसो व्विश्वान्मुञ्चत्वᳪं हसः।

( २ ) पञ्च सूना गृहस्थस्य वर्तन्तेऽहरहः सदा।
कण्डनी पेषणी चुल्ली जलकुम्भी च मार्जनी"ति।

( ३ ) ॐएषो ह देवः प्रदिशोऽनु सर्वाः पूर्व्वो ह जातः स उ गर्भेऽअन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥

( ४ ) ॐस नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये।

अनुमतिं पर्जन्यं अपः पृथिवीं धातारं विधातारं वायुं वायुं वायुं वायुं प्राचीं दक्षिणां प्रतीचीं उदीचीं ब्रह्माणं अन्तरिक्षं सूर्यं विश्वान् देवान् विश्वानि भूतानि उषसं भूतानां च पतिं पितॄन् यक्ष्मासं गोत्रान् पितृपितामहप्रपितामहान् द्वितीयगोत्रान् मातामहप्रमातामह-वृद्धप्रमातामहान् मनुष्यान् गाः वैश्वदेवान्नपात्रनिर्णेजनस्वधाभिरहं य-क्ष्ये । मणिकोदकेनाग्नेः पर्युक्षणम् । (१)इतरथावृत्तिः । दक्षिण-जानुनिपातेन सव्यहस्तं सोपग्रहं निधाय दक्षिणेन जुहुयात् ।

ॐब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐप्रजापतये स्वाहा इदं प्रजापतये न मम । ॐगृह्याभ्यः स्वाहा । इदं गृह्याभ्यो न मम । ॐकश्यपाय स्वाहा । इदं कश्यपाय न मम ॐअनुमतये स्वाहा । इदमनुमतये न मम । इति देवयज्ञः । नात्र संस्रवः ।

## ( अथ भूतयज्ञः )

ततो मणिकसमीपे पश्चिमभागे प्राक्संस्थमुदक्संस्थं वा त्रीणि बलिहरणानि—ॐपर्जन्याय नमः। इदं पर्जन्याय न मम । ॐअद्भ्यो नमः । इदमद्भ्यो० । ॐपृथिव्यै नमः। इदं पृथिव्यै न मम । ततो द्वारदेशे । ॐधात्रे नमः । इदं धात्रे० । ॐविधात्रे नमः । इदं वि-धात्रे० । प्राच्यां दिशि वायवे नमः। इदं वायवे० । पुनः प्राच्यै दिशे नमः। इदं प्रा० । ॐदक्षिणायै दिशे नमः । इदं दक्षि० । ॐप्र-तीच्यै दिशे नमः इदं प्र० । ॐउदीच्यै दिशे० । इदमुदीच्यै न

( १ ) "विवृत्यावृत्य चेतरथावृत्ति ( का० श्रौ० १।८।२४ ) रिति सूत्रोक्तेः ॥

मम । मध्ये ॐ ब्रह्मणे नमः । इदं ब्रह्मणे० । ॐ अन्तरिक्षाय नमः । इदमन्तरिक्षाय० । ॐ सूर्याय नमः । इदं सूर्याय० । तदुत्तरतः ॐ विश्वेभ्यो देवेभ्यो नमः । इदं विश्वेभ्यो देवेभ्यो न मम । ॐ विश्वेभ्यो भूतेभ्यो नमः । इदं विश्वेभ्यो भूतेभ्यो न मम । तदुत्तरतः— ॐ उषसे नमः । इदमुषसे० । ॐ भूतानां च पतये नमः । इदं भूतानां च पतये न मम । इति भूतयज्ञः ।

( अथ पितृयज्ञः )

अथ पितृयज्ञः । शेषमन्नं पिण्डीकृत्य प्राचीनावीती दक्षिणामुखो भूत्वा सव्यं जान्वाच्य बलित्रयाद् दक्षिणतो दद्यात् । ॐ पितृभ्यः स्वधा नमः । इति पितृतीर्थेन दद्यात् । इदं पितृभ्यः स्वधा न मम । तत्रोदकस्पर्शः । इति पितृयज्ञः ।

गृह्याग्निमतस्तु पितृ(भ्यो)बलिरेव नित्यश्राद्धस्य सिद्धिर्न पृथक् । निरग्निकस्य(स्तु) पृथक्कर्तव्यम् । यावत्कर्म प्राक्संस्थमुदक्संस्थं वा कर्तव्यम् । ततो यज्ञोपवीती भूत्वा हस्तं पात्रे प्रक्षाल्य वायव्यां दिशि निनयेत् । ॐ यक्ष्मैतत्ते निर्णेजनम् । इदं यक्ष्मैतत्ते निर्णेजनं न मम । यथोक्तनानास्थाने गृहद्वारादौ बलिदानासम्भवे उक्तं छन्दोगपरिशिष्टे कात्यायनेन—

"एकत्र चे(त्कृत्सा)दविकृष्टा भवन्तीतरेतरासंसक्ताश्चे"ति । गृहद्वारादेर्यथोक्तस्थाने बलिदानासम्भव एकत्र चेदेकस्मिन्नेव स्थाने यथा बलयो दीयन्ते तदा अविकृष्टा अभ्यर्वाहिता इवरेतरासंसक्ताश्च परस्परमसंलग्नाश्च दातव्या इत्यर्थः । अस्मिन् पक्षेऽग्नेः पश्चिमतश्च-

तुरस्रे मण्डले द्वारादिकं प्रकल्प्य यथोक्तस्थाने बलिदानं कार्यम्। बलीनभिधायाह छन्दोगपरिशिष्टे कात्यायनः—

"पिण्डवच्च पश्चिमा प्रतिपत्ति"रिति। पिण्डवत् पिण्डानां या प्रतिपत्तिः, पिण्डास्तु (१)"गोऽजविप्रेभ्यो दद्यादग्नौ जले अपि वे"त्यनेन विहिता सैव बलीनां पश्चिमा द्वितीया प्रतिपत्तिरित्यर्थः।

ततो बृहत्पराशरोक्तकल्पेन—(२)"त्वमग्ने द्युभि" (शु० य० सं ११।२७) रित्येकया (३)"आ ब्रह्मन्नि"त्येकया (शु० य० सं० २२।२२) (४)"महाव्यग्न" (य० सं २०।७९) इत्येकया—

"स्वरेण वर्णेन च यद्विहीनं तथैव हीनं क्रियया अपि यच्च।

---

(१) एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्।
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत्।
(म० स्मृ० ३।२६०)

(२) ॐ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः। (शु०य० सं० ११।२७) इति।

(३) ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्। (शु० य० सं० २२।२२)।

(४) ॐ महाव्यग्ने हविरास्ये ते स्रुचीव घृतञ्चम्वीव सोमः। वाजसनिᳬ रयिमस्मे सुवीरम्प्रशस्तन्धेहि यशसम्बृहन्तम्। (शु० य० सं० २०।७९)।

तथातिरिक्तं मम तत्त्वमस्व ततस्तवाग्ने परिपूर्णमे(व)तत्" ॥

एभिर्मन्त्रैरग्नेः प्रसादनम् ।

(१) "ऽयायुषमि" (शु० य० सं० ३।६२) त्यनेन भस्मना त्रिपुण्ड्धारणम् ।

( अथ ब्रह्मयज्ञः । )

अथ पूर्वो(र्वं)न कृतश्चेदत्र यथाशक्ति पूर्ववद् ब्रह्मयज्ञः(२) । ततोऽग्नेः पश्चिमतः स्वासने प्राङ्मुखोपविश्य देश-

---

( १ ) ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् । ( शु० य० सं० ३।६२ ) इति ।

अत्र सूत्रे विशेषः—त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम् । ( पा० गृ० २।४ ) इति । अत्र प्रकरणे त्र्यायुषकरणं सूत्रकारानुक्तमपि प्रसिद्धत्वात् शिष्टपरम्पराचरितत्वात्क्रियते ।

(२) देवतामुद्दिश्य द्रव्यत्यागो यागः । (का०श्रौ० १।२।२।) (पू० मी० ४।२।सू० २७।२८ ) स च ब्रह्मयज्ञादिषु नास्ति । तत्कथमेतेषु यज्ञशब्द इत्याशङ्क्य तेषां यज्ञत्वमुपपादयितुमृच उदाहरत्याश्वलायनः स्मार्तकल्पे—"यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः" । ( ऋ० मं० ८।१९।५ ) अस्यार्थः—यो मर्तो मर्त्यः समिधा अग्नये विभक्तिव्यत्ययः । अग्निं ददाश दाशतिर्दानकर्माऽन्यत्र, इह तु प्रीणने द्रष्टव्यः प्रीणाति । य आहुती तृतीयकवचनस्य पूर्वसवर्णं दीर्घः । यश्चाहुत्याग्निं प्रीणाति । यो वेदेन= यश्च वेदेनाग्निं प्रीणाति । यो नमसा=यश्च नमस्कारेणाग्निं प्रीणाति । यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । सः स्वध्वरः सर्वोऽपि शोभनयज्ञः न केवलं य आहुत्या प्रीणाति स एव किञ्च—"तस्येदर्वन्तो रंहयन्त

कालौ सङ्कीर्त्य "इषे त्वे" ( य०सं० १।१ ) त्यादि "खं ब्रह्म" ( य० सं० ४०।१८ )न्तकस्य माध्यन्दिनीयकस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वान् ऋषिः गायत्र्यादीनि सर्वाणि छन्दांऽसि सर्वाणि यजूंऽषि सर्वाणि सामानि प्रतिलिङ्गोक्ता देवता ब्रह्मयज्ञारम्भे विनियोगः ।

केचित्तु दशप्रणवसहितेषु इत्येवं प्रयोगः । दशप्रणवद्वेधा-प्रकारः ।

---

आशवस्तस्य द्युम्नितमं यशः । न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत्" । ( ऋ० ८।१९।६ ) तस्येत्=तस्यैव अर्वन्तः=अश्वाः रंहयन्ते=गमयन्ति कं रथं आशवः=क्षिप्रगामिनः । द्युम्नितमं द्युम्नमिति हिरण्यनाम (नि० ३।९) । अतिशयेन द्युम्नवत् द्युम्नितमम् । एवं भूतयशोऽपि तस्यैव । तस्य देवकृतमंहः व्यसनं कुतश्चनापि न नशत् न व्याप्नोति मर्त्यकृतं चांहो न नशद् इति । तथा च—"अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात्स्वादीयो मधुनश्च वोचत" (ऋ०४।८।२४। २० ) इति । तथैव—"आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि । ते ते भवन्तूक्षण ऋषभासो वशा उत" ( ऋ० ६। १६ । ४७ ) स्तुतिलक्षणं गां वाचं यो न रुणद्धि तस्मै अगोरुधाय गविषे गामिच्छते द्युक्षाय द्युःस्थानाय दस्म्यमनुरूपं स्तुतिलक्षणं वचः घृताद् मधुनश्च स्वादीयः स्वादुतरं दर्शनीयं वोचत ब्रूत हे मदीया ऋत्विजः पुत्रपौत्रा वा । मम स्वभूतमिदं वच एव घृताच्च मधुनश्च स्वादीयोऽस्त्विति । न केवलं घृताच्च मधुनश्च, मांसादपि स्वादुतरमिति दर्शयितुमियं ऋक्—'आते' इति । हे अग्ने तुभ्यं हृदा तष्टं हृदयेन चिकीर्षितं हविः ऋचा ऋग्रूपेण आभरामसि आहरामो वयम् । ते, लिङ्गवचनभेदः तादृग्रूपं हविः ते तव उक्षाणः ऋषभाश्च वशाश्च भवन्ति । वन्ध्या गावो वशाः ।

"आदौ प्रणवमुच्चार्य व्याहृतीः प्रणवान्विताः ।
मन्त्रादौ प्रणवः कार्यो मन्त्रान्ते प्रणवः पुनः ॥
ततो व्याहृतिसंयुक्तस्त्वन्ते च प्रणवः (सदा)पुन"—
रित्येकः पक्षः ॥

अपरस्तु—

"आदौ प्रणवमुच्चार्य सप्त व्याहृतयस्ततः ।
मन्त्रादौ प्रणवः कार्यो मन्त्रान्ते प्रणवः पुन"रिति

रुद्रकल्पद्रुमोक्तेः । एवं प्रणवव्याहृति(भि)र्गायत्रीं चाम्नायस्वरेणाधीत्य' गृह्यकारिकायां विशेषः—

"बद्धाञ्जलिर्दर्भपाणिः प्राङ्मुखस्तु कुशासनः ।
वामाङ्घ्रिमुत्तमं कृत्वा दक्षिणं तु यथाक्रमम् ।
दक्षिणे जानुनि करोत्यञ्जलिं तमृषेर्मतात्" ।

इति 'विशेषः' । तत्रादौ 'छन्दःपुरुषन्यासं कृत्वा ब्रह्मयज्ञार(म्भे)म्भो' इति वचनात् । सर्वानुक्रमसूत्रे—तद्यथा—

ॐ तिर्यग्बिलाय चमसोर्द्ध्वबुध्नाय छन्दःपुरुषाय नमः शिरसि । ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः । ॐ विश्वामित्रजमदग्निभ्यां नमः मन्त्रावृत्या श्रोत्रयोः । ॐ वशिष्ठकश्यपाभ्यां नमः नासापुटयोः । ॐ अत्रये नमः वाचि । ॐ गायत्र्यै छन्दसेऽग्नये नमः शिरसि । ॐ उष्णिहे छन्दसे सवित्रे नमः ग्रीवायाम् । ॐ बृहत्यै छन्दसे बृहस्पतयेऽनूके । अनूकः पृष्ठवंशः । ॐ बृहद्रथन्तराभ्यां द्यावापृथिवीभ्यां मन्त्रावृत्या बाह्वोः । ॐ त्रिष्टुभे छन्दसे इन्द्राय नमः मध्ये । मध्यमुदरम् । ॐ जगत्यै छन्दसे आदित्याय नमः,

मन्त्रावृत्त्या श्रोणयोः । ॐ अतिछन्दसे प्रजापतये नमः लिङ्गे । ॐ यज्ञायज्ञियछन्दसे वैश्वानराय नमः पायौ=गुह्ये । ॐ अनुष्टुभे छन्दसे विश्वेभ्यो देवेभ्यो नमः मन्त्रावृत्त्या ऊर्वोः । ॐ पङ्क्त्यै छन्दसे मरुद्भ्यो नमः । मन्त्रावृत्त्या अष्ठीवन्तौ । अष्ठीवान् जानु । ॐ द्विपदायै छन्दसे विष्णवे नमः, मन्त्रावृत्त्या पादयोः । ॐ विच्छन्दसे वायवे नमः प्राणेषु=नासिकारन्ध्रेषु । ॐ न्यूनाक्षरच्छन्दसे अद्भ्यो नमः, हस्तद्वयविपर्यासेन मस्तकादिपादान्तं सर्वाङ्गेषु । वेदमयः सम्पद्यते शापानुग्रहसमर्थो भवति आम्नं तेजश्च वर्द्धते न कुतश्चिद्भयं विदन्ते ऋङ्मयो यजुर्मयः साममयो ब्रह्ममयो ऽमृतमयः सम्भूय ब्रह्मैवाभ्येति तस्मादेतन्नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय न चाप्रवक्त्रेऽनुब्रूयादित्याह भगवान् कात्यायनः ।

"प्रणवादौ प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदादिमारभेत्" ॥

"इषे त्वे"त्यादि वेदमारभ्यानुवाकशो यजुषो वा संहितां, ब्राह्मणं चाध्यायशो ब्राह्मणशो वा प्रणवावसानं यथाशक्ति प्रत्यहमधीयानो मन्त्रं ब्राह्मणं च समाप्य पुनरेवमेवारभ्य समापयेत् । प्रणवव्याहृतीर्गायत्रीपूर्वकं तु प्रतिदिनं पठेत् । एवमेवेतिहासपुराणादीन् पठेत् । अशक्तौ तु गायत्रीजपमात्रम् ।

तदुक्तम्—

"ब्रह्मयज्ञस्य सिद्ध्यर्थं गायत्र्येकां जपेत्ततः ।
तेन प्रीततरां याति देवदेवो जनार्दनः" ॥

इति वचनात् । एवं द्विवेदाध्यायी त्रिवेदी चतुर्वेदी आरभ्य समाप्य पुनः पठेत् । अथवा 'इषे त्वोर्ज्जे त्वा'प्रथमाकण्डिका, अन्ते 'हिरण्मयेन' ( य० सं० ४०।१७ ) 'व्रतमुपैष्यन्' ( श० बा० १।१।१।१ ) 'प्राश्नीयात् पुत्रादासुरिवासिनः' (श०ब्रा० १४।६।४।३३) 'अग्निमीले पुरोहितम्' (ऋृ० १।१।१) । 'अग्न आयाहि वीतये' ( सामवे० १।१।१ ) 'शन्नोदेवो रमिष्टये' (अ० वे० १।१ ) 'अथानुवाकान् वक्ष्यामि' ( अनुवाकसूत्रम् १ ) 'मण्डलं दक्षिणमक्षिहृदयं' ( सर्वानुक्रमणी १ ) 'अथातोऽधिकारः फलयुक्तानि कर्माणि' ( का० श्रौ० १।१।१–२ ) 'अथातो गृह्य-स्थालीपाकानां कर्म' (पा० गृ० १।१) 'अथ शिक्षां प्रवक्ष्यामि' (पा० शि० १।१) 'पञ्चसंवत्सरमयं० (वे० ज्यो० १) 'मयरसतजभन' (पि०सू० १) 'गौः ग्मा ज्मा' (निघण्टु) वृद्धिरादैच् (पा० १।१।१) 'समाम्नायः समाम्नातः' ( नि० १।१ ) 'अथातो धर्मजिज्ञासा' (पू० मी० १।१।१) 'अथातो ब्रह्मजिज्ञासा' (उ० मी० १।१।१) 'योगीश्वरं याज्ञवल्क्यम्' (या० स्मृ० १।१) 'नारायणं नमस्कृत्य' ( म० भा० १।१।१ ) ब्रह्मणे नम इति त्रिरुच्चार्य ।

इति विद्यातपो योनिरयोनिर्विष्णुरीडितः ।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥

इति मन्त्रेण विष्णवे समर्पयेत् । ब्रह्मयज्ञार्थान् कुशानुत्तरतः प्रक्षिप्याचामेत् । ब्रह्मयज्ञस्तु अमावास्यादिष्व(१)नध्यायेऽप्यपि

(१) "वातेऽमावास्यायाᳪं सर्वानध्यायः" ( पा० गृ० २।१३।१ ) "पर्वणि नाध्येतव्यमि"त्यादयो ये मन्त्राणामध्ययनकाले स्वधर्मास्ते

कर्तव्य एव "अहरहः स्वाध्यायमधीते" ( श०ब्रा० ११।५।६।८ ) ( कौ० गृ० २ पत्रे )ति श्रुतेः ।

ब्रह्मयज्ञे तु द्वावेवानध्यायौ, आत्माऽशुचिस्तदा एकः देशाशुचिस्तदा एकः। तत्रानध्याये ब्रह्मयज्ञ अल्पीयान् मनसा च कर्तव्यः । इति ब्रह्मयज्ञः ।

( अथ मनुष्ययज्ञः )

मनुष्ययज्ञार्थे षोडशग्रासपरिमितमन्नं तत्राप्यशक्तौ ग्रासं वा ग्रासार्द्धं अन्नमुद्धृत्य सङ्कल्पयेत् । कण्ठं कृत्वा सनकादिमनुष्येभ्यो हन्त ते नमः । इदं सनकादिमनुष्येभ्यः । इति पञ्चमो मनुष्ययज्ञः। ततः सव्यं देवतानैवेद्यम् । तदुक्तं गङ्गाधरेण—

"हन्तकारस्य विप्रस्य पूजनं परिवेषणम् ।
हस्तं प्रक्षाल्य सङ्कल्पस्त्वपोशानं तु सर्वतः ॥
नैवेद्यं देवतानां च कृत्वानुज्ञापयेद्द्विजान् ।
गोग्रासं बलयश्चाथ भिक्षादानादिकं ततः" ॥

आह्निके—

"सुसंस्कृतान्नमध्वाद्यैः पयोदधि नियोजयेत् ।
फलमूलव्यञ्जनानि मोदकांश्च निषेधयेत्" ॥

अथ गोग्रासः—

"सौरभेयः सर्वहिताः पवित्राः पुण्यराशयः ।

कर्मकालेऽपिस्युरिति पूर्वपक्षे-निषेधस्य ग्रहणाध्यापनविषयत्वेन क्रतुप्रयोगे तन्निषेधाभावात् क्रतावनध्यायेऽप्यस्ति मन्त्रप्रयोग इति जैमिनेः ( १५।३ सू० १८-१९ ) सिद्धान्तः ।

प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः" ॥

इति मन्त्रेण गवे दद्यात् । इदं गोभ्यः ।

अथ वायसबलिः—

"ऐन्द्रवारुणवायव्या याम्या वै नि(नै)र्ऋति(ता)स्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्" । इति वायसेभ्यः ।
"द्वौ श्वानौ श्यामशवलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ" । इदं श्वभ्यः ॥
"पिपीलिकाः कीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबद्धबद्धाः ।
प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु" ॥

इति कीटबलिः ।

इति बलित्रयं गृहाङ्गणे दद्यात् । तेभ्यो न स्पर्शः ।

तदुक्तम्—

"काकश्वादिबलिभ्यस्तु सङ्कल्पानन्तरं स्पृशेत् ।
स्नानं कृत्वा सचैलं तु पञ्चगव्येन शुद्ध्यति" ॥

ततः पादौ प्रक्षाल्याचम्य गृहमागत्य बालवृद्धादीन् भोजयेत्(१) । निरग्निकस्य प्रयोगमग्रे वक्ष्यामः ।

इति स्मार्तोल्लासे गृह्याग्निमत्कर्तृके गृह्योक्तवैश्वदेव-
प्रयोगः समाप्तः ।

---

(१) अत्र कारिकाः—

स्वाहान्तास्ता जले वाग्नौ कुर्यात्पञ्चाहुतीः क्रमात् ।
ब्रह्मा प्रजापतिर्गृह्याः कश्यपोऽनुमतिस्तथा ।

## ( अथ वैश्वदेवनिर्णयः । )

अथेदानीं तदुपयोगिनिर्णय उच्यते ।

"अकृते वैश्वदेवे तु भिक्षुके गृहमागते ॥

उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ।

वैश्वदेवाकृतं पापं शक्तो भिक्षुर्व्यपोहति (हितुम्)" ॥

---

चतुर्थ्यन्तैर्जलं क्षिप्त्वा वैश्वदेवबलिं चरेत् ।

पर्जन्य आपः पृथिवी धातापि च विपूर्वकः ।

चतुर्वायुः प्राच्यवाची प्रतीचीचाप्युदीच्यपि ।

ब्रह्मान्तरिक्षसूर्याश्च विश्वेदेवास्ततः परम् ॥

विश्वा भूतान्युषश्चापि भूतानां च पतिस्तथा ।

अपसव्येन सतिलं पितृभ्यश्च स्वधा नमः ॥

सनकादि सप्त मर्तेभ्यो हन्त कण्ठापवीतवान् ।

यक्ष्मैतत्ते च सव्येन जलनिर्णेजनं नमः ॥

ये च (दद्यात् ) काकश्वचाण्डालाः पतिताः पापसङ्गिनः ।

ततः कीटपतङ्गाश्च गावः श्वानौ ततः परम् ॥

चतुर्थ्यन्तानुपादाय नमोन्तान् क्रमतः पठेत् ।

देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसङ्घाः ।

प्रेताः पिशाचास्तरवः समन्ताद्ये चान्नमिच्छन्ति मया प्रदत्तम् ।

कीटाः पतङ्गास्तरवश्च वृक्षा जले स्थले ये विचरन्ति जीवाः ।

ते तृप्तिमायान्तु मया प्रदत्तं तेभ्यो विसृष्टं भुवि चान्नमेतत् ।

येषां न माता न पिता न बन्धुर्न चान्नसिद्धिर्नतथान्नमस्ति ।

तत्तृप्तयेऽन्नं भुवि दत्तमेतत्तेचान्नतृप्ता मुदिता भवन्तु । इति ।

स्मार्तगङ्गाधरे—

उद्धृत्याग्निं पचेदन्नं मणिकस्यात्र वारिणा ।

साग्नेः सर्वत्र श्राद्धादौ वैश्वदेवः—

"पक्षान्तं कर्म निर्वृत्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं ततः" ॥

पक्षान्तं =अग्न्यन्वाधानम् । पिण्डयज्ञं=पिण्डपितृयज्ञः । अन्वाहार्यकं=दर्शश्राद्धम् ।

"पित्र्यर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च ।

---

श्राद्धार्थकं तथा चैव पञ्चयज्ञार्थमेव च ॥
मातृपूजा ततः श्राद्धं कृत्वाग्निमपरेण तु ।
उपविश्याभिमन्त्र्यापः प्रोक्ष्यान्नं च द्वितीयकम् ॥
अर्चनं चार्चयेत्प्राणान् कर्मसंकल्प एव च ।
देवतानामभिध्यानं कृत्वा पात्रेऽन्नमुद्धरेत् ॥
अभिघार्य घृताद्येन पर्युक्ष्याग्निं च वारिणा ।
होमो भूतबलिश्चान्यन्नित्यश्राद्धं समाचरेत् ॥
प्रक्षाल्य पादानुपवेश्य विप्रान्दत्वासनं पूजनमेव तेषाम् ।
प्रक्षालनं भाजनविप्रयोरन्नं तदालभ्य तिलोदकेन ॥
कृत्वान्नसङ्कल्पमिदं हि नित्यं श्राद्धं पुराणा मुनयो वदन्ति ॥
आस्तीर्य स्वासने दर्भानुपविश्य कुशत्रयम् ।
धारयन्नचलो हस्तौ दक्षिणोरौ ततः पठेत् ॥
सोङ्कारव्याहृतीस्तिस्रो गायत्रीं संहितादिकम् ।
ॐकारं च तथा चान्ते स्वस्ति दर्भान्क्षिपेदुदक् ।
हन्तकारस्य विप्रस्य पूजनं परिवेषणम् ॥
हस्तक्षालनसङ्कल्पस्त्वपोशानं च सर्वतः ।
नैवेद्यं देवतानां च कृत्वानुज्ञापयेद्द्विजान् ॥
गोग्रासं बलयश्चापि भिक्षादानादिकं ततः ।
यान्तु मातृगणा उक्त्वा मातॄणां च विसर्जनम् ॥ इति ।

वैश्वदेवं न पित्र्यर्थं न दार्शं वैश्वदेविकमि"

ति लोगाक्षिस्मृतेः ।

अत्र साग्निकस्त्रेताग्निरिति हेमाद्रिः । कात्यायनानां तु सर्वार्थमेक एव पाको "वैशवदेवादन्नादि"( गृ० सू० २।९।२ )ति सूत्रात् । अन्येषां तु पृथक् । अन्येषां=स्मार्ताग्निरहितानाम् ।

"श्राद्धात् प्रागेव कुर्वीत वैश्वदैवं तु साग्निकः ।

एकादशाह्निकं मुक्त्वा तत्र ह्यन्ते विधीयते" ॥

इति हेमाद्रावुक्तेः । तत्रैव परिशिष्टे—

"सम्प्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च ।

अग्रतो वैशवदेवः स्यात् पश्चादेकादशेऽहनि" ॥

---

अत्र सूत्राणि । अथातः पञ्चमहायज्ञाः ॥ १ ॥ वैश्ववदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति ॥२॥ भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै ॥३॥ धात्रे विधात्रे च द्वार्ययोः ॥ ४ ॥ प्रतिदिशं वायवे दिशां च ॥ ५ ॥मध्ये त्रीन्ब्रह्मणेऽन्तरिक्षाय सूर्याय ॥६॥ विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः ॥ ७ ॥ उषसे भूतानां च पतये परम् ॥ ८ ॥ पितृभ्यः स्वधा नम इति दक्षिणतः ॥ ९ ॥ पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मै तत्त इति ॥ १० ॥ उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति ॥ ११ ॥ यथार्हं भिक्षुकानतिथींश्च सम्भजेरन् ॥ १२ ॥ बालज्येष्ठा गृह्या यथार्हमश्नीयुः ॥ १३ ॥ पश्चाद् गृहपतिः पत्नी च॥ १४ ॥ पूर्वो वा गृहपतिः तस्मादु स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः ॥ १५ ॥ अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात् ॥ १६ ॥ (पा० गृ० २।९।)।

श्राद्धात् पूर्वं वैश्वदेवं स्मार्ताग्निमतां केवलनिरग्निक(स्तु)स्य तु—अग्नौ करणोत्तरं विकिरोत्तरं वा होममात्रं पृथक्पाठेन भूतयज्ञादि श्राद्धान्त एव । अत्र मूलं हेमाद्रि-चन्द्रिकादौ स्पष्टम् । सर्वेषां श्राद्धान्ते वा तत्पाकेन वैश्वदेवनित्यश्राद्धादीनि तृतीयः ।

"श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं तथा ।
कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथे"ति

**पैठीनसिस्मृतेः** ।

ततः श्राद्धशेषात् "श्राद्धेऽह्नि श्राद्धशेषेण वैश्वदेवं समाचरेदि"ति **चतुर्विंशतिमताच्च** । एवं वैश्वदेवकालत्रय **अपरार्के शाङ्खायनपरिशिष्टमुदाहृत्यैव** व्यवस्थोक्ता—

"आदौ वृद्धौ क्षये चान्ते दर्शमध्ये महालये ।
एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयत" इति ॥

**बहुस्मृत्युक्तत्वात्** सर्वेषां श्राद्धान्त एवेति **मेधातिथिस्मृतिरत्नावल्यादयो** बहवः । **बह्वृचां** 'श्राद्धान्ते एवे'ति **वोपदेवः** । मध्य(म)पक्षस्त्वन्यशाखापर इति स एव । हेमाद्रिस्तु वृद्धावप्यन्ते एव वैश्वदेवस्तु कातीयानां स्मार्ताग्निमतामादावेव सिद्धान्तः । एतद्दिवासम्भवे रात्रावपि कार्यम् ।

**तथा बृहन्नारदीये—**

"दिवोदितानि कार्याणि (कर्माणि) प्रमादादकृतानि वै ।
यामिन्याः प्रहरं यावत् कर्माणि तत्र कारयेत्" ॥

**अत्र विशेषः—**

"अकृते वैश्वदेवे चेदस्तमेति गभस्तिमान् ।

वैश्वदेवं ततः कुर्यात्सायं होमं समाचरेत्" ॥
अत एव वैश्वदेवो वाजसनेयीनां तु दिवैव न रात्रौ ।

इति स्मार्ताग्नीनां वैश्वदेवनिर्णयः ।

## ( अथ सायंप्रातर्होमकालः । )

अथ सायंप्रातर्होमः । तत्रादौ होमकालस्तूच्यते । अस्तमितलक्षणं कात्यायनेनोक्तम् —

"यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
(१)लोहितत्वं च नापैति (नोपैति)तावत्सायं तु हूयते" ॥

अनुदितस्तु द्विविधः, अनुदितश्च समयाध्युषितश्च ।

तथा च मनुः—

"उदितेऽनुदिते चैव समयाध्युषिते त(२)थे"ति ।

तत्रानुदितः स्पष्टतारकोपलक्षितः ततः परमुदयात् प्राक् समयाध्युषितः सम्पूर्णादित्यमण्डलदर्शनोपलक्षित उदितः ।

अन्यच्च—

"प्रातर्होमः सङ्गवान्ते कालस्त्वनुदिते तथा ।
सायमस्तमिते होमः कालस्तु नवनाडिकाः" ॥

मुख्यकाले यदा होमो न भवति तदा गौणकालेऽपि कार्यः ।

---

( १ ) न च लौहित्यमापैतीति ( ६।३ ) का० स्मृ० पाठः ।
( २ ) म० स्मृ० २।१५ ।

तथाह मण्डनः—

"मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते ।
गौणकालेऽपि कर्तव्यं गौणोऽप्यत्रेदृशो भवेत्" ॥
"आ सायमाहुतेः कालात् कालोऽस्ति प्रातराहुतेः ।
प्रातराहुतिकालात्प्राक् कालः स्यात्सायमाहुतेरि"ति ॥

मुख्यकालातिक्रमे प्रायश्चित्तपूर्वं गौणकालेऽनुष्ठानम् । गौणकालातिक्रमे तु लोप एव । मुख्यगौणकालातिक्रमे फलमाह देवयाज्ञिके—

"गणितात्सिद्धितः कालः काले तिष्ठन्ति देवताः ।
वरमेकाहुतिः काले अकाले कोटिसङ्ख्यया ॥
कालातीते च यः कुर्याच्छ्राद्धं होमं जपं तथा ।
व्यर्थं भवति तत्सर्वमपमृत्युं विधं तथा ॥
परद्रव्येण यो होम आसुरस्तस्य देवता ।
कालातिक्रमदोषे तु राक्षसस्तस्य देवता ॥
अशुचिर्यत्र होमेऽपि पिशाचस्तस्य देवता ।
तस्मात् काले शुचिर्द्रव्ये होतव्ये(व्यं) नान्यथा क्वचित्" ॥

( अथ होमाधिकारिणः । )

अथ होमाधिकारी उच्यते ।

"ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरेव हुतं यस्य तद्धुतं स्वयमेव तु" ।

गृह्यकारिकायाम्—

"पुत्रो गुरुः सौहृदभागिनेयः कन्यापतिस्तत् सुतपौत्रशिष्याः ।

पितृव्यतत्पुत्रकमातुलाख्याः पत्नी ततोऽ(न्ये)तो हवनक्रियायाः"
"पत्नी कन्या च जुहुयाद् विना पर्युक्षणक्रियामि"ति ।
अत्र वचनात्पत्न्यादीनां मन्त्रपाठेऽधिकारः, केवलपर्युक्षणे नाधिकरः । त्यागे विशेषः—

"सन्निधौ यजमानः स्यादुद्देशत्यागकारकः ।
असन्निधौ तु पत्नी स्यादुद्देशत्यागकारि(णी)का" ॥

कात्यायनोऽपि—

"असमक्षे(क्षं) तु दम्पत्योर्होतव्यं नर्त्विगादि(भिः)ना ।
द्वयोरप्यसम(क्षं)क्षे तु(हि) भवेद्धुतमनर्थकम्(१)" ॥
असन्निधौ तु (पत्न्याः) पत्नी स्यादध्वर्युस्तदनुज्ञया ।
उन्मादे प्रसवे चर्तौ कुर्वीतानुज्ञया विना" ॥

मण्डनः—

"त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः ।
उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत्" ॥

( होमद्रव्याणि । )

अथ होमद्रव्याणि स्मृत्यर्थसारे—

"पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तैलमापो दशैतान्यग्निहोत्रके ॥
स्यादग्निहोत्रवत् गृह्ये संस्कारो मन्त्रवर्जितः ।
यद्वा त्रिः प्रोक्षणं तेषां मांसमौपासनेन च ॥

---

( १ ) का० स्मृ० २०।१ ।

शालीश्यामाकनीवारव्रीहिगोधूमयावकाः ।
एतेषां तण्डुला होम्या यावनालप्रियङ्गवः ॥
प्रियङ्गवः शालयश्च गोधूमा व्रीहयो यवाः ।
स्वरूपेणापि होतव्या स्युः स्वरूपेण नै तिलाः" ॥

छन्दोगपरिशिष्टे च—

"हविष्येषु यवा (मुख्या) प्रोक्तास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादिसर्वालाभे(ऽपि) विवर्जयेत्" ॥

स्मृत्यन्तरे—

"हविष्यान्ने तिला माषा नीवारा व्रीहयो यवाः ।
इक्षवः शालयो मुद्गाः पयो दधि घृतं मधु" ॥

तत्रैव—

"कृतमोदनसक्त्वादि तण्डुलादिकृताकृतम् ।
व्रीह्यादिचाकृतं प्रोक्तमिति द्र(ह)व्यं त्रिधा स्मृतम्" ॥

( अथाहुतिपरिमाणम् । )

आहुतिपरिमाणमाह बृहस्पतिः—

"प्रस्थधान्यं चतुःषष्टेराहुतेः परिकीर्तितम् ।
(१)तिलानां च तदर्द्धं तु तण्डुला व्री(हयः)हिभिः समाः ॥
प्रस्थः प्रसृतिद्वितयं प्रस्थं मानचतुष्टयम्" । इति ।

बौधायनस्तु—

"व्रीहीणां वा यवानां वा शतमाहुतिरिष्यते" ।

---

(१) "तिलानां तु तदर्धं स्यात्तदर्धं स्याद्घृतस्य तु" इति पाराशरसंहितापाठः ।

अगस्त्यः—

"द्रवद्रव्यस्य मानं स्याद्धारा गोकर्णदीर्घिका ॥
द्रवं स्रुवेण होतव्यं पाणिना कठिनं हविः ।
स्रुवपूर्णा द्रवाः प्रोक्ताः कठिना ग्रासमात्रकाः" ॥

सिद्धान्तशेखरे—

"अन्नं ग्राससमं प्रोक्तं लाजा मुष्टिमिता मता" ।

( होमे वर्ज्यब्राह्मणाः । )

अथ होमे वर्ज्यब्राह्मणाः स्मृत्यन्तरे—

"काणः कुष्ठी सदाऽशुद्धः स्वयम्भूः श्यावदन्तकः ।
क्लीबोऽपि पतितः कृष्णः कुनखी शास्त्रवर्जितः ॥
हीनाङ्गोऽप्यधिकाङ्गस्तु भिन्नाङ्गः कर्कशः शठः ।
आचार्यऋत्विजश्चैव ( काणादिदोषयुक्ताः ) न शस्ता यज्ञकर्मणि ॥
एवमादिभवेद्यस्य शनैर्वंशक्षयो भवेत्" ।

यज्ञपार्श्वेऽपि—

"अन्यैः शतहुताद्धोमादेकः शिष्यहुतो वरम् ।
शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरम् ।
पुत्रैः शतहुताद्धोमादेकः स्वात्महुतो वरम्" ॥ इति ।

( सायंप्रातर्होमस्यैकद्रव्यत्वम् । )

अत्रोपयुक्तं किञ्चिदुच्यते । सर्वेषु काम्येषु नित्येषु वा येन होमो द्रव्येण च सायं हुतं तेनैव प्रातर्होतव्यम् ।

"सायं होमेषु यद्द्रव्यं प्रातर्होमेषु तद्भवेत् ।
भिन्नद्रव्यहुतं यन्नमहुतं तस्य तद्भवेत्" इति ॥

( अथ समिल्लक्षणम् । )

तदुपयोगिसमिल्लक्षणं च स्मृत्यर्थसारे—

"पालाशखदिराश्वत्थशम्युदुम्बरजा समित् ।
अपामार्गार्कदूर्वाश्च कुशाश्च अपरे विदुः ॥
सत्वचः समिधः कार्या ऋजुश्लक्ष्णसमास्तथा ।
शस्ताः दशाङ्गुलाः शुद्धाः द्वादशाङ्गुलिकास्तथा ॥
आर्द्राः पक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः ।
उत्पाटिताश्च द्विशाखाः कृमिदोषविवर्जिताः ॥
ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम्" ।

यद्वा—

"समित्पवित्रं वेदश्च त्रयं प्रादेशसम्मितम् ।
इध्मश्च द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः" ॥
"समित्पत्रकुशादीनि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः" ॥

गृह्यकारिकाऽपि—

"ग्रामादुदक्प्रागतिदूरदेशात् साधारणादह्नि हरन्नरो यः ।
स्वयं प्रशस्ताः समिधो न शूद्राद्धोमार्थमेता विहितद्रुमेभ्यः ॥
प्रादेशमात्रा द्विषडङ्गुला वा ऋज्व्यः कनिष्ठाग्रसमा अदग्धाः ।
प्रादेशिनीमात्रसमा अपि स्युः स्थाप्या मरुद्वर्त्मनि मण्डपादौ ॥

ह्रस्वा विदीर्णा विदला द्विशाखा वक्राः कृशाः स्थूलतराश्च दीर्घाः।
त्वचा विहीना घुणकैर्विदष्टास्त्याज्या यतो दुष्टफलास्युरेताः ॥
प्लक्षः पलाशो बटबिल्वगुल्मदेवद्रुमौदुम्बरखादिराख्याः ।
शालाः समित् श्रीतरुवञ्जुलाख्याः श्रीपर्णवैकङ्कतचन्दनाख्याः ॥
रोहीतकोर्ध्वः सरलश्च भूर्जः समिद्द्रुमाः स्युर्गदिता इमेऽत्र ।
पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः ।
शमीरोहितकाश्वत्थास्तदभावेऽर्कवेतसौ ।
एषामभावे सकलो द्रुमः स्यादस्मिन्निषिद्धान्निखिलान् विहाय ।
श्लेष्मांतकः शाल्मलिराजवृक्षविभीतकानीपकदम्बनिम्बाः ॥
स्फुरत् कपित्थोनलकोविदारो बिल्वः करंजः कथिता निषिद्धाः" ॥इति।

( व्रतादिषु प्रतिनिधिनिरूपणम् । )

अथ व्रतादिषु प्रतिनिधिस्तदुच्यते स्मृत्यन्तरे—

"भार्या भर्तु(पत्यु)र्व्रतं कुर्याद् भार्यायाश्च पतिर्व्रतम् ।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते ॥
पुत्रं वा नियमोपेतं भगिनीं भ्रातरं तथा ।
एषामभावे (एवान्यं) चान्यं वा ब्राह्मणं वा नियोजयेत् ।
पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः ।
उपवासं प्रकुर्वाणः पुण्यं शतगुणं ( लभेत् ) भवेत् ॥
मातामहादीनुद्दिश्य एकादश्यामुपोषणे ।
कृते ते तु फलं विप्राः समग्रं समवाप्नुयुः ॥
भर्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखा ( पि च ) तथा ।

भार्याया धर्मकार्येषु जायन्ते प्रतिहस्तकाः ॥
एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ।
स्वयं कर्तुमशक्तश्चेत्कारयीत पुरोधसा ॥
काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ।
काम्ये ऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः ॥
(१)अश्रुपातश्च रोषश्च कलहस्य कृतिस्तथा ।
उपवासवता सोऽपि सद्यो भ्रंशयते श्रियम् ॥
(२)ध्यानव्रतादिनियमे ध्याने ज्ञाने हुते जपे ।
यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत्" ॥

इति प्रतिनिधिः ।

---

( १ ) 'अश्रुप्रपातो रोषश्च कलहस्य कृतिस्तथा ।
उपवासाद्व्रताद्वापि सद्यो भ्रंशयति श्रिय'—
मिति निर्णयसिन्धु ( ११९ प० ) पाठः ।

( २ ) 'दानं व्रतानि नियमा ज्ञानं ध्यानं हुतं जपः ।
यत्नेनापि कृतं सर्वमिग्ति निर्णयसिन्धुपाठः ।

## ( अथ सायंहोमप्रयोगः । )

अथ प्रयोगः क्रमकारिकायां गृह्यमते—

"कृत्वा सन्ध्यां यथोक्तां हुतभवनमियाद्भार्यया सार्द्धमग्नेः
पश्चात् प्रागुक्तरीत्या ह्युपविशति हरिं संयमेत् पूर्वकृत्स्नम् ।
पश्चात्संकल्प्य दध्ना हवनमिति चरेत्तण्डुलैरक्षतैर्वा
सायंहोमं करिष्ये स्मृतिरथ च मुनेश्छन्दसो देवतायाः" ॥

अथ (ततः) स्मार्ताचमनम् ।

"कृत्वाऽऽदौ पादशौचं विमलमथ जलं त्रिपिबेदुन्मृजेद्द्वि—
र्देशिन्यङ्गुष्ठयुग्मं सजलमभि(मुखं) मृशेन्नासिकारन्ध्रयुग्मम् ॥
अङ्गुष्ठानामिकाभ्यां नयनयुगयुतं कर्णयुग्मं कनिष्ठाङ्—
गुष्ठाभ्यां नाभिदेशे हृदयमथ जलेनाङ्गुलीभिः शिरोंऽसौ" ॥

सङ्कल्पार्थे तिथितत्त्वे भविष्ये—

"सङ्कल्पेन विना विप्र यत्किंचित् कुरुते नरः ।
फलं चाल्पाल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत्" ॥

"सङ्कल्पः कर्म मानसमि"ति । तत्र विशेषमाह देवलः—

"मासपक्षतिथीनां च निमित्तानां च सर्वशः ।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्" ॥

प्राणायामार्थे तद्वाह वृद्धमनुः—

"प्राणानायम्य कुर्वीत सर्वकर्माणि यत्नतः ( संयतः ) ।
प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति" ॥

प्राणायामलक्षणं छन्दोगपरिशिष्टे कात्यायनेनाभिहितम् ।

"भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः ।
महर्जनस्तपः सत्यं गायत्री च शिरस्तथा ॥
आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरिति शिरः ।
प्रतिप्रतीकं प्रणवमुच्चारयेदन्ते च शिरसः ।
एता एतां सहानेन तथैभिर्दशभिः सह ।
त्रिर्जपेदायतः प्राणः प्राणायामः स उच्यते(१)" ॥

मुक्तिफलत्वादव्ययाः। एताः—सप्तव्याहृतयः । एतां—गायत्रीम्। अनेन—शिरसा सह । तथैभिर्दशभिः—प्रणवैः सह । आयतप्राणो—निरुद्धप्राणस्त्रिर्जपेदिति, अयमेकः प्राणायाम इत्यर्थः ।

योगियाज्ञवल्क्योऽपि—

"सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते" ॥

कूर्मपुराणे ईश्वरगीतासु—

"प्राणः स्वदेहजो वायुरायामस्तन्निरोधनमि"ति ।

दाल्भ्यपरिशिष्टे—

"ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म च ।
अनोङ्कृत्य कृतं सर्वं न भवेत् सिद्धिकारकम्" ॥

शाट्यायनोऽपि—

"दानयज्ञतपः स्वाध्यायजपध्यानसन्ध्योपासनप्राणायामहोमदैवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्तयेदि"ति ।

(१) ११।६—८।

अतश्च मन्त्रमात्रोच्चारणे आदावोंकारः कार्य इति सर्वानुक्रम-सूत्रभाष्ये ।

(१) ( केचित्तु प्रवर्तयेदिति वचनात्प्रारम्भे एव युक्तः ।

तथा च छन्दोगपरिशिष्टे कात्यायनः—

"नोंकुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् ।

अन्येषां च विकृष्टानां कालेनाचमनादिना" इति ।

अस्यार्थः—'गोभिलगृह्यप्रसिद्धषडाहुतित्रिंशत्याहुतिमन्त्रेषु प्रतिमन्त्रमादौ न ओंकारप्रयोगं क्वचिदपि कुर्यात् किन्तु प्रथममेव । अन्येषां जपाद्यर्थानां रुद्राध्यायादीनां मध्ये अशक्यत्वे सति आचमनादिना कालेन ओंकारेण सह व्यवधाने जाते न आचमनानन्तरं पठ्यमानस्य मन्त्रस्य आदावोंकारप्रयोगः कर्तव्यः । होममन्त्रेष्वेवं व्यवधाने ओङ्कारः कर्तव्य एव' इति नारायणवृत्तिकृता प्रतिपादितः । अतएव शाखान्तरीया न कुर्वन्तीत्याहुः ।)

पारस्करगृह्यभाष्ये हरिहरस्तु अन्येषां चाविकृष्टानामिति पाठं धृत्वा अविकृष्टानामनन्तरितानां कालेनाचमनादिना चेति व्याख्यातवान् । ॐ कारस्त्रिमात्रो वक्तव्यः ।

मदनरत्ने व्यासः—

"त्रिमात्रस्तु प्रयोक्तव्यः कर्मारम्भेषु सर्वशः" ।

(२) (ओमित्यधिकृत्य तथैवापस्तम्बोक्तेश्च । अस्य पृथग्विधि-

---

( १ ) रेखान्तर्गतः पाठ आदर्शपुस्तकेषु नास्ति, परन्त्वपेक्षितः ।

( २ ) धनुश्चिह्नान्तर्गतः पाठोऽयमपेक्षितः सर्वादर्शपुस्तकेषु त्रुटितः प्रतिभाति ।

त्वात् मन्त्रेण सह न सन्धिः । पृथग्विधानेन सह सन्धिर्न भवतीत्युपपादितं "त्रिषिमान्" इत्यादिकातीयसूत्रे [ ३।३।५ ] कर्कोपाध्यायैः । अध्याहारस्य तु लौकिकत्वात् मन्त्रेण सह सन्ध्यभाव इत्यपि प्रतिपादितं "पशुं पूर्वं समनक्ति" इत्यधिकृत्य "सन्त) इति प्रतिमन्त्रमि"ति सूत्रे ( का० श्रौ० ६।४।२ ) कर्कोपाध्यायैः । इति सर्वत्र कर्मारम्भादौ सङ्कल्पादिपरिभाषा उक्ताः ।

ततः सायंसन्ध्योत्तरं पत्न्या सहाग्नेः पश्चादुपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य अनिरुक्तपरमेश्वरप्रीत्यर्थं सायमौपासनहोममहं करिष्ये ।

तत्राग्नये स्वाहा प्रजापतये स्वाहेति द्वयोर्मन्त्रयोः प्रायोयुगा ऋषयः गायत्र्यनुष्टुभौ छन्दसी अग्निप्रजापती देवते सायंहोमे विनियोगः ।

तत्राग्निं प्रजापतिं दध्ना तंडुलैरक्षतैर्वा अहं यक्ष्ये ।

तत उत्तरतोऽग्नेः पात्रोपकल्पनम् ' उपयमनकुशाः समिधस्तिस्रः मणिकोदकं होमद्रव्यं चेति । उपयमनकुशान् गृहीत्वा तिष्ठन् समिधः प्रक्षेपः । उदकेनाग्निपर्युक्षणम् । नलिकयाग्नेः प्रदीप्तकरणं दक्षिणजानुनिपातः । हृदि सोपग्रहहस्तं निधाय दक्षिणपाणिना होमः ।

ॐअग्नये स्वाहा । इदमग्नये न मम । संस्रवरक्षणम् ।

ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम । संस्रवरक्षणम् ।

दधितंडुलैरक्षतैर्वाऽन्यतमेन द्रव्येण स्वेन हस्तेन होमः । दधि-

चेत्तदा स्रुवेण । स्त्रीगर्भकामा चेत्तदा सायंप्रातः पूर्वाहुतिं पत्न्येव जुहुयात् ।

"ॐ पुमाᳬंसौ मित्रावरुणौ पुमाᳬंसावश्विनावुभौ ।
पुमानिन्द्रश्च सूर्य्यश्च पुमाᳬंसंवर्ततां मयि पुनः स्वाहे"ति ।

अनेन मन्त्रेण हुत्वा इदं मित्रावरुणाभ्यामिन्द्राय सूर्याय न ममेति त्यागो यजमानस्य । उत्तरामाहुतिं यजमान एव जुहोति । संस्रवप्राशनम् । पत्नीकर्तृकहोमशेषस्य पत्न्येव प्राशनं करोति दधिपक्षे तण्डुलपक्षे च शेषप्राशनम् । अन्य(अक्षत)पक्षे त्वभावः । नियत(अनदनीय)त्वादिति भर्तृयज्ञ इति **गदाधरभाष्ये** उक्तम् ।

तत ऊर्ध्वजानुः कृताञ्जलिरग्न्यभिमुखो जपेत् ।

समास्त्वेति नव ऋचस्याग्निर्ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अग्निस्तुतौ जपे विनियोगः । (१)नवऋचो जपेत्सायमुपस्थान इति **जयरामभाष्ये** ।

---

(१) सस्वरं जपः । ॐ समास्त्वाग्नऽऋतवो वर्द्धयन्तु संवत्सराऽऋषयो यानि सत्या ॥ सन्दिव्येन दीदिहि रोचनेन विश्वाऽआभाहि प्रदिशश्चतस्रः ॥ १ ॥

सञ्चेध्यस्वाग्ने प्र च बोधयैनमुच्चतिष्ठ महते सौभगाय ॥ मा च रिषदुपसत्ता तेऽअग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ २ ॥

त्वामग्ने वृणते ब्राह्मणाऽ इमे शिवोऽअग्ने संवरणे भवानः ॥ सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥

इहैवाग्ने ऽअधिधारया रयिम्मा त्वा निक्रन्पूर्वचितो निकारिणः ॥ क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्द्धतान्ते अनिष्टृतः ॥ ४ ॥

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥
नमः सभ्यावसथ्याभ्यां नमस्ते परमात्मने ।
एभिर्भवति पञ्चाग्नेर्विधिवत्समुपासनम् ॥ (१) चतुर्भिश्च० ।
अश्वत्थो यः शमीगर्भस्तस्य गर्भस्य यो रिपुः ।

---

क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व ॥ सजातानाम्मध्यमस्थाऽएधि राज्ञामग्ने विहव्यो दीदिहीह ॥ ५ ॥

अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ॥ विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिन्दाः ॥ ६ ॥

अनाधृष्यो जातवेदाऽअनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ॥ विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परिपाहि नो वृधे ॥ ७ ॥

बृहस्पते सवितर्बोधयैनꣳ सꣳशितश्चित्सन्तराꣳ सꣳशिशाधि ॥ वर्धयैनम्महते सौभगाय विश्वऽएनमनुमदन्तु देवाः ॥ ८ ॥

अमुत्र भूयादध यद्यमस्य बृहस्पतेऽअभिशस्तेरमुञ्चः ॥ प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ९ ॥

( १ ) पूर्वं १९८ पत्रे टिप्पण्यां द्रष्टव्यः । अस्यार्थे श्रुतिः—'तदेतद्य ज्ञस्यायातयाम ओश्रावयास्तु श्रौषड्यज ये यजामहे वौषडिति तासां वा एतासां पञ्चानां व्याहृतीनाꣳ सप्तदशाक्षराण्यो श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः स एष सप्तदशः प्रजापतिरधिदैवतं चाध्यात्मं च प्रतिष्ठितः स यो हैवमेतꣳ सप्तदशं प्रजापतिमधिदैवतं चाध्यात्मं च प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन्' ( श० ब्रा० १२।३।३। ४) ति ।

रिपुगर्भस्य यो गर्भस्तस्मै यज्ञात्मने नमः(१) ॥

(२)काले वर्षतु० (३)सर्वे० (४)यस्य स्मृत्या० (५)प्रमादात्० कायेन०(६) ।

अनेन सायंहोमाख्येन कर्मणा श्री भगवान् यज्ञरूपी परमेश्वरः प्रीयताम् । प्रणम्य भस्मवन्दनम् । इति सायंहोमः ।

---

(१) शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।

रिपुगर्भस्य यो (भर्ता) गर्भः स मे विष्णुः प्रसीदतु" इत्यनुस्मृति (३१)पाठः । अस्यार्थः—शम्याः शमीवृक्षस्य गर्भोन्तःसारस्तस्य गर्भोऽग्निस्तन्मथनेनोद्भूयमानत्वात्, तस्याग्ने रिपुर्जलं तद्गर्भो लक्ष्मीस्तस्याः सागरमथनेन जलजात्वात् तस्याः भर्तेत्यादि । शमीगर्भपदेन अश्वत्थ इत्यपि केचित् तदपि सुवचनं अश्वत्थस्यापि वह्नियोनित्वात् ।

(२) काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ।

(३) सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखमाप्नुयात ।

(४) यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।

(५) प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।

(६) कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वाऽनुसृतस्वभावात् ।

करोमि (ति) यद्यत्सकलं परस्मै नारायणायेति समर्प(येत्तत्)यामि ।

## ( अथ प्रातर्होमे विशेषः । )

अथ प्रातर्होमे विशेषः । उषःकाले स्नानं कृत्वा अग्नेः प्रादुष्करणम् । तदुक्तं कात्यायनेन—

"सूर्ये (ऽस्त) (ऽन्त) तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासा(ऽप्र)मदर्शने" ॥ (का०स्मृ०६।१)

प्रकाशकरणमित्यर्थः । ततो मणिकोदकं कुर्यात् ।

ॐ आपो रेवतोः क्षयथा हि० । आपो हि ष्ठेति तिसृभिरिति । (१) अनेन मणिकपूरणम् ।

ततोऽनुदिते प्राणानायम्य देशकालौ सङ्कीर्त्य अनिरुक्तपरमेश्वरप्रीत्यर्थं प्रातरौपासनहोममहं करिष्ये ।

तत्र सूर्याय स्वाहा प्रजापतये स्वाहेति द्वयोर्मन्त्रयोः प्रायोमेधा ऋषयः गायत्रीत्रिष्टुभौ छन्दसी सूर्यप्रजाप(ती)तिदेवते प्रातर्होमे विनियोगः । तत्र सूर्यं प्रजापतिं अमुकद्रव्यैरहं यक्ष्ये ।

उपयमनकुशादानादिपर्युक्षणान्तं पूर्ववत् । ततो होमः । ॐ सूर्याय स्वाहा । इदं सूर्याय न मम । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । विभ्राडित्यनुवाकं जपेत् । ऋष्यादिस्मरणम् । विभ्राड्बृहत् विभ्राड्सौर्य उदुत्यं तिस्रः प्रस्कण्वः प्रतीकचोदितानां ब्रह्मस्वयंभूरानोऽगस्त्यो यदद्य श्रुतकक्षसुतंकक्षौ तरणिः प्रस्कण्वस्तत्सूर्यस्य द्वयोः कुत्सो वयमहां द्वयोर्जमदग्निः आयन्त इव नृमेधोऽद्या देवाः कुत्स आकृष्णेन हिरण्यस्तूप आङ्गिरसः,

---

( १ ) स्मा० १६७ पत्रे द्रष्टव्यं द्रष्टव्यः ।

विभ्राट् जगती उदुत्यं तिस्रो गायत्र्यस्तंप्रत्नथा जगती अयं वेनस्तिस्रस्त्रिष्टुभो यदद्य द्वयोर्गायत्र्यौ तत्सूर्यस्य द्वे त्रिष्टुभौ बण्महां द्वे बृहतीसतोबृहत्यौ आयन्त इव बृहती अद्या देवा द्वे त्रिष्टुभौ सर्वासां सविता देवता अग्निस्तुतौ जपे (१) विनियोगः । शेषं पूर्ववत् ।

इति प्रातर्होमः ।

---

(१) सस्वरं जपः । हरिः ॐ विभ्राड्बृहत्पिबतु सोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविहुतम् ॥ व्वातजूतो योऽ अभिरक्षति त्मना प्रजाः पुपोष पुरुधा व्विराजति ॥ १ ॥ उदु त्यञ्जातवेदसन्देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्य्यम् ॥ २ ॥ येना पावक चक्षसा भुरण्यन्तञ्जनाँ २॥ ऽअनु ॥ त्वं व्वरुण पश्यसि ॥३॥ दैव्व्यावद्ध्वर्य्यू ऽआगतꣳरथेन सूर्य्यत्वचा ॥ मद्ध्वा यज्ञꣳ समञ्जाथे॥४॥तम्प्रत्नथा पूर्व्वथा विश्वथेमथा ज्येष्ठतातिम्बर्हिषदꣳस्वर्विदम्॥ प्रतीचीनं व्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे ॥५॥ अयं व्वेनश्चोदयत्पृश्निगर्भा ज्ज्योतिर्ज्जरायूरजसो व्विमाने ॥ इममपाꣳसङ्गमे सूर्य्यस्य शिशुन्न व्विप्रा मतिभीरिहन्ति ॥ ६ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्नेः ॥ आ प्प्रा द्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्मा जगतस्तस्थुषश्च ॥ ७ ॥ आ नऽइडाभिर्व्विदथे सुशस्ति विश्वानरः सविता देवऽएतु ॥ अपि यथा युवानो मत्सथा नो व्विश्वञ्जगदभिपित्वे मनीषा ॥८॥ यदद्य कच्च व्वृत्रहन्नुदगाऽअभि सूर्य ॥ सर्व्वन्तदिन्द्र ते व्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतो ज्ज्योतिष्कृदसि सूर्य ॥ व्विश्वमाभासि रोचनम् ॥१०॥ तत्सूर्य्यस्य देवत्वन्तन्महित्वम्मद्ध्याकर्त्तोर्विततꣳ सञ्जभार॥ यदेदयुक्त हरितः सधस्थादाद्रात्री व्वासस्तनुते सिमस्मै ॥ ११ ॥ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपङ्कृणुते द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ १२ ॥ बण्म-

अथ प्रातर्होमे अभ्रेणाच्छादिते अनुदयभ्रान्ते सूर्योदिते होमे कृते तदा न दोषो न प्रायश्चित्तम् । सायं होमकालं ज्ञात्वा होमे कृते सूर्यो यदि दृश्यते तदा पुनः सन्ध्याकाले जाते होमं कुर्यात् । ततोऽग्निमपरेण प्राङ्मुखस्तिष्ठन् (१) 'भवतन्नः समनसावि'ति मन्त्रेणाग्निमुपतिष्ठते पुनः सायंहोमं(२) कुर्यात् ।

---

हाँ २ ॥ असि सूर्य वडादित्य महाँ२॥ असि । महस्ते सतो महिमा पनस्यतेऽद्धादेव महाँ२॥ असि ॥१३॥ वट्सूर्य्य श्रवसा महाँ२ऽअसि सत्रादेव महाँ२॥असि ॥ मन्न्हा देवानामसुर्य्यः पुरोहितो विभुज्ज्योतिरदाभ्यम् ॥ १२ ॥ श्रायन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत ॥ व्वसूनि जाते जनमानऽओजसा प्प्रति भागन्नदीधिम ॥ १५ ॥ अद्या देवाऽउदिता सूर्य्यस्य निरर्ठ०हसः पिपृतानिरवद्यात् ॥ तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥ १६ ॥ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१७॥ (शु० य० सं० ३३।३०-४३।)

(१) ॐ भवतन्नः समनसौ सचेतसावरेपसौ । मा यज्ञर्ठ० हिर्ठ० सिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः ( शु० य० ५। ३॥ १२। ६० )

( २ ) अत्र गङ्गाधरोक्ताः कारिकाः—

उद्धृत्याग्निं पचेदन्नं वारिणा मणिकस्य तु ॥
पादप्रक्षालनं कृत्वा ब्राह्मणानुपवेश्य च ॥
प्राणायामत्रयं कृत्वा कालज्ञानं तथैव च ।
गोत्रं च पितृनामानि श्राद्धसङ्कल्पमेव च ॥
मातृपूजा ततः श्राद्धं संध्योपासनमेव च ॥
अपरेणोपविश्याग्नेः पत्न्या सार्द्धं शुचिः सुधीः ॥
होमसङ्कल्पनं कृत्वा ऋष्यादिस्मरणं ततः ॥

तदुक्तं गृह्यकारिकायाम्—

स्वाध्यायोऽप्यविकल्पकस्त्वहरहः कुर्यादिदं संयतः
प्रातः स्नानविधिं विधाय हवनं दृश्यांशुमद्वर्जितम् ।
सायं लोहितवर्णार्कं दिशि जलाधीशस्य यावद्भवे—
द्यद्वा षड्घटिकावधिर्हुतविधिर्गौणोऽपि मुख्येऽसति ॥
आ सायन्तनहोमतो हुतविधिः प्रातस्तनः संभवे—
त्वा प्रातस्तनकालतो मुनिजनाः सायन्तनस्याब्रुवन् ।
पक्षादिष्वपि गौण एष विहितः सर्वेषु कर्मस्वयं—
कृत्वा भेषजमत्र कर्मविहितं कार्यं स्वकालात् पुरा ॥
रजोनिहारैरथवाऽभ्रधूमैर्वृक्षादिभिर्वाऽन्तरिते दिनेशे ।
उद्दिश्य सन्ध्याहवनं विधेयं न लुप्यते तत्र हुतं न दोषः ॥
सन्ध्यादिने दिनकरेऽतिघनैः सकृष्णैः
सर्वासु दिक्ष्वपि तदस्तमनं च दृष्ट्वा ।
होमे कृते घनचयापगमो यदि स्याद्
भास्वद्दिशस्तु नियतः पुनरेव काले ॥
सन्ध्यादिकर्म कुरुते "भवतन्न" मन्त्रे—
णोपस्थितिर्हुतविधिं स पुनर्विधाय ।
श्रौतेऽपि तद्विहरणे खलु शंस्यवद्भे—
रौपस्थिको हुतविधिः पुनरत्र कार्यः ॥

---

देवतानामभिध्यानं पात्रासादनमेव च ।
कुशाऽऽदानं समित्क्षेपः पर्युक्ष्याग्निं च वाग्यतः ॥
प्रदीप्तेऽग्नौ भवेद्धोमो नमस्कृत्य जपेदिति ॥

तत्र होमलोपे त्वेकतन्त्रेण सायंप्रातर्होमं कुर्यात् । बहुलोपे-ऽप्येवम् ।

( अथ पक्षहोमविधिः )

अथ पक्षहोमविधिः । तत्र यजमानस्यायाचितत्वेनार्थापगमे चौरराष्ट्रभ्रंशे ( आध्यादिनिमित्ते रोगार्तात्वध्वगमने ) धनाभावे गुरुगृहवासे अन्यास्वपि भयाद्यापत्सु होमानां समासो यथा—( तद्यथा ) प्रदिपदि सायङ्काले उपयमनकुशादानादिपर्युक्षणा-न्तं कृत्वा आहुतिपरिमाणं होमद्रव्यं ( पात्रद्वये ) प्रतिपात्रं चतुर्दशवारं गृहीत्वा होमकाले प्रथमपात्रस्थानग्नये स्वाहेति जुहुयात् । ततो द्वितीयपात्रस्थान् प्रजापतये स्वाहेति जुहोति । एवं द्वितीयायां प्रातः पर्युक्षणान्तं कृत्वा पूर्ववत् पात्रद्वये त-ण्डुलान् कृत्वा सूर्याय स्वाहेति प्रथमपात्रस्थान् हुत्वा प्रजापतये स्वाहेति द्वितीयपात्रस्थांस्तण्डुलान् जुहुयात् । प्रयोगरत्ने हरिहरमिश्रैस्तु सायंप्रातर्होमो लिखितः । स चैवं पर्युक्ष-णान्तं कृत्वाऽग्नये स्वाहेति हुत्वा तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयात् । पक्षमध्ये वा आपत्तावागामिचतुर्दशीसायंकालीनहोमान्तान् शेषान् होमान् सायं समस्येत् पर्वप्रातर्होमान्तांश्च प्रातः शेषान् होमान् सायं समस्येत् । सर्वथा पर्वसायंहोमः प्रतिपत्प्रातर्होमश्च पृथगेव होतव्यः । तत्र पूर्ववदग्निधर्मभिरक्षेत् ।

हरिहरस्तु—'पक्षहोमानन्तरं 'अयन्ते योनि' रिति

मन्त्रेणाग्निं समारोपयेत् । अथ पौर्णमास्याममावास्यायां वा प्राप्तायां प्रातरशयोरग्निं मथित्वा कुण्डे निधायान्वसरप्राप्तं वैश्वदेवादिकं कर्म विधाय सायङ्काले सायंहोमं प्रातःकाले प्रातर्होमं हुत्वा पुनः पक्षादिहोमं कुर्यात्' ( इत्याह ) ।

**काठके—**

"एवमेवोत्तरत्राह्नि प्रातर्होमान् (१)समस्य तु ।

---

( १ ) अत्र संस्काररत्नमालायां प्रजापतिः—

सायंप्रातस्तनौ होमावुभौ सायं समस्य तु ।
आपन्नो जुहुयात्तत्र समिदेकाऽथवा द्वयम् ॥
सायंहोमस्य मुख्यत्वात्तदीयं तन्त्रमिष्यते ।
चतस्र आहुतीः कुर्यात्तत्र द्वे सायमाहुती ॥
द्वे प्रातराहुती सायंहोमे चैका समिद्यदि ।
समित्कृता द्वितीया चेत्सा भवेत्प्रातराहुतौ ॥
द्विः सायंहोमवन्मृज्याद्द्विः प्रातर्होमवत्स्रुचम् ।
उपस्थानं सकृत्कार्यं शेषं प्रकृतिवद्भवेत् ॥
केचिद्द्वे आहुती हुत्वा संविश्यैव निमील्य वा ।
विच्छिद्यैतावता होमौ कुर्याद्द्वे आहुती ततः ॥
गुर्वापदि समस्यन्ते प्रातः सर्वे कदाचन ।

( त्रि० मं० २।१८६-१९४ )

यावन्तोऽत्र समस्यन्ते सर्वे सायमुपक्रमाः ॥
प्रातः कालापवर्गाश्च न तु प्रातरुपक्रमाः । इति ।

( त्रि० मं० २।२०५ )

**पक्षहोमे बौधायनः—**

"अथाऽऽपद्यग्निहोत्राणां समासो राष्ट्रविभ्रमे व्याधिपीडायामध्वगमनप्रसङ्गे गुरुकुलवासापेक्षायां मातृपितृकलत्रपुत्राद्यत्यये बल-

जुहोत्यौपवसथ्याहमातर्होमावधीन् सकृत् ॥
समारोपविधानेन समारोपयतेऽनलान् ।
ये धार्यन्तेऽथवा धार्यान् धारयन्त्येव पूर्ववदि”ति ॥
( त्रि० मं० २।१७२-१७४ )

वतो निरोधादौ देशकालाद्यनुपपत्तौ चात्यन्तापत्सु” इति ।

अग्निहोत्रिणां = अग्निहोत्रसम्बन्धिनां होमानाम् । राष्ट्रविभ्रमो राष्ट्रक्षोभः । विशिष्ट आधिर्व्याधिर्मानसं दुःखं, पीडा बाह्यं दुःखम् । अत्ययो = नाशः । बलवतो निरोधो = बलवत्कर्तृको निरोधः । बलवति विरोधाविति पाठे बलवत्त्वविशेषणं निरोधादीनां द्रष्टव्यम् ।

मरीचिः—

शरीरापन्नवेद्यत्र भयार्तश्च प्रजायते ।
यथाऽन्यास्वपि चाऽऽपत्सु पञ्चहोमो विधीयते ॥
हुतेषु पञ्चहोमेषु मध्ये तस्मान्निवर्तते ।
होमं पुनः प्रकुर्याच्चेन्न चासौ दोषकृद्भवेत् ।

चेदित्यनेन विकल्पः श्रूयते । पञ्चहोमग्रहणं शेषहोमोपलक्षणमित्याचाररत्ने ।

मण्डनस्मृत्यर्थसारौ—

आमयाद्यार्तिमापन्नतो वाऽध्वगतोऽपि वा ।
राष्ट्र(भ्रंशे)भङ्गे धनाभावे गुरुगेहे वसन्नपि ॥
अन्येष्वेवंप्रकारेषु निमित्तेष्वागतेषु च ।
समासमग्निहोत्राणां यथासम्भवमाचरेत् ॥
निमित्तानामिहैतेषां निर्दिश्यैकं यदुच्यते ।
तत्सर्वेषु निमित्तेषु जानीयात्प्रतिपादितम् ।
पञ्चहोमानशेषान्वा शेषहोमानथापि वा ॥
( त्रि० मं० २।१६६-१६८ ) इति ॥

एतदापद्विषयम् । अग्नौ समारूढे सति वैश्वदेवः कथं भवेत् । तदुक्तं ( अत्रोक्तं ) दामोदरनिबन्धे—

"पक्षहोमे कृते वह्नौ समारूढे कथंचन ।
पञ्चयज्ञविधानं तु लौकिकेऽग्नौ विधीयते" ॥

गृह्यपार्श्वे—

"गृहीत्वाग्निं समारोप्य यः पराग्नं निषेवते ।
अभोज्यान्नं गृहस्थोऽसौ वेदवादिषु गर्हितः" ॥

अनापदि पक्षहोमे प्रायश्चित्तं देवयाज्ञिके—

"अनातुरोऽप्रवासी च निश्चिन्तो निरुपद्रवः ॥
पक्षहोमं तु यः कुर्यात् स चरेत् पतितव्रतम्" ।

---

संग्रहे तु—

पक्षादौ पक्षहोमः स्यात्समस्यो मध्यमो भवेत् ।
सायंप्रातः पृथक् कुर्यादेकस्मिन् वा निमित्ततः ॥
प्रतिपत्सायमारभ्य द्वितीया प्रातरेव च ।
समस्य पूर्ववद्धोम उपस्थानं समित्पृथगिति ॥

आलस्यादिना समस्यहोमे दोषमाह गोपालः—

नैतज्जामितया कार्यं न रागान्न च लोभतः ।
नैतच्छक्तिं दधानस्तु कुर्याच्छ्रद्धालुरापदि ।
अनापद्याचरन्निष्ट्या तन्तुमत्या यजेत सः ॥

जामिता = ऽऽलस्यम् । शक्तिमाञ्जामितया रागेण लोभेन वा नैतत्समस्य होमविधिमनुतिष्ठेत् । आपदि त्वनुतिष्ठेदेव । अनापदि यद्यनुतिष्ठेत्तदा तन्तुमत्येष्ट्या यजेतेत्यर्थः । अत्र तन्तुमतीष्टिस्थने-तान्तुमतः स्थालीपाकः । "य आहिताग्नेः पुरोडाशास्तेऽनाहिताग्ने-श्चरव" इति शाखान्तरात् ।

अत्यन्तापत्तौ—

"एवमापद्गतः पक्षे पक्षे चैवं समाचरेत् ।
तृतीयेऽनन्तरे पक्षे समासं न समाचरेत् ॥
तावता नापगच्छेच्चेदापत्पक्षे तृतीयके ॥
कृच्छ्रेणापि विनिर्वर्त्य तत्र होमान् दिने दिने ।
पक्षान्तरे पुनः कामं पक्षहोमादिमाचरेत् ॥
कठैः पक्षद्वयं त्वेव पक्षहोमो नियम्यते ।
आपच्चेदनुवर्तेत दीर्घकालं कदाचन ।
(१)यावज्जीवमविच्छिन्नान्पक्षहोमान् समाचरेत् ॥
आपदेवावधिस्तत्र न पक्षगणनावधिः" ।

( त्रि० मं० २।१८४-१८८ ) ।

अथ पक्षहोमः प्रयोगः । तत्रापत्सम्भावनायां प्रतिपदि सायं देशकालसङ्कीर्तनान्ते अद्याद्यागामिपर्वपूर्वदिने सायंहोमान्तं सायं होमान् समस्याहं करिष्ये । इति सङ्कल्प्य प्रतिपदादिपूर्वपर्वदिनान्तं गणनया पात्रान्तरे होमद्रव्यं गृहीत्वा पूर्ववत् सायंहोमः कर्तव्यः । एवं द्वितीयायां प्रातर्देशकालसङ्कीर्तनान्ते अद्याद्यागामिपर्वप्रातर्हो-

---

( १ ) अत्र चन्द्रिकायां—"यदि पक्षहोमेन पक्षत्रयमतीयात्पुनरा-धान" मित्युक्तं तदनापत्तिपरम् । विशेषः स्मृतिभास्करे—

सर्वथोपवसथ्याहे सायं होमः पृथग् भवेत् ।
तथैव यजनीयेऽह्नि प्रातर्होमो भवेत्पृथक् ॥

प्रयवनः—पर्वोपवासशून्यं चेत्प्राप्तं केनापि हेतुना ।
तदा तत्सायंहोमोऽपि पूर्वैः सहसमस्यते ॥ इति ।

मान्ते प्रातर्होमान समस्याहं करिष्ये । इति सङ्कल्प्य द्वितीयादिपर्वदिनान्तगणनया द्रव्यं गृहीत्वा पूर्ववत् प्रातर्होमः कर्तव्यः इत्येकः पक्षः ।

पक्षान्तरे प्रातर्होमासम्भावनायां तु प्रतिपदि सायमेव देशकालसङ्कीर्तनान्ते अद्याद्यागामि पर्वप्रातर्होमान्ते सायंप्रातर्होमान् समस्याहं करिष्ये । इति सङ्कल्प्य प्रतिपदि सायमादि पर्व प्रातरन्तं सायङ्कालगणनया होमद्रव्यं पूर्ववत्सायन्तनाहुतिं हुत्वा पुनस्तथैव गृहीत्वा सूर्यायेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयात् । एवं सायंप्रातः समस्ययोर्होमः ।

अथ प्रातरेवापदागमश्चेत् द्वितीयायां प्रातरेवाद्याद्यागामिपर्वप्रातरन्तं प्रातःसायंहोमान् समस्याहं करिष्ये । इति सङ्कल्प्य द्वितीयाप्रातरादि पर्वप्रातरन्तं प्रातःसायंकालगणनया द्रव्यं गृहीत्वा पूर्ववत्प्रातस्तनस्तन्त्रेण होमः कर्तव्यः । तत्राप्यादौ पूर्ववदादौ प्रातराहुतिः पश्चात् सायमाहुतिस्तन्त्रेणैवोत्तरा एवं यदैवापद्गमः पूर्वाह्णापराह्णादौ तदैवापन्निर्गमान्तं सायंप्रातर्होमाः कर्तव्याः । अथ यदा कश्चित्सायमेवाद्य श्वः प्रातर्होमेन समस्य सायंहोमं करिष्ये । इति सङ्कल्प्य पूर्ववत्सायंतनस्तंत्रेण होमः कर्तव्यः । कदाचिदापद्गुरुतश्चेत्पर्वणि व्रताद्यसम्भावना तदा पर्वसायंहोमोऽपि पूर्वहोमैः (सह) समस्य कर्तव्यः । एवमेवातिक्रान्तहोमेष्वपि देशकालसंकीर्तनान्ते अतिक्रान्तैतद्दिनाद्यवधिसायंप्रातर्होमानहं करिष्ये । इति संकल्प्य अतिक्रान्तसायंप्रातर्होमगणनया होमद्रव्यं गृहीत्वा पूर्ववज्जुहुयात् ।

इति स्मार्तोल्लासे सायंप्रातर्होमविधिनिर्णयः समाप्तः ।

## ( आशौचनिर्णयः । )

अथाशौचनिर्णयः । व्यासः—

"सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ।
न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः" ॥

कर्मप्रदीपे—

"सूतकादौ समुत्पन्ने स्मार्तकर्मणि (न) किंचन ।
अनारब्धे भवेदेतत्प्रारब्धे नास्ति सूतकम्" ॥

अपवादान्तरमाह याज्ञवल्क्यः—

"वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्"(१) ।
तत्र त्यागमात्रे स्नानोत्तरं स्वस्य कर्तृत्वम् ।

"श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादि"ति स्मृतेः । श्रौतं सर्वं स्वयं कार्यं स्मार्तं तु त्यागातिरिक्तेऽन्यस्यैव कर्तृत्वं त्यागमात्रे तु स्वस्य ।

"आशौचे वर्जयेत्सर्वं नित्यं नैमित्तिकादिकम् ।
अग्निहोत्रं विहायान्यत्स्मार्तं पौराणिकं तथा" ॥

जातूकर्ण्यः—

"सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत् ।
पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत् ॥
स्मार्ताग्निः सूतके शावे स्वयं न जुहुयाद्द्विजः ।
श्रौताग्निस्तु सकृद्धुत्वा समाप्तौ वा स्वयं हुनेत्" ॥

(१) या० स्मृ० ३।१७।

पुलस्त्यः—

"सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्।
न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः" ॥
"सन्ध्यां पञ्चमहायज्ञान्नैत्यकं स्मृतिकर्म च।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रियेति" जाबालिः।

सन्ध्यायां तु विशेषो भरद्वाजोक्तेः—

"सूतके मृतके कुर्यात् प्राणायाममन्त्रकम्।
तथा मार्जनमन्त्रांश्च मनसोच्चार्य मार्जयेत् ॥
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्।
मार्जनं तु न वा कुर्यादुपस्थानं न चैव हि" ॥

आश्वलायनः—

"आपन्नश्चाशुचिः काले तिष्ठन्नपि जपेद्दश"।
गायत्रीमिति शेषः। अग्निस्मृतावप्यर्घस्यावश्यकतोक्ता।
"जलाभावे महामार्गे बन्धने त्वशुचावपि।
उभयोः सन्ध्ययोः काले रजसा वार्घ्यमुत्सृजेदि"ति ॥

कात्यायनः—

"सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते।
होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैरि"ति ॥
संध्याविधिस्तु पूर्वोक्तः।

ब्रह्मपुराणे—

"पर्वहोमेषु पश्चादौ यागकाल उपस्थिते।

शुष्कान्नेन फलैर्वापि यजेत च यथाक्रम"—

मित्याशौचाभाव उक्तः। चर्वा आर्द्रेण स्वयं होमः पञ्चयज्ञास्तु शुष्कान्नेनापि न कर्तव्याः।

"पञ्चयज्ञविधानं च न कुर्यान्मृत्युजन्मनोरि"ति—

जातूकर्ण्योक्तेः। स्मार्ते होमे त्वन्याभावे जबालोक्तिः—

"जन्महानौ वितानस्य कर्मत्यागो न विद्यते।

शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैरि"ति।

श्रीधरपद्धतौ—

"स्मार्ताग्निमात्मनोऽन्येषामभावे सूतकादिषु।

समारोप्य तदन्ते तु विहृत्य जुहुयात्स्वयम्।

अतीताहुतयः सर्वा हुनेन्निष्कृतिपूर्वकम्॥

घृतैश्चतुर्गृहीतैस्तु कुर्यात्तं निष्कृतिः सदा॥

न त्यजेत्सूतके वापि त्यजन्गच्छेदधो गतिम्"।

अयमेव सिद्धान्तः।

इति स्मार्तोल्लासे सूतके होमविधिः।

# अथ रजस्वलानिर्णयः ।

अथाधानमध्ये पत्नी रजस्वला तदा विशेषः ।

आधाने वर्तमाने असमाप्तौ पत्न्या रजोत्प(त्तौ)त्तिः सूतके वा मृतके जाते पञ्चदशदिने अशौचान्ते आभ्युदयिकादिसर्वं कार्यम् । मन्थने जाते सूतके मृतके रजोत्पत्तौ वा तदाग्निमुपसमाधानं अग्निधारणं शुद्धिपर्यन्तं कार्यम् । अधिकारे जाते सति ब्रह्मोपवेशनाद्याधानं सर्वं क्रियते । ब्रह्मोऽवेशनसमाप्त्यनन्तरमेवाशौचाद्युत्पत्तौ आधानसमाप्तिं क्रियमाणः शुद्धौ सत्यां मणिकावधानं कार्यमिति पक्षः । परन्त्वाधाने क्रियमाणे पत्न्या रजोत्पत्तौ सूतके मृतके वा प्राप्ते ब्राह्मणतर्पणपूर्वकमाधानमावर्तते । तथा चोक्तम्—

"अर्वाग् ब्राह्मणतृप्तेश्चेदाधाने स्त्री रजस्वला ।
आवर्तते तदाधानं मातृपूजासमन्वितमि"ति ॥

कारिकायाम्—

"अर्वाक् पूर्णप्रदानाच्चेदाधाने स्त्री रजस्वला ।
तच्छुद्धौ पुनराधानं मातृपूजनपूर्वकम् ।
स्यातान्ते अरणिः सैव योनिः सैवोत्तरा तथा ।
आधानानन्तरं चेत्सा रजोयुक्ता (१) कथंचन ।

---

(१) बह्वीनां पत्नीनाममुख्याऽनालम्बुका चेत्तदा यागः कर्तव्य एव । ज्येष्ठा चेदनालम्बुका तदा न यागः कर्तव्यः । तदुक्तं हेमाद्रौ गौतमेन—"यजनीयेऽह्नि सम्प्राप्ते यस्य भार्या रजस्वला ।
यागं तत्र प्रकुर्वीत ज्येष्ठा चैत्सैवमाचरेत्" इति ।

मक्षिकादि न कर्तव्यं कुर्यादेकादशेऽहनी’’ति ।
आधानपदार्थविपर्यासे पुनरावृत्तिर्नानादिष्टमिति । प्रथमाधाने

---

वशिष्ठोऽपि—

“बह्वीनामपि पत्नीनां ज्येष्ठा चेद्रजसाऽन्विता ।
नापरुध्य प्रकुर्वीत यजनं हि विचक्षणः’’ इति ।

कनिष्ठामपरुध्य यागः कर्तव्य इति त्वर्थात्सिद्धं भवति । अस्ति च पाद्मं वचनम्—

“बह्वीनामेकपत्नीनां कनिष्ठा रजसाऽन्विता ।
अपरुध्यापि कुर्वीत यजनं विधिपूर्वकम्’’ इति ।

ज्येष्ठातोऽन्याः सर्वा अपि कनिष्ठशब्देन ग्राह्याः । न त्वन्तिमैव । अत एव—

“बह्वीनामपि पत्नीनाममुख्या रजसान्विता ।
अपरुध्यापि कुर्वीत यजनं विधिपूर्वकम्’’ ॥

इति स्मृत्यन्तरेऽमुख्येत्युक्तम् ।

ज्येष्ठपत्न्या मुख्यत्वं तु पाद्म उक्तम्—

“ज्येष्ठा पत्नी तु मुख्या स्याद्यज्ञे दानेऽर्चने गृहे ।
तया कर्माणि कुर्वंस्तु यथोक्तफलभाग्भवेत्’’ ॥ इति ।

कौर्मेऽपि—

“ज्येष्ठपत्न्या विरहितं कृतं यत्तु जनाधिप ।
तत्सर्वं विफलं याति गजभुक्तकपित्थवत्’’ इति ।

वशिष्ठोऽपि—

“ज्येष्ठया सह कर्माणि कुर्याद्यत्नेन भूपते ।
तया सह कृतं कर्म सफलं जायते नृणाम्’’ इति ।

ज्येष्ठपत्न्या राहित्येन कर्मकरणे यो दोष उक्तः स तस्या विद्यमानत्वे द्रष्टव्यः । ज्येष्ठायां मृतायां विद्यमानासु या ज्येष्ठा सा मुख्यत्वेन

आभ्युदयिकमादौ कृत्वा ब्राह्मणतृप्तिपर्यन्तं पदार्थानां विपर्यासे नाशे वा पत्न्या रजोत्पत्तौ सूतके मृतके वा जाते आभ्युदयिकादि सर्वमाधानमावर्तते । ब्राह्मणतृप्तेरनन्तरं सूतकाद्यापत्तौ शुद्ध्यनन्तरं मणिकाधानादि सर्वं कार्यमिति ।

अथ यदि कृताधानो यजमानः प्रजार्थी वा कमार्थी चोद्वहेत्तत्रान्ये अरणी संपाद्य प्रातर्होमं विधाय दिवा विवाहं कृत्वा आचतुर्थीकर्मणो होमं त्यक्त्वा तदन्तेऽतिक्रान्तहोमद्रव्यं दत्त्वा पञ्चमेऽहनि पुनराधानं यथोक्तं कार्यमित्येकः पक्षः ।

प्रातर्होमं कृत्वा दिवा विवाहं संपाद्य सद्यः चतुर्थीकर्म च कृत्वा तद्दिन एवावसथ्याधानमिति द्वितीयः पक्षः ।

अत्र पक्षद्वयेऽपि पूर्वारण्योः स्फुटितयोरावसथ्ये दहनम् । अ-

---

इष्टव्या । एवं च विद्यमानज्येष्ठाव्यतिरिक्ताः पत्नीरपरुध्यपि यागः कर्तव्य इति सिद्धं भवति । एतेन बह्वीनां पत्नीनामेकाऽप्यृतुमती चेन्न यागः कार्य इति परास्तम् ।

एतच्च प्रथमप्रयोगव्यतिरिक्ते—

"प्रक्रान्तमग्निहोत्रादि कर्म यच्छ्रुतिचोदितम् ।
आर्तवाभिप्लुतां नारीं विहाय कुरुते द्विजः"

इति कात्यायनवचने प्रक्रान्तमिति श्रवणात् ।

"ज्येष्ठा वाथ कनिष्ठा वा पत्नी यदि रजस्वला ।
प्रथमे चेत्प्रयोगे स्यान्नोपरोधस्तदा मतः"

इति स्मृत्यन्तरेऽभिधानाच्च । प्रक्रान्तमारब्धमेकवारमनुष्ठितमिति व्याख्यातारः । ये तु प्रारब्धं सङ्कल्पादिना प्रक्रान्तमित्यर्थं वदन्ति तन्मते सङ्कल्पोत्तरं प्रथमप्रयोगेऽप्यपरोध इति द्रष्टव्यम् ।

न्यारण्योराधानम् । पात्राणि तु तान्येव । यत्तु छन्दोगपरिशिष्टे—

"सदारो यः पुनर्दारान् कथंचित्कारणान्तरात् ।
य इच्छेदग्निमान् कर्तुं क्व होमोऽस्य विधीयते ॥
स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन ।
न त्वाहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयते" ॥

इति पुनराधानाभाव इति प्रतिपादनं तच्छन्दोगविषयम् ।

अथारोपिताग्न्योररण्योर्नाशे एकस्या वा पुनराधानम् । असमारोपितयोस्त्वेकतरनाशे द्वितीयां छित्वा मन्थनम् । नष्टायाः प्रतिपत्तिरावसथ्ये दाहः । यद्वा पुनर्जन्तुभक्षणेन मन्थनेन वा मन्थनायोग्ये भवतस्तदान्ये अरणी गृहीत्वा दार्शपक्षादिकर्म निर्वर्त्य जीर्णमरणिद्वयं शकलीकृत्य तस्मिन्नग्नौ प्रज्वाल्य दक्षिणहस्तेन नूतनामुत्तरारणिं सव्यहस्तेनाधरारणिं गृहीत्वा प्रदीप्तेऽग्नौ धारयन्—

"ॐ उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यायै वोढवे जातवेदः । अरण्योररणिमनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्व ।

(१)अयन्ते योनिर्ऋत्वियो" इत्येतौ मन्त्रौ जपित्वा मन्थनयन्त्रं निधाय पूर्णाहुतिवदाज्यं संस्कृत्य अनादिष्टहोमं कुर्यात् ।

## अथ पर्वनिर्णयः ।

अथ स्थालीपाककर्मोच्यते तदुपयोगी पर्वनिर्णयः ।

श्रीमन्तं परमानन्दं नत्वा कात्यायनस्य हि(कात्यायनं तथा)।

---

(१) य० सं० ३।१४।

कस्मिन् दिने याग इति निश्चयं वच्मि साम्प्रतम् ॥

तत्र पर्वप्रतिपदोः सम्पूर्णत्वे सन्देह एव नास्ति खण्डत्वे तु तत्रोपवासयागकालनिर्णयमाह । पौर्णमास्यां तु द्वेधा विभाग एव श्रुत्या उक्तः । "वसन्तो ग्रीष्मो वा० पूर्वाह्णो देवा अपराह्णः पितर" इति द्विधा विभागः ।

स्कन्दपुराणे—

"आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः ।
मध्याह्नस्तु तयोः सन्धिर्यदावर्तनमुच्यते ॥

अयं द्वेधा विभागः । लौगाक्षिः—

"पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते" ॥

गोभिलः—

"आवर्त्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् ।
तदहर्याग इष्येत परतश्चेत् परेऽहनि" ॥

कात्यायनः—

"सन्धिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः" ॥

अत्र पूर्वापेक्षया यावती प्रतिपदा (दो) वृद्धिः क्षयो वा तदर्धं पर्वणि प्रक्षिप्य सन्धिनिर्णयः । तदाह कात्यायनः—

"परेऽह्न घटिका न्यूनास्तथैवाभ्यधिका श्च याः ।

तदर्धं कृत्वा पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत्"

लौगाक्षिः—

"तिथेः परस्या घटिकास्तु याः स्यु-
र्न्यूनास्तथैवाभ्यधिकाश्च तासाम् ॥
अर्द्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत्" ॥

दिनमानं तु त्रिंशद्घटिमितम् ३० तत्रोदाहरणम्—पर्व चतुर्दशघटिमितम् १४ प्रतिपदष्टादशघटि १८ तदा प्रतिपद्वृद्धेरर्धं घटिकाद्वयं पर्वान्ते प्रक्षिपन्ति । एवं पर्व सप्तदशघटि १७ प्रतिपत्त्रयोदशघटि १३ तदा प्रतिपत् ह्रासार्द्धं घटिद्वयं पर्वान्न्यूनयन्ति एवं ज्ञात्वा पूर्वोत्तरदिने यागः । तच्च यागकालो यथा कात्यायनः—

"पञ्चदश्याः परः पादः पत्रादेः प्रथमास्त्रयः ।
कालः पार्वणयागस्य अन्यथा तु न विद्यते" ॥

वृद्धशातातपः—

"पर्वणो यश्चतुर्थोऽंश आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातर्युं(रु)क्तो मनीषिभिः" ॥

अत्र प्रतिपच्चतुर्थांशे यागनिषेधस्तु [ अपराह्नसन्धिविषयः ] तदुक्तं वृद्धशतातपेन—

"सन्धिर्यद्यपराह्णे स्याद्यागः प्रातः परेऽहनि ।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति" ॥

इति पौर्णमासीनिर्णयः ।

## अथामावास्यायां विशेषः ।

वाजसनेयिनाममासन्धिनिर्णये पिण्डपितृयज्ञकालविधाय(१)-कश्रुत्या त्रेधा त्रिभागो वक्ष्यते । अत्र दिवसस्य त्रेधा-विभागः । "स वा अपराह्णे ददाती"ति श्रुतेः । अपराह्णशब्दस्तु तृतीयभागपरः । कात्यायनः—

"पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः(२) ॥
चतुर्दश्यष्टमे भागे क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमे भागे पुनः किल भवेदणुः(३) ॥
वर्द्धमानाममावास्यां लभेच्चेदपरेऽहनि ।
यामांस्त्रीनधिकान्वापि पितृयज्ञस्ततो भवेत्(४) ॥

कर्मप्रदीपे—

"यदा चतुर्दशीयामं तुरीयमनु(पूरयेत्)पूर्वकम् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते(५)" ॥

श्राद्धशब्देन पिण्डपितृयज्ञः पार्वणं चेति । अत्रामाविषये ह्रासवृद्धिसूक्ष्मविचारो गङ्गाधरकृते पर्वनिर्णये तथा मयूखे प्रोक्तः ।

---

(१) "पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददाती"ति (श० ब्रा० २।४।२।८) श्रुतिः ।

(२) का० स्मृ० १६।१ ।

(३) का० स्मृ० १६।५ ।

(४) का० स्मृ० १६ । १० ।

(५) क० प्र० १६।२ ।

तत्र वृद्धावुदाहरणम् । यत्र चतुर्दशी२५ पर्व विंशति२० प्रतिपत् षोडश १६ अत्र पर्वणो घट्यादिमानं ५५ । अत्र वृद्धिरेका घटी १ ज्ञेया । तदर्द्धे पर्वणि योजिते जातं पर्व सार्द्धविंशति घटिमितं, दिनमध्यमं त्रिंशद्‌घटिमितं तदाऽपराह्णे सन्धिर्जायते तेनोत्तरदिने यागः। क्षयोदाहरणं यथा यत्र पर्वषट्षष्टिघटि ६६ प्रतिपच्चतुःषष्टिः ६४, तदा प्रतिपत्क्षये द्विघटिमितः२ तदर्द्धे पर्वविनियोजितेःजाते पर्व विंशति २० घटिमितं तदा मध्याह्ने सन्धिर्जायते तेन तस्मिन्दिने यागः। (१)पूर्वदिनेऽन्वाधानम् । (अत्र चन्द्रदर्शने निषिद्धयागः)(२)।

"अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादि"ति निषेधात् ।

यस्मिन्देशेऽष्टादशघटीमितं दिनमानं बदरीचम्पाकाश्मीरकामरूपादौ श्रौतस्मार्तकर्मानुष्ठानदेशे सम्भवति ( तत्र ) चतुर्दश्यां पिण्डपितृयज्ञः, अमादिने यागः । इत्थं च त्रयोविंशत्यधिकदिनमानदेशे इदं न सम्भवतीति निश्चयः ।

कात्यायनश्च—

"रजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं ( दानं ) दद्याद्द्विजातये" ॥

(३)शेषपर्वणीष्टौ माधवीये गार्ग्यः—

---

( १ ) "पूर्वदिनेऽन्वाधाना इत्यादि सुधिभि" रिति सर्वादर्शपुस्तकेषु पाठः ।

( २ ) इत ऊर्ध्वं "एवमुक्तमेतद्विषये वाक्यानी"त्यधिकः सर्वादर्शपुस्तकेषु पाठः ।

( ३ ) "शेषपर्वणीष्टौ विशे माधवीये" इति सर्वत्र पाठः ।

"प्रतिपद्यप्रविष्टायां यदि त्विष्टिः समाप्यते ।
पुनः प्रणीय कृच्छ्रेष्टिः कर्तव्या यागवित्तमैः" ॥

एतच्च पञ्चदशशाखान्तर्गतबौधायनवाजसनेयिविषयं न माध्यन्दिनीयवाजसनेयिविषयम् । गदाधरभाष्येऽपि—पिण्डपितृयज्ञदिनात्परदिने यागः कार्यः । "पूर्वेद्युः पितृभ्यो निष्क्रीय प्रातर्देवेभ्यः प्रतनुत" (१) इति श्रुतेः, "पूर्वो वाऽङ्गत्वात्पिण्डपितृयज्ञ" (२)इति सूत्राच्च(३) । यद्यपि चन्द्रदर्शने याग निषेधः स्मर्यते—

"द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी ।
अन्वाधानं चतुर्दश्यां परतः सोमदर्शना"—

दित्यादिना । तथाप्युक्तन्यायेन वाजसनेयिनां पिण्डपितृयज्ञः परदिन एव । चन्द्रदर्शनवत्यपि यागानुष्ठानस्योचितत्वाद्वाजसनेयिव्यतिरिक्तविषयत्वेन पूर्वाह्णमध्याह्नसन्धिविषयत्वेन वा निषेधो नेतव्यः । नचास्य दर्शाङ्गत्वादनाहिताग्नेरेष न भवतीति वाच्यम् । "अनाहिताग्नेरप्येष"(४) इत्युक्तत्वात् । अयं च मृतपितृकस्यैव भवति ।

इति पर्वनिर्णयः समाप्तः ।

---

( १ ) तै० ब्रा० १।३।१० ।

( २ ) का० श्रौ० ४।१।२८ ।

( ३ ) अत्र "तत्रैव स्यादिष्टिस्तत्परेऽहनि निर्दिष्टः पिण्डपितृयज्ञोऽत्र कालो वाजसनेयिनां नेष्टिस्तत्सूत्रोतो त्वेषिस्त्वा शेषितियरीत्रिति" इत्यशुद्ध अनन्वितश्च पाठः सर्वपुस्तकेषु समुपलभ्यते ।

( ४ ) का० श्रौ० ४।१।३१ ।

## ( अथ क्षौरनिर्णयः )

अथ क्षौरनिर्णयः । "केशश्मश्रु वपते वाऽशिखमि(१)"ति सूत्रे अशिखं वपनं देवयाज्ञिकादिभिर्व्याख्यातम् । भर्तृयज्ञमते नियमेन वपनम् । वैद्यनाथभाष्ये एव शब्दो निश्चयार्थे कृत्वा वपत एव । कर्कमते वपते न वा वपत इति विकल्पः । पूर्वपक्षो बहुसम्मतः शिष्टाचारोऽप्येवम् । ( वपनस्य दर्शपौर्णमासयोर्विधानात् ) अत्र दर्शपौर्णमासपदाभ्यां स्थालीपाकविधानादावसथ्याग्निमतोऽपि पर्वणि वपनं व्रत्याशनादयो नियमाः श्रौते विहिता भवन्ति । अत एव "प्रवसन्नोपवसेदि"ति छान्दोग्ये ।

"नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतमि"ति–

शाङ्खायनगृह्ये प्रवासे उपवासनिषेधः । न च छन्दोगविषयं तदिति वाच्यं परोक्तस्याविरोधेन उपादेयत्वात् । शिष्टाचारोऽप्येवम् ।

बौधायनोऽपि—

"अनाहिताग्निराधानी पक्षे पक्षे विशेषतः ।
दर्शे च पौर्णमासे च क्षौरं कुर्यात्सदैव हि" ॥

एतेन गृह्याग्निमतां पर्वणि पवनव्रत्याशनादिनियमो नास्त्यनभिधानादिति वदन्तो निरस्ताः ।

वपनाभावेऽपरार्के बौधायनः—

"आहिताग्नेर्द्वयं पर्व पञ्चमी च प्रशस्यते ।

---

( १ ) का० श्रौ० २।१।६ ।

द्वादश्यामथवाष्टम्यां पर्वणोर्यद्यसम्भवः" ॥

अधिरपद्धतौ—

"दर्शं च पौर्णमासं च विना चैव तु साग्निकः ।
नान्तरा वपनं कुर्यान्मातापित्रोर्मृतिं विना ॥
उच्छिन्नाग्नेस्तथैव स्याद्वपनं नैव विद्यते ।
अनग्निद्विजवद्धर्मो वैश्वदेवं विना यतः" ।

इत्याहिताग्निरनाहिताग्निक्षौरविधिः । केवलनिरग्निकस्तु—

वशिष्ठः—

"मासि मासि गृहस्थानां पक्षे पक्षे तु यज्वनाम् ।
ऋतावृतौ यतीनां तु यथेच्छं ब्रह्मचारिणाम्" इति ॥

तत्र निषेधं वर्जयित्वा कर्तव्यं गृहस्थैरिति । तदुक्तं वृद्धगार्ग्येण—

"रव्यारसौरिवारेषु रात्रौ पाते व्रतेऽहनि ।
श्राद्धाहः प्रतिपद्रिक्ता भद्रा क्षौरेषु वर्जयेत्" ॥

गार्ग्यः—

"षष्ठ्यमापूर्णिमायां तु चतुर्दश्यष्टमी तथा ।
आसु सन्निहितं पापं त्रिषु तैले भगे क्षुरे" ॥

धर्मप्रवृत्तौ—

"शन्यर्कभौमरिक्तासु षष्ठ्यष्टम्योश्च पर्वसु ।
श्राद्धाहे च व्रते चैव सूतके निशि सन्ध्ययोः" ।

तथा—

"कुम्भे कर्कटके चैव कन्यायां कार्मुके रवौ ।
रोमखंडं गृहस्थस्य पितॄन् नाशयते नरः" ॥

तस्यापवादः । तदुक्तं कारिकायाम्—

"सर्वां कन्यां परित्यज्य अर्द्धकर्कटकं त्यजेत् ।
धनुःकुम्भौ त्रिधा कृत्वा पूर्वभागं परित्यजेत्" ॥

सूतके तु साग्निनिरग्निकैरवश्यमेव वर्ज्यम्। अन्यदपि निषेधो ग्रन्थान्तरेऽवगन्तव्यः । इति निरग्निकक्षौरविधिः ॥

## ( अथ स्थालीपाकारम्भनिर्णयः । )

अथाधानानन्तरं शुक्ला कृष्णा वा प्रतिपद्भवति तस्यामारम्भः कार्यः । तदुक्तं कारिकायाम्—

"आधानानन्तरं शुक्ला कृष्णा वा प्रतिपद्भवेत् ।
तस्यां पक्षादिकर्मैतत् कार्यं पूर्वाह्ण एव तत्" ॥

हरिहरभाष्ये तु—

"सायमादिप्रातरन्तमेकं कर्म प्रचक्षते ।
पौर्णमासादिदर्शान्तमेकमेव विदुर्बुधाः" ।

इति वचनात्कृष्णपक्षे यद्याधानं तदा दर्शमनिष्ट्वैव पौर्णमास्यां पक्षादिकर्मारम्भः । यत्तु छन्दोगपरिशिष्टवचनं—

"ऊर्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोऽपि चाग्रिमः ।
य आयाति स होतव्यः स एवादिरिति श्रुते"—

रित्येतत्पुनराधानविषयं तच्छाखिविषयमित्युक्तम् । अन्ये के वदन्त्याधानस्य शुक्लपक्षे विहितत्वात्तदुत्तरं पौर्णमासस्थालीपाककालस्य विद्यमानत्वात्पौर्णमासस्थालीपाकारम्भो युक्तः। तच्चिन्त्यम्,

अस्माकं सूत्रे (१)"दारकाले दायाद्यकाले वे"त्यावसथ्याधानस्यारम्भो युक्तः(२) । ननू "दगयन आपूर्यमाणपक्षे पुण्याह" (३)इत्युक्तत्वाद्विभागोऽपि शुक्लपक्षे स्यात्तदा कृष्णायां प्रतिपद्यारम्भः सिद्ध्येदेव । सत्यम्, विभागस्तावद्रागतः प्राप्तस्तत्र कालापेक्षाभावादापूर्यमाणादिनियमो न स्यादतो यदैव विभागस्तदैवाधानं, ततः प्रतिपद्यारम्भ इति युक्तम् ।

नन्वस्तु कृष्णपक्षे शुक्लपक्षे वा विभागः। आधानं तु शुक्लपक्ष एव कार्यम्। नैवम्। कालविलम्बे प्रमाणाभावाद्विभागोत्तरं कार्यमेव, ततो या प्रतिपदायाति तस्यामारम्भ इति । अत्र बहुवक्तव्यमस्ति ग्रन्थगौरवभयान्नोच्यते। यद्यारम्भकाले मूतकमलमासपौषमासगुरुशुक्रास्तवाल्यवार्धकग्रहणादि भवति तदापि प्रारम्भः कार्यः । यानि तु तत्रारम्भनिषेधकानि—

"उपरागोऽधिमासश्च यदा प्रथमपर्वणि ।
तदा मलिम्लुचे पौषे नान्वारम्भणमिष्यते ।।
गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा"

इत्यादीनि सङ्ग्रहकारादिवचनानि तान्यालस्यादिना स्वकालानुपक्रान्तस्थालीपाकादिप्रारम्भविषयकाणीति प्रयोगपारिजातकारः प्रयोगरत्नाकरश्च । तथा चापरार्कस्थं गर्गवच-

---

( १ ) पा० गृ० सू २।१ ।

( २ ) तत्र यदा दायाद्यकाल आधानं कृतं तदुत्तरं या प्रतिपद्भवति तस्यामारम्भो युक्त"इति गदाधरभाष्येऽ( १२२पत्रे )धिकः पाठः।

( ३ ) पा० गृ० १।४।५ ।

तमुदाजहार—

"नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे" इति ॥

देवयाज्ञिकैस्तु—"दर्शपूर्णमासानीजान" (१)इति सूत्रव्याख्याने सूतकशुक्रास्तादिनिमित्तवशाद्दर्शपौर्णमासारम्भोत्कर्षेसत्याग्रयणकाल आगते तदतिक्रमशङ्कायामयं प्रकार इत्युक्तम् । अतो याज्ञिकानामभीष्टः शुक्रास्तादावारम्भ इत्याभाति ।

तथा च त्रिकाण्डमण्डनः—

"आधानानन्तरं पूर्णमासी चेन्मलमासगा ।
तस्यामारम्भणीयादीन्न कुर्वीत कदाचन"(२) इति ॥

आचारोऽप्येवम् ।

## ( पक्षादिकर्मप्रयोगः)

अथ प्रयोगः । तत्र प्रथमप्रयोगे आधानानन्तरं प्रथमप्रतिपदि शुक्लायां कृष्णायां वा प्रातर्होमानन्तरं खरस्थानादग्नेरेकदेशं महानसे स्थाप्य खण्डवैश्वदेवार्थं पाकं कृत्वा निर्णेजनान्तं वैश्वदेवं विधाय मातृपूजनपूर्वकमाभ्युदयिकं कुर्यात् । ततो देशकालौ सङ्कीर्त्य ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शपौर्णमासस्थालीपाकाख्यं कर्माहं करिष्ये । तदङ्गभूतं गणपतिपूजनं स्वस्तिपुण्याह—

(१) का० श्रौ० ४।६।११ ।
(२) त्रि० मं० १ । १८१ ।

वाचनं मातृपूजनं वसोर्धारापूर्वकमाभ्युदयिकश्राद्धं करिष्ये। श्राद्धं समाप्य देशकालौ सङ्कीर्त्य दार्शिकं पौर्णमासिकं वा स्थालीपाकाख्यं कर्माहं करिष्ये। ततो वैकल्पिकस्मरणम्। तत्र पूर्वेद्यु प्रभृयो गमनादिपूर्णपात्रान्तं पूर्ववत्।

अथ ऋष्यादिस्मरणम्। तत्र पञ्चादिकर्ममन्त्राणां प्रजापतिर्ऋषिस्ते च छन्दोहीना लिंगोक्तादेवता होमे विनियोगः। तत्र भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निर्वायुः सूर्यो देवतास्त्वन्नः सत्वन्न अयाश्चाग्ने ये ते शतमिति मन्त्राणां वामदेव ऋषिरग्नीवरुणौ देवते द्वयोस्तृतीयस्याग्निर्देवता चतुर्थस्य वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता उदुत्तममिति शुनश्शेप ऋषिस्त्रिष्टुप्छन्दः वरुणो देवता सर्वेषामाज्यहोमे विनियोगः।

अथ देवताभिध्यानम्। तत्र प्रजापतिमिन्द्रमग्निं सोममाज्येन, अग्निं ( उपांशु ) अग्नीषोमौ ( उच्चैः ) अग्नीषोमौ इति पौर्णमासे, दर्शे—अग्निं (उपांशु) विष्णुं ( उच्चैः ) इन्द्राग्नी एताः प्रधानदेवताश्चरुणा, अन्वारणां प्रजापतिं विश्वान् देवान् द्यावापृथिव्यौ चरुणा, विश्वान् देवान् भूतगृह्यान् आकाशं एता बलिभिः, अग्निं प्रजापतिं विश्वान् देवान वैश्वदेवान्नेन, अग्निं स्विष्टकृतं चरुवैश्वदेवान्नेन, अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निमयसं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं प्रजापतिं एता आज्येन स्त्रियं पुमांसं वयसमवयसं शुक्लं कृष्णदन्तं पापीनां पतिं ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तान्

( एते बलयः ) एता देवताः स्थालीपाकाख्ये कर्मण्यहं यक्ष्ये ।

ततो ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा तण्डुलासादनानन्तरं वैश्वदेवान्नस्यासादनं जलेन प्रोक्षणम् , एतावान् विशेषः ।

ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐइन्द्राय स्वाहा । इदमिन्द्राय न मम । ॐअग्नये स्वाहा । इदमग्नये न मम । ॐसोमाय स्वाहा । इदं सोमाय न मम । ततश्चरुमभिघार्य स्रुवेणावदाय–ॐअग्नये स्वाहा । इदमग्नये न मम । (उपांशु) ॐअग्नीषोमाभ्याꣲ स्वाहा । इदमग्नीषोमाभ्यां न मम । (उच्चैः) ॐअग्नीषोमाभ्याꣲ स्वाहा । इदमग्नीषोमाभ्यां न मम । इति पौर्णमासे ।

अथ दर्शे ॐअग्नये स्वाहा । इदमग्नये न मम । ( उपांशु ) ॐविष्णवे स्वाहा । इदं विष्णवे न मम । (उच्चैः) ॐइन्द्राग्निभ्याꣲ स्वाहा । इदमिन्द्राग्निभ्यां न मम ।

उत्तरस्तूभयत्र समानम् । ॐब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐविश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो न मम । ॐद्यावापृथिवीभ्याꣲ स्वाहा । इदं द्यावापृथिवीभ्यां न मम । उत्तरतस्त्रीणि बलिहरणानि ॐविश्वेभ्यो देवेभ्यो नमः । इदं विश्वेभ्यो देवेभ्यो न मम । ॐभूतगृह्येभ्यो नमः।इदं भूतगृह्येभ्यो न मम । ॐआकाशाय नमः । इदमाकाशाय न मम । त्रयाणां न संस्रवः । ततो वैश्वदेवान्नमभिघार्य ॐअग्नये स्वाहा । इदमग्नये न मम । ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐविश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो न मम । चरोर्वैश्वदेवान्नस्य चोत्तरार्द्धात् स्विष्टकृत् । ॐअग्नये स्विष्ट-

कृते स्वाहा। इदमग्नये स्विष्टकृते न मम। ततो (आज्येन) भूराद्या नवाहुतयः(१)। संस्रवप्राशनादि(२) प्रणीताविमोकान्तं कृत्वा चरुशेषेण बाह्यतो बलिहरणमुपलिप्तदेशे स्रुवेण ॐनमः स्त्रियै। इदं स्त्रियै न मम। ॐ नमः पुंसे वयसेऽवयसे। इदं पुंसे वयसेऽवयसे न मम। ॐनमः शुक्लाय कृष्णदन्ताय पापीनां पतये। इदं शुक्लाय कृष्णदन्ताय पापीनां पतये न मम। ॐनमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यः। इदं ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यो न मम। ॐनमोऽस्तु बलिभेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु। इदं स्त्रियै पुंसे वयसेऽवयसे शुक्लाय कृष्णदन्ताय पापीनां पतये ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यश्च न मम। मणिकोदकेन चरुशेषप्रप्लावनम्। ततो ब्राह्मणभोजनम्।

ततो वैश्वदेवान्नशेषेण नित्यश्राद्धहन्तकारब्रह्मयज्ञबलिहरणानि कुर्यात्। द्वितीयादिप्रयोगे पूर्वं स्थालीपाकः। पश्चाद्वैश्वदेवः। तदुक्तं कारिकायाम्—

"अकृते वैश्वदेवे तु स्थालीपाकः प्रकीर्तितः।
अन्यत्र पितृयज्ञादौ सोऽपराह्णे विधीयते"॥

प्रथमायां प्रतिपदि तु आभ्युदयिकात्पूर्वं कार्यमिति तत्रैवोक्तम्।

इति स्मार्त्तोल्लासे स्थालीपाकप्रयोगः समाप्तः।

---

(१) पूर्वं १६४ पत्रे द्रष्टव्याः।

(२) संस्रवप्राशनम्। मार्जनम्। पवित्रप्रतिपत्तिः। प्रणीताविमोकः। दक्षिणादानम्।

## ( पिण्डपितृयज्ञः )

अथ पिण्डपितृयज्ञः। तत्र "चन्द्रादर्शनेऽमावास्यायामपराह्णे पिण्डपितृयज्ञ" इति (१)सूत्रम्। दिवसस्य तृतीयभागोत्तरं सोपराह्णे पितृयज्ञः।

तत्र प्रथमप्रयोगे निर्योजनान्तं वैश्वदेवं कृत्वा देशकालौ सङ्कीर्त्य गोत्रपितृनामोच्चारणपूर्वकं पिण्डपितृयज्ञारम्भनिमित्तमाभ्युदयिकश्राद्धं मातृपूजनपूर्वकमहं करिष्ये॥

द्वितीयादिप्रयोगे माध्याह्निकं कर्म नि(वर्त्य)वृत्य निर्योजनान्तं वैश्वदेवं कृत्वाऽग्नेरुत्तरतो दक्षिणाभिमुखो भूत्वा प्राचीनावीतिकरणम्, नीविबन्धनम्, तच्च कुशतिलसंयुक्तानां वस्त्रदशानां सव्यभागे परिहितवस्त्रेण संवेष्टयावगूहनमिति देवयाज्ञिकाः। नीविं परिहितमध्येऽवगूहित[हनं]वस्त्रप्रान्तं विस्रंस्येति "नीविं विस्रंस्ये"ति (२)सूत्रव्याख्याने श्रीअनन्तयाज्ञिकाः। "न नीविं कुरुते" (३)इत्येतद्व्याख्याने नीवि परिधानदार्ढ्यार्थं प्रदेशान्तरे प्रदेशान्तरावगूहनार्थमित्युक्तं श्रीअनन्तैः। "नीविं कुरुते सोमस्य नीविरि" (४)त्यत्र च नीविरपवर्तिकेति कर्कादयः। सर्वसूत्रव्याख्यानावलोकने प्रदेशान्तरे प्रदेशान्तरावगूहनमायाति।

"नीविं वासोदशान्तेन स्वरक्षार्थं प्रबन्धये"—

---

( १ ) का० श्रौ० ४। १। १।

( २ ) का० श्रौ० ४। १। १५।

( ३ ) का० श्रौ० ७। २। १६।

( ४ ) का० श्रौ० ७। ३। २३।

दित्याश्वलायनः । वेदश्रोणिसंहननाच्छादनवाक्यशेषे (१)"दक्षिणत एव हीयं नीविरि"ति ।

"दक्षिणे कटिदेशे तु तिलैः सह कुशत्रयमि"ति—

वृद्धयाज्ञवल्क्यः ।

"नीवी कार्या दशागुप्तिर्वामकुक्षौ कुशैः सहे"ति—

यत्कात्यायनवचनं तद्वृद्धिश्राद्धे ।

"पितॄणां दक्षिणे पार्श्वे विपरीता तु दैविके"—

इति स्मृत्यन्तरात् । वामे दक्षिणे वेत्याचाराद्व्यवस्थे"ति मदन( प्रयोग )पारिजाते ।

ततः सव्यं आचम्य देशकालौ सङ्कीर्त्य अपसव्यं गोत्राणां अस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्रीपितृतृप्तिद्वारा परमेश्वरप्रीत्यर्थं पिण्डपितृयज्ञमहं करिष्ये ।

ततो वैकल्पिकस्मरणम् । अग्निमपरेण पात्रासादनम् । दक्षिणेन लेखाकरणम् । एतत्तेऽन्नमिति पिण्डदानम् । सूत्राण्याच्छादनानि, एतान् वैकल्पिकपदार्थानहं करिष्ये ।

अथ ऋष्यादिस्मरणम् । पिण्डपितृ[यज्ञ]मन्त्राणां प्रजापतिर्ऋषिरग्निः कव्यवाहनः सोमः पितृमान् देवते "अपहता' इति यजुः रक्षांसि देवता 'ये रूपाणीति' त्रिष्टुप् 'अत्र पितर' इति 'नमो व' इ'त्येतद्यः' इति यजुः रक्षांसि 'आधत्ते'ति गायत्री पत्नानां पितरो देवता 'ऊर्ज'मिति विराट् आपो देवता पिण्डपितृयज्ञहोमे लेखाकरणे उल्मुकनिधाने जपे अञ्जलिकरणे सूत्रदाने मध्यमपिण्डप्राशने अपां

(१) श० ब्रा० २ । ३ । ६ । ६ ।

निषेकेऽवघाते विनियोगः ।

अथ देवताभिध्यानम् । अग्निं कव्यवाहनं सोमं पितृमन्तं गोत्रं अस्मत् पितरं पितामहं प्रपितामहं चरुशेषेण पिण्डैरहं यक्ष्ये ।

आग्नेयाद्यपदक्षिणां दक्षिणाग्रैर्दर्भैः परिस्तरणम् । पात्रासादनम्—अग्निमपरेण दक्षिणाग्राणि प्राग्बिलानि प्राक्संस्थानि, उत्तरेण चेत् प्रागग्राणि दक्षिणबिलानि दक्षिणसंस्थानि । कृष्णाजिनं, ऊलूखलं, मुसलं, शूर्पं, चरुपात्रं, जलं, आज्यं, मेक्षणं, वज्रं, उदपात्रं, सकृदाच्छिन्नानि, तण्डुलाः, सूत्राणि चासादयेत् । कृष्णाजिनादानम् । उत्तरतोऽग्नेरास्तरणम् । शम्याशून्ये उलूखलनिधानम् । पितृतीर्थेन तण्डुलप्रक्षेपः । मुसलादानम् । मुसलयोजनम् । तिष्ठन् त्रिःकण्डनम् । शूर्पादानम् । उद्वपनम् । निष्पवनम् । विवेकीकरणम् । पुनरुलूखले निधानम् । सकृत्फलीकरणम् । चरुस्थाल्यां प्रक्षेपः । सकृत्प्रक्षालनमासादनोदकेन । अधिश्रयणम् । सुशृतस्याभिघारणम् । उद्वासनम् । दक्षिणात अग्नादक्षिणयेनानयनम् । सव्यं जान्वाच्य मेक्षणेन होमः—ॐ अग्नये कव्यवाहनाय स्वाहा । इदमग्नये कव्यवाहनाय न मम । तस्माद्दक्षिणतः—ॐ सोमाय पितृमते स्वाहा । इदं सोमाय पितृमते न मम । तत्पुरस्ताद्दक्षिणाग्रं मेक्षणप्रक्षेपः । अपरेण दक्षिणेन वा (१)'अपहता' इत्यनेन वज्रेण लेखाकरम् । (२)ये रूपाणी'ति दक्षिणे उल्मुकनि·

---

(१) "ॐ अपहता असुरा रक्षाᳬसि वेदिषदः" (शु० य० सं० २ । २९ ) ।

(२) "ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चर·

धानम् । उदपात्रेण दक्षिणासंस्थमवनेजनम् । गोत्र अस्मत्पितः अमु-कशर्मन् अवनेनिक्ष्व । एवं पितामहप्रपितामहयोरवनेजनम् । रेखोपरि सकृदाछिन्नास्तरम्। पिण्डदानम्—गोत्र अस्मत्पितः अमुकशर्मन् वसुरूप एतत्तेऽन्नं स्वधा । इदं गोत्रायास्मत्पित्रे ऽमुकशर्मणे वसुरूपाय दत्तं न मम । एवं पितामहप्रपितामहयोः । (१)"अत्र पितर" इति आश्वा-सधारणम् । (२)"अमीमदन्ते"ति विसृज्य प्रत्यवनेजनम्—गोत्र पितः अमुकशर्मन् वसुरूप प्रत्यवनेनिक्ष्व । एवं पितामहप्रपितामहयोः । नीविं विस्रंस्य (३)"नमो व" इति षडञ्जलिकरणम् । (४)"गृहा-न्न" इति जपः । (५)"एतद्वः" इति त्रीणि त्रीणि सूत्राणि ददाति । आचारात्पूजनम् । (६)"ऊर्ज्जमि"ति अपां निषेकः । पिण्डमूले पिण्डोद्धरणम्।अवघ्राणम्। सकृदाच्छिन्नान्यग्नौ प्रक्षेपः, उल्मुकस्य च । सव्यं, उदकोपस्पर्शः । शेषं वैश्वदेवं समापयेत् । पुत्रकामा

न्ति । परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् ( शु० य० सं० २ । ३० ) ।

( १ ) ॐ अत्र पितरो मादयध्वं यथा भागमावृषायध्वम् ।

( २ ) ॐ अमीमदन्त पितरो यथाभागमावृषायिषत ( य० सं० २ । ३१ ) ।

( ३ ) नमो वः पितरो रसाय । नमो वः पितरः शोषाय । नमो वः पितरो जीवाय । नमो वः पितरः स्वधायै । नमो वः पितरो घो-राय । नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः ।

( ४ ) गृहान्नः पितरो दत्त सतो वः पितरो देष्म ।

( ५ ) एतद्वः पितरो वास आधत्त ।

( ६ ) ऊर्जं वहन्तीरमृतं घृतम्पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितॄन् ।

मध्यमपिण्डं पत्नी (१)"आधत्तेति" मन्त्रेण प्राश्नाति। तस्मिन्पक्षे नावघ्राणम्। यजमाने प्रोषिते सति गृहे ऋत्विमादिःकरोति तदा नावघ्राणम्। ततो ब्राह्मणभोजनम्। पिण्डपितृयज्ञाख्येन कर्मणा श्री पितृरूपी परमेश्वरः प्रीयताम्।

ततो दर्शश्राद्धम्। अथ स्वकाले स्थालीपाकपिण्डपितृयज्ञयोरकरणे विशेष उच्यते—

"पक्षादि पिण्डयज्ञादि प्रमादादकृतं यदि।
प्रायश्चित्तं ततो हुत्वा कर्तव्यं तद्दिनान्तरे"॥ इति।

पितृयज्ञस्त्वमावास्यादिन एव भवति न दिनान्तरे। अमावास्यामननुष्ठानेन प्रायश्चित्तत्वेन वैश्वानरचरुरेव न पिण्डपितृयज्ञः।

कारिकायाम्—

"मुख्यकाले यदा न स्यात्पौर्णमासः कथञ्चन।
कृत्वाऽन्वादिष्टमा दर्शात्कर्तव्यो यत्र कुत्रचित्॥
दर्शात्पाक्स न वा चेत्स्याद्दर्शेन सह तत्क्रिया।
यदि दर्शोऽप्यतिक्रान्तस्तदा पथिकृ[तिर्भवेत्]तिं चरेत्"॥

अत्रापि चरुरेवानाहिताग्नेः, आहिताग्नेस्त्विष्टिः। अनाहिताग्नेश्चरु इत्युक्तम्।

"एवं दर्शोऽतिपन्नः प्राक्पौर्णमासाच्च चेत्कृतः।
पितृयज्ञं विना सोऽपि कर्तव्यो यत्र कुत्रचित्॥
न पौर्णमासतन्त्रे स्याद्दर्शो भिन्नप्रयोगतः।

---

(१) आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत्।

पौर्णमासेऽप्यतिक्रान्तेऽतिपत्तिः पथिकृत्तदा" ॥
प्रायश्चित्तन्त्वग्रे वक्ष्यामः । इति स्थालीपाकादिगौणकालाः॥

इति शिवप्रसादकृते स्मार्तोल्लासे पिण्डपितृयज्ञप्रयोगः समाप्तः ।

## ( नवान्नप्रयोगः । )

अथ नवान्नप्रयोग उच्यते । तदुक्तं गृह्यकारिकायाम्—
"वक्ष्ये नवप्राशनमाहितस्य पुण्येऽह्नि तत्कर्म शरद्वसन्ते ।
न पूर्णिमाया नियमस्त्वमाया आचार्यमत्या ग्रहणं न हीदम् ॥
पौष्णाद्वये चादितिभद्वये च ब्रह्मद्वये चैव करद्वये च ।
त्रिरुत्तरे विष्णुयुगे ज्ञजीवे सिते च रिक्तातिथिवर्जिते स्यात् ॥
यवैर्वसन्ते यष्टव्यं व्रीहिभिः शरदीष्यते ।
श्यामाकैश्च शरद्येव ग्रीष्मकाले च वेणुजैः ॥
कृताकृतं वेणुयवैर्भेदन्त्याग्रयणं बुधाः ।
समानतन्त्रे वा व्रीहिश्यामाकाग्रयणे उभे ॥
कात्यायनमतेनैके श्यामाकेष्टयां न कुर्वते" ।

संग्रहे—
"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ॥
वसन्ते च शरद्येव नवान्नप्राशनं भवेत् ।
बुधे गुरौ रवौ वापि वारे स्यादन्यतो न च ॥
रेवत्यां च तथाश्विन्यां रोहिण्यां मृगशीर्षके ।

पुनर्वसौ तथा पुष्ये हस्ते चित्रोत्तरात्रये ॥
श्रवणे च धनिष्ठायामेतद्भवति नान्यतः ।
रिक्तातिथिं व्यतीपातं वैधृतिं चावमं दिनम् ॥
संक्रान्तिं करणं विष्टिं विरुद्धं च विवर्जयेत् ।
जन्मस्थे च जलस्थे च पञ्चमे नवमेऽपि वा ॥
नवमैकादशे श्रेष्ठचन्द्रे चैव प्रशस्यते ।
अन्यत्र शुक्लपक्षे च यदाग्रयणमाचरेत् ॥
तदा प्रायश्चित्तिस्तस्या न त्याज्या धर्मलोपतः" । इति मुहूर्तः ।

अथ प्रयोगः । तत्र प्रथमप्रयोगे निर्णेजनान्तं वैश्वदेवं विधाय नवान्ननिमित्तमाभ्युदयिकश्राद्धं कृत्वा ततः पत्न्या सह पश्चादग्नेरुपविश्य ॐतत्सत्परमेश्वरप्रीत्यर्थं नवान्नप्राशनमहं करिष्ये ।

ततो वैकल्पिकं स्मरेत् । पूर्वेण आग्रयणागमनम्० भागौ । 'अग्निः प्रथमः प्राश्नात्वि'ति संस्रवप्राशनम् । 'एतमुत्यमि'ति यवप्राशने । पूर्णपात्रं दक्षिणा, एतावद्व्धारणं करिष्ये ।

अथ ऋष्यादिस्मरणम् । 'शतायुधाय ये चत्वारः स्विष्टमग्न' इति त्रयाणां प्रजापतिस्त्रिष्टुप् इन्द्रः सर्वे देवाग्निर्देवता आज्यहोमे विनियोगः ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोममिन्द्रं सर्वान्देवान् आज्येन, इन्द्राग्नी विश्वान् देवान् द्यावापृथिव्यौ व्रीहिमयेन यवमयेन वा चरुणा, अग्निमाज्येन, अग्निं स्विष्टकृतं चरुशेषेण, पुनरग्निमाज्येन, अग्निं वायुं सूर्यमित्यादिवरुणान्तं प्रजापतिं एता

देवता आज्येन, अस्मिन्नवान्नप्राशनाख्ये कर्मण्यहं यक्ष्ये ।

ततो ब्रह्मोपवेशनाद्याघारावाज्यभागान्कृत्वाज्येन—

"ॐ शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे । शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा" । इदमिन्द्राय ।

'ॐ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां योऽज्यानिमजोजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा' । इदं सर्वेभ्यो देवेभ्यः ।

ततः स्थालीपाकमभिघार्य स्रुवेण होमः । ॐ इन्द्राग्निभ्याᳬ स्वाहा । इदमिन्द्राग्निभ्यां न मम । ॐ विश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो न मम । ॐ द्यावापृथिवीभ्याᳬ स्वाहा । इदं द्यावापृथिवीभ्यां न मम ।

आज्येन 'ॐ स्विष्टमग्ने अभितत्पृणाहि विश्वाँश्च देवः पृतना अविष्यत् । सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः स्वाहा' । इदमग्नये न मम ।

चरुणा स्विष्टकृत् । 'ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम' । पुनः 'स्विष्टमग्न' इत्याज्याहुतिः ।

ततो भूराद्या नवाहुतयः । ततः संस्रवप्राशनम् । तत्र मन्त्रः—"अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व

शं तोकाय तनुवे स्योनः" । अथवा "अन्नपतेऽन्नस्ये"(१)ति प्राशनम् । यवप्राशने—'एतमुत्यं मधुना संयुतं यवꣳ सरस्वत्या अधिवनाय चक्रुषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः' । एतावान् विशेषः ।

पवित्रमार्जनादिप्रणीताविमोकान्तं कृत्वा ब्रह्मन् ! अस्य नवान्नप्राशनकर्माङ्गतया यथाविहितोऽयं ते वरः प्रतिगृह्यताम् । (२)द्यौस्त्वेति । ब्राह्मणभोजनम् । अनेन नवान्नप्राशनकर्मणा श्रीयज्ञरूपी परमेश्वरः प्रीयताम् । (३)यस्य स्मृत्येति । क्षमस्व ।

इति शिवप्रसादकृते स्मार्तोल्लासे नवान्नप्राशनप्रयोगः समाप्तः ।

---

## ( उपाकर्मनिर्णयः )

अथोपाकर्मोच्यते । एतच्चाध्ययनप्रवृत्तस्य भवति । अत एवाग्निमतोऽध्यापनं भवति । नह्यग्निमान्छक्नोत्यग्निसाध्यं कर्म कर्तुमिति । निरग्नेरप्येतदुपाकर्म लौकिकेऽग्नौ भवतीति गर्गः । न चैतत्कर्कादिसम्मतम् । अत्र पौर्णमास्या एव प्राधान्यात्पौर्णिमाऽभावे हस्तयुक्तपञ्चम्यां कार्यमित्याहुः । यदि ग्रहणं संक्रान्तिर्वा पर्वणि भवति तदा पञ्चम्यामुपाकरणं भवति । तदुक्तं महार्णवे—

---

(१) अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । ( शु० य० सं० ११।८३ )

(२) द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ।

(३) "यस्य स्मृत्या" पूर्वं ( १३३ पत्रे ) टिप्पण्यां द्रष्टव्यः ।

"संक्रान्तिर्ग्रहणं वाऽपि यदि पर्वणि जायते ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते" ॥

तथा च—

"संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः" ॥

मदनरत्नेऽपि—

"यदि स्याच्छ्रवणं पर्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु" ॥

तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ—

"अर्द्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत्" ॥ इति ।

प्रयोगपारिजाते—

"वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।
उपाकर्म न कर्तव्यं सिंहयुक्ते तदिष्यत"

इति वचनं देशान्तरविषयम् ।

"नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे" ॥

इति बृहस्पतिवचनात् । पराशरमाधवीयेऽप्येवम् । सामगानां सिंहस्थे रवावुक्तेस्तद्विषय इदं पुरोडाशचतुर्द्धाकरण(१)-

(१) अत्रायं भावः—सन्ति दर्शपूर्णमासयोराग्नेयाग्नीषोमीयैन्द्राग्नाः पुरोडाशाः । तत्र "ग्नेयं चतुर्धा करोती" (श० ब्रा० १।८।१।४०)ति श्रुतं चतुर्धाकरणं किं सर्वेषां भवति उताग्नेयस्यैवेति सन्दि-

वदुपसंह्रियत इति त्वन्ये । एतच्च शुक्रास्तादावपि कार्यम् ।

"उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्"—

मिति वचनात् । पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभाव उक्तः प्रयोगपारिजाते—

"नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते" इति ।

प्रथमारम्भस्तु न भवति । तत्रैव कश्यपः—

"गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा ।
तथाऽधिमाससंक्रान्तौ मलमासादिषु द्विज ॥
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत्" । इति ।

एतच्च पूर्वाह्णे कार्यम् । तथा च प्रचेतोवचः—

"भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु" इति ।

दीपिकाऽपि—

"अस्य तु विधेः पूर्वाह्णकालः स्मृत" इति । यत्तु—

---

ह्याग्नेयवदैन्द्राग्नाग्नीषोमयोरपि पुरोडाशयोरग्निसम्बन्धादाग्नेयश-ब्देन पुरोडाशत्रयमुपलक्ष्यते । ततस्त्रयाणां चतुर्धाकरणं कर्तव्यमिति पूर्वपक्षयित्वा—न हि 'आग्नेय' इत्ययं तद्धितः सम्बन्धमात्रे विहितः, किन्तु देवतासम्बन्धे । अग्निश्च केवलो द्विदैवत्ययोः पुरोडाशयोर्न दे-वता ततो देवतैकदेशेन कृत्स्नदेवतोपलक्षणत्वादाग्नेयत्वं तयोर्न मुख्य-मिति; मुख्य एवाऽऽग्नेये व्यवतिष्ठत इति पूर्णतन्त्रे (३।१सू० २६—२७) सिद्धान्तितं, एवं प्रकृतेऽपि सिंहस्थे रवौ यदुपाकर्मविधानं तत्सामगा-नामेव नान्येषामिति ।

"अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णके।
पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः"॥

इति गोभिलवचस्तत्सामगविषयम्। तेषामपराह्णस्योक्तत्वात्। तेन वाजसनेयिभिः पूर्वाह्णव्यापिनी तिथिर्ग्राह्या। "दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा तैत्तिरीयव्यतिरिक्तानां पूर्वैव" इति हेमाद्रिः।

मदनपारिजातेऽपि—

"पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्म" इत्युक्तम्॥

मदनरत्ने तु—

"पर्वण्योदयिके कुर्युः श्रावणं तैत्तिरीयकाः"—

इति बह्वृचपरिशिष्टे तैत्तिरीयकपदम्। अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात्प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थमित्युक्तम्। तथैवानन्तभट्टीयेऽपि—

कारिकायां तु—

"पूर्णिमा प्रतिपद्युक्ता तत्रोपाकर्मणः क्रिया।
उक्तोऽर्थोऽयं प्रसङ्गेन भविष्योत्तरसञ्ज्ञके"॥

वस्तुतस्तु हेमाद्रिमतमेव युक्तम्।

पराशरमाधवीये—

"श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि।
तदैवोदयिकी ग्राह्या नान्यदौदयिकी भवेत्"॥

कालादर्शेऽपि—

"श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः।

विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत्'' ।

प्रयोगपारिजाते—

''उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।
धारणाध्ययनाङ्गत्वाद्गृहीणां ब्रह्मचारिणाम् ॥
उत्सर्जनं च वेदानामुपकर्म तथैव च ।
अकृत्वा वेदजप्येन फलं नाप्नोति मानवः'' ॥

''श्रावणस्य पञ्चमीं हस्तेन वा''(१)श्रावणमासस्य शुक्लपञ्चमीं हस्तेन युक्तां प्राप्य वा भवति । तत्रापि प्रायशो हस्त एव भवति । अतः कालद्वयस्योपाकरणे कर्मणोरारम्भः क्रियते तदा प्रथमप्रयोगे श्रवणाकर्म श्रावण्यां तत्पञ्चम्यां उपाकर्म विद्यमानकालान्तरत्वात् ।

## ( उत्सर्गनिर्णयः ) ।

द्वितीयादिप्रयोगे श्रावण्यां पौर्णमास्यामपि क्रमेणोपाकर्मश्रवणाकर्मणी द्वे अपि कर्तव्ये । उपाकर्मोत्तरकालमन्त्रब्राह्मणयोरध्ययनं कर्तव्यम् । पौषमासस्य यावन्मध्यमाष्टका रोहिणीनक्षत्रं च प्राप्नोति तत्र मध्यमाष्टकायां रोहिण्यामधीयमानयोर्मन्त्रब्राह्मणयोरुत्सर्गः । पौषस्य रोहिण्यां मध्यमाष्टकायां वा अध्यायानुत्सृजेयुरिति । अनेन

(१) पा० सू० २।१०।२ ।

सूत्रेण (१)विहितः कर्तव्यः । तदर्थं मन्त्रब्राह्मणयोरध्ययनं शुक्लपक्षे कर्तव्यं कृष्णपक्षे चाङ्गानां यावदाषाढकृष्णादशमी श्रावणकृष्णादशमी वाऽऽगच्छति तत्रोत्सर्गः "अर्धषष्ठमासानधीत्योत्सृजेयुरर्धसप्तमान्वे"त्यनेन(२)सूत्रेण विहितः कार्यः । अपरे तु एकस्यैवोत्सर्गस्य कालत्रयसाध्यत्वेऽपि केनचित्कारणेन श्रावण्यामेव क्रियते तदभिधीयते ।

## ( उत्सर्गप्रयोगः )

तत उत्सर्गप्रयोगः । पूजोपकरणमृद्गोमयकुशतिलसुमनस आहृत्य ग्रामादुदग्दिशं शिष्यैरन्यैश्च ब्राह्मणैः सह रम्यजलाशयं गच्छेत् । गुरुः शिष्याश्च प्राङ्मुखोपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य छन्दसामुत्सर्गमहं करिष्ये । सर्वैः सहेमामृचं गुरुशिष्याश्च उच्चैर्जपन्ति ।

"उभा कवी युवा यो नो धर्मः परापतत् । परिसख्यस्य धर्मिणो विसख्यानि विसृजामहे"(३) ।

ततः शिष्या गुरुमभिवाद्य यथाज्येष्ठमभिवादयेयुः । ततः सूत्रोक्तस्नानं(४) कृत्वा ऋष्यादिपूजनमुत्सर्गतर्पणं विसर्जनं च (कार्यम्) । अत ऊर्ध्वं परस्परमविरोधश्च नियमेन सर्वेषाम् । गुरुगृहे

( १ ) पा० गृ० २।१२।१ ।

( २ ) पा० गृ० २।११।१०–११ ।

( ३ ) पा० गृ० २।११।१२ ।

( ४ ) पूर्वं ६७ पत्रे टिप्पण्यां स्नानसूत्राणि द्रष्टव्यानि ।

त्रिरात्रं वासः। ततो गृहे गमनम्। एतावानुत्सर्गः। यस्त्वर्धष-ण्मासानधीत्योत्सर्गो यदि उपाकर्मकाले क्रियते तदा स्नानादिकं तन्त्रेण कार्यमित्युत्सर्गः।

## ( उपाकर्मप्रयोगः )

अथोपाकर्मप्रयोगः। तत्र प्रथमप्रयोगे प्रातर्होमानन्तरमग्नि मुद्धृत्य पाकं कृत्वा निर्गोजनान्तं वैश्वदेवं विधाय अध्यायोत्सर्गोपा-कर्मनिमित्तमाभ्युदयिकं कृत्वा ततोऽक्षततिलदर्भदूर्वापामार्गादि, अर्घ्यार्थं गन्धपुष्पादि ( पूजासामग्रीं च ) गृहीत्वा जलाशयं गच्छेत्। ततः पादौ प्रक्षाल्य पूर्ववत्सूत्रोक्त(१)स्नान—सन्ध्योपस्थान-ब्रह्मयज्ञपूर्वकं तर्पणान्तं कर्म कुर्यात्।

तत्रायं प्रयोगः। प्राणानायम्य देशकालौ सङ्कीर्त्य अध्यायो-त्सर्गोपाकर्मनिमित्तं देवर्षिमनुष्यपितृतर्पणार्थं गणस्नानमहं करि-ष्ये। यथाविधि स्नानादितर्पणान्तं नित्यक्रियां कृत्वा ततः शान्ति पाठं पठित्वा सप्तर्षींश्च स्थापयेत्। तदुक्तं कारिकायाम्—

"कश्यपोऽथ भरद्वाज अङ्गिरा गौतमस्तथा।
वत्सः पराशरमाण्डव्य एते सप्तर्षयः स्मृताः(२)॥
प्रतिष्ठावाहनं चैव कालज्ञानं ( तथैव च ) भवेत्ततः।

---

( १ ) पूर्वं ६७ पत्रे टि० द्रष्टव्यः।

( २ ) 'कश्यपोऽथ भरद्वाज अङ्गिरा गौतमो मुनिः। वत्सः पराशरश्चेति माण्डव्यः सप्तमस्तथा" इति मुद्रितश्राव-णीप्रयोगपाठः।

पूजोपवीतिदानं स्यात्प्राचीनावीतिपूर्वकम् ॥
उत्सर्ग( तर्पणं चैव पितरश्चैव आचान्तो वंश एव च ।
तत्सवितुरित्यारभ्य सावित्र्या ब्रुवणं ततः ॥
विरताः स्म इति सकृदध्यायादीन् पठेत्तदा ।
तदेतदृचाभ्युक्तं नमस्कारो विसर्जनम् ॥
समुद्रेति जले प्राश्य द्विराचान्तो गृहं व्रजेत्" ॥

ततः कश्यपभरद्वाजाङ्गिरोगौतमवत्सपराशरमाण्डव्यारुन्धत्या दर्भपवित्रैस्त्रिभिस्त्रिभिः सावित्र्या ग्रन्थिः कार्या । ततस्तान् प्रागग्रानुदगग्रांश्च स्थापयेत् । ॐ भूर्भुवः स्वः कश्यपमावाहयामि स्थापयामि । एवं भरद्वाजमङ्गिरसं गौतमं वत्सं पराशरं माण्डव्यमरुन्धतीमावाहयामि स्थापयामि । स्वान् ऋषींश्च प्रवरांश्च स्थापयेत् । (१)'मनो जूति'रिति प्रतिष्ठाप्य (२)'इमामेव' उच्चैर्जपः ।

ततः प्राणानायम्य देशकालौ सङ्कीर्त्य अध्यायोत्सर्गोपाकर्मनिमित्तं ऋषिपूजनं च करिष्ये ।

(३)'इदं विष्णुरिति' मन्त्रेण कश्यपाद्यरुन्धतीसहितसप्तर्षिभ्यो नमः । आसनपाद्यार्घ्यादिसर्वोपचारयज्ञोपवीतानि दद्यात् । एवं स्वऋषिपूजनम् । यज्ञोपवीतदानं—प्राचीनावीती गोत्रेभ्य अस्मत्पितृगणेभ्य अस्मन्मातामहेभ्य इमानि यज्ञोपवीतानीति दद्यात् । सव्यं, सर्वेभ्यो ब्राह्मणेभ्यश्चन्दनानुलेपनदक्षिणा उपवीतानि च द-

(१) शु० य० सं० २।१३।
(२) श० ब्रा० १४।५।२।६।
(३) शु० य० सं० ५।१५।

ग्यात् । अत्र जीर्णोपवीतत्यागः । तदुक्तम्—

(१)“उपाकर्मे सूतकान्ते चातुर्मास्यगते अपि ।
नवयज्ञोपवीतं च धृत्वा जीर्णं विसर्जयेत्” ॥

तत उत्सर्गतर्पणम् । दक्षिणं जान्वाच्याञ्जलिना देवास्तृप्यन्ताम् । छन्दांसि तृप्यन्ताम् । वेदास्तृप्यन्ताम् । ऋषयस्तृप्यन्ताम् । पुराणाचार्यास्तृप्यन्ताम् । गन्धर्वास्तृप्यन्ताम् । इतराचार्यास्तृप्यन्ताम् । संवत्सरः सावयवस्तृप्यताम् । देव्यस्तृप्यन्ताम् । आचार्यस्तृप्यताम् । अहोरात्राणि तृप्यन्ताम् । अर्द्धमासास्तृप्यन्ताम् । मासास्तृप्यन्ताम् । ऋतवस्तृप्यन्ताम् । गौतमस्तृप्यताम् । भरद्वाजस्तृप्यताम् । वशिष्ठस्तृप्यताम् । कश्यपस्तृप्यताम् । विश्वामित्रस्तृप्यताम् । अत्रिस्तृप्यताम् । जमदग्निस्तृप्यताम् । अरुन्धतीतृप्यताम् । ततो दक्षिणामुखा प्राचीनावीतिनः सव्यं जान्वाच्य गोत्राणां पितृपितामहादीनां यथोक्ततर्पणं कुर्युः । ततः सव्येन पितृमातृगोत्रस्थान् ऋषींस्तर्पयेत् । ततो वंशानामनुप्रवचनम् । (२)अथ वंशः । वंशान्ते वंशोक्ता ऋषयस्तृप्यन्ताम् । ‘ततः तत्सवितुरि’त्या(३)रभ्य सावित्र्यानुब्रुवणं सर्वेषाम् । तदन्ते विरताः स्म इति सकृत् । ततो मन्त्रब्राह्मणयोरध्यायादीन् अन्तकाण्डिकाफक्किकान्तपठनं सर्वेषां

---

(१) उपाकर्मणि चोत्सर्गे गते मासचतुष्टये ।
नवयज्ञोपवीतानि धृत्वा पूर्वाणि संत्यजेत् । इति मुद्रितश्रावणीप्रयोगपाठः ।

(२) श० ब्रा० १४।५।५।२०॥१४।७।३।२६॥

(३) शु० य० सं० ३।३५

तदेतदृचाभ्युक्तं पठेत् । ऋषीन्नमस्कृत्यो'(१)त्तिष्ठ ब्रह्मणस्पत' इति विसर्जनं ग्रन्थीन् मुक्त्वा (२)'समुद्रङ्गच्छे'ति जलाशये स्थापयेत् । ततो द्विराचमनम् । अग्नेः पश्चात् पत्न्या शिष्यैः सह प्राङ्मुख उपविश्य आवसथ्ये खर्परमधिश्रित्य तत्र यवान् प्रक्षिप्य खर्परस्याधोऽग्निं प्रज्वाल्य यवानां भर्जनानन्तरं पृथक्करणं होमार्थं भक्षणार्थं च ।

ततः प्राणानायम्य देशकालौ सङ्कीर्त्य परमेश्वरप्रीतये अध्यायोत्सर्गोपाकर्माहं करिष्ये ।

ततो वैकल्पिकं स्मरेत् । पौर्णमास्यामुपाकरणम् । पूर्वेण ब्रह्म० भागौ । सावित्रीमन्त्रेण तिलहोमं पूर्णपात्रं दक्षिणा त्रिरात्रं लोमनखानामनिकृन्तनम् । एतान् वैकल्पिकान्पदार्थानहं करिष्ये ।

अथ ऋष्यादिस्मरणम् । उपाकर्ममन्त्राणां=प्रजापतय इत्याद्यनुमतये स्वाहेत्यन्तानां मन्त्राणां प्रजापतिर्ऋषिस्ते च छन्दोहीना लिङ्गोक्ता देवता होमे विनियोगः । 'सदसस्पतिमि'ति स्वयम्भूर्ब्रह्मा गायत्री धानाहोमे विनियोगः । 'तत्सवितुरि'ति विश्वामित्रो गायत्री सविता देवता धानाहोमे विनियोगः । 'शन्नो भवन्त्वि'ति वशिष्ठ विराट् वाजिनो देवता धानाभक्षणे विनियोगः । 'दधिक्राव्ण' इति वामदेवोऽनुष्टुप् सुरभी दधिप्राशने विनियोगः । 'तत्सवितुरि'ति विश्वामित्रो गायत्री सवितादेवता तिलहोमे विनियोगः । भूर्भुवः स्वरिति पूर्ववत्

(१) शु० य० सं० ३४।५६
(२) शु० य० सं० ६।२१

सर्वेषामाज्यहोमे विनियोगः । 'सह नोऽस्तु' इति ब्रह्मा यजुः ब्रह्मा-देवता जपे विनियोगः ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोममन्तरिक्षं वायुं ब्रह्माणं छन्दांसि पृथिवीमग्निं ब्रह्माणं छन्दांसि दिवं सूर्यं ब्रह्माणं छन्दांसि दिशश्चन्द्रमसं ब्रह्माणं छन्दांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिं अनुमतिं एता अङ्गप्रधानदेवता आज्येन सदसस्पतिं धानाभिः सवितारं तिलैः धानाशेषेणाग्निं स्विष्टकृतं, अग्निर्वायुः सूर्यादि पूर्ववत् प्रजापतिं एता देवता पुनराज्येन एता अङ्गप्रधानार्था देवता अस्मिन्नुपाकर्मणयहं यक्ष्ये ।

ततो ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा पात्रासादने आज्यानन्तरं धानासादनमिति विशेषः । अथोपकल्पनीयानि—प्रतिशिष्यं नवसमिधः आर्द्राः सपत्रा औदुम्बरस्य दधि भक्षार्थं धाना भक्षणार्थाः। आकर्षफलकं तिलाश्चेत्युपकल्पनीयानि ।

तत आज्यभागानन्तरं (१)ॐअन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय न मम । ॐ वायवे स्वाहा । इदं वायवे न मम । ॐब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐछन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम । (२)ॐपृथिव्यै स्वाहा । इदं पृथिव्यै न मम । ॐअग्नये स्वाहा । इदमग्नये न मम । ॐब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐछन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न

(१) यजुर्वेदोपाकर्मणि ।

(२) ऋग्वेदोपाकरणे ।

मम । (१)ॐदिवे स्वाहा । इदं दिवे न मम । ॐ सूर्याय स्वाहा । इदं सूर्याय न मम । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम । (२)ॐदिग्भ्यः स्वाहा । इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा । इदं चन्द्रमसे न मम । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यो न मम । प्राजापत्याहुतयस्तन्त्रेण । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यो न मम । ॐ ऋषिभ्यः स्वाहा। इदं ऋषिभ्यो न मम। ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै न न मम । ॐ मेधायै स्वाहा । इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये न मम । ॐ अनुमतये स्वाहा । इदमनुमतये न मम ।

ततो धाना अभिघार्य स्रुवेणावदाय (३)'सदसस्पति'मिति मन्त्रेण जुहुयात् । इदं सदसस्पतये न मम। मन्त्रं गुरुः शिष्यैः सह पठति । शिष्यैः सह औदुम्बरसमिधोऽभिघार्य तिस्रस्तिस्रो गृहीत्वोत्तिष्ठन्तः प्राङ्मुखा'स्तत्सवितुरि'ति हुत्वा इदं सवित्रे, एकां समिधमादध्युः । एवं द्वितीयां तथा तृतीयाम् । ततः सर्वे उपविशेयुः । पुनराचार्येण धानाः स्रुवेणावदाय सदसस्पतिर्मिति मन्त्रेण धानानां होमः ।

( १ ) सामवेदोपाकर्मप्रयोगे ।

( २ ) अथर्वोपाकरणे ।

( ३ ) ॐसदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिम्मेधामयासिषं स्वाहा ( शु० य० सं० ३२।१३ ) ।

पुनः शिष्यैः सह तत्सवितुरिति पूर्वोक्तहोमः । पुनः उपविशेयुः सदसस्पति मन्त्रेण धानाहोमः, तथैव शिष्यैः सह समिद्धोमः । सर्वे उपविशेयुः ब्रह्मचारी तु शिष्यः—(१)"अग्नये समिधमाहार्षमि"ति मन्त्रेण समिद्धोमः । न सावित्र्या । तत उपकल्पितधानास्तिस्रस्तिस्रो गृहीत्वा "शन्नो भवन्तु वाजिन"(२)इति दन्तैरखादन्तः प्राश्नीयुः । ततो द्विराचमनम् । (३) 'दधि क्राव्ण' इति दधि भक्षयेयुः । द्विराचम्य तत आचार्यो यावन्तं शिष्यगणं इच्छेत्तावतस्तिलान् गणयित्वा आकर्षफलकेनादाय सावित्रीमन्त्रेण जुहुयात् । इदं सवित्रे । अथवा 'शुक्रज्योति'रित्यनुवाकेन जुहुयात् । अत्र न संस्रवः । ततः पूर्वोक्तधानाभ्यः स्विष्टकृत् । अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । ततो भूराद्या नवाहुतयः । संस्रवप्राशनादि प्रणीताविमोकान्तं कृत्वा ततोऽग्निमुत्तरेण कुशेषु प्राङ्मुखेभ्य उपविष्टेभ्यः प्राङ्मुख आचार्यः ओङ्कारमुक्त्वा त्रिश्च सावित्रीमनुब्रूयात् । तथा 'तत्सवितुरि'त्यादि सर्वमन्त्रब्राह्मणयोरध्यायादीन प्रब्रूयात् । बह्वृचां ऋषिमुखानि पर्वाणि छन्दोगानाम् । सूक्तान्यथर्वणानाम् । एवं सर्वे पठित्वा सह शिष्याः प्रजपन्ति ।

सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु
ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामहे । इति ।

त्रिरात्रं नाधीयीरन् । लोमनखानामनिकृन्तनम् । न वपनं

(१) पा० गृ० २ । ४ । ३ ।
(२) शु० य० सं० ९ । १६ ।
(३) शु० य० सं० २३ । ३२

करिष्यामहे इति सर्वेषां सङ्कल्पः। प्रागुत्सर्गाद्वा नियमो लो मनखानामनिकृन्तनस्य । उत्सर्गावधि लोमनखानामनिकृन्तनमहं करिष्ये इति । छन्दसामुत्सर्गात् प्राक्मन्त्रब्राह्मणयोरध्ययनम् । ततः पाकशेषेण मनुष्ययज्ञादीन् कुर्यात् । ततो ब्राह्मणभोजनम् । अनेनोपाकर्माख्येन कर्मणा श्रीपरमेश्वरः प्रीयताम् ।

इति पुष्करवल्लीस्थशिवप्रसादकृते स्मार्तोल्लासे
उपाकर्मप्रयोगः समाप्तः ।

---

## ( प्रवासविधिकारिका: )

अथ प्रवासविधिरुच्यते—

"श्रीमच्छिवप्रसादेन सूत्रशास्त्रस्य सम्मतिम् ।
आलोक्य सम्यक् क्रियते प्रवासविधिनिर्णयः" ॥

प्रवासलक्षणं गृह्यकारिकायाम्—

"यदि सीमामतिक्रम्य रात्रौ तत्रैव वत्स्यति ।
अगृहस्य प्रयाणं यत्प्रवासः प्रोच्यते बुधैः ॥
यत्तु नारायणेनोक्तं ग्रामाच्चाग्निसमन्वितात् ।
गत्वा ग्रामान्तरे वासः प्रवासोऽयमितीदृशः ॥
ग्रामान्तरे नगर्यां वा पल्यां वाऽन्यत्र वा क्वचित् ।
सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतम् ॥

निक्षिप्याग्निं स्वदारेषु परिकल्प्य च ऋत्विजम् ।
प्रवसेत्कार्यवान् विप्रो न वृथैव चिरं क्वचित् ॥
नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि ।
न विनापि निमित्तेन क्रीडाद्यर्थं सदा बुधः ॥
प्रवसेद्धनसम्पत्त्यै न तीर्थाय कदाचन ।
इति कूर्मपुराणोक्तं तथा बौधायनेन च ॥
प्रविश्य चानलं पश्चादुपविश्योपतिष्ठते ।
प्रवत्स्यामीति सङ्कल्पस्ततो ब्रूयान्नमोऽग्नये ॥
अग्न्यन्तिकं समारभ्य तावन्मौनी प्रतिष्ठते ।
यावच्छर्दीषि दृश्यन्ते हव्यवाहनसद्मनि ॥
अनलादर्शनं यावत्तावच्छाङ्खायनश्रुतिः ।
स्वबुद्धिकल्पिते देशे इति वाजसनेयिनः(१) ॥
प्रोषितस्य विधिश्चायमग्रेदानीं निरूप्यते ।
होमादीनां यथाकालं याजमानं(२) भवेदिति ॥
अग्न्यन्तिके मनः कृत्वा तां दिशं समिरीक्ष्य च ।
आचम्य प्राङ्मुखो भूत्वा कुर्यात्त्यागान् यथाक्रमम् ॥

---

(१) "गच्छति मत्या वाग्विसर्जन" (का० श्रौ० ४।१२।१४) मित्याम्नानात् ।

(२) "प्रवसन्याजमानं कुर्याद्यथाकालमात्मसंस्काराद्ध धर्ममात्वाच्छूते (श० ब्रा० १।३।१।५-६) श्च" (४।१२।१५) इति कात्यायनकल्पवचनात्प्रवसता यजमानेन यदात्मनस्संस्कारा व्रतग्रहणमुपस्थानादयः यच्चाहृत्यार्थमर्थकर्म तत्सर्वं कर्तव्यम् ।

सौराग्निकान् जपेन्मन्त्रान् इति वृद्धस्य सम्मतम् ।
पितृयज्ञं चरुं होमं विनाऽन्यस्त्यागसंयुतम् ॥
पाक्षिकं नैत्यिकं कर्म कृत्वा चैव यथाविधि ।
सङ्कल्पपूर्वकांस्त्यागांस्तान्कुर्यात् पञ्चयज्ञियान् ॥
पितृणामपसव्येन मनुष्याणां निवीतिना ।
दक्षिणोदङ्मुखः कुर्यात् क्रमात् पितृमनुष्ययोः ॥
नात्र जानुनिपातः स्यात्प(रा)दार्थत्वादिति श्रुतिः ।
स्वकाले ब्रह्मयज्ञः स्यादेवं पक्षादिकर्मसु ॥
आचम्य पिण्डयज्ञः स्यात्प्राचीनावीतिना ततः ।
नीवीबन्धनमापूर्य कुर्यात्त्यागान् यथाक्रमम् ॥
आहुती पिण्डयज्ञस्य नीवीविस्रंसनं तथा ।
गृहान्नः पितरो जप्त्वा सव्यं कृत्वा जपेत्पुनः ॥
नद्यादिषु यथान्यायं प्रोष्यैत्य स्नानमाचरेत् ।
प्राप्तस्य वेश्म कर्तव्यं शौचमाचमनादिकम् ॥
ततोऽग्निसन्निधौ मौनी(न)भाव(वाच)मेवं विसृजति ।
भारद्वाजोऽब्रवीदेवं ततोऽग्निमुपतिष्ठते ॥
उपस्थाने कृते मौनं त्यजेदित्याश्वलायनः ।
उपविश्यानलं पश्चात् प्रत्यक्षीकृत्य केनचित् ॥
नमोऽग्नये जपं कृत्वा शिरसा प्रणमेच्च तम् ।
गृहा मेति गृहान् गच्छेत् क्षेमायेति प्रविश्य च ॥
अभ्यर्च्य पित्राचार्यादीन जायापुत्रस्य दर्शने ।
अङ्गादङ्गादिति मन्त्रं जपेत्(जिघ्रेत्)पुत्रस्य मस्तकम् ॥

प्रजापतेष्ट्वा मन्त्रेण पुत्रनाम विनिर्दिशेत् ।
नाम सम्बोधनयुतं सङ्कीर्त्याथापरेण च ॥
त्रिर्जिघ्रेदेव मन्त्रेण सकृत्तूष्णीं द्विरेव तु(१) ।
भवेत्प्राङ्मन्त्रशेषोऽस्मिन्नवजिघ्रपदादिकः ॥
अस्मे प्रयन्धि मघवन् जपेदस्यैव दक्षिणे ।
कर्णे सव्ये भवत्विन्द्र श्रेष्ठानीति ( जपेदिदम् ) भवेदमून् ॥
पुत्रं दृष्ट्वादिकं कर्म (कर्णे)जपान्तं प्रतिपुत्रकः ।
क्रमादङ्गादिति जपः सकृदेव भवेदयम् ॥
स्त्रीणां मूर्द्धानमेवाऽवजिघ्रेत्तूष्णीं यथाक्रमम् ।
उभयोस्तुल्य एव स्यादावसथ्याग्निहोत्रयोः" ॥

इति गृह्यकारिकोक्तः प्रवासविधिः ॥

---

## (साग्निकप्रवासे पाक-श्राद्ध—वैश्वदेवाग्न्यादिनिर्णयः। )

अथ प्रवासे भोजनविधिः—

गृहे वैश्वदेवादिनिर्णय उच्यते । रुद्रकल्पद्रुमे—नित्य-पाकस्यावसथ्याग्नौ विहितस्याभावात्स्वगृह एव ब्रह्मयज्ञवर्जिता देव-यज्ञादयश्चत्वारो यज्ञाः पत्न्या ऋत्विगादिद्वारा कारणीयाः। पाकयज्ञ-

(१) इत ऊर्ध्वं "भवेत्प्राङ्मन्त्रशेषोऽस्मिन्नैव जिघ्रपदादिकम्" इत्य-नन्वितः पाठः सर्वादर्शपुस्तकेषु समुपलभ्यते ।

त्वेन तेषां गृह्याग्निसाध्यत्वात् "न स्त्री जुहुयान्नानुपेत" (आ०ध० ६।१५।१७-१८) इति निषेधात्पत्नी न स्वयं जुहोति । अयं निषेधस्तु ऋत्विगादिसन्निधावेव प्रवर्त्तते तदसन्निधौ तु पत्न्यपि स्वयं देवयज्ञादि करोति ।

"नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतम् ।
पुत्रो भ्राताऽथवा पत्नी शिष्यो वाऽस्य बलिं हरेत्" ॥

इति शाङ्खायनगृह्ये (२।१७),

"प्रोषिते वाप्यशक्तौ (क्ते) वा स्वामिन्यनधिकारिणि ।
पुत्रो भ्राताऽथवा पत्नी शिष्यो वा जुहुयादिति"—

रेणुकारिकायां च, देवयज्ञादिषु चतुर्षु यज्ञेषु पत्नीकर्तृकत्वस्याप्युक्तत्वात् । निरग्नेस्तु स्वकर्तृका एव पञ्चमहायज्ञाः । यत्तु—

"पचनं यदि कुर्वीत प्रवसन्नग्निमान् द्विजः ।
समारोपे कृते चाग्नेर्वैश्वदेवं तु लौकिके ॥
पत्नी च यजमानोऽथ प्रवासे गच्छतो(स्तयोः)यदि ।
समारोप्य ततः कुर्याद्वैश्वदेवं पराग्निना" ॥

एभिर्यज्ञपार्श्वादिवाक्यैर्यदा समारोपेऽरणीसहितो गच्छेत्तदा लौकिकाग्नौ पाकं कृत्वा तदग्निमध्ये वैश्वदेवपूर्वकं लौकिकाग्नौ पक्वं भुञ्जीत ।

मदनपारिजाते, परिशिष्टेऽपि—

"प्रवसेदाहिताग्निश्चेत्कदाचित् कालपर्ययात् ।
यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै" ॥

इत्यादिवचनबलाद्वैश्वदेवः प्रवासेऽपि साग्निना कार्य इत्युक्तं

वघस्यां शाखायां पञ्चमहायज्ञेभ्यो वैश्वदेवबलिहरणयोः पृथग्विधिरस्ति तच्छाखिकर्तृकवैश्वदेवविषयम् ।

वाजसनेयिनां तु "अथातः पञ्च महायज्ञा" इत्यादिना(१)पारस्कराचार्यैः पञ्चमहायज्ञमात्रविधानेन वैश्वदेवबलिहरणयोः पृथग्विधानाभावात् पञ्च महायज्ञेष्वेवास्माकं वैश्वदेवव्यवहारात्। येषामपि वैश्वदेवबलिहरणयोः पृथग्विधिरस्ति तेषामपि पञ्चमहायज्ञानुष्ठानं स्वगृह एवोक्तम् । यत्र—

"पञ्चयज्ञविधानं च गृहे यस्य न जायते ।
पत्नी सन्निहिते ह्यग्नौ कथं कार्यं प्रवासिना ॥
गृह्योक्तेन विधानेन दैवभौतनृपैतृकान् ।
तथा ब्राह्ममहामेधान् प्रोषितो लौकिके चरेत्" ॥

इत्युक्तं वघस्यां शाखायां पत्नीसन्निहिते गृह्येऽग्नौ पञ्चमहायज्ञानुष्ठानं विहितं नास्ति तच्छाखिकर्तृकदेवयज्ञादिविषयं "पञ्च यज्ञविधानं च गृहे यस्य न जायते । पत्नी सन्निहिते ह्यग्नावि" त्युक्तत्वात् ।

अस्माकं पारस्करगृह्यसूत्रानुसारिणां वाजसनेयिनां तु न प्रवासे ब्रह्मयज्ञवर्जिता देवयज्ञादयश्चत्वारो यज्ञा भवन्ति । "चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति"(२) सूत्रे देवयज्ञादीनां चतुर्णां यज्ञानां पाकयज्ञत्वाभिधानात् । पाकयज्ञसमाख्यानान्यथाऽनुपपत्त्या च पाकयज्ञानां गृह्याग्निसाध्यत्वावग-

---

(१) पा० गृ० २।९।१।
(२) पा० गृ० १।४।१।

मात् । हुतयज्ञः=हूयत एवाग्नौ यस्मिन् कर्मणि न बलिप्रदानं स हुतः । यथा सायंप्रातःकालीनमौपासनस्य परिचरणं देवयज्ञोपाकर्मादयश्च । अहुतः=न हूयतेऽग्नौ यस्मिन् कर्मणि सोऽहुतः पाकयज्ञः । यथा भूतयज्ञसर्पबलिस्रस्तरारोहणमणिकावधानानि । प्रहुतः=प्रकर्षेण हुतः यत्र होमो बलिहरणं च, प्रकर्षश्च बलिप्रदानाधिक्यात् । यथा पक्षादिश्रवणाकर्मादयः । यद्वा हुत एव पक्षादिश्रवणाकर्मादेरन्तर्भावः । हूयते प्रधानतयाऽग्नौ स प्रहुतः ।

"पित्र्यं यत्पिण्डदानादि कर्म स प्रहुतो मखः" ।

प्रेतश्राद्धं विना । एतदुक्तम्—

"सपिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै ।

तानि स्युर्लौकिके वह्नाविति शाट्यायनोऽब्रवीत्" ।

विस्तारोऽत्र रुद्रकल्पद्रुमेऽ(१)वगन्तव्यः। प्राशितः=यत्र प्राश्यते न होमो नापि बलि(हरणं)प्रदानम्। यथा नृयज्ञो "यथार्हं भिक्षुकानतिथींश्च सम्भजेरन(२) इति । तथा "सर्वासां पयसि पायसꣳ श्रपयित्वा ब्राह्मणान् भोजयेदि"(३)ति । तदेवं स्वगृह्यविहितानां देवभूतपितृमनुष्योपादानाच्चतुर्णां यज्ञानां पाकयज्ञत्वात्तेषु गृह्याग्निमत एवाधिकारः सिद्धः । अत एव देवयज्ञादीनां चतुर्णां सत्यपि प्रवासे गृह्ये(हे) एवानुष्ठानमित्युक्तं, अस्तु तर्हि पञ्चमप्रकारेण ब्रह्मयज्ञस्य पाकयज्ञत्वव्युदासार्थं चत्वार इति ग्रहणम् । एवं चानग्निनापि ब्रह्म-

(१) रु० क० ६२-६३ पत्रे ।

(२) पा० गृ० २।६।१२।

(३) पा० गृ० ३।६।८।

यज्ञः कर्तव्य एव ।

"नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतम् ।

पुत्रो भ्राताऽथवा पत्नी शिष्यो वाऽस्य बलिं हरेदि"ति—

शाङ्खायनगृह्ये (२।१७), पञ्चमहायज्ञान् प्रकृत्य 'प्रोषिते वा०' पूर्वोक्तरेणुकारिकायां च गृह्याग्नावेव स्वगृहे देवयज्ञादीनां चतुर्णामनुष्ठानस्याभिहितत्वात्प्रवासकर्तारं प्रकृत्य—

"प्रवासे नैत्यिकं कर्म कृत्वा चैव यथाविधि ॥

सङ्कल्पपूर्वकांस्त्यागान् तान् कुर्यात्पञ्चयज्ञवदि"ति रेणुकारिकायामौपासनाग्निपरिचर्यायाः पञ्चमहायज्ञ( वत् )त्यागकर्तव्यतां वदता पञ्चमहायज्ञानुष्ठानस्य स्वगृहे दर्शितत्वात् वैश्वदेवबलिहरणयोः पञ्चमहायज्ञेभ्यः पृथक्त्वेन विध्यभावात्तेष्वेव वैश्वदेवव्यवहारो वाजसनेयिनामित्युक्तत्वाच्च । आशार्कभाष्येऽपि 'न प्रवासे वैश्वदेव' इत्युक्तत्वाच्च । अथातो धर्मजिज्ञासापद्धतौ गर्गोपाध्यायैरपि साग्नेः प्रवासे सति यावत् प्रवासं होमवैश्वदेवयोरभाव इत्युक्तत्वाच्च, अतएव—

"निक्षिप्याग्निं स्वदारेषु(१) परिकल्प्य च ऋत्विजम् ।

प्रवसेत् कार्यवान् विप्रो वृथैव(मृषैव)न चरेत्कचित्" ॥

इति छन्दोगपरिशिष्टे कात्यायनेन (२)लौकिकाग्नौ सा-

---

( १ ) 'परिकल्प्यर्त्विजं तथा' इति का० स्मृ० १८—१ पाठः ।

( २ ) "प्रवासोपस्थितावग्निसाध्यकर्मणां स्वगृह एवानुष्ठेयत्वेन तदर्थमृत्विक्परिकल्पनमभिहितं किं च—

"स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन ।

ग्निकसम्बन्धिहोमोऽपि प्रतिषिद्धः । तस्मादग्निमतः प्रवासे देवयज्ञाद्यश्चत्वारो यज्ञा न भवन्ति । (१)( अग्निमिति लौकिके न पुनः संस्कृते पूर्ववदन्तैर्हुत्वेति पूर्ववदित्यनेन गृह्योक्तं होममात्रं गृह्यते स च होमः सायंप्रातःकालीनस्तन्त्रेण पूर्ववद्बलिकर्मेति भवति) किन्तु स्वगृह एव गृह्याग्नौ । अत एवोक्तं देवभाष्ये कठसूत्रे "प्रवसन्यदा हुतं मन्येताथ भुञ्जीत पर्वण्युपोष्य यदा संस्थितं मन्येताथ भुञ्जीते"ति । प्रवासे देवयज्ञाद्यनुष्ठानं चिकीर्षितं चेत्स्यात्तदा "प्रवसन्यदा हुतं मन्येते"ति नावक्ष्यत् , किं तर्हि "प्रवसन् हुत्वा भुञ्जीते" त्येवमेवावक्ष्यत् ।

एवं दर्शश्राद्धादिकमपि स्वगृह एवानुष्ठेयं "चत्वारः पाकयज्ञा" इति(२) पारस्करगृह्ये "प्रहुतः पितृकर्मणे"ति शाङ्खायनगृह्ये (१।१०)च पितृकर्म(णां)णः श्राद्धापरपर्यायस्य प्रहुतपाकयज्ञत्वाभिधानात् । "अष्टकाः पार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था" इति गौतमस्मृतौ च श्राद्धस्य पाकयज्ञसंस्थासु परिगणितत्वात् पाकयज्ञानां च गृह्याग्निसाध्यत्वनियमात् ।

"अमावास्यादिनियतं प्रोषिते सहचारिणी ।

पत्यौ (पत्नी) तु कारयेत् श्राद्धमन्येनाप्यृत्विगादिने"ति–

---

न ह्याहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयत" (का०स्मृ० १६।१४) इति तत्रैव कात्यायनेन" इति ( ह० क० ५६ ) पाठस्त्रुटितः प्रतिभाति "क" पुस्तके ।

( १ ) धनुश्चिह्नान्तर्गतं नास्ति क० ख० पु० ।

( २ ) पा० गृ० १।४।१।

ब्रह्मपुराणवचनात् । आदिशब्देन क्षयाहादिनियतसौत्रश्राद्ध-ग्रहणम् । तस्मादग्निमान्प्रवासी स्वगृह एव ऋत्विगादिद्वारा ब्रह्म-यज्ञवर्जं पञ्चमहायज्ञ—दर्शश्राद्ध—क्षयाहश्राद्धादिकुर्यादिति सिद्धम् ।

**हेमाद्रिपद्धतौ व्यासो** विशेषमाह—

"त्यक्ताग्नेः पार्वणं नै(चै)व नैकोद्दिष्टं कदाचन ।
अत्यक्ताग्नेस्तु पिण्डोक्तिस्तस्मात्सङ्कल्प्य भोजयेदि"ति ॥

अत्यक्ताग्निमदधिकारिणां प्रत्येव पिण्डोक्तिः=श्राद्धोपदेश इत्यर्थः । तेन प्रवासाभावेऽपि पुनराधाने सति गृह्याग्नेः पुनराधानं कृत्वैव श्राद्धं कार्यं, अन्यथा श्राद्धानधिकारात् ।

इति साग्निकश्राद्धादिनिर्णयः ॥

## ( प्रवासे पाकभोजनविधिः )

अथ पाकभोजनविधिः। पूर्णिमाऽमावास्ययोस्तु साग्नेः पराग्नि-सिद्धान्नभोजनं निषिद्धमेव ।

"पराग्निपक्वं नाश्नीयात्पर्वणि प्रोषितोऽग्निमानि"ति वचनात्
"दर्शे च पौर्णमासे च पराग्निपक्वभोजने ।
आधानादिकृतं नश्येच्छ्रौतं स्मार्तं तथैव चे"ति—
वचनान्तराच्च । अत्रान्येनाहितोऽग्निः पराग्निशब्देनाभिधी-

यते । अतो लौकिकाग्निपक्कं न निषिद्धमिति केचित् ।

अपरे त्वेवमाहुः—स्वाहितात्परस्यैवाग्नेः पराग्निशब्देनाभिधानाल्लौकिकाग्निपक्कमपि निषिद्धमेवेति ।

एवं च सति पर्वणि पराग्निपक्वनिषेधात्प्रवसतोऽग्निसान्निध्याभावेन पाकाभावादुपवासे प्राप्ते—

"नोपवासः प्रवासे स्यात्पत्नी धारयते व्रतमि"ति—

शाङ्खायनगृह्ये, "प्रवसन्नोपवसे"दिति छान्दोग्ये चोपवासनिषेधात्कथं वर्तनीयमित्याकाङ्क्षायां—

"प्रवसन्नग्निमान् विप्रः पयोमूलफलादिभिः ।
कालं नयेदशक्तौ तु विधिना पाकमाचरे"दिति—
वचनेन पयोमूलफलादिभक्ष्यद्रव्यं विधीयते ।

न च प्रवासे गृह्याग्न्यभावेन पाकाभावात् "प्रवसन्नग्निमानि"ति वाक्ये पर्वपदाश्रवणाच्च पयोमूलफलादिना कालनयनं सार्वकालिकमिति वाच्यं, तथा सति "पराग्निपक्कं नाश्नीयादि"ति वाक्ये पर्वग्रहणस्य "दर्शे च पौर्णमासे चे"ति वाक्ये दर्शादिग्रहणस्य च वैयर्थ्यापत्तेः । तस्मात् "पराग्निपक्वं नाश्नीयादि"त्ययं निषेधः पर्वण्येव प्रवर्तत इति केचिदाहुः ।

अपरे त्वेवमाहुः—नित्यपाकस्य गृह्याग्निसाध्यत्वात्प्रवासे च गृह्याग्न्यभावेन पाकाभावात्प्रवासे पर्वान्यकालेऽपि पाकं विनैव पयोमूलादिना कालनयनं कुर्यात् । तदसामर्थ्ये तु पृष्ठोदेविविधानेन पाकमपि कुर्यात् । तदुक्तम्—

"प्रवसन्नग्निमान् विप्रः पयोमूलफलादिभिः ।

कालं नयेदशक्तौ तु विधिना पाकमाचरेदि"ति ॥

यत्तु—"पराग्निपक्वं नाश्नीयादि"ति वचनं यच्च "दर्शे च पौर्ण-मासे चेति"ति वचनं तदुभयमपि विधिमतिक्रम्यापि रागतः परा-ग्निपक्वभक्षणे प्रवृत्तं प्रति दोषाधिक्यज्ञापनार्थमिति । कन्दुपक्वं (१)तु न निषिद्धं शिष्टाचारात् । तथा च त्रिकाण्डमण्डनः—

"इक्षुक्षीरविकारांश्च भ्राष्ट्रभ्रष्टान्यवाँस्तथा ।
फलमूला(दि वा)नि चाश्नीयात् पर्वणि प्रोषितोऽग्निमान् ॥
पराग्निपक्वं नाश्नीयाद्विहाय गुडगोरसौ ।
शाकपिण्याकसक्त्वादि आममद्यात्फलादिकम् ॥
सकृत्पर्वणि सर्पिष्मद्धविष्यं लघुभोजनम् ।
न सायं नोपवासश्च सायं शाकास्तथै(व च)त्तवमि"ति ॥

अन्यच्च—

"प्रवसन्नग्निमान् विप्रः पयोऽश्नीयात्फलान्यपि ।
अशक्तौ तु पचेदन्नं भुञ्जीत विधिपूर्वकम् ॥
ज्वरिणो रोगिणो वापि पाकं कृत्वा तु भोजनम् ।
सामर्थ्ये तु पुनर्जाते नैवाश्नीयात्पराग्निना"—
इति गृह्यकारिकायाम् ।
"अकृतं केनचिद्भोज्यमन्नं पूर्वमचोदितम् ।
आज्यं भोजनपर्याप्तमश्नीयाददोषदर्शनात् ॥
असामर्थ्ये शरीरस्य भक्ष(क्ष्य)द्रव्याद्यभावतः ।

---

( १ ) "कन्दुपक्वं-भाषायां हलवाईकृतमिति प्रसिद्धम्" इति ख. पुस्तकेऽधिकः ।

स्वहस्तेन पचेदन्नमश्नीयात्प्रोषितोऽग्निमान्" ॥

इत्यापस्तम्बपरिशिष्टे केशवस्वामिना निरूपितमशक्तविषये, तन्न समर्थस्य । तथा सर्वदा प्रवासे गुडगोरसादिकं पराग्निपक्वमश्नीयादिति यदुक्तं, दर्शपौर्णमासयोस्तदपि न ग्राह्यं ग्रन्थान्तरे दर्शपौर्णमासविषये बाधश्रवणात् ।

"गोरसश्च गुडो वाऽस्य फलमूलेक्षवस्तथा ।
पराग्निपक्वं यत्किञ्चिच्छाकमाज्यं तथैव च ॥
साग्निः पर्वणि नाश्नीयात्प्रवासे सर्वदा बुधः ।
गृहे चैव न दोषः स्यादाज्यादीनां तु पर्वणि" ॥ इति ।

प्रवासे उष्णोदकेन स्नायात् । शीतनिवारणार्थं प्रवासे पर्वणि पराग्निं न सेवेत । चूर्णक्वाथादि न भक्षयेत् । प्रवासग्रहणाद्गृहे न दोषः ।

तथा च स्मृतिभास्करे हारीतः—

"धनमर्जयितुं दूरे आहिताग्निर्गतो यदा ।
भुनक्त्यन्नमपक्वं हि भुङ्क्ते क्षीरं गुडोऽपि वा ॥
आधानेच्छुरनिच्छुर्वा यावद्देहस्य धारणम् ।
पराग्निपक्वं नाश्नीयादुच्छिन्नाग्निस्तु सर्वदा ॥
अग्नित्यागे तु यत्प्रोक्तं प्रायश्चित्तं तदेव तु ।
प्राजापत्यानि कुर्वीत (धनार्जने)प्रवासे भोजने ध्रुवम् ॥
तस्मादेतैर्न कर्त्तव्यं पक्वं लोकाग्निना बुधैः ।
उच्छिन्नाग्निर्विशेषेण न कुर्याद्भोजनं क्वचित्" ॥
गृहे सूतिकायास्तु पर्वणि पराग्निभक्षणे न दोषः ।

तदुक्तम्—

"सूतिसम्बन्धि यत्किञ्चित्कर्म तल्लौकिकेऽनले ।
पर्वण्यपि च यत्प(क्व)क्तिमश्नीयान्नैव दोषभाक्" ॥

(१) सर्वाधानिनस्त्वौपासनाग्न्यभावाद्गृहेऽपि लौकिकाग्नावेव पाक इति न तस्य प्रवासे कश्चिद्विशेषः । गृह्याग्नावदृष्टार्थविहितेन पाकेन वैश्वदेवादिदृष्टकार्ये सिद्धे न पुनस्तदर्थं पृथक्पा(कश्रपणं)काश्रयणं युक्तं, न च दृष्टार्थस्यैव पाकस्य गृह्याग्नौ नियमः, असति दृष्टकार्ये पक्वाभावप्रसङ्गात् । न चेष्टापत्तिः—

"पचनाग्नौ पचेदन्नं सूतके मृतकेऽपि वा ।
अपचन्नेकरात्रेण पुनराधानमर्हती"ति—

यज्ञपार्श्वे वैश्वदेवाद्यभावेऽप्यदृष्टार्थतया पाककर्तव्यताया नियमितत्वात् ।

यत्तु कश्चिदाह—आशौचे वैश्वदेवानधिकारे तदर्थपाकस्यावश्यं विहितस्याभावाद् गृहस्थितेनापि साग्निना फलाहारादिकमेव कार्यमिति, तन्न युक्तं—आशौचे वैश्वदेवानधिकारेऽपि "पचनाग्नौ पचेदन्नमि"ति यज्ञपार्श्ववचनेन नित्यपाकस्यादृष्टार्थतया विहितस्य पचनाग्नौ कर्तव्यताया नियमितत्वेन पाकसद्भावात् । निरग्नेस्तु स्वात्मार्थं पाकनिषेधादाशौचे वैश्वदेवाद्यभावात्तदर्थः पाको न प्राप्नोति । अत एव "लब्धक्रीताशना वा स्यु"रित्युक्तं(२), एतदस-

---

(१) अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रिता ॥ इति ॥

(२) पा० गृ० ३।१०।२६ ॥

म्भवे तु कुटुम्बा(र्थे)र्थं पाकः करणीयः । तच्छेषं स्वयं भुञ्जीयात् । कुटुम्बासन्निधाने तु फलाहारादिकमेवोचितमिति । किञ्च—

"देवार्थं यः पचेदन्नं पुत्रार्थे यस्य मैथुनम् ।
पुण्यार्थं यः पठेद्वेदान्धर्मार्थे यस्य जीवितम्" ।। इति ।

फलादिशब्दो हविष्यान्नेऽपि वर्तते । तदुक्तं श्रीधरेण—

"जलं विना यदन्नं तु पक्वं केवलपावके ।
तदन्नं फलवद्ग्राह्यं नोच्छिष्टं मनुरब्रवीत्" ।।

इत्यादिना न दोषः । अन्नस्य लवणोदकयोगे अग्निलवणयोगे वा घृतगुडयोगे वा (न) दोषः ।

"तण्डुलेष्वग्निसंयोगात्पिष्टं लवणयोगतः ।
पानीयमन्नसंयोगात्स्पर्शदोषो न जायते" ।

स्पर्शत्वनिषेधादन्नशब्दस्तन्न भवति । उदकं विना केवलक्षीरतण्डुलैर्यः पाकः सम्भवति तस्यापि नान्नशब्दः । "पायसान्नेन ब्राह्मणान् भोजयेदि"त्यनेनान्नशब्दो दृश्यते तस्मात्तस्य विकल्पः । अग्न्युदकलवणादिसर्वसंयोगेन यत्पक्वं तन्निषिध्यत इत्यादिज्ञातव्यम् ।

इति साग्निकप्रवासे भक्ष्याभक्ष्यनिर्णयः ।

---

## ( प्रवासे सायम्प्रातर्होमः ) ।

अथ प्रवासविधिनिर्णयः । ततो ब्राह्मे मुहूर्ते चोत्थाय प्रातर्होमादिकं विधाय देशकालौ सङ्कीर्त्य धनार्थ्यहं प्रवासं करिष्ये ।

नमोऽग्नय इति नमस्कृत्य आज्ञां गृहीत्वा मौनेन गृहसीमां वाऽग्न्यागारादीनामदर्शनं यावत्तावद्वा मौनेन गच्छेत्यश्राद्धयथेच्छम्। यथाकाले सङ्कल्पपूर्वं त्यागः। देशकालौ सङ्कीर्त्य सायम्प्रातरौपासनहोमं करिष्ये। इदमग्नये। इदं प्रजापतये। (१)समास्त्वेति नवर्चं जपेत्। प्रातर्होमे प्रातर्होमं करिष्ये। इदं सूर्याय। इदं प्रजापतये। (२)विभ्राडित्यनुवाकं जपेत्। इति होमः। यथाकाले ब्रह्मयज्ञः।

## (प्रवासे वैश्वदेवः।)

अथ वैश्वदेवत्यागः। इदं ब्रह्मणे न मम। इदं प्रजापतये न मम। इदं गृह्याभ्यो न मम। इदं कश्यपाय न मम। इदमनुमतये न मम। इदं पर्जन्याय न मम। इदमद्भ्यो०। इदं पृथिव्यै०। इदं धात्रे०। इदं विधात्रे०। इदं वायवे०। चतुर्वारम्। इदं प्राच्यै दिशे०। इदं दक्षिणायै०। इदं० प्रतीच्यै०। इदमुदीच्यै। इदं ब्रह्मणे०। इदमन्तरिक्षाय०। इदं सूर्याय०। इदं विश्वेभ्यो देवेभ्यो०। इदं विश्वेभ्यो भूतेभ्यो०। इदमुषसे०। इदं भूतानां पतये न मम। इदं पितृभ्यः स्वधा नमः। इदं यक्ष्मणे ०। प्रवासे मनुष्यार्थं यथोक्तं ब्राह्मणभोजनं कुर्यात्। इति वैश्वदेवः।

## (प्रवासे स्थालीपाकः।)

इदं प्रजापतये न मम। इदमिन्द्राय०। इदमग्नये०। इदं सोमाय० ततः प्रधानदेवताः(पौर्णमासे–) इदमग्नये०।(उपांशु) इदमग्नीषोमा-

---

(१) समास्त्वेत्यादयो मन्त्राः पूर्वं २०३ पत्रे टिप्पण्यां द्रष्टव्याः।
(२) विभ्राडित्यनुवाकः २०७ पत्रे द्रष्टव्यः।

भ्यां०। (उच्चैः)इदमग्नीषोमाभ्यां०।दर्शे–इदमग्नये०। (उपांशु) इदं विष्णवे०। (उच्चैः)इदमिन्द्राग्निभ्यां० । इदं ब्रह्मणे० । इदं प्रजापतये० । इदं विश्वेभ्यो देवेभ्यो० । इदं द्यावापृथिवीभ्यां०। बलिहरणम्। इदं विश्वेभ्यो देवेभ्यो० । इदं भूतगृह्येभ्यो० । इदमाकाशाय० । वैश्वदेवाग्न्याहुतिः–इदमग्नये० । इदं प्रजापतये० । इदं विश्वेभ्यो देवेभ्यो०। इदमग्नये स्विष्टकृते० । नवाहुतयः–इदमग्नये० । इदं वायवे० । इदं सूर्याय० । इदमग्नीवरुणाभ्यां० । इति द्विवारम् । इदमग्नये अयसे। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम । इदं वरुणायादित्यायादितये० । इदं प्रजापतये० । इदं स्त्रियै० । इदं पुंसे वयसेऽवयसे न मम । इदं शुक्लाय कृष्णदन्ताय पापिनां पतये न मम । इदं ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यश्च न मम । इदं स्त्रियै पुंसे वयसेऽवयसे शुक्लाय कृष्णदन्ताय पापिनां पतये ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यः० । ब्राह्मणभोजनसङ्कल्पः । इति स्थालीपाकः ।

## ( प्रवासे पिण्डपितृयज्ञः )

अथ पिण्डपितृयज्ञः । देशकालौ सङ्कीर्त्य श्रीपितृतृप्तिद्वारा परमेश्वरप्रीत्यर्थं पिण्डपितृयज्ञमहं करिष्ये । प्राचीनावीतिकरणम् । नीवीबन्धनम् । इदमग्नये कव्यवाहनाय० । इदं सोमाय पितृमते० । गृहान्नेति (१)जपः । नीवीं विसृज्य सव्यं, आचमनम् । इति

(१) 'गृहान्नः' पूर्वं २३२ पत्रे टिप्पण्याम् ।

पितृयज्ञः ॥

## ( प्रवासे आग्रयणम् )

अथ प्रवासे आग्रयणं, पत्नी गृहे ऋत्विगादिर्वा करोति। प्रवासे त्यागः। आज्यभागं पत्तादिवत्। विशेषः—इदमिन्द्राय०। इदं सर्वेभ्यो देवेभ्यो०। इदमिन्द्राग्निभ्यां०। (उपांशु)इदं विश्वेभ्यो देवेभ्यो० इदं द्यावापृथिवीभ्यां०। इदमग्नये०। (उच्चैः)इदमग्नये स्विष्टकृते०। इदमग्नये०। ततो नवाहुतित्यागः पत्तादिवत्। इत्याग्रयणम्।

## ( प्रवासादागतस्य साग्नेर्गृहोपस्थानादिविधिः )

अथ आगते सति तत्स्थानान्मौनी शुचिर्गृहमागत्य प्रादुष्करणमावसथ्यं नमस्कृत्योपविश्य तृणान्यवलुप्योत्तिष्ठन् वसतिगृहमागत्य गृहानुपतिष्ठते(१)"गृहा मा" इत्यादि "शं योः शं योः" इत्यन्तं जपेत्। अथ पशवः "उपहूता इह गाव" इत्यादि "शंयोः शंयोः" इत्यन्तं जपेत्। पुत्रं दृष्ट्वा जपति "अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्"। पुत्रस्य मूर्धानमवजिघ्रति "प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रा-

---

( १ ) ॐ गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि। ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ येषामध्येति प्रवसन्येषु सौमनसो बहुः। गृहानुपह्वयामहे ते नो जानन्तु जानतः॥ उपहूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु नः। क्षेमाय वः शान्त्यै प्रपद्ये शिवꣳ० शग्मꣳ० शंयोः शंयोः (शु० य० सं० ३।४१-४३)।

युषाऽमुकशर्मन् त्वं जीव शरदः शतम् । गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषाऽमुकशर्मन् त्वं जीव शरदः शतम् । सकृन्मन्त्रेण द्विस्तूष्णीम् । तस्यैव दक्षिणकर्णे जपति ।

"अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः ।

अस्मे शतꣳ शरदो जीवसेऽधा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्" ।

सव्ये कर्णे जपति "इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे । पोषꣳ रयीणामरिष्टिं तनूनाꣳस्वाद्मानं वाचः सुदिनत्वमह्नामि"ति ।

स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीं पश्चाद्वाग्विसर्गः । तदह्नि कस्य कोपं कुर्यात् ।

इति प्रवासविधिप्रयोगः ॥

## ( प्रवसतो यष्टुर्होमफलनिर्णयः )

यजमाने प्रवासस्थे होमस्याल्पफलम् ।

"प्रदीपचन्द्रिकायां तु अल्पहोमे फलस्मृतिः ।

यजमाने प्रवासे च तुरीयांशं फलं सदा" ॥

तथा च—

"यजमाने प्रवा(सस्थे)से स्यात् पत्नी यदि रजस्वला ।

सूतिका वा भवेद्वापि अष्टमांशं फलं तदा ॥
यजमाने समीपस्थे पादोनं लभते फलम् ।
होमाधिकारी जाते तु तुरीयांशं भवेद् ध्रुवम् ॥
न्यूनं फलं भवेत्तस्मात्प्रवासे चैव सर्वदा" ॥

## ( प्रवसतः साग्निकस्य पाकविधिः )

अथ प्रवासे पाकश्रपणार्थं पृष्टोदिविविधानं लिख्यते ।

ततः 'अन्वग्निरि'त्यनेन ग्रामादग्नेराहरणम् । निन्द्यगृहादाहृतश्चेद्भूमौ निधाय तस्योपरि विशुद्धं शुष्कगोमयपिण्डं शुष्ककाष्ठं वा धारयित्वा तं पक्त्वा तत् प्रज्वलितं गृहीत्वा पूर्वमग्निं विहाय तद्गृहीत्वा स्थानान्तरे स्थाप्य पुनरन्यं तस्योपरि धारयित्वा एवं त्रिवारं कृत्वा पश्चाच्चतुर्थमग्निं गृहीत्वा भूसंस्कारपूर्वकमग्निं संस्थाप्य पाकः कार्यः ।

'अन्वग्निर'त्यस्य पुरोधाग्निस्त्रिष्टुबग्न्याहरणे विनियोगः । (१)'अन्वग्निरि'त्यनेनाग्निहरणम् । 'पृष्टो दिवी'ति कुत्सोऽग्निस्त्रिष्टुबग्निस्थापने विनियोगः। (२)"पृष्टो दिवी"त्यनेन स्थापनम् । 'समितमि'ति द्वयोः प्रजापतिऋषिस्त्रिष्टुपरिष्टाद्बृहत्यौ चित्योऽख्यावग्नीदेवतेऽग्न्युपस्थाने

---

( १ ) अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ (शु०य०सं०११।१७)।

( २ ) पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश । वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ( शु० यं० सं० १८।७३ ) ।

विनियोगः। "समितᳪ सङ्कल्पेथाम्"(१)। महाव्याहृतीनां प्रजापति-गायत्र्युष्णिगनुष्टुप्, अग्निर्वायुः सूर्यो देवता, 'ताᳪसवितुरि'त्यस्य कण्वस्त्रिष्टुप् 'तत्सवितुरि'त्यस्य विश्वामित्रगायत्री, 'विश्वानि देव सवितरि'त्यस्य श्यावाश्वगायत्री त्रयाणां सविता देवताऽग्निप्रज्वालने विनियोगः।

ॐ भूर्भुवः स्वः "ताᳪसवितुः (२)तत्सवितुः (३)विश्वानि-देवे"ति (४)त्रिभिः प्रज्वालनम्। पुनस्त्वेति समिन्धनम् 'पुनस्त्वे'ति प्रजापतिस्त्रिष्टुप् अग्निसमिन्धने विनियोगः।

"ॐ पुनस्त्वा"(५) प्रज्वलितस्यापि पुनरिन्धनप्रक्षेपेण प्र-

---

(१) समितᳪ सङ्कल्पेथाᳪसम्प्रियौ रोचिष्णू सुमनस्यमानौ। इषमूर्जमभिसंवसानौ। सं वां मनाᳪसि सं व्रता समु चित्तान्याकरम्। अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि (शु० यं० सं० १२।५७-५८)।

(२) ॐ ताᳪसवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्। यामस्य कण्वो अदुहत्प्रपीनाᳪसहस्रधारां पयसा महीं गाम् (शु० य० सं० १७।७४)।

(३) ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् (शु० य० सं० ३०।२)।

(४) ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव (शु० य० सं० ३०।२)।

(५) ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः (शु० य० सं० १२।४४)।

दीप्तकरणं समिन्धनम् । पाकश्रपणम् । ब्राह्मणार्थमन्नोद्धरणम् । ततो भोजनमिति । होमवैश्वदेवयोरभावस्तस्य प्रवासं यावदिति सिद्धान्तः ।

इति साग्निकप्रवासे पाकविधिः ।

---

## ( पृष्टोदिविविधान-प्रसवोत्थानपरिशिष्टोक्तो-निरग्निकवैश्वदेवविधिनिर्णयः । )

अथेदानीं निरग्निकवैश्वदेवविधिरुच्यते ।

तत्र वाजसनेयिनो गृह्येऽनग्निकं प्रति वैश्वदेवान्तरविधेरनुक्तत्वाद्वैश्वदेवाकरणापत्तिरिति । तन्न, स्वगृह्ये निरग्निकं प्रति वैश्वदेवान्तरविधेरविधानेऽपि गर्गपद्धति-हरिहरभाष्य-गदाधरभाष्यधृतपृष्टोदिविविधानपरिशिष्टे-प्रसवोत्थानपरिशिष्टे चरणव्यूहोक्ते यज्ञपार्श्वपरिशिष्टे च तद्विधानात् ।

तथाच पृष्टोदिविधानपरिशिष्टे—

"अथातो धर्मजिज्ञासा केशान्तादूर्ध्वमपत्नीक उच्छि(त्स)न्नाग्निरनग्निको वा प्रवासी ब्रह्मचारी (वा) चान्यग्निरिति ग्रामादग्निमाहृत्य पृष्टोदिवीत्यधिष्ठाप्य समितमिति द्वाभ्यामुपस्थाय व्याहृतिभिस्तिसृभिश्च सावित्रैः प्रज्वाल्य ताꣳसवितुस्तत्सवितुर्विश्वानि देव सवितरिति पुनस्त्वेति समिध्य पूर्ववदत्रैर्हुत्वा पाकं पचेत्तत्र वैश्वदेवं कुर्यात् । अग्नये प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृत इत्युपस्पृश्य पूर्ववद्बलिकर्म नैवंकृते ह्यपाको

भवति न वृथापाकं पचेन्न वृथाशाकमश्नीयादत्र पिण्डपितृयज्ञश्राद्धाग्रयणानि कुर्यादिति ।

अस्यार्थः । अथ शब्दो गृह्यकल्पविहितपञ्चमहायज्ञानन्तर्य-प्रश्नप्स्यर्थः । अग्निमतो गृहस्थस्य तदधिकाराच्चद्रहितस्याधिकारस्य विधेयत्वादतो हेतोः कतिपयधर्मजिज्ञासा । ज्ञातुमिच्छायां "सुपां सु"-इति[१] सुपां सुपोभवन्तीति सप्तमीस्थाने प्रथमा उच्यते । केशान्तादूर्ध्वमुपकुर्वाणः स्नातको वा अपत्नीकः=अविवाहितपत्नीको मृतपत्नीको वा उच्छिन्नाग्निः=पतिताग्निः संस्थिताग्निर्वा अनग्निकः=कृतदारसङ्ग्रहोऽपि निमित्तवशादधिकाराभावेनानाहितावसथ्याग्निः, प्रवासी=साग्निकश्चिकीर्षितपाकः । तदुक्तम्—

"प्रवसन्नग्निमान् विप्रः पयोमूलफलादिभिः ।
कालं नयेदशक्तौ तु विधिना पाकमाचरेत्" ॥

इति पाकमात्रविधानादेव साग्निकस्य न प्रवासे वैश्वदेवः । अतएव गर्गोपाध्यायैरुक्तम्—"साग्नेः प्रवासे सति यावत्प्रवासं होमवैश्वदेवयोरभाव" इति । ब्रह्मचारी नैष्ठिकः ।

ननु ब्रह्मचारिणः "यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभावि"तिपाकविधानाभावात् कथमेतदुक्तम् । उच्यते—पितृश्राद्धादौ तस्यापि पाकसम्भवात् ।

गर्गोपाध्यायस्तु 'ब्रह्मचारिणः स्वाग्निविच्छेदे सत्यनेनैव विधिनाग्न्याहरणादिप्रज्वालनान्तं विधाय समिदाधानं

---

(१) पा० ७।१।३९

कार्यम् । इदं चाग्न्याहरणं समिदाधानार्थं नित्यपाकस्य तु निवृत्तिस्तस्ये'त्याह तच्चिन्त्यम् । यतः पारस्करगृह्यकल्पे ब्रह्मचारिणः समिदाधानार्थं नित्यतयाऽग्निधारणस्य विधानाभावात् । यत्तु "तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजत" इति पारस्करगृह्यं(१) तत्तदहःसम्बन्धिन्यां सायंकालीनाग्निपरिचर्यायामुपनयनाग्निनियामकं वेदितव्यम् ।

अत्रायं विवेकः—अपत्नीकोच्छिन्नाग्न्यनग्निकानां त्रयाणां पाकपचनपूर्वकं वैश्वदेवार्थमग्न्याहरणं प्रवासिब्रह्मचारिणोस्तु पाकार्थमेव न वैश्वदेवार्थं ब्रह्मचारिणो वैश्वदेवानधिकारात् । प्रवासिनस्तु गृहे वैश्वदेवस्य कृतत्वेन पाकस्य वैश्वदेवविवर्जितत्वाभावे न चाभक्ष्यत्वाभावात्, एकस्मिन्नहनि वैश्वदेवद्वयनिषेधाच्च ।

'ग्रामादग्निमि'ति लौकिकं न पुनः संस्कृतं, 'पूर्ववदन्तैर्हुत्वे'ति पूर्ववदित्यनेन गृह्योक्तं होममात्रं गृह्यते । स च होमः सायंप्रातःकालीनस्तन्त्रेण, 'पूर्ववद्बलिकर्मे'ति मणिकाभावादुदकुम्भसमीपे पर्जन्यादिभ्यस्त्रिभ्यो दानम् । 'अद्भ्य उदकुम्भ' इति गौतमाभिधानात्, 'उदपात्रसन्निधावि'त्यापस्तम्बवचनाच्च । शेषं निगदव्याख्यातम् ।

विवाहादूर्ध्वमावसथ्याधानात्पूर्वं पृष्ठोदिविविधानेनाभ्युदयिकपूर्वकमग्निं स्थापयित्वा नित्यहोमादिकं कुर्यादिति हरिहरः ।

---

(१) पा० गृ० २।५।९।

प्रसवोत्थानपरिशिष्टेऽपि—

अथ सम्राडिति होवाच भगवन् याज्ञवल्क्य उच्छिन्नाग्नीनां को विधिः स्यात् स होवाच देवपितृमनुष्याणां निर्वपणार्थं पाकश्रपणं प्र(सवा)वासार्थेविधिं वक्ष्यामि विधानेनाग्निमुपसमाधाय ब्राह्मणानां न वृथापाको भवति केशान्तादूर्ध्वमपत्नीकस्योच्छिन्नाग्नेरनग्निकस्य ग्रामादन्वग्निरित्यग्निमाहृत्य पृष्टो दिवीत्यधिष्ठाप्य त्रिभिश्च सावित्रैः प्रज्वाल्य तत्सवितुस्ताꣳ सवितुर्विश्वानि देव सवित रित्येवं प्रणीतो भवति पूर्ववदक्षतैर्हुत्वा पाकं श्रपयेत्तत्र वैश्वदेवं कुर्याद् ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृत इति पूर्ववद्बलिं हरेन्न वृथापाकं श्रपयेन्न वृथापाकमश्नीयात्तस्मादेवं न वृथापाको भवति गृहस्थो ब्रह्मचारी प्रवासी वा आमं भैक्ष्यमाहरेत्पक्वादि पिण्डपितृयज्ञा(न्तं)प्रयणं चेति ।

## ( पृष्टोदिविविधानेनाग्न्याधानप्रयोगः । )

अथ प्रयोगः तत्र पूर्वोक्तशुभे मासे शुभे दिवसे आधाननक्षत्रे ( चैतत्कार्यम् । ) तत्र पूर्वदिवसे प्रायश्चित्तं कृत्वा नक्षत्रे पर्वदिवसे वा अन्वाधानं कार्यम् । (१) तत्साधनीभूतो गृह्याग्निर्यस्य नास्ति तस्येदं प्रकारान्तरमुच्यते । अत्र वृद्धाबादौ न वैश्वदेवः । ततः प्राणानायम्य देशकालौ सङ्कीर्त्य वृथापाककरणजनित (दोष)

---

( १ ) 'गृहस्वामिनो मरणादेकादशाहे गृहज्येष्ठस्य पञ्चमहायज्ञाधिकारः सिद्धस्तत्साधनीभूतो'' इति रु० क० ७२ पत्रपाठः ।

परिहारपुरस्सरपञ्चमहायज्ञसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पृष्ठोदिविविधानपरिशिष्टोक्तमग्न्याधानं करिष्ये । तदङ्गभूतगणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं नान्दीश्राद्धं च करिष्ये । श्राद्धं समाप्य ततो मधुपर्कादि ( युतं ) ब्रह्मवरणं कुर्यात् । पूर्वोक्तं कुण्डं कृत्वा तत्र त्वरे पञ्चभूसंस्कारान् कृत्वा ब्राह्मणैः सह मङ्गलवाद्यैर्वेदघोषात्मकं शान्तिपाठं पठित्वा ब्राह्मणगृहाद्ग्रामाद्वा महानसाद्वा अन्वग्निरित्यनेनाग्निहरणम् । 'अन्वग्नि'रित्यस्य पुरोधास्त्रिष्टुबग्निरग्न्याहरणे विनियोगः । 'अन्वग्नि'रित्यनेनाग्निं गृहीत्वा 'पृष्ठो दिवी'ति कुत्सस्त्रिष्टुबग्निरग्निस्थापने विनियोगः । "ॐ पृष्ठो दिवी"त्यनेन कुण्डेऽग्निस्थापनम् । "समितमि"ति द्वयोः प्रजापतिरुष्णिगुपरिष्टाद्बृहत्यौ चित्योख्यावग्नी देवतेऽग्नुपस्थाने विनियोगः ।

ॐ समितᳬ सङ्कल्पेथाम् । सं वां मनाᳬसि । महाव्याहृतीनां प्रजापति(र्यजु)र्गायत्र्युष्णिगनुष्टुबग्निर्वायुः सूर्यो'ताᳬ सवितु'रित्यस्य कण्वस्त्रिष्टुप् 'तत्सवितु'रित्यस्य विश्वामित्रगायत्री 'विश्वानि देव सवित'रित्यस्य श्यावाश्वगायत्री त्रयाणां सविता देवताग्निप्रज्वालने विनियोगः । ॐ भूर्भुवः स्वः ॐ ताᳬसवितुः, तत्सवितुः, विश्वानि देव इति तिसृभिर्ऋग्भिः प्रज्वालनम् । 'पुनस्त्वे'ति प्रजापतिस्त्रिष्टुबग्निसमिन्धने विनियोगः । ॐ पुनस्त्वा० । प्रज्वलितस्यापि पुनरिन्धनप्रक्षेपेण प्रदीप्तकरणं समिन्धनम् । एतावदेवमाधानम् । मणिकस्थाने उदकुम्भं निधायायैतस्मिन्नग्नौ सायंप्रातर्होमस्तन्त्रेण (कार्यः) धारितश्चेत्प्रातर्होमपात्रम् । ततस्तस्मिन्नग्नावान्वाहिकपाकश्रपणं, अन्न-

मुद्धृत्याभिघारणं, पञ्चमहायज्ञाश्च । तत्र विशेषः—अनुमतये स्वाहेत्यनन्तरं ॐ विश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो० । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते० । इत्याहुतिद्वयमधिकं होतव्यम् । ततः पूर्ववद्बलिकर्म । अ(त)त्रोदकुम्भसमीपे पर्जन्यादिभ्यो दानमिह मणिकाभावादिति विशेषः, अन्यत्सर्वं पूर्ववत् । अत ऊर्ध्वमनेनैव विधिना(१) यावज्जीवं वर्तनीयम् । अन्ये त्वौपासनवत्तस्याग्नेर्याव्ज्जीवं धारणं कर्त्तव्यमित्याहुः । शान्ते चा(वा)ग्नौ अनेनैव विधिनाऽग्न्याहरणमिति । अस्मिन्नग्नौ पिण्डपितृयज्ञपत्ताग्रयणादि कर्त्तव्यम् । श्रवणाकर्मादि तु न कर्त्तव्यम् ।

ब्रह्मचारिणोऽपि पितृश्राद्धादौ पाकोपस्थितौ एवमेव पाकश्रपणम् ।

गर्गोपाध्यायस्तु—यदि ब्रह्मचारिणोऽपि स्वकीयाग्निविच्छेदस्ततोऽनेनैव विधिनाग्न्याहरणादि समिदाधानान्तम् । अग्न्याहरणं तु समिदाधानार्थं पाकस्य तु निवृत्तिस्तस्येत्याह ।

तदयुक्तं, ब्रह्मचारिणः समिदाधानार्थं हि नित्यतयाग्निधारणस्य गृह्यकल्पे विधानाभावात् ।

एतत् पृष्ठोदिविविधानम् । एवं कृते वृथापाको न भवति वृथापाकश्रपणं न कर्तव्यम् । वृथापाकाशनं च न कर्तव्यमिति ।

इति स्मार्तोल्लासे पृष्ठोदिविविधानेनाग्न्याधानप्रयोगः ।

---

(१) 'विधिनाग्न्याहरणं यावज्जीवं' क० ख० पाठः

## ( यज्ञपार्श्वोक्तो निरग्निकर्तृकवैश्वदेवप्रयोगः । )

अथ यज्ञपार्श्वपरिशिष्टेऽनग्निकानां प्रति कात्यायनेन प्रकारान्तरमुक्तम्—

'अनाहिताग्निभिः कार्यो वैश्वदेवो यथाविधि ।
अभक्ष्यस्तु भवेत्पाको वैश्वदेवविवर्जितः'(१) ॥

इत्युक्त्वा—

'सभार्यो योऽगृहीताग्निर्विधुरः स्नातकोऽपि वा ।
व्याहृति(तो)भिः समस्ताभिर्व्यस्ताभिश्च ततः परम् ॥
हुत्वा तु शाकलैर्मन्त्रैः प्राजापत्यं ततः परम् ।
स्विष्टकृच्च हुनेदन्ते देवयज्ञोऽयमीरितः ॥
भूतयज्ञं ततः कुर्यात्पर्जन्यादित्रिकं विना ।
नित्यश्राद्धं निरग्नेः स्यात्साग्नेः पितृ[भ्यो]बलिः स्मृतः ॥
पितृयज्ञोऽयमाख्यातोऽनग्नेर्वा पैतृको बलिः ।
निर्दिश्य ब्रह्मयज्ञः स्यात् पञ्चमो मानुषो मत'' (२) इति ।

ज्योतिष्टोमे काष्ठशकलहोमे विनियुक्ता(३)''देवकृतस्यैनसोऽवयजनमसी''त्यादयो मन्त्राः शाकला उच्यन्ते । एतेनानग्निमन्तं प्रति वैश्वदेवे प्रकारद्वयमुक्तं पृष्ठोदिविविधानप्रसवोत्थानप-

---

( १ ) य० पा० प० १।८।

( २ ) य० पा० प० १।११—१४

( ३ ) ''शाकलाधानं देवकृतस्ये ( शु० य० सं०८।१२ ) ति प्रतिमन्त्र''मिति सूत्रेण (का० श्रौ० १०।८।७) विनियुक्तेत्यर्थः ।

रिशिष्टाभ्यामुक्त एकः । यज्ञपार्श्वपरिशिष्टोक्तश्चापरः । एवं चोदाहृतपरिशिष्टानां स्वशाखीयत्वा "वैश्वदेवं तु कुर्वीत स्वशाखाविहितं तत" इति व्यासवाक्येन सह न विरोधः ।

## ( स्मृत्युक्ता वैश्वदेवकारिकाः । )

केचन स्मृतीनां सर्वशाखासाधारण्यात्स्मृत्युक्तमपि वैश्वदेवमनुष्ठेयं मन्यन्ते ।

अत्र वशिष्ठः—

"अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयम् ।
हुत्वा शाकलमन्त्रैश्च शिष्टं भूतबलिं हरेत्" ॥

शांखश्च—

"अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैश्च शाकलैः ।
प्र(सु)विभज्य च भूतेभ्यस्ततोऽश्नीयादनग्निमानि"ति ॥

व्यासः—

"शाकलेन विधानेन जुहुयाल्लौकिकेऽनले ।
व्यस्ताभिर्व्याहृतीभिश्च समस्ताभिस्ततः परम् ॥
षड्भिर्देवकृतस्येति मन्त्रविद्भिर्यथाक्रमम् ।
प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः ॥
ॐ कारपूर्वं स्वाहान्तं, त्यागः स्विष्टविधानतः ।
भुवि दर्भान् समास्तीर्य बलिकर्म समा(रभेत्)चरेत् ॥
विश्वेभ्यश्चैव भूतेभ्यः सर्वभूतेभ्य एव च ।
भूतानां पतये चेति नमस्कारेण शास्त्रवित् ॥

दद्याद्बलित्रयं चाग्रे पितृभ्यश्च स्वधा नमः ।
पात्रनिर्णेजनं वारि वायव्यां दिशि निक्षिपेत् ॥
उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षितम् ।
इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत् ॥
गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः"(१) ।

इति निरग्निकयज्ञपार्श्वोक्तवैश्वदेवप्रयोगः ।

## ( निरग्निकवैश्वदेवार्थं कुण्डकरणम् )

अथ कुण्डकरणमुच्यते । दीपिकायाम्—

"उत्सेधं द्व्यङ्गुलं प्रोक्तं विस्तारे द्वादशाङ्गुलम् ।
दैर्घ्यं चैव प्रकुर्वीत चतुरस्रं समंततः ॥
वैश्वदेवं ततः कुर्यात् कुण्डं खातविवर्जितम् ।
मेखलां वर्जयेच्चैव योनिं चैव विवर्जयेत्" ॥

अथवा—

"सप्ताङ्गुलप्रमाणेन कुर्याद्वै वर्तुलाकृतिः ।
मध्यशंकोः परि(री)णाहे कुर्यादेवं प्रयत्नतः ॥
न चूल्यां नायसे पात्रे न भूमौ न च खर्परे ।
वैश्वदेवं प्रकुर्वीत कुंडे वा स्थंडिलेऽपिवा" ॥

ग्रन्थान्तरे ताम्रादिकुण्डेऽपि वैश्वदेवकरणम् ( उक्तम् ) ।

---

( १ ) व्यासस्मृतिः ३ । २८—३४ .

## ( यज्ञपार्श्वोक्तवैश्वदेवप्रयोगः । )

ततस्ताम्रपात्रे वैश्वदेवान्नमुद्धृत्य घृतेनाभिघारणम् । "यद्देवा" (१)इति कूष्माण्डैभिस्तिसृभिर्ऋग्भिः क्षुद्रदृष्टिपतनजनितदोषपरिहारार्थमुद्धृतान्नप्रोक्षणम् । कृतकुशोपग्रहः पवित्रपाणी कर्ताऽऽचम्य त्रीन्प्राणायामान् कृत्वा देशकालयोःसङ्कीर्तनान्ते मम पञ्चसूनाजनितपापक्षयपूर्वकनित्यकर्मानुष्ठानसिद्धिद्वारा श्री परमेश्वरप्रीत्यर्थं यज्ञपार्श्वोक्तविधिना वैश्वदेवाख्यं कर्माहं करिष्ये । तत्र कुण्डे स्थंडिले वा पञ्चभूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनम् । (२)"चत्वारि शृङ्गे"ति ध्यानम्। (३)"एषो ह देव" इत्यावाहनम् । (४)"स नः पिते"ति पावकनाम्ने वैश्वानराय नम इति गन्धादिभिः पञ्चोपचारैरभ्यर्चनम् ।

---

( १ ) ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् । अग्निर्मा तस्मादेनसो व्विश्वान् मुञ्चत्वꣳहसः । यदि दिवा यदि नक्तमेनाꣳसि चकृमा व्वयम् । व्वायुर्मा तस्मादेनसो व्विश्वान् मुञ्चत्वꣳ हसः। यदि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा व्वयम् । सूर्यो मा तस्मादेनसो व्विश्वान मुञ्चन्त्वꣳ हसः ( शु०य०सं०२०।१४--१६ ) ।

( २ ) चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां३ ॥ आविवेश ( शु०य०सं०१७।९१ ) ।

( ३ ) ॐ एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः ( शु०य०सं०३२।४ ) ।

( ४ ) ॐ स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ( शु०य०सं० ३।२४) ।

ॐ मुखं यः सर्व(देवानां)भूतानां हव्यभुक् कव्यभुक् तथा ॥
पितॄणां च नमस्तस्मै विष्णवे पावकात्मने ।

इति नमस्कृत्य प्रदक्षिणमग्नेः पर्युक्षणम् । इतरथावृत्तिः । दक्षिणं जान्वाच्य देवतीर्थेन सुसमिद्धेऽग्नौ जुहुयात् । ॐ भूर्भुवः स्वः स्वाहा । इदं प्रजापतये । ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐ स्वः स्वाहा । इदं सूर्याय । ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा । ॐमनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा । ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा । ॐ एनस एनसोऽवयजनमसि स्वाहा। ॐ यच्चाहमेनो विद्वांश्चकार यच्चाविद्वांस्तस्य सर्वस्यैनसोऽवयजनमसि स्वाहा । इदमग्नये इति षण्णां त्यागः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । इत्येवं द्वादशाहुतिको होमो देवयज्ञः ।

अथ भूतयज्ञः । तत्र पर्जन्यादित्रिकवर्जं भूमौ बलिहरणं पूर्ववत् । पितृयज्ञादिसर्वं पूर्ववत् ।

इति यज्ञपार्श्वोक्तो वैश्वदेवः ।

## (२ स्मृत्युक्तो वैश्वदेवप्रयोगः)

अथवा स्मृत्युक्तं वैश्वदेवं कुर्यात् । तत्र विशेषः । ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । इति महाव्याहृति-

भिर्व्यस्ताभिर्हुत्वा ॐ भूर्भुवः स्वः स्वाहेति समस्ताभिर्जुहुयात् । ततो देवकृतस्यैनसोऽवयजनमसि स्वाहेत्याद्याः स्विष्टकृदन्ता अष्टावाहुतीर्जुहुयात् । ॐ धात्रे नमः । ॐ विधात्रे नमः । इति बलिद्वयं द्वारदेशशाखामू[लदेशे]ले दत्वाग्नेः पश्चादुपविश्य ॐ विश्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो भूतेभ्यो नमः । ॐ भूतानां पतये नमः । इति बलित्रयं प्राक्संस्थमुदक्संस्थं वा दद्यात् । एवं पञ्चबलीन् दद्यादिति देवयज्ञभूतयज्ञ(यो)र्विशेषः । अन्यत्पितृयज्ञादिसर्वं यज्ञपार्श्वोक्तवैश्वदेववत् ।

इति स्मृत्युक्तो वैश्वदेवः ।

---

## ( निरग्निकवैश्वदेवनिर्णयः । )

अथ निरग्निकवैश्वदेवनिर्णयः । नित्यश्राद्धे विशेषः। हेमाद्रौ-

"एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही" ।

अपीत्यनुकल्पः । प्रचेताः—

"नामन्त्रणं न होमं च नाह्वानं न विसर्जनम् ।
न पिण्डदानं विकिरं न दद्यादत्र दक्षिणाम् ।
अनिर्दिश्य भोजयित्वा किंचिद्दत्वा विसर्जयेत्" ॥

इति तेनैवोक्तेर्दक्षिणाविकल्पः । यत्तु काशीखण्डे—

"नित्यश्राद्धं देवहीनं नियमादिविवर्जितम् ।
दक्षिणारहितं चैव दातृभोक्तृविवर्जितम्" ॥ इति ।

तद्विप्राऽभावपरम् ।

भविष्ये—

"आवाहनं स्वधाकारं पिण्डाग्नौकरणादिकम् ।
ब्रह्मचर्यादिनियमा विश्वेदेवा न चैव हि ॥
दातृणामथ भोक्तृणां नियमो न च विद्यते" ॥ इति ।
"होमाग्नदानरहितं भोक्तव्यं न कथंचन ।
अविभक्तेषु संसृष्टेष्वेकेनापि कृतं च यत् ॥
देवयज्ञादि सर्वार्थं लौकिकाग्नौ हुतं यदि ।
इक्षुरापः पयो मूलं तांबूलं फलमौषधम् ।
भक्षयित्वापि कर्तव्याः स्नानसन्ध्यादिकाःक्रियाः" ॥

इति गदाधरभाष्योक्तेः । विष्णुः—

"अभावादग्निहोत्रस्य आवसथ्यात्तु बाह्यतः ।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते" ॥

अङ्गिरा अपि—

"शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः ।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते" ॥ इति ।
"यदर्थमुद्धृतो ह्यग्निः कृतश्चार्थो यथाविधि ।
कृतकर्मापवृत्तस्तु हुतोऽग्निर्लौकिकः स्मृतः" ॥

इति वचनात्पारिभाषिक एवात्र लौकिको न पुनर्ग्रामाग्निः । "अपवृक्तकर्मा लौकिकोऽर्थसंयोगादि"ति कात्यायनेन (१) त-

(१) का० श्रौ० १।३।२८।

स्मिन्नेवाग्नौ लौकिकशब्दप्रयोगात् । अन्यत्र तु (१)"ग्रामाग्निना चेदि"ति ।(२) "तूष्णीं ग्रामाग्निनेतरमि"ति । "गार्हपत्यानुगते ग्रामाग्निमाहृत्ये"(३)ति । "अन्वग्निरिति ग्रामाग्निमाहृत्या"(४)दौ ग्रामाग्निपदप्रयोगाच्च ।

अथाचारादर्शे मदनपारिजाते च शातातपः—

"वैदिके लौकिके वापि हुतोच्छिष्टे जले क्षितौ ।
आहृत्योत्सृज्य जुहुयात्पञ्चसूनापनुत्तये" ॥ इति ।

वैदिके आवसथ्येऽग्नौ तदभावे हुतोच्छिष्टे=अन्येनान्यहोमं कृत्वा त्यक्ते तदभावे लौकिके= ग्रामाग्नौ, पात्रान्तरकरणमाहरणम् । गृह्याग्नेस्त्वग्न्युद्बोधनमाहरणम् । उन्मार्जनं भस्मापाकरणम् । मनुः—

"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्" (५) ॥

कीटादीनां ध्मायनेन [ध्मापणेन] चुल्ली, पेषणेन पतितपा-

(१) का० श्रौ० २५।४।३०।
(२) पा० गृ० ३।१०।१२
(३) का० श्रौ० ४।८।१०
(४) कात्यायनपृष्ठादिविविधानपरि० ॥
(५) मनुस्मृतिः ३।६८-६९ ॥

खिवघादिना पेषणी, त्क्षेपणादिना मार्जनी, अवहननेन कण्डनी, सकीटजलाहरणेनोदकुम्भः। एताः गृहस्थस्य पञ्च सूना= प्राणिवध-स्थानं तत्सदृशवधतुल्य[जन्य] दोषहेतुत्वात्। अतएवैतान् वाहय-न्=व्यापारयन् सूनादोषैः संबध्यत इत्यर्थः। उपस्करः समार्जनी भाण्डकुण्डा[म्भा]दिगृहोपस्करणमित्येके। 'तासामि'त्यादिना एतत्पापक्षयार्थं पञ्चमहायज्ञा इत्युक्तम्। तथा स एव—

"पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः।

स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते" (१)॥ इति।

एतच्चार्थवादमात्रम्।

"ततः पञ्चमहायज्ञान् कुर्यादहरहर्द्विजः"।

इति सुमन्तुवाक्ये,

"अहरहर्भूतेभ्यो बलिं हरेदि"ति(२)शतपथश्रुतौ चाह-रहरिति वीप्सया तेषां नित्यत्वावगमात्।

शङ्खोऽपि—

"पञ्चयज्ञविधानं च गृही नित्यं न हापयेदि"ति।

अथवा अर्थवादात्सूनाजनितपापक्षयोऽपि फलम्। एवं च—

"स्वर्गापवर्गयोः सिद्धिः पाकयज्ञैः प्रचक्षत"—

इति व्यासवाक्यादपि फलान्तरं बोध्यम्।

(१) मनुस्मृ० ३।७१।

(२) शा० ब्रा० ११।५।६।२।

प्रत्येकमपि फलमाह हारीतः—

"यद्देवेभ्यो जुहोति देवलोकं तेनाभिजयति, यत् पितृभ्यः पितृलोकं तेन, यत्स्वाध्यायमधीते ऋषिलोकं तेन, यद्भूतेभ्यो बलिं हरति भूतलोकं तेन जयति" ।

एतेन पुरुषार्थत्वमुक्तं भवति (१) वैश्वदेवस्येति । ततो वैश्वदेवस्यान्यस्य घृतेनाभिघारणादि ।

तदुक्तं मदनपारिजाते कात्यायनेन—

"उद्धृतं हविरासिच्य हविष्येण घृतादिना ।

---

( १ ) मनुरपि वैश्वदेवस्य पुरुषार्थत्वमेवाह—

"वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् ।

तस्मा (स्याप्य) अन्नं यथाशक्ति प्रदद्यान्न बलिं हरे"दिति

( म० स्मृ० ३।१०८ ) ।

वैश्वदेवानन्तरमतिथिपूजायां कृतायां द्वितीयोऽतिथिर्यद्यागच्छति अन्नं च पक्वं नास्ति तदा पुनः पाकं कृत्वा तस्मै दद्यान्न बलिं हरेद्वैश्वदेवं न कुर्यादित्यर्थः । यद्यन्नसंस्कारार्थत्वं वैश्वदेवस्य स्यात्तदा पुनः करणनिषेधो न युज्यत इति । मिताक्षरायां ( या० स्मृ० १।१०३। ) मप्येवम् । अतश्च पाकसंस्कारार्थत्वं निरस्तम् । पाकसंस्कारार्थत्वे तु पाकाभावे वैश्वदेवाभावप्रसङ्गात् । केचित्तु—

"यस्य चाग्नौ न क्रियते यस्य चाग्रं न दीयते ।

अभोज्यं तदन्नवेदन्नं भुक्त्वा तूपवसेदहः" ॥

इति मिताक्षरायां लिखितेन वाक्येन वैश्वदेवाभावेऽन्नस्याभोज्यत्वाभिधानादन्नसंस्कारार्थतापि प्रतीयते, तेन वैश्वदेवस्योभयार्थत्वं स्विष्टकृद्वत् ( जै० ४।१।७ ) देकस्यैव प्रधानकर्मत्वं गुणकर्मत्वं चांशभेदेनाविरुद्धमित्याहुः । तेनादृष्टार्थविहितस्यैव पाकस्य वैश्वदेवे विनियो

स्वशाखाविधिना हुत्वा तच्छेषेण बलिं हरेत्" ॥ इति ।

हविष्येण घृतादिना उद्धृतं हविरासिच्य तेन हविषा जुहुयादित्यर्थः । घृताभावे दध्यादियुक्तं हविर्जुहुयात् ।

तथा च व्यासः—

"जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितम् ।
दध्यक्तं पयसाभ्यक्तं तदभावेऽम्भसापि वा" ॥ इति ।

हविष्याभावे चतुर्विंशतिमते—

"अलाभे येन केनापि फलशाकोदकादिभिः ।
पयोदधिघृतैः कुर्याद्वैश्वदेवं स्रुवेण तु ।
हस्तेनान्नादिभिः कुर्यादद्भिरञ्जलिना जले" ॥ इति ।

अत्रापरो विशेषः परिशिष्टे—

"शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ।
सङ्कल्पयेद्यदाहारे(रं) तेनाग्नौ जुहुयादपि" ॥ इति ।

---

गः । "वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुया" ( पा० गृ० २।९।२ ) दिति । वैश्वदेवादित्यन्नं व्यपदिश्यते । विश्वेदेवदेवताकबलिसम्बन्धात् । यद्यपि देवतान्तरमप्युक्तमस्ति तथाप्येकदेशेन व्यवहारः । अत एव होमेऽप्यस्मिन्वैश्वदेवपदम् । " अग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदि" (गौ० ध० सू० ५।११) ति गौतमादिकल्पे होमेऽपि विश्वेदेवसम्बन्धात् । "वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहे"ति सूत्रे तु पुरोडाशकपालेनेति (जै० ४।१।११।) वद्वैश्वदेवार्हस्य पाकस्य विनियोगान्तरमिति ।

पयःप्रभृतिद्रव्याणां होमः स्रुवेणेत्युक्तम् (१) । चर्वादिकठिनद्रव्याणां तु विशेषोऽभिहितः परिशिष्टे—

"उत्तानेन तु हस्तेन अङ्गुष्ठाग्रेण पीडितम् ।
संहताङ्गुलि(भिर्यस्तु)पाणिस्तु वाग्यतो जुहुयाद्धविः" ॥ इति ॥

हविष्येष्वपि मुख्यद्र(ह)व्यमाह कात्यायनः—

"हविष्ये तु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादीन् सर्वालाभेऽपि वर्जयेदि"ति ॥

गौराः गौरसर्षपाः । आदिशब्देन कोद्रवचणकमाषमसूरकुलित्थवर्ज्यमिति शङ्खलिखितोक्तं परिगृह्यते ।

आपस्तम्बः—

"न क्षारलवणहोमो विद्यते तथावराभ्रसंसृष्टस्य हविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिञ्जुहुयात्तद्धुतमहुतं चाग्नौ भवती"ति ।

क्षारलवणपराभ्रसंसृष्टेनाहविष्येणाग्नौ होमो न कार्यः । अपि

---

( १ ) पूर्वमीमांसाया ( १।४।सू०३० ) मपि आज्यादिषु स्रुवादीनां व्यवस्था सिद्धान्तिता । तथा हि संक्षेपः—

स्रुवेणाथ स्वधितिना हस्तेनावद्यतीत्यमी ।
आज्ये मांसे पुरोडाशे संकीर्णा वा व्यवस्थिताः ।
व्यवस्थापकराहित्यात्स्रुवाद्या अव्यवस्थिताः ।
व्यवस्थापकताशक्तेस्तद्वशेन व्यवस्थितिः ।

( न्या० मा० १।४-५३-५४ ) इति ।

( २ ) आ० धर्मसूत्र ६।१५॥१४-१६ ।

च तूष्णीं भस्माग्न्यायतनादुत्तरतोऽपोह्यास्मिन् होतव्यम् । उष्णां भस्मेत्यङ्गारमिश्रितं भस्मेत्यर्थः । अतएव बौधायनः—

'अङ्गारान् भस्ममिश्रांस्तु उद्धृत्योत्तरतो [ऽनलात्] नयेत् ।
जुहुयाद्वैश्वदेवं तु यदि ज्ञारादि[मिश्रितम्] वर्जितम्" ॥

तथा—

"परोक्तमन्नमसंस्कृतमग्नावधिश्रित्याद्भिः प्रोक्ष्येत्तदेव पवित्रमित्याचक्षत" इत्यादि । अधिश्रयणं तु पुनरग्नेरुपरिस्थापनमात्रमन्नसहितस्य वैश्वदेपात्रस्य । अधिश्रित्य संस्कृतं कृत्वा प्रोक्षेदित्यन्वयः ।

इति पुष्करपल्लीस्थशिवप्रसादपाठककृते स्मार्त्तोल्लासे साग्निकनिरग्निकवैश्वदेवनिर्णयप्रयोगः समाप्तः ।

## ( अथ विधुरोपासनम् । )

अथ विधुरोपासनं लिख्यते । ततः पूर्वोक्त ( २८१ पत्रे ) प्रसवोत्थानपरिशिष्टे अपत्नीकशब्दे(ऽस्य)न मृतपत्नीकः स च विधुरः=अनाश्रमी ।

एतदुक्तम्—

"अनाश्रमी न तिष्ठे(त्तु)त क्षणमेकं पितामह ।
तिष्ठन्भवेद्द्विजो व्रात्यः प्रायश्चित्ती भवेत्तु सः ॥

प्रायश्चित्तमाह हारीतः—

अनाश्रमी संवत्सरं प्राजापत्यं चरित्वा आश्रममुपेयात् । द्वितीये कृच्छ्रं, तृतीये कृच्छ्रातिकृच्छ्रं, अत ऊर्ध्वं चान्द्रायणमिति ।

प्रायश्चित्तमुक्तावल्यां सङ्ग्रहे—

"तपसा ब्राह्मणो जातः कर्मिष्ठश्च द्विजोत्तमः ।
त्रिप्रियो(१)ब्राह्मणः शुद्धो कर्मदाने न(१)कर्मसु ॥
अना(विना)श्रमी द्विजस्तस्य सुमुखं नावलोकयेत् ।
तं त्य(जित्वा)जेत्तु प्रयत्नेन श्राद्धे दाने च कर्मसु ॥
मृतस्य तस्य नाशौचं दहने नोदकक्रियाम्" ॥ इति ।

तदुक्तं ( तथा च ) गृह्यकारिकायाम्—

"कुलटानामग्रजन्मगर्भघ्नीनां च योषिताम् ।
गामिनीनां हीनजातौ तथाऽनाश्रमिणामपि ॥
अधिकारे मृतौ तेषां सद्यः शौचं विधीयते ।
न कुर्याद्दहनं तेषां प्रायश्चित्तमतोऽन्यथा ॥
न कुर्याद्दहनाशौचोदकमेषां कृतं यदि ।
नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति" ॥

त्रिंशच्छ्लोकेऽपि—

"नाशौचं चौराश्रमरहितसुरापेय(१)मि"त्यादि ।

---

( १ ) नाशौचा ज्ञातयः स्युः पतितपतिसुतब्रह्मविड्घातिनोषु
दोषात्पाखण्डचौराश्रमरहितसुरापेयहीनोपगासु ।
सम्दर्पात्सर्पविप्रदितिपपशुद्विवाकीर्तिकाद्यैर्हतेषु
स्वेच्छापूर्वं च शस्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु ॥
इति त्रिंशच्छ्लोकी ( १६ श्लो० ) पाठः ।

अतएवावश्यमेव विधुरोपासनं कर्तव्यम् । तदुक्तम्—

"आश्वलायनमाचार्यमधिगम्य महर्षयः ।
प्रतिपूज्य यथाचारमिदं वचनमब्रुवन् ॥
भगवन् विधुराणां हि धर्मं नो वक्तुमर्हसि ।
विवाहे ह्य(हस्या)समर्थस्य विधुरस्य क्रियाः कथम् ॥
श्राद्धानि पञ्चयज्ञाश्च कार्या नैमित्तिकाः क्रियाः ।
अनेनैव (यस्मिन्नेव) विधानेन गृहस्थसदृशो भवेत् ॥

आश्वलायन उवाच ।

कात्यायन-भरद्वाज-धौम्य-बौधायनादिभिः ।
यदुक्तं विधुराणां हि तदेतत्कथयामि वः ॥
चन्द्रानुकूलदिवसे स्नात्वाऽऽगत्य द्विजैः सह ।
पुण्याहं वाचयित्वाऽथ ततश्चैव महानसात् ॥
अग्निमाहृत्य विधिवत् स्थंडिले प्रणिधाय च ।
सङ्कल्प्य विधुरस्याग्निं पुनः संधानमेव च ॥
त्रिभिः सावित्रैः प्रज्वाल्य पुनस्त्वेति समिन्धनम् ।
सायंप्रातश्च जुहुयादौपासनमतः परम् ॥
दर्शश्च पौर्णमासश्च नित्येष्ट्याग्रयणो तथा ।
श्राद्धानि पञ्चयज्ञांश्च तस्मिन्नग्नौ समाचरेत् ॥
एवं कृते विधुरेण गृहस्थसदृशो भवेत् ।
अनाश्रमित्वदोषो हि नास्तीत्याहाश्वलायनः ॥
दानव्रतेषु होमेषु तीर्थेषु श्राद्धकर्मसु ।
विधुरोऽपि सदा पूज्यो योऽग्निवेदसमन्वितः ॥

तस्मात्सर्वप्रयत्नेन वह्निं परिचरेत्स्वयम्" ।

विष्णुः—

"मृतायामपि भार्यायां वैदिकं कर्म न त्यजेत् ॥
उपाधिनापि तत्कर्म यावज्जीवं समाचरेत् ।
अनेनैव विधानेन विधुरोपासनं भवेत् ॥
औपास(नेत्व)नस्याकरणे प्रायश्चित्तं विधीयते ।
औपासनं विना दोषो न स्पृशेद्विधुरं ततः ॥
अत्राग्निहोत्रस्य फलं तत्फलं विधुरस्य च ।
अग्ने नय जपेत्सूक्तं पञ्चवारं दिने दिने" ॥

ग्रन्थान्तरे कारिका—

"उद्धृत्य वह्निं प्रणवेन चादावन्वग्निरित्याहरयेत्पुरस्तात् ।
निधाय पृष्टो दिवि मन्त्रकेन ततश्च होमं शकलैश्च कुर्युः ॥
ताꣳसवितुस्तत्सवितुर्वरेण्यं विश्वानि देवेति समिद्धमन्त्राः ।
नारोपणं नाप्यवरोहणं च उत्पत्तिमेतद्विधुरस्य तस्य ॥
नैमित्तिकं नित्यमथापि काम्यं तत्रैव कुर्याद्विधुरः सदैवे"ति ।

## ( विधुरोपासनप्रयोगः )

अथ प्रयोगः । तत्रादावनाश्रमदोषपरिहारार्थं सर्वप्रायश्चित्तं कृत्वा तदुत्तरमतीतसंवत्सरसङ्ख्याकान् प्राजापत्यादि यथाशक्तिमत्याम्नायत्वेन करिष्ये ।

ततः पूर्वोक्ते शुभे मासे प्रधाननक्षत्रे चन्द्रानुकूले दिवसेऽग्न्याधानम् । ततः प्राणानायम्य देशकालौ सङ्कीर्त्य गार्हस्थ्य-

सद्यश्च सर्वकर्मयोग्यतावाप्तिपुरस्सरश्रौतस्मार्तकर्मानुष्ठानफलप्राप्त्यर्थं अनाश्रमदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं च प्रसवोत्थानपरिशिष्टोक्तविधुरोपासनं करिष्ये । तदङ्गभूतं गणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृपूजनं वसोर्धारापूजनं वृद्धिश्राद्धं च करिष्ये । श्राद्धं समाप्य ततो ब्रह्मवरणादि मधुपर्कान्तं पूजयेत् । ततः पूर्वोक्तस्थले पञ्च भूसंस्कारान् कृत्वा ब्राह्मणैः सह शान्तिपाठं पठन् महानसादन्वग्निरित्यनेनाग्निहरणम् । 'अन्वग्निरि'त्यस्य पुरोधास्त्रिष्टुबग्निरभ्याहरणे विनियोगः । ॐ अन्वग्निः० । ततोऽग्निं गृहीत्वा कुण्डसमीपमानीय पश्चादुपविश्य 'पृष्टो दिवो'ति कुत्सस्त्रिष्टुबग्निरग्निस्थापने विनियोगः । 'पृष्टो दिवि' इति मन्त्रेण स्थापनम् । 'समितमि'ति द्वयोः प्रजापतिरुष्णिक् बृहत्यावग्निस्थापने विनियोगः । ॐ समितठं० । ॐ सं वाम्मनाꣳसि० । इति द्वाभ्यामभ्युपस्थानम् । ततो महाव्याहृतीनां प्रजापतिर्गायत्र्युष्णिगनुष्टुबग्निर्वायुःसूर्यस्ताꣳसवितुरित्यस्य कण्वस्त्रिष्टुप् तत्सवितुरिति विश्वामित्रगायत्री, विश्वानि देव सवितरित्यस्य श्यावाश्वगायत्री त्रयाणां सविता देवता अग्निप्रज्वालने विनियोगः ।

'ॐ भूर्भुवः स्वः ताꣳसवितुः० । ॐ तत्सवितुः० । ॐ विश्वानि देव' इत्यनेनाग्निप्रज्वालनम् । 'पुनस्त्वे'ति प्रजापतिस्त्रिष्टुबग्निसमिन्धने वि० । ॐ पुनस्त्वा प्रज्वलितस्यापि पुनरिन्धनप्रक्षेपेण प्रदीप्तकरणं समिन्धनम् । एतावदाधानं समाप्तम् ।

तस्मिन्नग्नौ सायंप्रातर्होमस्तन्त्रेण, धारितश्चेत् प्रातर्होममात्रम् । तदस्मिन्नग्नौ चान्वाहिकपाकश्रपणं अग्न्युद्धस्याभिघारणं पञ्चमहायज्ञा-

श्च । तत्र विशेषः अनुमतये स्वाहेत्यनन्तरं ॐ विश्वेभ्यो देवेभ्यः स्वाहा । इदं विश्वेभ्यो देवेभ्यो न मम । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । इत्याहुतिद्वयमधिकं होतव्यम् । ततः पूर्ववदूखलिकर्म । तत्रोदकुम्भसमीपे पर्जन्यादिभ्योदानम् । मणिकस्थाने उदकुम्भस्थापनमिह मणिकाभावादिति विशेषः । अन्यत्सर्वं पूर्ववत् । अत ऊर्ध्वमनेनैव विधिना यावज्जीवं वर्तनीयम् ।

अन्ये तु—औपासनवत्तस्याग्नेर्यावज्जीवं धारणं कर्तव्यमित्याहुः । शान्ते चाग्नावनेनैव विधिनाग्न्याहरणमिति । अस्मिन्नग्नौ पिण्डपितृयज्ञपत्ताद्याग्रयणादि कर्तव्यम् । श्रवणाकर्मादि तु न कर्तव्यम् । एवं कृते वृथापाको न भवति । वृथापाकश्रपणं न कर्तव्यं वृथापाकाशनं च न कर्तव्यमिति । विधुरोपासनसाङ्गतासिद्ध्यर्थं यथाशक्ति दक्षिणां दद्यात् । यथाशक्ति ब्राह्मणान् भोजयिष्ये । 'यस्य स्मृत्ये'ति । क्षमस्व । अनेन विधुरोपासनाख्येन कर्मणा भगवान् श्रोयज्ञरूपी परमेश्वरः प्रीयताम् ।

## ( विधुरस्य प्रवासविधिः । )

अथ विधुरस्य प्रवासोपस्थिते । तदा देशकालौ सङ्कीर्त्य प्रवासनिमित्तमग्निसमारोपं करिष्ये । ततः प्रातःकाले पक्षसमस्यहोमं कृत्वाग्निं प्रज्वाल्य समिधं गृहीत्वा "अयं ते योनि" रिति प्रतपेत् । सकृन्मन्त्रेण द्विस्तूष्णीम् । आहरणापत्तभेत् समिधं तथैव प्रक्षिपेत् । ततः यजमानो गृहान्निष्क्रम्य ग्रामान्तरं गत्वा पञ्चभूसंस्कारपूर्वकलौकिकाग्निस्थापनम् । तस्मिन् "ॐप्रत्यवरोह जातवेदः

पुनस्त्वं देवेभ्यो हव्यं वहतु प्रजानन् । प्रजां पुष्टिं रयिमस्मासु धेहि यथा भव यजमानाय शंयो" रित्यनेनाग्नौ समिद्धोमं कृत्वा तस्मिन्नाकप्रपणं पञ्चमहायज्ञादि च कुर्यात् । अथवा पर्वदिवसे एतदग्नि-(एवमग्नि) सिद्धं कृत्वाग्निधारणं कर्तव्यम् । प्रातः प्रतिपदि होमानन्तरं स्थालीपाकं विधाय पुनः समस्य होमं कृत्वा पुनः समित्समारोपं कृत्वा समिधं गृहीत्वा गच्छेत् । ततः प्रत्यागत्य तूष्णीं गृहं प्रविश्याग्निं प्रतिष्ठाप्य प्रादुष्करणप्रत्यवरोहेति समिधमाधाय तदग्नेः प्रज्वालनं कुर्यात् । पूर्ववद्धोमादिकुर्यात् । केचिन्मते विधुरोपासने समारोपणं नास्ति ।

इति स्मार्तोल्लासे विधुरोपासनप्रयोगः समाप्तः ।

## ( अग्निसमारोपविधिः )

अथानाहिताग्नेः सभार्यस्य प्रवासमसक्तोऽग्निसमारोपविधिः ।

प्रातर्होमानन्तरमरणिद्वय 'मयं ते योनि'रिति मन्त्रेणावसथ्ये प्रतपतीत्यरणिपक्षे समारोपः ।

आहरणपक्षे तु 'अयं ते योनि'रिति मन्त्रेणाश्वत्थसमिधमावसथ्ये प्रतपति । अथवा "या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एही"ति मन्त्रेण पाणी प्रतप्यात्मनि समारोपयेत् । तत्र प्रादुष्करणकाले अरणिसमारोपे अरणी निर्मथ्य "प्रत्यवरोहे"ति मन्त्रेण स्वरेऽग्निस्थापनम् ।

अश्वत्थसमित्समारोपणे वैश्यादिगृहादग्निमाहृत्य खरे पञ्चाग्न्यर्थान् संस्कारान् कृत्वाऽग्निं स्थापयित्वा 'प्रत्यवरोहे'ति मन्त्रेण तां समिधमग्नौ निदध्यात् । आत्मसमारोपपक्षे सर्वदा स्पृश्यस्पर्शनं जले निमज्जनं स्नानं स्त्रीगमनं चाकुर्वन्मूत्रपुरीषोत्सर्गे शौचमकृत्वा चिरकालमतिष्ठंश्च होमकाले आत्मसमारूढमग्निमुच्छ्वासरूपेण प्रत्यवरोहेति मन्त्रेण लौकिकाग्नौ निदध्यात् । एवं यथाधिकारमग्निं प्रतिष्ठाप्य होमं कुर्यात् । इदं समारोपणं द्वादशरात्रपर्यन्तमेव कुर्यादिति प्रयोगरत्ने । कात्तीयानां त्वरणिसमारोपः श्रौते दृष्टस्तद्वत्स्मार्तेऽपि कार्य उक्तत्वादिति शिष्टाः । समित्समारोपणेऽपि "अयं ते योनिरिति मन्त्रेण समारोप्य प्रादुष्करणकाले लौकिकमग्निं संस्थाप्य तत्र तूष्णीं समिधमादध्यादिति वृद्धाः । वस्तुतस्तु कात्तीयानामपि समित्समारोपः शाखान्तरोक्त एव भवति । स्वशाखायां समित्समारोपाभावादिति गदाधरभाष्य उक्तम् ।

इति समारोपविधिः ।

## ( अग्नित्यागप्रायश्चित्तम् । )

अथ पुनराधानप्रयोगः । तत्राग्नित्यागप्रायश्चित्तम् । स च त्यागस्त्रिविधः, प्रमादादिना एकः, आलस्येन बुद्धिपूर्वको द्वितीयः, नास्तिक्येन तृतीयः, त्रिष्वपि त्यागेषु प्रत्येकं प्रायश्चित्तं भिन्नम् । तत्र प्रमादादग्निनाशे रात्रित्रये प्राणायामशतं विंशतिरात्रे एकदि-

नोपवासः । मासद्वये त्रिरात्रोपवासः । अब्दे प्राजापत्यकृच्छ्रः । एवं त्यागकालानुसारेण प्रायश्चित्तं कुर्यात् ।

आलस्यादिना बुद्धिपूर्वकमग्नित्यागे तु द्वादशाहपर्यन्तं त्रिरात्रमुपवासः । मासपर्यन्तं द्वादशरात्रमुपवासः । अब्दपर्यन्तं मासं पयोव्रतम् । द्विवर्षपर्यन्तं चान्द्रायणम् । त्र्यब्दपर्यन्तं चान्द्रायणं सोमायनं च, एतदूर्ध्वं अब्दकृच्छ्रं धनिनो गोदानं चेति ।

प्रयोगपारिजाते स्मृत्यर्थसारे तु—द्वादशाहातिक्रमे त्र्यहमुपवासः । मासातिक्रमे द्वादशाहमुपवासः । संवत्सरातिक्रमे मासमुपवासः पयोभक्षणं चेति विशेषः ।

अथ नास्तिक्यादिनाग्नित्यागे प्रायश्चित्तम् । तद्यथा द्वादशरात्रिपर्यन्तं यथाशक्ति सुवर्णादानम् । मासद्वयपर्यन्तं कृच्छ्रं मासचतुष्टयपर्यन्तमतिकृच्छ्रम् । षण्मासपर्यन्तं पराकः । ततोऽब्दपर्यन्तं मासं पयोव्रतम् । अब्दे पूर्णे त्रैमासिकम् । ततः प्रतिवर्षं मासिकावृत्तिरिति । एवं कालविलम्बे सङ्कल्पपूर्वकं प्रायश्चित्तं कार्यं यत्र त्वग्निविच्छेदनिमित्तेन केनचिदग्निविच्छेदः कालविलम्बश्च नास्ति तत्राकृत्वैव प्रायश्चित्तं पुनराधानं कार्यम् । प्राजपत्यानुकल्पस्तु पूर्वोक्तः ।

इत्यग्नित्यागप्रायश्चित्तम् ।

## ( अग्नित्यागप्रायश्चित्तप्रयोगः )

अथ प्रयोगः । कर्ता नित्यक्रियां विधाय देशकालौ सङ्कीर्त्यामुकसमयमारभ्याद्यदिनपर्यन्तमावसथ्याग्निविच्छेदजनितप्रत्यवायप-

रिहारार्थं एतावत्प्रायश्चित्तममुकप्रत्याम्नायत्वेन करिष्ये, इति सङ्क-ल्पः । 'अमुकदिनमारभ्याद्यदिनपर्यन्तं लुप्तानां सायंप्रातर्होमानां तण्डुलादिद्रव्यं यस्मै कस्मै ब्राह्मणाय संप्रददे' इति होम्यं दद्यात् । अमुकदिनमारभ्याद्यदिनपर्यन्तं लुप्तानां दर्शपौर्णमासस्थालीपाकानां पिण्डपितृयज्ञानां वैश्वदेवानां च तत्पर्याप्तं सन्नीह्याज्यादिद्रव्यं तन्निष्क्रयं वा दद्यात् ।

## ( पुनराधानप्रयोगः । )

ततः शुभे काले शुचिराचान्तः प्राणानायम्य देशकालौ सङ्कीर्त्य विच्छिन्नस्यावसथ्यस्य पुनराधानं करिष्य इति सङ्कल्पः । तदङ्गभूतगणपतिपूजनं स्वस्तिवाचनान्तं कुर्यात् । अत्र विशेषस्तदुक्तम् ।

"आधि(धान)वत्पुनराधानं दानमानविवर्जितम् ।
एवं स्मार्तेऽग्निहोत्रेऽपि वृद्धिश्राद्धं विवर्जयेत्" ॥

ततः स्वरे पञ्चभूसंस्कारान् कृत्वा निर्मथ्याग्निं स्थापयेत् । ततो ब्रह्मोपवेशनाद्याज्यभागान्तं (कृत्वा) कुर्यात् पक्षादिवत् । यथा "त्वन्नो०" । इदमग्नीवरुणाभ्यां० । "स त्वन्नो"० । इदमग्नीवरुणाभ्यां० । "इमम्मे वरुण०" । इदं वरुणाय० । "तत्त्वा यामि०" । इदं वरुणाय० । "ये ते शतं०" । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च० । "अयाश्चाग्ने०" । इदमग्नये अयसे० । "उदुत्तमं०" । इदं वरुणाय० । "भवतन्नः०" । इदं जातवेदोभ्याम्० । ततश्चरुमभिघार्य 'ॐ अग्नये पवमानाय०' इदमग्नये पव० । 'ॐ अग्नये पावकाय०' । मदमग्नये पावकाय० । 'ॐ

अग्नये शुचये०' । इदमग्नये शुचये० । 'ॐ अदित्यै स्वाहा' । इदमदित्यै० । पुनराज्येन "त्वन्नो अग्न" इत्याद्यष्टर्चहोमः । ततश्चरुशेषेणा'ग्नये स्विष्टकृते०' । इदमग्नये स्विष्टकृते० । ततो दशाज्याहुतयः—"ॐ अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवागातुविदः स्वाहा" । इदं देवेभ्यो गातुविद्भ्यो० । ततो भूराद्यानवाहुतयः । ततो घृताक्तबर्हिर्जुहुयात् 'ॐ स्वाहा' इदं प्रजापतये० । ततः संस्रवप्राशनादि प्रणीताविमोकान्तं कृत्वा कृतस्य पुनराधानाख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं सूत्रोक्तब्राह्मणमेकं भोजयिष्ये । अत्र स्मृत्युक्तं त्रयस्त्रिंशद्ब्राह्मणभोजनम् ।

इति स्मार्तोल्लासे पुनराधानप्रयोगः ।

---

## ( पुनराधाननिमित्तानि । )

अथ पुनराधाननिमित्तानि लिख्यन्ते । तत्र कृतावसथ्याधानौ पत्नीयजमानौ यद्यग्निं परित्यज्य ग्रामसीमामतीत्य वसेतां तामेकरात्रीं तत्र प्रातरग्निं मथित्वोक्तविधिना अग्न्युपवेशनादि ब्राह्मणभोजनान्तमाधानं कुर्यात् । अनेकपत्नीकस्यैकस्याः पत्न्या मरणेऽग्निपात्रैः सहावसथ्येन तां दाहयित्वाऽऽशौचान्ते पुनराधानम् । अग्नावुपशान्ते होमकालद्वया(लाद्य)तिक्रमे गृहपतौ प्रोषिते प्रमादात्पत्न्या ग्रामान्तरवासे तथा गृहस्थिते यजमाने पत्न्याः प्रवासे प्राग्घोमकालादनागमने पुनराधानम् ।

केचित्तु ज्येष्ठायामग्निसन्निधौ तिष्ठन्त्यामन्यासां पतिसहितानां केवलानां वा कार्यवशाद् ग्रामान्तरस्थितौ पत्यौ वा (अग्नि) संन्निधौ तिष्ठति सर्वासां पत्नीनां ग्रामान्तरगमने नाग्निनाश इत्याहुः ।

तथा पत्न्या अग्निं विना समुद्रगानद्यतिक्रमे, भर्तृरहितायाश्चाग्निना सहिताया भयं विना सोमातिक्रमे, कर्मार्थाहरणादन्यत्र शकटं विना शम्यापरासादूर्ध्वं हरणे त्रिरुच्छ्वसन्तः प्रत्यक्ताग्निहरणे, मथ्यमानस्य दृष्टस्याग्नेर्मन्थनयन्त्रोत्थापनादूर्ध्वं नाशे, संवत्सरमेकं यजमानस्य होमाकरणे प्राजापत्यब्रह्मकूर्चयोरन्यतरप्रायश्चित्ताचरणादूर्ध्वं पत्न्याश्च पादकृच्छ्राचरणात्पुनर्विवाहवदाधानम् । उदकेनाग्न्युपश(मने)मे शिक्येनाग्न्युद्वहने प्रत्यक्तस्यारणिसमारूढस्य वा अग्नेरेकनामधेयशतयोजनगामिनदी ( योजनाधिकगामिनदी ) सन्तरणे वा सर्वत्र सीमातिक्र(मणे)मे आधन्तसीमातिक्रमणे वा पत्नीयजमानयोरन्वारम्भाभावे सूकर–गर्दभ–काक–शृगाल–कुक्कुट–मर्कट–शूद्रान्त्यज–महापातकि–शव–सूतिका–रजस्वला–रेतो–मूत्र–पुरीष–मेदोऽश्रु–श्लेष्म–शोणित–पूयास्थि–मांस–मज्जा–सुराप्रभृतिभिरमेध्यैः प्रत्यक्तस्यारणिसमारोपितस्य वाऽग्नेः स्पर्शे त्रीन् पक्षानिरन्तरं पक्षहोमाकरणे पुनराधानम् । तथाग्नेरपहरणे प्रादुष्करणादूर्ध्वं पूर्वं वा शान्तेऽग्नौ मन्थने प्रारब्धेऽग्निजन्माभावे लौकिकाग्निब्राह्मणाजदक्षिणाहस्ताजादक्षिणाकर्णकुशस्तम्बजलानामन्यतमेऽग्निस्थानेऽप्रकल्पिते सूर्यास्तमये उदये वा जाते पुनराधानम् । अग्निनाशभ्रान्त्याऽग्निं मथित्वा पूर्वाऽग्निं दृष्ट्वा मथितमग्निं "अयं ते योनि"रिति मन्त्रेणारण्योः समारोप्य पूर्वेऽग्नौ होमादिकं विदध्यात् । यदा तु लौकिकाग्न्याधान्य-

तर्मं विधाय होमं कृत्वा मन्थने प्रारब्धे द्वितीयहोमकालात्तृतीयाद्वा-
ग्नेर्जन्माभावस्तदा पुनराधानम् । आरोपिताग्न्योररण्योर्नाशे एकस्य
वा पुनराधानम् ।

## ( पुनराधानकारिका: )

अथ पुनराधाने कारिका लिख्यते—

"अग्नावनुगते यस्य होमकालद्वयं व्रजेत् ।
उभयोर्विप्रवासे वा लौकिकोऽग्निर्विधीयते ॥
अनो विना समारूढ(मू )ऊर्ध्वं शम्यापरासनात् ।
हृतोऽग्निर्लौकिको ज्ञेयः श्रुतौ सर्वत्र दर्शनात् ॥
शिक्येनोद्वाहयेद(ग्नीन् )ग्निं पुनराधानमर्हति ।
अग्निहोत्रेण रहितः पन्थानं शतयोजनम् ।
आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति ॥
अब्दं स्वयमजुह्वद्यो हावयेदृत्विगादिना ॥
तस्य स्यात्पुनराधेयं पवित्रेष्टिरथापि वा ॥
विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते ॥
ज्येष्ठा चेद्बहुभार्यस्य अतिचारेण गच्छति ।
पुनराधानमत्रैक इच्छन्ति खलु सूरयः ॥
भार्यायां (ज्येष्ठायां)विद्यमानायां द्वितीयामुद्वहेद्यदि ।
उत्सर्गेष्ट्याग्निमुत्सृज्य आदध्यादन्यया सह ॥

यजमानश्च पत्नी च उभौ प्रवसितौ यदि ।
आहोमान्न निवर्तेत पुनराधानमर्हति ॥
यदोभावप्यतिक्रम्य सीमां प्रत्यागतौ पुनः ।
होमकालमतिक्रम्य तदा नश्यन्ति वह्नयः ॥

विहारकाले यदि कार्यदोषात्पत्नी सुसीमानमतोत्य गच्छेत् ।
निःसंशयोऽग्निः खलु नाशमेति गृहस्य सीमेति विवक्षितार्थः ॥
विनाऽग्निभिर्यदा पत्नी नदीमम्बुधिगामिनीम् ।
अतिक्रामेद्यदाऽग्नीनां विनाशः (स्यादिति श्रुतिः) प(त्न्य)स्यसन्निधौ ॥

पत्नी सीमामतिक्रान्ता यजमानो गृहे यदि ।
आहोमाद्यदि नागच्छेत्पुनराधानमर्हति ॥
एकाकिनी यदा पत्नी वह्निमादाय गच्छति ।
तत्र नाशोऽपरे त्वाहुर्भयाद्याते न दुष्यति ॥
रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा ।
प्रवसन्नग्निमान् विप्रः पुनराधानमर्हति ॥
अचोदितेन पाकेन कृतेनोद्धरणेन वा ।
लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति ॥
शवानुगमने चैव शवसंस्पर्शने तथा ।
पुनरेवाग्निमादध्यादिति शातातपोऽब्रवीत् ॥
आहिताग्निः प्रमादाच्चेच्छवानुगमनं यदि ।
अग्निनाशं विजानीयात्सपिण्डेषु न दोषभाक् ॥
न दुष्येकाकिनी पत्नी प्रयाया(मादा)दग्निभिः सह ।
राष्ट्रभ्रंशादिसम्प्राप्तावुषितं यानमीदृशम् ॥

बह्वीनामथवैकस्यामुदक्यायां तु न व्रजेत् ।
तथा च पुनराधानं प्रवसेत्पर्वसन्धिषु ॥
निमित्तेन विना क्रीडाद्यर्थं होमे च पर्वणि ।
प्रवसेदग्निमान्विप्रः पुनराधानमर्हति ॥
नदीसन्तरणेऽग्नीनां सीमातिक्रमणे तथा ।
सर्वत्राद्यन्तसीम्नोर्वा सा(स्वा)मि स्पृष्टा स्युरग्नयः ॥
तथैव पत्नी सर्वत्र अन्यथाग्निविनाशनम् ।
उदक्या चेद्व्रजेत्पत्नी प्रसूता प्रवसत्यपि ॥
अन्वारम्भविक(ल्पात्तु)ल्पत्वात्पुनराधिर्न तन्मतात् ॥

होमद्वयात्यये दर्शपौर्णमासात्यये तथा ।
पुनरेवाग्निमादध्यादिति भार्गवशासनम् ॥
होमकाले तु उभयोः पुनराधिर्न सन्निधौ ।
सायम्प्रातर्वाऽग्निनाशे अस्तात्प्रागुदयात्तथा ॥
आ(ना)रम्भमन्थनं नापि लौकिकादिकमेव च ।
तदा स्यात्पुनराधानमापस्तम्बमतादि च ॥
अग्नौ देदीप्यमाने तु लोपे होमाष्टकेऽपि हि ।
आपदि च द्वादशके अत्यन्तापदि वार्षिके ।
तथैव पक्षमात्रे तु पुनराधानमिष्यते ॥
पक्षहोमत्रयं कृत्वा पुनराधानमेव च ।
पुनराधानमेव स्यादुदकेनाग्निनाशने ॥
यजमानेऽसन्निधाने कार्यदर्शे तु पर्वणि ।
स्वयं तु होमाकरणे पुनराधानमेव च ॥

यद्धितं जीवनायालं कुटुम्बस्यैकवत्सरम् ।
तन्नाशे पुत्रमरणे ज्ञातीनामवरोधने ॥
भाण्डनाशेऽन्ननाशे पुनराधानमिष्यते ।
स्याद्धानिः सर्वहानिः स्यात् स्पष्टं माध्यन्दिनश्रुतेः ॥
उपघातः क्रियालोप उपेक्षा च प्रमादतः ।
चतुर्विधमिदं प्रोक्तं पुनराधानकारणम् ॥
प्रसिद्धकर्मणां लोप उपघातोऽन्त्यजादिना ।
उपेक्षणं प्रवासादि प्रमादोऽग्नेरधारणम् ॥
पत्नी तत्रैव निवसेद् ग्रामं गत्वाप्रमादतः ।
लौकिकोऽग्निः स विज्ञेय इत्येषा नैगिमी श्रुतिः ॥
भार्यायां प्रोषितायां चेदुदेत्यर्कोऽस्तमेति वा ।
तत्र स्यात्पुनराधेयमन्ये प्राहुरिहान्यथा ॥
ज्येष्ठा चेदग्निसंयुक्ता गच्छत्यन्या यथारुचि ।
बहुभार्यस्य ज्येष्ठा चेत्प्र(सवे)वसेत्पुनराहितिः ॥
एकस्यामप्यतिष्ठन्त्यामग्निहोत्रसमीपतः ।
पतिस्तिष्ठति चेदग्निनाशमेत्यपरे विदुः ॥
प्रत्यक्षेण नयन्नग्निमुच्छ्वसेच्चेद्विनश्यति ।
यदि वाऽनुच्छ्वसन् गत्वा निधायोच्छ्वसनं पुनः ॥
हरेदनुच्छ्वसन्नेव नश्येन्निर्हरणोऽनलः ।
कर्मार्थे हरणेऽग्नीनां नानुच्छ्वासादि चोच्यते ॥
कात्यायनमतात्केचिदुच्छ्वसन्तोऽतिदूरतः ।
प्रत्यक्षेण नयन्त्यग्नीन् शकटेन विनापि तु ॥

आरूढोऽपि यथाशास्त्रमवरूढो न शास्त्रतः ।
तृतीये होमकालेऽथ सम्प्राप्ते पुनराहितिः ॥
यदा तु लौकिकाग्न्यादिर्निधाय हवनं तदा ।
द्वितीयाद्वा तृतीयाद्वा होमकालात्पुरा यदि ॥
अग्निर्न जायते तत्र पुनराधेयमाचरेत् ।
चाण्डालादिभिरग्नौ तु कृते स्पर्शेऽरणीगते ॥
आत्मारूढे तु मज्जेद्वा योषितं वाऽनृतौ गमेत् ।
वदन्त्येषु निमित्तेषु केचिदग्निविनाशनम् ॥
तत्रारणीगते वह्नौ नष्टे स्यात्पुनराहितिः ।
इतरेषु निमित्तेषु (ष्व)अग्न्याधेयं प्र(परि)चक्षते ॥
आरोपितारणी चोभे एका वा यदि नश्यति ।
तत्राग्न्याधेयमिच्छन्ति पुनराधेयमेव वा ॥
इत्यनारोपितारण्यो र्नाशे प्राप्ते नवे पुनः ।
तदलाभे य(दा द्वौ वा तदा)दोद्वापादत्र स्यात्पुनराहितिः ॥
नाशापहारावग्नीनां यद्वा रूढारणोर्यदा ।
कुर्यात्त्वेर्पुनराधेयमिति बौधायनोऽब्रवीत् ॥
कामे निमित्तयोगे वा पुनराधेयमिष्यते ।
निमित्तेषु यदायोगमाधानमपि वा भवेत् ॥
तत्र येषु निमित्तेषु भृङ्क्रमाहिकया विधिः ।
तत्रैव पुनराधेयमन्यत्राधानमिष्यते ॥
अन्यत्राप्यपरे प्राहुः पुनराधिं विकल्पतः ।
अन्ये तृतीयं नियतमग्न्याधेयं वितन्यते ॥

आधाने वत्सरे वृद्धिमिच्छतः पुनराहितिः।
प्रजापशूँस्तथा पुष्टिमिच्छतामन्यदापि च ॥
आधाने वत्सरे जाते यथाऽऽधातुरुपद्रवः।
अवृद्धिर्नाम सा प्रोक्ता तत्र स्यात्पुनराहितिः ॥
यज्ञभागाङ्गवैधुर्याद्यदाऽऽधानस्य धारणम्।
आद्ये संवत्सरे तच्चेत्तत्रैव पुनराहितिः ॥
अभावपहृतेऽन्याधिः सत्याषाढादिदर्शनात्।
प्रतीते पुनराधानमृत्विग्भ्रातृपुरोहिताः ॥
बौधायनमुनिः प्राह नेष्टं सूत्रान्तरेष्विदम्।
आधानाद्यामयावित्वे बहृचाः पुनराहितिम् ॥
कथयन्ति प्रतिज्ञातं भ्रंशे तामेव जीविनः।
उद्वातेऽग्नौ विहारात्प्राक् मथ्यमानेऽप्यजन्मनि ॥
लोकाग्न्यादावनिष्टिप्तेऽभ्युदयेऽस्तमयेऽपि वा।
विनष्टहेतुना ऽनेन जातवेदा विनश्यति ॥
विहारोत्तरकालं वा नष्टौ पूर्वापरानलौ।
शेषं पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति ॥
कालाल्पत्वे त्वनिर्मथ्य लोकाग्न्यादि क्षिपेद्यदि।
उदयास्तमयात्पूर्वं कर्कोऽत्रानाशमिच्छति ॥
लोकाग्न्यादावलब्धेऽपि प्राग(पुरा)र्कास्तमयोदयात्।
मन्थनारम्भमात्रेण नाशो वृद्धैर्निवारितः ॥
उभयोर्नाशविज्ञानादूर्ध्वमर्कोऽस्तमेति चेत्।
कर्कोऽग्निनाशमाचष्टे पश्चादुज्ञातेऽपि नेच्छति" ॥

## ( प्रायश्चित्तप्रकरणम् )

अथ प्रायश्चित्तान्यभिधीयन्ते ।

विघ्नराजं नमस्कृत्य शारदां वरदाम्बिकाम् ।
शिवप्रसादः कुरुते निष्कृतिं विधिनिर्णयाम् ॥

"कर्मोपपाते प्रायश्चित्तं तत्कालमि"ति(१)कात्यायनसूत्रम्। तच्च तत्काले कर्तव्यम् । अधुना स्मार्तकर्मसु विनाशे प्रायश्चित्तान्युच्यन्ते ।

कर्मविनाशश्च(तुरः)तुष्प्रकारः । अकरणं न्यूनकरणमतिरिक्तकरणमयथाकरणं च । यथा वैश्वदेवाकरणे तदकरणप्रायश्चित्तम् । चतुरो यज्ञान् कृत्वा, तन्न्यूनकरणम् । तदधिकं कृत्वा तदतिरिक्तं यदुक्तं तन्न कृतं तदयथाकरणम् ।

एतदुक्तप्रायश्चित्तं द्विविधम्। आदिष्टमनादिष्टं च । यत्र विशेषतो निमित्तमुद्दिश्य नैमित्तिकं विधीयते तदादिष्टम् । यथा सन्ध्यादिलोपे गायत्रीजपःप्रोक्तस्तदादिष्टम् । यत्कर्मणि प्रायश्चित्तमुक्तं तदादिष्टम् । यदनुक्तं तदनादिष्टम् । 'सदोपवीतिना भाव्यमि'(२)त्यादि । यत्र सामान्यनिमित्तमात्रमुद्दिश्य नैमित्तिकं विधीयते तदनादिष्टम्। "महाव्याहृतिहोमोऽनादेशे" (३)। यत्कर्मणि अनादिष्टं तद्ब्रह्मा जुहोति(४)। यदादिष्टं तत्स्वयं जुहोति। यत्र ब्रह्मा न

---

( १ ) का० श्रौ० २५।१।१'। (२) का० स्मृ० १।४।

( ३ ) का० श्रौ० २५।१।४।

( ४ ) "ब्रह्मा प्रायश्चित्तानि जुहुयादनादिष्टानि । ब्रह्मा विलि·

विद्यते तत्र कर्ता जुहोति । पितृयज्ञादौ ब्रह्मा नास्ति तत्स्वयं जुहोति ।

गृह्यकारिकायाम्—

"उक्तानुक्तनिमित्तेषु स्मरेद्विष्णुं सनातनम्" ।

ततोऽस्तमिते सूर्ये प्रतीच्यां दिशि यावल्लोहितमादृश्यते तावत्सायं होमस्य मुख्यकालः । यद्वा षट्घटिकात्मकः, नव घटिकात्मको वा, तत उपरि प्रातर्होमात्पूर्वमनादिष्टं कृत्वा सायं होमः कार्यः । तत्राप्यसम्भवेन तल्लोप एव, एकद्वित्रिहोमस्तन्त्रेण कार्यः । बहुलोपेऽप्येवम् ।

तदुक्तं कात्यायनेन—

"एकपक्षगतो यावान् होमसङ्घोऽतिपद्यते ।

पक्षहोमविधाने तु(नात्तु) लुप्ते(लुप्तं) तन्तुमतीं यजेत्" ॥

धर्मप्रवर्गे—

"अर्वाक् त्रिरात्राज्जुहुयादथापि आसप्तरात्राच्च मनस्वती च ।

एकादशाहे सह तन्तुमत्या आद्वादशाहे(१)ऽभवदग्निनाशः" ।

ततः सायं सन्ध्यां कृत्वा पश्चाद्धोमं कुर्यात् । अरुणोदयवेलायामल्पकालत्वादशक्तौ संक्षेपेण स्नायात् । ततोऽग्निं प्रादुष्कृत्य अर्घ्यान्तां सन्ध्यां विधायोपस्थानं च । उपस्थानविषये उदयनियमो नास्ति । प्रातर्होमस्य रात्रेः षोडशांशमारभ्य सूर्योदयात्पूर्वं मुख्यः कालः । उदिते सूर्ये आसायंहोमाद् गौणः कालः । तत्राप्यनादिष्टं

---

छा ठं० सन्दधातीति श्रुते"रिति कात्यायनो ( श्रौ० २५।१४।३५-३६ ) क्तेः ।

( १ ) अभवद् = भवेदित्यर्थः ।

कृत्वा कार्यः । तत्राप्यसम्भवे होमलोपेऽष्टोत्तरशतगायत्रीजपः । प्रायश्चित्तं गङ्गाधरेणोक्तम् ।

एवं नित्यस्नानलोपे सन्ध्यालोपे सायम्प्रातर्होमलोपे च स्नात्वाष्टोत्तरशतगायत्रीजपः कार्यः । नित्यकर्मणामतिक्रमे उपवासो गायत्र्यष्टशतं जपश्च । अनुक्ते प्राणायामशतम् । अभक्ष्यभक्षणे संवत्सरस्यैकं कृच्छ्रं पादकृच्छ्रं वा सप्तरात्रं गोमूत्रयावकाहारः, ज्ञानेन चान्द्रायणम् । ब्रह्मसूत्रं विना विण्मूत्रादि कुरुते अष्टसहस्रगायत्रीजपः प्राणायामश्च । अज्ञानेनोपवीतं विहितं विना पाने त्रयः, मेहने षट् प्राणायामाः । भोजने नक्तम् ।

"आपद्गतो विना तोयं शारीरं यो निषेवते ।
एकाहक्षपणं कृत्वा सचैलं स्नानमाचरेत् ॥
तैलाभ्यक्तस्तथाऽऽचान्तः श्मश्रुकर्मणि मैथुने ।
मन्त्रोच्चारं यदा कुर्यादहोरात्रेण शुद्ध्यति" ॥

आचमनाकरणे सद्यः स्नानमष्टसहस्रगायत्रीजपः । नित्यस्नानं विना भोजने अहोरात्रं न जपेत् । स्नानानन्तरमष्टसहस्रगायत्रीजपः । एकाहातिक्रमेऽहोरात्रोपोषितोऽयुतगायत्रीजपः । ( एवं कार्यम् ) । नित्यकर्मातिक्रमे पतितः । पूजाविच्छेदे द्विगुणमर्चनम् ।

"सन्ध्याकाले त्वतिक्रान्ते स्नात्वाऽऽचम्य यथाविधि ।
जपेदष्टशतं देवीं ततः सन्ध्यां समाचरेत् ॥
एकाहं समतिक्रम्य प्रमादादकृतं यदि ।
अहोरात्रोषितो भूत्वा गायत्र्या वाऽयुतं जपेत् ॥
राष्ट्रभङ्गे नृपक्षोभे रोगार्ते सूतकेऽपि वा ।

देवाग्निद्विजविद्यानां कार्ये महति संस्थिते ॥
सन्ध्यावन्दनविच्छित्तिर्न दोषाय कदाचन ।
मध्याह्ने समतिक्रान्ते सायङ्काले भवेद्यदि ॥
सायं सन्ध्यामुपास्यादौ सन्ध्यां माध्याह्निकीं ततः" ।

अनाहितोऽन्यत्र भक्षणेऽहरुपवसेत् । अपोशानलोपे उपवासः । मौनलोपेऽष्टशतं गायत्रीजपः । घृतहीनं प्राणाहुतिः पश्चाद्घृतभोजने चान्द्रायणम् । बलिकर्माकृतेऽशने (शत) प्राणायामः । अनुद्धृत्य भोजने तदुक्तम् ।

"भोजनादौ बलिं मुक्त्वा समुद्धृत्य हि भोजनम् ।
अनुद्धृत्य तु यो भुङ्क्ते प्राणायामाष्टकं जपेत्" ।

सलवणक्षीरभोजने उच्छिष्टघृतग्रहणे शणपुष्पराजपुष्पभक्षणे चान्द्रायणम् । शूद्राणां भाजने भिन्नभाजनभोजने अहोरात्रोपोषितः पञ्चगव्येन । वटार्काश्वत्थकुम्भीतिन्दुकविषुकोविदारकदम्बबल्लीपलाशपत्रेषु भोजने चान्द्रायणम् । सैन्धवसामुद्रिकलवणव्यतिरिक्तप्रत्यक्षलवणाशने उपवासः । दीपोच्छिष्टाभ्यङ्गोच्छिष्टतैलभक्षणे नक्तम् । पीतोच्छिष्टपाने त्रिरात्रम् । अमेध्य—पतित—चाण्डाल—पुल्कस—रजस्वला—ऽवधूत—विहस्त—कुष्ठी—कुनखि संस्पृष्टानि भुक्त्वा कृच्छ्रं, उच्छिष्टभोजनेऽहोरात्रं, मात्तिक—फाणिक—शाकगोरसलवणघृतहस्तदत्तभोजने उपवासः । (१)ब्राह्मणान्नं शूद्रो ददत् शूद्रान्नं भोजने (ब्राह्मण) उपवसेत् । शूद्रहस्तपानभोजनेऽहोरात्रोपोषितः पञ्चग-

(१) ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददेत् ।

द्वयमेतदभोज्यं स्यात भुक्त्वा तूपवसेदहः । (प्रा०मं० १७ पत्रे) एतच्छ्लोकाभिधायिकेयं पङ्क्तिः । तथा च "ब्राह्मणान्नस्य शूद्रेण-

व्येन । (१) आसनारूढपादो वस्त्रार्धप्रावृतमुखेन दमितं भुक्त्वा कृच्छ्रम् । भोजने मेहने अमेहने मूत्रोत्सर्गे रेतोत्सर्गे त्रिरात्रोपवासः सर्पिषाऽऽहुतीर्जुहुयात् । छत्राक–विड्वराह–लशुन–पलाण्डु–गृञ्जन–वृन्ताक–कूष्माण्ड–कपित्थ–कलिङ्गभक्षणे–अष्टसहस्रगायत्रीजपः । ज्ञाने तु पुनरुपनयनम् । तदुक्तम्—

"लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च (तथा शुनीम्) मसूरिकाम् ।
उष्ट्रं मानुषकेशांश्च रासभीक्षीरभोजनात् ।
उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः" ॥

शुनोच्छिष्टापःप्राशने क्षीरशङ्खपुष्पीं पक्त्वा पिबेत्त्र्यहं स्त्रियोच्छिष्टेऽपि । शूद्रोच्छिष्टापःप्राशने कुशपक्वक्षीरं त्र्यहं पिबेत् । शूद्रवेश्मनि पाकं कृत्वा भोजने तदुक्तम्—

"एकग्रामनिवासी(नां) च यो भुङ्क्ते शूद्रमन्दिरे ।
षष्टिवर्षसहस्राणि भुक्त्वा चान्द्रायणं चरेत्" ॥

परग्रामे तु न दोषः । शूद्राद्येकपङ्क्तिभोजने अहोरात्रोपोषितः पञ्चगव्येन । श्राद्धभोजने गायत्र्या दशकृत्वापः प्राशनम् । संस्काराभोजने उपवासः । आशौचान्नभोजने सान्तपनं, अपां प्राशने पञ्चगव्यप्राशनं त्रिरात्रमभोजनं स्पर्शे स्नानम् । दिवा मैथुने स्नानमुपवासः । परस्त्रियं नग्नं दृष्ट्वा दिनमेकमुपवासः ।

इति कर्मोपयोगिमक्षिताह्निकप्रायश्चित्तम् ।

---

दत्तस्य शूद्रान्नस्य ब्राह्मणेन दत्तस्य भोजने उपवसेत्" एवं पाठो भवितुमुचितः ।

(१) "आसनारूढपादो वस्त्रार्धप्रावृतमुखो भुक्त्वा कृच्छ्रम्" ईदृग् पाठः समीचीनो भाति ।

## ( होमाद्यकरणे प्रायश्चित्तम् । )

अथ होमादिप्रायश्चित्तानि । ततः प्रादुष्करणकालात्यये समस्ताभिर्व्याहृतिभिरेकाज्याहुतिः मुख्यकाले होमः, मुख्यकालातिक्रमे गौणकाले होमः । गौणकालातिक्रमे तु अनादिष्टं वा मनो ज्योतिरित्यनेन चतुर्गृहीतमाज्यं गृहीत्वा सकृज्जुहोति, "ॐमनो ज्योतिर्जुषतामा(ज्यं)ज्यस्य विच्छिन्नं यज्ञठं० समिमन्दधातु । या इष्टा उषसो या अनिष्टास्ताः सन्तनोमि हविषा घृतेन स्वाहा" (आश्व० श्रौ० २।६)। इदं मनस्वते न मम। इत्येकः पक्षः । अथवा अनादिष्टं च। अनादिष्टस्य किं लक्षणम् ( उच्यते ) ।

ततः सङ्कल्पं कृत्वा अमुककर्माकरणजनितप्रत्यवायपरिहारार्थमनादिष्टप्रायश्चित्तं होष्ये । इति सङ्कल्पः ।

तत आज्यस्थाल्यामाज्यनिर्वापः । अधिश्रयणम् । पर्यग्निकरणम् । स्रुवप्रतपनम् । कुशैः सम्मार्जनम् । पुनः प्रतपनम् । निधानम् । आज्यमुद्वास्य लौकिकपवित्रेणाज्योत्पवनम् । अवेक्षणम् । अपद्रव्यनिरसनम् । स्रुवेण होमः । ॐभूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐस्वः स्वाहा । इदं सूर्याय । ॐभूर्भुवः स्वः स्वाहा । इदं प्रजापतये । ॐत्वन्नो ऽग्ने० । ॐसत्वन्नो अग्ने० । ॐअयाश्चाग्ने० । ॐ ये ते शतं० । ॐ उदुत्तमं० । पूर्ववत्त्यागाः । एतदनादिष्टम् ।

केचिन्मते होमत्रयलोपे तन्तुमते चरुः । अथवा चतुर्गृहीतेनाज्येन सकृदाज्याहुतिः । तत्र मन्त्रः—"तन्तुं तन्वन्रजसो भानुम-

न्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् । अनुल्बणं वयत जोगुवामपोमनुर्भव जनया दैव्यं जनं स्वाहा" ॥ ( ऋ० १०।५३।६ ) बहुहोमलोपेऽप्येवम् ।

तदुक्तं गृह्यकारिकायाम्—

"लुप्ते होमत्रये तद्वत्पौर्णमासादिषु त्रिषु ।
तथा चाग्रयणे युग्मे लुप्ते तन्तुमतीं यजेत्" ॥

एवमग्निहोत्रेऽपि । आहिताग्नेस्तु इष्टिरेव, अनाहिताग्नेस्तु चरुः । ततश्चरुप्रकारः । ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा चरुमभिघार्य स्रुवेणैकाहुतिः । ॐअग्नये तन्तुमते स्वाहा । इदमग्नये तन्तुमते न मम । तेनैव स्विष्टकृद्धोमः । ततो भूरादिनवाहुतयः । संस्रवादिप्रणीताविमोकान्तं कुर्यात् । एतद्वैश्वानरचरुप्रायश्चित्तमुक्तम् । तदेव कर्त्तव्यम् । सर्वत्र होमलोपे पक्षत्रयमुक्तम् । एका मनस्वित्याहुतिः । द्वितीयमनादिष्टम् । तृतीयं तन्तुमती यथासम्भवेन कर्तव्यम् ॥

इति होमकालातिक्रमप्रायश्चित्तम् ।

## ( आहुतिविपर्यासे प्रायश्चित्तम् । )

अथाहुतिविपर्यासे प्रायश्चित्तम् । अग्निस्थाने सूर्याहुतिः सूर्यस्थाने अग्न्याहुतिः एवं विपर्यासे, अत्र सङ्कल्पादि द्रव्यान्तरेण होममावर्तते । यदि प्रथमा उत्तराहुतिर्हुता तर्हि उपयमनाद्यावर्तते । उप-

स्थानलोपे प्राणायामत्रयम् । अनुदितभ्रान्तिहोमे कृते प्राणायामत्रयम् । ततो ब्रह्मयज्ञः ।

तदुक्तम्—

"स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा(१) ब्रह्मयज्ञस्त्रिधा स्मृतः" ।। इति ।

ततः पञ्चमहायज्ञार्थमग्निमुद्धृत्य महानसे पाकः कार्यः । शूद्रपतितरजस्वलासूतिकार्थे वर्ज्यम् । तयोः पञ्चमहायज्ञात्पूर्वं भोजननिषेधः । बालापत्यारोगिणीगर्भिणीर्वर्जयित्वा शेषाणां भोजने नियमः । ततः पञ्चमहायज्ञा उद्धृतेनान्नेन कार्याः । पर्युक्षणं विनाऽऽहुतिमात्रे हुते प्राणायामादि पुनः क्रिया । आहुतिविपर्यासे तथैव । आहुतिलोपे बलिलोपे प्राणायामत्रयम् । पञ्चयज्ञविपर्यासे प्राणायामः । देवयज्ञः । सप्तखण्डो वैश्वदेवः । अथवाऽष्टखण्डानि-भूतयज्ञः १ । मणिकबलिः २ । द्वारबलिः ३ । वायुबलिः ४ । दिग्बलिः ५ । मध्यबलिः ६ । उत्तरबलिः ७ । दक्षिणे पितृबलिः ८ । खण्डविपर्यासे प्राणायामत्रयं पुनः क्रिया च । 'बलिविपर्यासे विष्णुस्मरणम् । इदं विष्णुरिति मन्त्रः । ततो नित्यश्राद्धमिति । पितृयज्ञविपर्यासे प्राणायामत्रयं पुनः क्रिया च । एतेषां पञ्चमहायज्ञानामेकैकस्याकरणे उपवासः प्रायश्चित्तम् । उपवासेऽशक्तस्य गायत्रीसहस्रजपः । अथवा ब्राह्मणभोजनम् । अथवा द्वादशप्राणायामाः । तदुक्तम्—

"उपवासस्तु गायत्र्याः सहस्रं, विप्रभोजनम् ।

---

(१) नान्यत्रेति निमित्तकात् । इति गदाधरभाष्यपाठः ।

प्राणायामा दशद्वौ(दशाष्टौ) च सममेतच्चतुष्टयम्" ॥

प्रायश्चित्तकाण्डे—

"पञ्चानामपि यज्ञानामेकैकाकरणो नरः ।

उपवासं प्रकुर्वीत सावित्रीजपमेव वा ॥

अष्टोत्तरसहस्रं तु पुनः पूतो भवेन्नरः" ।

सव्येऽपसव्यम् , अपसव्ये सव्यं प्राणायामत्रयम् । निर्णेजनविपर्यासे विष्णुस्मरणम् । लोपे प्राणायामत्रयम् । नृयज्ञब्रह्मयज्ञविपर्यासे प्राणायामत्रयम् । एकभक्तत्रयं वा । सर्वलोपेऽर्द्धकृच्छ्रः । रोगपीडानिमित्तलोपे द्रव्याभावे पादकृच्छ्रः । तस्य स्वरूपम् । एकभक्तं नक्तमयाचितमुपवासश्चेति । अत्यन्तापत्तौ सर्वस्याकरणे उपवासः । ततः पञ्चयज्ञात्पूर्वं दम्पत्योर्भोजने पञ्चयज्ञलोपः । पञ्चयज्ञात्पूर्वं स्त्री चेद् भोजनं करोति तर्हि तस्या उपवासः प्रायश्चित्तम् । सायंहोमादिसर्वं प्रथमप्रहरपर्यन्तं कार्यम् । ( आदौ वैश्वदेवः पश्चाद्धोमः ) । तदुक्तं परिशिष्टे—

"स्नानादीनि दिवोक्तानि रात्रौ चेत्कारणान्तरात् ।

क्रियन्ते दिवसोक्तानि प्रथमे रात्रियामके" ॥

ततो दर्शपौर्णमासिकं पक्षादिकर्म यावज्जीवं कार्यं दैवान्मानुषात्प्रतिबन्धाद्वा स्थालीपाकाऽसम्भवे गौणकालेऽनादिष्टपूर्वकं कुर्यात् । तत्राप्यसम्भवे तल्लोपः । लोपेऽनादिष्टमात्रम् । संलग्नपक्षादित्रयलोपे पुनराधानम् । तदुक्तम्—

"होमद्वादशलोपे तु स्थालीपाकत्रयस्य च ।

पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥

अग्निर्विच्छिद्यते त्वेतावाचार्यः शौनकोऽब्रवीत्" ।

वैश्वदेवपितृयज्ञस्यापवादमाह कात्यायनः—

"परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम् ।
पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्" ॥

गङ्गाधरेण होमद्वयलोपे वैश्वानरश्चरुः पक्षादि(द्वय)होमलोपे च भयादौ त्रिरात्रहोमलोपे तन्तुमते चरुः । उपाकर्मद्वयलोपे वैश्वानरश्चरुः । वैश्वदेवद्वयलोपे वैश्वानरश्चरुः पिण्डपितृयज्ञे चोक्तः । अकृताग्रयणस्य नवान्नपक्वभोजनेऽतिकृच्छ्रपूर्वको वैश्वानरश्चरुः । पिण्डपाणिसम्मितेनान्नेन प्राजापत्यसहातिकृच्छ्रः । वैश्वानरचरोस्तु क्रिया पूर्वोक्ता ।

इति पक्षादिप्रायश्चित्तम् ।

## अथ परिसमूहनादिविपर्यासे प्रायश्चित्तम् ।

दर्भैः परिसमूहनादि पञ्चपदार्थविपर्यासे पुनर्यथार्थक्रमेण कार्यं नानादिष्टमिति । संस्रवभक्षणपर्यन्तं ब्रह्मोपवेशनं, प्रणयनं स्थालीपाकपर्यन्तं, आज्याहुतिपर्यन्तं परिस्तरणम् । स्वीकारपर्यन्तं पात्रासादनम् । आज्यमोक्षणपुत्पवनपर्यन्तं पवित्रकरणम् । पर्युक्षणपर्यन्तं मोक्षणीसंस्कारः । स्वकर्मपर्यन्तं पात्रमोक्षणम् । होमाग्रार्थ-

माज्यसंस्कारः । होमार्थमेव स्रुवसंस्कारः । तथा उपयमनादानादि समिदाधानं पर्युक्षणं प्रधानाहुतिमात्रार्थमाघारावाज्यभागौ च । यत्राज्यव्यतिरिक्तेन हविषा प्रधानहोमस्तत्र प्रधानाकरणे तदनन्तरं पुनः स्थालीपाकेन प्रधानहोमः । प्रधानहोमे जाते आज्याहुतयः स्विष्टकृच्चावर्तेते । प्रधानाहुतिविपर्यासे पुनरपि यथाक्रमेण करणम् । पूर्वोक्तसर्वनिमित्तेऽङ्गाहुतिविपर्यासे लोपे संस्रवाकरणे तदभक्षणे मार्जनवरदानब्राह्मणभोजनबलिलोपे एतेषां प्रत्येकमनादिष्टम् ।

ततश्चरौ श्रप्यमाणे प्राग्दिश्युत्सेकेऽग्नये स्वाहेति स्रुवाहुतिं, यदि दक्षिणात यमाय स्वाहेति यदि पश्चिमतो वरुणाय स्वाहेति यद्युत्तरतः सोमाय स्वाहेति युगपत्सर्वत उत्सेके सर्वा आहुतीर्जुहुयात् । विदिक्षु सेके व्याहृतीर्जुहुयात् । उत्सिक्तं चरुमाज्येनाप्याययति । "(१)आ प्यायस्व समेतु, (२)सन्ते पयांऽसि" इति द्वाभ्यामिन्द्राहुतिं च जुहुयात् । चर्वादीनां निःस्रावे दुर्गादिगणप्रायश्चित्तम् ।

अथोदकादिना कीटादि सर्वेष्वग्निषूपघातेषु पुनस्त्वेति समिन्धनम् ।

ततः हविषामुपरि यदि काक आसीत तदेदं विष्णुर्विचक्र-

---

(१) ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ( शु० य० सं० १२।११२ ) ॥

(२) सन्ते पयांऽसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांऽस्युत्तमानि धिष्व ( वा० सं० १२।११३ ) ॥

म'(१)इति स्रुवाहुतिं जुहुयात् । हविरन्तरमुत्पाद्य प्रचरेत् ।

ततो यजमानस्य कर्मकाले वाचनानां भ्रेषे उदात्तादिस्वर-भ्रेषेऽक्षरपदमात्राभ्रेषे वा आभिर्गीर्भिरिति स्रुवाहुतिं जुहुयात् । "आभिर्गीर्भिर्यदतो न ऊनमाप्याय हरिवो वर्द्धमानः । यदा स्तोतृभ्यो महि गोत्रारुजासि भूयिष्ठभाजो अधते स्याम स्वाहा" । इदमिन्द्राय हरिवते न मम ।

ततः प्रणीतास्कन्दने विशेषः—उदकमेतु राजेत्यभिमृशेत् ।

"ॐ एतु राजा वरुणो रेवतीभिरस्मिन्त्स्थाने तिष्ठतु मोद-मानः । अरिष्टा अस्माकं वीरा मा परासेचि मत्पयः"। (का०श्रौ० २५।५।२८)

आज्यतण्डुलादिस्कन्दने "भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति" (य०सं० २।२) मन्त्रेणाभिमर्शनम् ।

ततः श्वमार्जाराद्यन्तरागमने "इदं विष्णुरि"ति मन्त्रेण भ-स्मनोदकधारां निनयेत् ।

अथवा हविषां यत्र कुत्रचित् स्कन्न—छिन्न—भिन्न—भग्न—नष्ट—दुष्ट—विपरीतभक्षण—स्यन्दन—स्नापित—स्फुटितादिनिमित्तेषु, अग्न्य जा—श्व—श्वान—बिडाल—काक—खर—मृग—पशु—यक्ष—राक्षस—स-रीसृपादिष्वग्नीनामन्तरात्मृत्विजामन्तरा गतेषु द्वादशगृहीतेन स्रुचं पूर-यित्वा मनस्वतीं व्याहृतीस्तिस्रो जुहुयात् ।

ततः शवाग्निसूतिकाग्निपतिताग्न्यन्त्यजाग्नीनां संसर्गे ऽनादिष्टं

---

(१) इदं विष्णुः पूर्वः ९० पत्रे टि० द्रष्टव्यः ।

"ताᳬसवितुस्तत्सवितुर्विश्वानि देव सवितरि" इत्येतैः प्रक्षालनं पुनस्त्वेति समिन्धनम्। आज्येनाग्निना संसर्गे समिन्धनमेव।

ततः पत्नी रजस्वला दिनचतुष्टयमनधिकारिणी सूतिका पुत्रवती विंशतिदिनानि स्त्रीप्रसूता मासपर्यन्तं, ततस्त्यागे दानेऽधिकारः। रजस्वलायां सूतिकायां वा पत्न्यां यजमानेन प्रवासो न कार्यः। यदि प्रवासं करोति तदा पुनराधानं, रजस्वलायां पत्न्यां सत्यामग्निगमने पुनराधानं नास्ति, मन्थनं कृत्वा कर्मणां प्रवृत्तिः। सूतके मृतकेऽग्निगमने पुनराधानम्। सूतिकायामपि पत्नी विरजस्का भवति तदा (शाक)पाकं करोति। दशाहादूर्ध्वं प्रोषिते सति नित्यानि कुर्यान्नैमित्तिकं श्राद्धं वर्जयित्वा। सूतिकायां पत्न्यामग्निधारणं न कर्तव्यम्। सायंप्रातर्होमपक्षादिकर्म पिण्डपितृयज्ञान् वर्जयित्वाऽन्यमपि न क्रियेत द्वादशरात्रिविकल्पः। निवृत्तिपक्षेऽग्निधारणमेव यदाग्निः शान्तो भवति तदा पुनराधानमुभयथा पाकनियमः। होमस्वीकारपक्षे होमाकरणे पाकस्य लोपे पुनराधानम्। सूतके सति पञ्चयज्ञानामावसथ्यस्य च निवृत्तिः। पाकार्थमुद्धृत्य पाके क्रियमाणे सूतके मृतके वाऽसगोत्रेण कृते पुनः संसर्गः। होमपक्षादिपिण्डपितृयज्ञकर्म कार्यं सङ्कल्पत्यागौ यजमानपत्न्याश्च। तस्यास्त्वनधिकारे(ण) त्यागदानं नास्ति। सपिण्डसम्बन्धिनामाशौचेऽपि प्रवासनिवृत्तिः। पाकार्थमुद्धृत्य पाके कृते भ्रान्त्या संसर्गो न कृतस्तदोत्तरकर्मण्यपादावाज्यसंस्कारं कृत्वाऽनादिष्टं हुत्वोत्तरकर्मारम्भः। मातापितृमरणेऽथवा स्वगृहे सपि-

गुडमरणेऽप्यावसगोत्रेण पाकः कार्यः । एवमग्निशुश्रूषा च । असपिण्डो मणिकोदकं न गृह्णाति । दर्शश्राद्धलोपः । सांवत्सरिकमपरपाक्षिकं चाशौचान्ते । असपिण्डेन मणिकप्रक्षालनं मन्त्रेणोदकप्रक्षेपः । दशाहमध्य उदकक्षये जातेऽसगोत्रिणा मन्त्रवर्ज्जं जलप्रक्षेपः कार्यः । सूतके वर्तमानेऽनादिष्टप्रायश्चित्ते सत्यसगोत्रेण कारयेत् । श्रवणाकर्मोपक्रमणे अशौचातिपत्तौ सायम्प्रातर्होमे बलिदानमसगोत्रिणा कारयितव्यं पिण्डपितृयज्ञचरुश्च । अशौचरजोदर्शनादिना इन्द्रयज्ञातिक्रमे जाते तदा शुद्ध्यनन्तरं कर्तव्यं पिण्डपितृयज्ञचरुश्च । आग्रहायणीपर्यन्तमयमेव न्यायः । एवं प्रथमाष्टकाक्रिया आरब्धे द्वितीयाष्टकादिकं कार्यम् । सर्वत्र प्रथमारम्भं मुख्यकाले करोति । ( रोगग्रस्ताऽथवा दुष्टभावयुक्ता सति कर्मसन्निहिता न भवति तदा कर्मवैगुण्यं नास्ति ) । प्रथमवर्षे श्रवणाकर्मारम्भो न घटते तदाऽनादिष्टपूर्वं कर्मारम्भः । इन्द्रयज्ञादौ पृथगनादिष्टं नास्ति सर्वत्र गौणे प्राप्तेऽनादिष्टमितिवचनात् । एवमष्टकाविषये पक्षादिपिण्डपितृयज्ञदर्शश्राद्धमापरपाक्षिकं श्रवणाकर्मादिप्रत्येकलोपे उपवासप्रायश्चित्तम् ।

केचित्तु प्रायश्चित्ते कृते कर्मकरणं कृताकृतं तदुक्तम्—

“प्रायश्चित्ते कृते पश्चादतीतमपि कर्म च ।
कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः” ॥

अथारण्यौ मन्थने क्रियमाणेऽग्न्यसम्भवे जाते सति तत्रासम्भवभ्रान्त्याऽन्यस्थाने मन्थनेनाग्न्युत्पत्तौ पूर्वमन्थनस्थाने पूर्वाग्निद-

र्शने जाते सत्युभयोरन्योर्मृण्मयपालिकयोर्ग्रहणं कृत्वोत्तरमन्थनसम्भवाग्निं प्रदीप्तं कृत्वा पालाशादियज्ञियवृक्षसमिधं द्वादशाङ्गुलां "गृहीत्वा ॐ० समितसङ्कल्पेथामि"तिद्वाभ्यामुत्तरमन्थनसम्भवाग्नौ प्रागग्रां क्षिपेत्। पश्चात्पञ्चभूसंस्कारपूर्वकं पूर्वमथिताग्निं खरे स्थापयित्वाऽरणीखण्डमात्रे विद्यमानेऽरण्यन्तरोपादानं कार्यम्। उत्तराया अपि क्षये जाते सत्यधरारण्योरेवोत्तरा ग्राह्या। अधराया अत्यन्तक्षये जाते सति अग्निधारणे परमयत्नः कार्यः। तत्र नूतने अरणी सलक्षणे आनीय "अयं त" इत्यग्नेः समारोपं कृत्वा शान्तेऽग्नौ मन्थनं ततः स्थापनम्। अरण्योर्वाऽन्त्यजादिस्पर्शे रेतोविण्मूत्रादिसंसर्गे सति सम्भवे पुनराधानम्। असम्भवे "पुनस्त्वे"ति समिन्धनमन्त्रेण यज्ञियकाष्ठप्रक्षेपः। अरण्योः क्षालनं तक्षणं च, पात्राणामुपहतौ प्लावनं तक्षणं च पादस्पृष्टे लंघिते वा पात्राणामुपहतौ क्षालनं तक्षणमेव अरण्योस्तु तक्षणमेव।

अथ साग्निकस्य पराग्निभोजने प्राजापत्यं दर्शपौर्णमासे त्रिगुणं उत्सन्नाग्निः प्रतिदिनं विवाहोन्मुखस्य त्रिगुणं कस्यचिदपि गृहे श्राद्धादौ न भोक्तव्यम्।

कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः॥

इति श्रीपुष्करपल्लीस्थशिवप्रसादपाठककृते स्मार्तोल्लासे औपासनकर्मणि पुनराधानादिप्रायश्चित्ताध्यायः समाप्तः।

# THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

**Edited by**

GOPINATH KAVIRAJ, M. A.

**No. 1—The Kiraṇāvalī Bhāskara, (किरणावलीभास्कर) [वैशेषिक],** a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A.
Rs 1-12

**No 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त],** by Raṅgoji Bhaṭṭa,
Ed. with Introduction etc by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs 1-12

**No 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त],** by Madhusūdana Sarasvatī
Edited with Introduction etc by Rāmājñā Pāṇḍeya Vyākaraṇāchārya Rs 1-12

**No. 4—The Kusumāñjali Bodhanī, (कुसुमाञ्जलिबोधिनी) [न्याय],** a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja
Ed. with Introduction etc. by Gopinath Kaviraj, MA, Rs 2-0

**No. 5—The Rasasāra (रससार) [वैशेषिक],** a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīnd
Ed. with Introduction etc. by Gopīnath Kaviraj, MA. Rs. 1-2

**No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा],** by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

**No. 6-(Part II)—Ditto** Ditto Rs. 0-12

**No. 7-(Part I)-The Yoginīhṛdaya dīpikā, (योगिनीहृदयदीपिका) [तन्त्र],** by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A.
Rs. 1-8

**No 7—( Part II ) Ditto** Ditto Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.

Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)—The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on S'āṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.

Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-15

No. 10—(Part I)—The Siddhāntaratna, (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa.

Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10—(Part II)—Do. Do. Rs. 2-12

No. 11—The S'rī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.

Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12—The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākara Bhaṭṭa.

Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13—The Siddhasiddhānta Saṅgraha, (सिद्धसिद्धान्तसंग्रह) [नाथमार्ग] by Balabhadra.

Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14—The Triveṇikā, (त्रिवेणिका) [अलङ्कार], by Āśādhara Bhaṭṭa.

Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15—(Part I)—The Tripurārahasya. (Jñāna Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड)। [तान्त्रिकदर्शन],

Ed. with a Prefatory Note by Gopinātha Kavirj, M.A Rs. 0-14

No. 15—(Part-II)—Do. Do Rs. 2-4

No. 15—(Part III)—Do. Do. Rs. 2-0

No. 15—(Part IV)—Do. with Introduction, etc. by Gopinath Kaviraj, M. A.

No. 16–The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chiranjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1–2

No. 17–The Nyāya Kalikā, (न्यायकलिका) [न्याय] by Bhaṭṭ Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A. D. Litt. Rs 0–14

No. 18–(Part I)–The Gorakṣa Siddhānta Saṅgraha. (गोरक्षसिद्धान्तसंग्रह) [नाथमार्ग],
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A., Rs. 0–14

No. 19–( Part. I )–The Prākṛita Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण]
by Vararuchi with the Prākṛita Sañjīvanī by Vasantarāja and the Subodhinī by Sadānanda.
Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A. Rs 2–4

No. 19–( Part.II ) Ditto Ditto Rs. 2–12

No 19—( Part. III ) Introduction etc. ( In Preparation. )

No. 20–The Mānsatattvaviveka ( मांसतत्त्वविवेक ) [ धर्मशास्त्र ], by Viśvanātha Nyāyapañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Pandit Jagannātha Sāstri Hoshing Sāhityopādhyāya, with a Foreword by Pandit Gopi Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0–12

No. 21–( Part I ) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [ न्याय ], by Jayarāma Nyāya Pañchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Dr. Mangal Deva Sāstrī, M. A., D. Phil. ( Oxon ), Librarian, Govt. Sanskrit Library, Sarasvati Bhavana, Benares. Rs. 1–4

No. 21–( Part–II ) Ditto Ditto Rs. 2–0

No. 22–The Dharmānubandhi Slokachaturdaśī ( धर्मानुबन्धिश्लोकचतुर्दशी) [धर्मशास्त्र], by S'rī Seṣa Kṛṣṇa with a Commentary by Rāma Pandit.

Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1-0

No. 23–The Navarātrapradīpa (नवरात्रप्रदीप) [धर्मशास्त्र], by Nanda Paṇdit Dharmādhikārī.

Ed. with Introduction etc. by Vaijanātha S'āstrī Varakale, Dharmaśāstra-S'āstrī, Sādholāl Research Scholar, Sanskrit College, Benares, with a Foreword by Pāndit Gopinath Kaviraj, M. A., Principal, Government Sanskrit College, Benares. Rs. 2-0

No. 24–The S'rī Rāmatāpinīyopaniṣad (रामतापिनीयोपनिषद्) [उपनिषद्], with the Commentary called Rāma Kāśikā in Pūrvatāpinī and Ānandanidhi in Uttaratāpinī by Ānandavana.

Ed. with Introduction etc. by Anantarāma S'āstrī Vetāla Sāhityopādhyāya, Post-Āchārya Scholar, Govt. Sanskrit College, Benares, with a Foreword by Pandit Gopī Nātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 3-12

No. 25–The Sāpiṇḍyakalpalatikā ( सापिण्ड्यकल्पलतिका ) [ धर्मशास्त्र ], by Sadāśivadeva alias Āpadeva with a commentary by Nārāyaṇa Deva.

Edited with Introduction etc. by Jagannātha S'āstrī Hośiṅga Sāhityopādhyāya, Sādholāl Research Scholar, Govt. Sanskrit College, Benares. Rs. 1-4.

No. 26–The Mṛgāṅkalekhā Nāṭikā ( मृगाङ्कलेखानाटिका ) [नाटिका], by Viśvanātha Deva Kavi.

Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Asst. Librarian, Government Sanskrit Library, Benares. Rs. 1-0

No. 27–The Vidvachcharita Pañchakam ( विद्वच्चरितपञ्चकम् ) [निबन्ध] By Nārāyana S'āstri Khiste, Sāhityacharya, Assistant Librarian, Govt. Sanskrit College, Sarasvati Bhavana Library, Benares. With an Introduction by Gopināth Kavirāja, M. A., Principal, Govt. Sanskrit College, Benares. Rs 2-0

No. 28–The Vrata Kos'a (व्रतकोश) [धर्मशास्त्र], by Jagannātha S'āstri Hosiṅga Sāhityopādhyāya, late Sadholal Research Scholar, Sanskrit College, Benares With a Foreword by S'rī Gopināth Kaviraja, M. A., Principal, Govt Sanskrit College, Benares. Rs. 4–0

No. 29–The Vṛitti dīpikā (वृत्तिदीपिका) [व्याकरण], By Mauni S'rī Kṛṣṇ Bhatta.
Edited with Introduction etc by Pt. Gangadhara S'astri Bhāradvāja, Professor, Govt. Sanskrit College, Benares. Rs. 1–2

No. 30–The Padārtha Maṇḍanam ( पदार्थमण्डन ) [ वैशेषिक ], By S'rī Veṇīdatta.
Edited with Introduction etc. by Pandit Gopāla S'āstri Nene, Professor, Govt. Sanskrit College, Benares. Rs. 0–14

No. 31–( Part I)–The Tantraratna ( तन्त्ररत्न ) [ मीमांसा ], by Pārth Sārathi Mis'ra.
Edited by M. M. Dr. Ganganatha Jha, M. A, D. Litt, Vice-Chancellor, Allahabad University Allahabad Rs. 1–14

No. 31–( Part II ) Ditto. Ditto.
Edited by Pt. Gopāl S'āstri Nene, Govt. Sanskrit College, Benares. Rs. 2–4

No. 32–The Tattvasāra ( तत्त्वसार ) [ न्याय ], by Rākhāldasa Nyāyaratna.
Edited with Introduction etc by. Harihara S'astri, Benares Hindu University. Rs. 1–0.

No. 33–( Part I ) The Nyaya Kaustubha ( न्यायकौस्तुभ ) [ न्याय ], by Mahadeva Puntamkar.
Edited with Introduction etc by Umes'a Mis'ra, M. A., Allahabad University, Allahabad. Rs. 3–4

No. 34–( Part I ) The Advaita Vidyātilakam ( अद्वैतविद्यातिलकम् ) [ शाङ्करवेदान्त ], by S'rī Samarapuṅgava Dīkṣita.
With a Commentary by S'rī Dharmayya Dīkṣita.
Edited with Introduction, etc, by Ganapati Lal Jha, M. A., Sadholal Research Scholar, Govt. Sanskrit Library, Benares. Rs. 1–4

No. 35–The Dharma Vijaya Nāṭaka ( धर्मविजयनाटक ) [ नाटक ], by Bhūdeva S'ukla.

Fdited with Introduction etc, by Pandit Nārāyaṇa S'āstri Khiste, Asst. Librarian, Govt. Sanskrit Library, Benares. Rs. 1-4

No. 36-The Ānanda Kanda Champū ( आनन्दकन्दचम्पू ) [ चम्पू ], by Mitra Miśra.

Edited, with a Foreword by Gopinath Kaviraj, M. A, by Nanda Kishore Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 3-8

No. 37-The Upanidāna Sūtra ( उपनिदानसूत्रम् ) [ वेद ], Edited with Introduction by Dr. Mangaldeva S'āstri, M. A., D. Phil. Rs. 1-0

No. 38-The Kiranāvali prakās'a dīdhiti ( Guṇa ), ( किरणावली-प्रकाशदीधिति ) [ वैशेषिक ], by Raghunāth S'iromani. Edited by Pandit Badrināth Sāstri, M. A., Lucknow University Rs. 1-12

No. 39-The Rāma Vijaya Mahākāvya, ( रामविजयमहाकाव्य ) [ काव्य ] by Rupanātha.

Edited by Pt. Ganapatilal Jha, M. A. Rs. 2-0

No. 40-(Part I) The Kālatattva Vivechana( कालतत्त्वविवेचन ) [ धर्मशास्त्र ] by Raghunātha Bhaṭṭa.

Edited with a Foreword by Gopinātha Kaviraja M.A by Nanda Kishore S'arma Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4-0

No. 40-( Part II ) Do Do Rs. 3-8

No. 41-( Part I ) The Siddhānta Sārvabhauma ( सिद्धान्तसार्वभौम ) [ ज्योतिष ], by S'rī Munīśvar .

Edited with Introduction etc. by Jyautiṣāchārya Pandit Murlidhara Ṭhakkura, late Sadholal Scholar, Sanskrit College, Benares Rs 3-0

No. 41-( Part II ) Do. Do.

No. 42-The Bheda Siddhi ( भेदसिद्धि ) [ न्याय ], by Vis'vanātha Pañchānana Bhaṭṭāchārya.

Edited with notes etc., by Nyāya Vyākaraṇāchārya Pandit Sūrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares. Rs. 1-12

No. 43-( Part I ) The Smārtollāsa ( स्मार्तोल्लास ) [ कर्मकाण्ड ],
by S'iva Prasāda.
Edited with Introduction, notes, etc, by Vedāchārya Pandit Bhagavat Prasad Miśra, Professor, Govt. Sanskrit College, Benares. Rs. 1-8

No. 43-( Part II ) Do. Do.

No. 44-( Part I ) S'ūdrāchāra S'iromani (शूद्राचारशिरोमणि) [धर्मशास्त्र]
Edited by Sāhityāchārya Pandit Nārayan S'astri Khiste. Rs, 2-4

No. 45-( Part I ) Kiranāvalī Prakāśa (Guna) (किरणावली प्रकाश-गुण)
[ वैशेषिक ], by Vardhamāna.
Edited, with a Foreword, by Pt. Gopinath Kaviraj M., A., by Pandit Badrinath S'astri, M. A., Lucknow University. Rs. 1-8

No. 46-( Part I ) Kāvya prakāśa dīpikā (काव्यप्रकाशदीपिका) [अलङ्कार]
by S'rī Chandī Dāsa.
Edited by S'ivaprasāda Bhaṭṭāchārya, M. A., Professor, Presidency College, Calcutta. Rs. 1-12

No. 47-Bhedajayaśrī ( भेदजयश्री ) [ माध्ववेदान्त ], by S'rī Tarkavāgīśa Bhaṭṭa Venīdattāchārya,
Edited with Introduction etc, by Pandit Tribhuvan prasad Upādhyāya, M. A., Inspector of Sanskrit Pāṭhashalas, United Provinces, Benares. Rs. 1-4

No. 48-Samyak Sambuddha bhāṣitam Buddhapratimālakṣanam
( सम्यक्संबुद्धभाषितं प्रतिमालक्षणम् ) [ शिल्पशास्त्र ],
With the Commentary Sambuddhabhāṣita-pratimā lakṣana Vivaranī. Critically edited with Introduction etc by Haridās Mitra, M, A, Viśvabhārati, S'āntiniketana. Rs. 1-4

No. 49-Bhedaratna ( भेदरत्न ) [ न्याय ] by Sankara Miśra,
Edited with Introduction etc, by Pandit Sūryanārāyana S'ukla, Professor, Govt. Sanskrit College, Benares. Rs. 1-8

No. 50-Mātrikā Chakra Viveka ( मातृकाचक्रविवेक ) [ तन्त्र ], by Svatantrānanda Nātha, with a Commentary.
Edited by Pandit Lalita Prasad Dabral Vyākarnāchārya.

**With a Foreword by Pt Gopināth Kavirāj, M A., Principal** Govt. Sanskrit College, Benares.

No. 51-52. Advaita Siddhānta Vidyotana(अद्वैतसिद्धान्तविद्योतन) [वेदान्त] by **Brahmānanda Sarasvati**

and

Nṛisimha Vijnāpana (नृसिंहविज्ञापन) [वेदान्त], by Nṛisimhāśrama.

Edited with notes, Introduction etc. by Pandit Sūrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares,

No. 53-Nṛisimha Prasāda-Vyavaharsāra ( नृसिंहप्रसाद्-व्यवहारसार )
[ धर्मशास्त्र ], by Dalapati Rāja.

Edited with Introduction etc. by Pandit Vināyaka S'āstri Tillu, Research Scholar, Sanskrit College, Benares.

No. 54-Nṛisimha Prasāda-Prāyaśchitta Sāra ( नृसिंहप्रसाद् प्रायश्चित्तसार)
[ धर्मशास्त्र ], by Sri Dalapati Rāja.

Edited by Pandit Nanda Kishore Sharma and Nanda Kumar Sharma Sahityacharya.

No. 55-Nṛisimha Prasāda-S'rādha Sāra (नृसिंहप्रसाद् श्राद्धसार) [धर्मशास्त्र].

Edited by Pandit Vidyadhara Miśra, College of Oriental Leraning, Benares Hindu University, Benares.

No. 56-Bhagavannāma Mahātmya Samgraha ( भगवन्नाममाहात्म्यसंग्रह )
[ भक्तिशास्त्र ], by Raghunathendra yati, with Com. by Ananta S'āstri Phadke.

Edited by Pt. Ananta S'āstri Phadke.

## Works in the press

No. 1. Dakṣiṇāmūrti Samhitā ( दक्षिणामूर्तिसंहिता ) [ तन्त्र ],

Edited by Pt. Nārāyna S'āstri Khiste.

No. 2. Ās'valāyana S'rauta Sūtra with Sidhhānti Bhāshya (सिद्धान्तिभाष्यसहित आश्वलायनश्रौतसूत्र) [वेद],

Edited by Dr. M. D. S'āstri, M. A., D. Phil.

No. 3. Nīti mañjarī (नीतिमञ्जरी) [वेद], by Dyā Dvivedi.
Edited by Dr. Mangal deva Sastri. M. A., D. Phil.

No. 4. Nyāya Kaustubha ( Part II ) Anumānakhaṇḍ (न्यायकौस्तुभ-अनुमानखण्ड) [न्याय], by Mahādeva Puntamkar.
Edited by Pt. Goswami Dāmodara S'āstri.

No. 5. Mīmānsā Chandrikā ( मीमांसाचन्द्रिका ) [ मीमांसा ], by Brahmānanda Sarsvati.
Edited by Pt, Haran Chandra Bhaṭṭāchārya S'āstri.

No. 6. Gaṇita Kaumudī (गणित कौमुदी) [गणित], by Nārāyaṇa Pandit
Edited by Pt. Padmakar Dvivedi.

No. 7. Kiranāvali prakāśa, ( Part II) ( किरणावली प्रकाश ) [वैशेषिक], by Vardhamāna Upādhyāya.
Edited by Pt. Badrināth S'āstri, M. A.

No. 8. Tantraratna (Part III) (तन्त्ररत्न) [ मीमांसा ], by Partha Sārathi.
Edited by Pt. Gopal Sāstri Nene,

No. 9. S'ūdrāchāra S'iromaṇi (Part II) (शूद्राचारशिरोमणि) [धर्मशास्त्र], by S'eṣa Kṛṣṇa.
Edited by Pt. Nārāyana S'āstri Khiste.

No. 10. Kāvya prakāśa dīpikā ( Part II ) ( काव्यप्रकाशदीपिका ) [ अलङ्कार ], by S'ri Chaṇḍīdāsa.
Edited by Pt S'ivaprasāda Bhaṭṭāchārya, M. A.

No. 11. Smārtollasa ( Part III ) ( स्मार्तोल्लास ) [ कर्मकाण्ड ], by Siva prasada. Edited by P. Bhagavata prasād Miśra.

No. 12. Kālatattvavivechana ( Part III ) (कालतत्त्वविवेचन) [धर्मशास्त्र], by Ragunātha Bhaṭṭa.
Edited by Pt Nanda kishore Sharma.

No. 13. Siddhānta Sārvabhauma ( Part-III ) ( सिद्धान्तसार्वभौम ) [ ज्यौतिष ], by Munīśvara.
Edited by Pt. Murlidhar Thakkur.

## Works in the press.

No. 14. Upendra Vijnāna Sūtra ( उपेन्द्रविज्ञानसूत्र ) [ दर्शन ],
Edited by Dr. M. D. Shastri.

No. 15. Nyāyāmṛita Saurabha ( न्यायामृतसौरभ ) [ माध्ववेदान्त ], by Vanamāli.
Edited by Pt. Nrisimha Achārya.

No. 16. Vāsiṣṭha Darśana (वासिष्ठदर्शन) [वेदान्त],
Edited by Dr. B. L. Atreya M.A., Ph. D. Professor, Benares Hindu University, Benares.

# THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its Evolution, by Gaṅgānātha Jhā.

(b) The View-point of Nyāya Vaiśeṣika Philosophy, by Gopinath Kaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 1-12

Vol. II—

(a) Paraśurāma Miśra alias Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) S'tudies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha S'armā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vira S'aiva Philosophy, by Gopinath Kaviraj.

(j) Nyāya Kusumāñjali ( English Translation ), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇa S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the Late Col. G. A. Jacob.

(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgā-nātha Jha.

(c) Theism in Ancient India, by Gopintha Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamal Bhaṭṭāchārya.

(f) Indian Dramaturgy, by P. N. Pātankar. Rs 5.

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgā-nātha Jha.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Ṛgveda–Prātiśākhya, by Maṅgala Deva S'āstri.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Ramayanic Age, by Manmatha natha Roy

(f) Satakāyavāda: Causality in Sāṅkhya, by Gopinatha Kaviraj.

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expension of the Aryans. by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools, by G.L. Sinha. Rs 5.

Vol. V—

(a) Ancient Home of the Aryans and their migration to India by A. C. Ganguly.

(b) A Satrap Coin, by Shyamalal Mehr.

(c) An Estimate of the Civilisation of the Vanaras as depicted in the Rāmayaṇa, by Manmatha nātha Roy.

(d) A Comparison of the Contents of the Ṛgveda, Vajasaneya, Tattirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva S'āsti.

(e) Foramal Training and the Ancient Indian Thought, by G.L. Sinha.

(f) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinath Kavirāj.

(g) A Descriptive Index to the names in the Rāmāyaṇa, by Manmatha nātha Roy.

(h) Notes and Queries, (1) Virgin Worship, by Gopinath Kaviraj. Rs. 5

Vol. VI—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(b) Some Aspects of the History and Doctrines of the Nāthās, by Gopinath Kaviraj.

(c) An Index etc. the Ramayana, by Manmatha nātha Roy.

(d) Studies in Hindu Law by M. M. Gaṅganatha Jha.

(e) The Mimamsa manuscripts in the Govt. Sanskrit Library (Benares), by Gopinātha Kavirāj.

(f) Notes and Queries, by Gopinātha Kavirāj.

Vol. VII.

(a) Bhāmaha and his Kāvyālaṅkār, by Baṭukanātha S'armā and Baladeva Upādhyāya.

(b) Some variants in the readings of the Vais'eṣika Sūtras, by Gopinātha Kavirāj.

(c) History and Bibliography of Nyāya Vais'eṣika Literature, by Gopinātha Kavirāj.

(d) An attempt to arrive at the correct meaning of some obscure Vedic words, by Sītāram Joshi.

(e) A comparison of the contents of the Rig Veda, Vajasaneya Taittiriya, and Atharva Veda (Chāturadhyāyika) Prātis'ākhyas, by Mangal Deva Shāstri.

(f) An Index to the Ramayana, by Manmatha Nātha Roy.

(g) An Index to S'abrar's Bhāṣya, by the late Col. J. A. Jacob.

(h) Gleanings from the Tantras, by Gopinātha Kavirāj.

(i) The date of Madhusudana Srarswati, by Gopinātha Kavirāj.

(j) Descriptive notes on Sanskrit Manuscripts, by Gopinātha Kavirāj.

(k) A note on the meaning of the word Parārdha, by Umes'a Mis'ra. Rs. 5

Vol. VIII.

(a) Indian Philosophy, by Tarakanatha Sanyal.

(b) An Index to the Rāmāyana, by Manmatha Nath Roy.

(c) Index to S abara's Bhāṣya, by the late Col. J. A. Jacob.

(d) Hari Svāmi, the commentator of S'atapatha Brāhmana and the date of Skanda Svami the commentator of the Rigveda, by Mangaladeva S'āstri.

(e) Mysticism in Veda, by Gopināth Kaviraj.

(f) The Deva dāsī: a brief history of the Institution, by Manmath Nātha Roy. Rs. 5

Vol. IX (In progress)

(a) The Life of a Yogin, by Gopinātha Kavirāj.

# THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

( SANSKRIT )

## SARASVATALOKA

Edited by

GOPINATH KAVIRAJ, M. A

Kirana 1 ( In progress )

(a) Mangalam, etc, by Nārāyaṇa S'āstri Khiste.

(b) Mimansaka mata saṃgraha, by Haranchandra Bhaṭṭāchārya.

(c) S'rimad Ācharya Mandana Mis'ra by Chinna Swami S'astri.

(d) Bhagavato Buddhasya Chaitama Upades'as'cha, by Gopinatha Kaviraj.

Kirana I ( Supplement )

Sanskrita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma.

Kirana II ( In progress )

(a) S'āradā Prasādanam by Nārāyāna S'āstri Khiste.

(b) Chūḍāmaṇi Dars'anam by S'as'adhara Tarkachūḍāmaṇi.

To be had of

The Superintendent

Government Press, U. P.,

Allahabad.

THE

PRINCESS OF WALES

# SARASWATĪ BHAVANA TEXTS

*No. 43*

( PART III )

—o—

EDITED BY

Mahāmahopādhyāya

GOPĪ NĀTHA KAVIRĀJA, M. A.

---

THE

# SMĀRTOLLĀSA

( PART III )

*Printed by Jai Krishna Das Gupta*
*Vidya Vilas Press, Benares City*

---

1936

# स्मार्त्तोल्लासः

## श्रीशिवप्रसादकृतः

( तृतीयो भागः )

वाराणसीस्थराजकीयमहाविद्यालयवेदाध्यापकेन
वेदाचार्य पण्डित श्रीभगवत्प्रसादशर्मणा
टिप्पण्यादिभिर्विभूष्य संशोधितः ।

---

THE

# SMĀRTOLLĀSA

BY

S'RĪ S'IVAPRASĀDA

( PART III )

EDITED WITH INTRODUCTION & NOTES

By

VEDĀCHĀRYA
BHAGVATPRASĀDA S'ARMĀ
Professor, Govt. Sanskrit College, Benares.

---

1936.

॥ श्रीः ॥

# भूमिका

सर्वकर्माधिष्ठातुः काशीपुराधिपतेः कृपया स्मार्तकर्मप्रतिपादकः स्मार्तोल्लासनामको ग्रन्थः सम्पूर्णीभूय प्रकाशं प्राप्तः। अस्य ग्रन्थस्यावलोकनेन ज्ञायेत यत् शुक्लयजुर्वेदमाध्यन्दिनशाखीयस्मार्तकर्मणां शृङ्खलितविवरणोपयोगि ग्रन्थान्तरमीदृशं नोपलभ्यत इति।

यद्यपि गङ्गाधरकृतस्मार्तगङ्गाधर—वैद्यनाथमिश्रकृतपाकयज्ञसंस्थादयः केचिद् ग्रन्थाः स्मार्तकर्मोपयोगिनः प्रसिद्धास्तथापि एतत्प्रकाशनं न विफलं, यत उक्तग्रन्थेभ्योऽत्र भूयिष्ठं वैलक्षण्यमस्ति, तच्च सरलरीतिविस्तृतपद्धत्यादिगुणैः स्फुटमेव। अपेक्षितमन्त्राणामानुपूर्व्युद्धारस्तु प्रयोगकर्तॄणां विशेषोपयोगितावहः। अत एव सरस्वतीभवनग्रन्थमालासम्पादकैर्महामहोपाध्याय पं० श्रीयुक्तगोपीनाथकविराज एम् ए० महोदयैरेतत्प्रकाशनायाहमादिष्टः। तदादेशं शिरसा वहता मया यथामति टिप्पण्यादिविधानपूर्वकं सम्पादितोऽयं ग्रन्थः।

एतन्निर्माता आलम्बायनगोत्रः शिवप्रसादनामा आसीत्। एतद्रचितः श्रौतोल्लासोऽपि ( सूरतनगरे ) मुद्रितः। एतद्ग्रन्थावलोकनेन (१)जयदेवोऽस्य पितामहः शिवाजीशर्मा च पिता आसीदिति प्रतीयते। कुत्रत्योऽयं काटशोपनामा चेति नैव सुनिश्चितं, किन्त्वस्य(२) भट्टत्वेन(३) पाठकत्वेन चोभयथापि निर्देशो दृश्यते। स्थानसम्बन्धेऽपि पुष्करपल्ली(४)-पुष्करपुर(५)-

---

( १ ) स्मा० ३७७।  ( २ ) श्रौ० १२७। ९९।

( ३ ) स्मा० २९६। ३२८। ३४४। ३६७। ३७७। ३८४।

( ४ ) स्मा० २५७। २९६। ३२८। ३४४। ३६७ ३७७।

( ५ ) श्रौ० ६१।

एरण्डवल्ली-एरण्डपल्ली(१) शब्दा दृश्यन्ते ।

अनेन ग्रन्थकर्त्रा कियन्तो ग्रन्था निर्मिताः के च तत्र विषया इति निःसङ्करूपेण सम्यग्ज्ञातुमशक्यत्वे केवलं श्रौतोल्लासस्य स्मार्तोल्लासस्य च निर्मातृत्वमस्येति प्रसिद्धग्रन्थद्वयकर्तृत्वमेवास्य स्वीकरणीयम् ।

श्रौतोल्लासे स्मार्तोल्लासस्य समुल्लेख(२)दर्शनात् स्मार्तोल्लास एव प्राचीनतरो ग्रन्थ इति प्रतिभाति ।

अत्र बहवः प्राचीनग्रन्था ग्रन्थकाराश्चोल्लिखितास्तेषु ऋषीन् तत्सदृशाचार्यांश्च विहायान्येषां यानि नामानि दृश्यन्ते तन्नामकानां समयपौर्वापर्यं निम्नलिखितरीत्या बोध्यम् ।

| | |
|---|---|
| भर्तृयज्ञः | ( ८०० ई० ) |
| मेधातिथिः | ( मनुस्मृतिटीकाकारः; ८८५—९०० ई० ) |
| केशवस्वामी | ( १००० ई० अब्दतः प्राचीनः ) |
| पारिजातः | ( ११०० ईस्वीतः प्राचीनः ) |
| त्रिकाण्डमण्डनम् | ( १०००—१२०० ई० ) |
| कर्कः | ( कात्यायनश्रौत-शुल्ब-गृह्य-भाष्यकर्ता, ११०० ई० ) |
| अपरार्कः | ( उत्कलदेशाधिपः, ११२५ ई० ) |
| स्मृत्यर्थसारः | ( श्रीधरस्य ११५०—१२०० ई० ) |
| श्रीधरपद्धतिः | ( ११५०—१२०० ई० ) |
| कालादर्शः | ( १२००—१३२५ ई० ) |
| जयरामभाष्यम् | ( पारस्करगृह्यसूत्रभाष्यम्; १२००—१४०० ई० ) |
| वोपदेवः | ( १२०७—१३०० ई० ) |
| हेमाद्रिः | ( १२०७—१२७१ ई० ) |
| रेणुकारिका | (कात्यायनश्रौत-पारस्करगृह्यसूत्रानुसारिणी; १२६६-१२६७ई०) |
| हरिहरः | ( पारस्करगृह्यसूत्रभाष्यकारः; १२४५-१४०० ई० ) |
| आचारादर्शः | ( १३०० ई० ) |

( १ ) स्मा० १६१ । श्रौ०१ । ९१ । १२७ । ( २ ) श्रौ० ६१

पराशरमाधवीय: ( १३३०—१३८५ ई० )

स्मृतिसार: ( हरिनाथस्य; १३३०—१३८५ ई० )

प्रयोगपारिजात: ( १३६०—१४३५ ई० )

मदनपारिजात: ( १३११—१३९० ई० )

दानभागवतम् ( १३०० ईस्वीत: परवर्ति )

मदनरत्नम् ( १४२५—१४५० ई० )

रामवाजपेयी ( कात्यायनश्रौतसूत्रमनुसृत्य पद्धतिकार:; १४२९ ई० )

सिद्धान्तशेखर: ( १५०० ईस्वीत: प्राचीन: )

गर्गपद्धति: ( १५१९ ईस्वीत: प्राचीना )

निर्णयामृतम् ( १५०० ईस्वीत: प्राचीनम् )

गदाधरभाष्यम् ( पारस्करगृह्यसूत्रभाष्यम् ; १५०० ईस्वीत: परवर्ती )

टोडरानन्द: ( १५६५—१५९९ई० )

देवयाज्ञिक: ( कात्यायनश्रौतसूत्रोपरिबृहद्भाष्यपद्धतिकर्ता; १५९५ ईस्वीत: प्राचीन: )

स्मृतिरत्नावलि: ( १६०० ईस्वीत: प्राचीना )

स्मृतिभास्कर: ( १६१०—१६४५ ई० )

कृष्णं भट्टीय: ( निर्णयसिन्धुटीका; १६१२ ईस्वीत: पश्चात् )

प्रयोगरत्नम् ( १६०० ई० मध्यभागे )

धर्मप्रवृत्ति: ( १६०० ई० मध्यभागे )

प्रायश्चित्तमुक्तावलि. ( दिवाकरस्य; १६८६ ई० मध्यभागे )

हस्तलिखितमेकं स्मार्तोल्लासपुस्तकं बडोदाराजपुस्तकालये सुरक्षितं वर्तते यदीयलिपिकाल: १६१० शकाब्द: । १६८६ ईसवीयाब्दे निर्मितस्याचारार्कस्य कर्तुर्दिवाकरस्य प्रायश्चित्तमुक्तावलेर्नाम्नोऽत्र ग्रन्थे प्रमाणतया निर्दिश्यमानत्वेन दिवाकरकालादर्वाचीन: प्रकृतग्रन्थकर्तुर्जीवितकाल इति प्रतीयते । १६१० शकाब्दे ( १६८८ ईस्वीयाब्दे ) स्मार्तोल्लासस्य लिपिकालदर्शनात्तस्मात्प्राचीनस्तत्समकालिक एव वा ग्रन्थकर्तुर्जीवितकाल इत्यपि स्पष्टम् ।

अतः १६८७ ईशवीयाब्दे तत्सन्निकृष्टे कालान्तरे वा ग्रन्थकर्ता जीवन्नासीदिति पूर्वोक्तप्रमाणद्वयतः स्फुटमेव प्रसिध्यति ।

सम्प्रति स्मार्ताग्नेराधानमेतद्ग्रन्थानुसारेणैवानुष्ठीयते ।

अत्र वर्णितविषयाणां विस्तृतसूचीपत्रं पुस्तकादौ समावेशितम् ।

ग्रन्थविषयकं विस्तृतसमालोचनं यथावसरं समयान्तरे करिष्यते ।

ग्रन्थस्यास्य सम्पादनकर्मणि येषां हस्तलिखितपुस्तकानामुपयोगो विहितस्तेषां सर्वेषामेवाशुद्धिबहुलतया संशोधनकार्यमतीव दुष्करमासीत्, परन्तु गोस्वामि पं० श्रीदामोदरलालमहोदयैः पं० श्रीविद्याधरशर्ममहोदयैश्च तादृशाशुद्धिनिराकरणेन पङ्क्तिसंस्कारकर्मणि सविशेषमानुकूल्यमाचरितमिति सबहुमानं साञ्जलिबन्धं तेभ्यः कृतज्ञतां निवेदयामि ।

गवर्नमेन्ट संस्कृत कालेज,<br>काशी । } श्रीभगवत्प्रसादमिश्रः ।

# विषयानुक्रमणिका।


| | | | पृ० |
|---|---|---|---|
| ग्रन्थकर्तुर्मङ्गलाचरणम् | ... | ... | १ |
| आवसथ्यप्रशंसा | ... | ... | ,, |
| द्विजानां षट्कर्माणि | ... | ... | २ |
| विप्राणां त्रीणि जीविकाकर्माणि | ... | ... | ,, |
| नित्यस्यौपासनहोमस्याकरणे प्रत्यवायः | | ... | ,, |
| नास्तिक्यात्स्वकर्महानौ पातित्यं तस्य द्वादशाब्दव्रतेन शुद्धिश्च | | | ,, |
| पतितस्य निरीक्षणे सूर्यदर्शनं प्रायश्चित्तम् | | ... | ,, |
| पतितस्य स्पर्शे सचैलस्नानं प्रायश्चित्तम् | | ... | ,, |
| पतितेन सह सम्भाषणे हास्ये च अब्दप्रायश्चित्तम् | | | ,, |
| पतितान्नभुक्तौ तत्समत्वम् | ... | ... | ,, |
| पतितेन सह शय्यासनोपवेशने साग्निकस्य प्राणायामत्रयेण शुद्धिः | | | ,, |
| स्वकर्महानौ मासे कृच्छ्रप्रायश्चित्तम् | | ... | ,, |
| षण्मासे द्विगुणं प्रा० | ... | ... | ,, |
| नवमासे त्रिगुणं प्रा० | ... | ... | ,, |
| संवत्सरपर्यन्तं स्वकमहानौ प्रा० | ... | ... | ,, |
| अनग्नेः स्वस्त्रीस्वीकरणादपि पारदारिकत्वम् | | ... | ३ |
| अनग्नेः पुरुषस्य जारत्वम् | ... | ... | ,, |
| तस्य प्रजानां जारजातत्वम् | ... | ... | ,, |
| अनग्निकस्य भोजने प्रायश्चित्तम | ... | ... | ,, |
| नित्येषु यावच्छक्यानुष्ठानेनापि प्रत्यवायपरिहारोपपत्तिः | | | ,, |
| आधानकालसूत्रम् | ... | ... | ,, |
| दारकाल दायाद्यकालशब्दार्थः कालद्वयस्य व्यवस्था च | | | ४ |

पृ०

कालद्वयातीतेऽपि कृच्छ्रपूर्वकमाधानव्यवस्था ,,
गृहपतौ प्रेते एकादशाहे द्वादशाहे वा आधानं कार्यम् ,,
वृथापाकिनोऽनग्नेर्गृहस्थस्यान्नभोजने प्रायश्चित्तम् ,,
आधानकालातिक्रमे प्रायश्चित्तम् ... ... ५
आधानाधिकारिनिरूपणम् ... ... ५-६
परिवेत्तृदोषविचारः ... ... ६-७
परिवेत्तृदोषस्यापवादः ... ... ८-१०
शूद्रप्रतिग्रहे दोषादयः ... ... ११
मुहूर्तविचारः ... ... १२-२७
वैश्यादिगृहादग्न्याहरणनिरूपणम् ... २७-२८
श्रौतस्मार्ताधानार्थारणिलक्षणम् ... ... २९-३०
अरणिमूलशिरोयज्ञानां विचारः ... ... ३१
मानप्रकारो यज्ञपार्श्वे ... ... ३२-३४
अग्न्यागारविधिः ... ... ३४
पात्रलक्षणम् ... ... ३५
वज्र ( स्फ्य ) लक्षणम् ... ... ,,
ब्रह्मासनलक्षणम् ... ... ३६
प्रणीतालक्षणम् ... ... ,,
प्रोक्षणी ,, ... ... ३७
आज्यस्थाली ,, ... ... ३८
चरुस्थाली ,, ... ... ,,
स्रुव ,, ... ... ३९
स्रुग्लक्षणम् ... ... ४०
पूर्णपात्रलक्षणम् ... ... ४१
वरलक्षणम् ... ... ४२
किंचिल्लक्षणम् ... ... ४३

| | | | पृ० |
|---|---|---|---|
| पुष्कललक्षणम् | ... | ... | ४३ |
| शूर्पलक्षणम् | ... | ... | ,, |
| दृषदुपललक्षणम् | ... | ... | ,, |
| उलूखललक्षणम् | ... | ... | ,, |
| मुसललक्षणम् | ... | ... | ४४ |
| मेक्षणलक्षणम् | ... | ... | ४५ |
| दर्वीलक्षणम् | ... | ... | ४६ |
| आकर्षफलकलक्षणम् | ... | ... | ,, |
| कङ्कतलक्षणम् | ... | ... | ,, |
| अभ्रिलक्षणम् | ... | ... | ,, |
| शासलक्षणम् | ... | ... | ,, |
| शम्यालक्षणम् | .. | ... | ,, |
| परिधिलक्षणम् | ... | ... | ४७ |
| वपाश्रपणिलक्षणम् | ... | ... | ,, |
| शूललक्षणम् | ... | ... | ,, |
| पशुबालक्षणम् | ... | ... | ,, |
| वारणपात्राणामसम्भवे वैकङ्कतानि पात्राणि कार्याणि | | | ४८ |
| अत्र भास्करसम्मतिः | ... | ... | ,, |
| आधानाकरणे कृच्छ्रप्रायश्चित्तं हौम्यदानप्रायश्चित्तं च | | | ,, |
| प्राजापत्यलक्षणम् | ... | ... | ४९ |
| पादकृच्छ्रलक्षणम् | ... | ... | ५० |
| कृच्छ्रेषु मुनेर्ग्राससङ्ख्या | ... | ... | ५१ |
| ,, अरण्यवासिनो ग्राससङ्ख्या | | ... | ,, |
| ,, गृहस्थस्य ,, | ... | ... | ,, |
| ,, ग्रासपरिमाणम् | ... | ... | ,, |
| अर्धकृच्छ्रलक्षणम् | ... | ... | ५२ |

| | | | पृ० |
|---|---|---|---|
| पादोनकृच्छ्रलक्षणम् | ... | ... | ५२ |
| तप्तकृच्छ्रलक्षणम् | ... | ... | ,, |
| तप्तकृच्छ्रे विहितानामम्बादीनां परिमाणम् | | ... | ५३ |
| पराकलक्षणम् | ... | ... | ,, |
| अतिकृच्छ्रलक्षणम् | ... | ... | ,, |
| सान्तपनकृच्छ्रलक्षणम् | ... | ... | ,, |
| सान्तपने विहितानां गोमूत्रादीनां मानम् | | ... | ५४ |
| प्राजापत्यव्रतानुकल्पः | ... | ... | ,, |
| गवां मूल्यनिरूपणम् | ... | ... | ५५ |
| वत्सस्य ,, | ... | ... | ,, |
| वृषस्य ,, | ... | ... | ५६ |
| अनडुहः ,, | ... | ... | ,, |
| धेनोः ,, | ... | ... | ,, |
| अश्वस्य ,, | ... | ... | ,, |
| हिरण्यस्य ,, | ... | ... | ,, |
| वस्त्रस्य ,, | ... | ... | ,, |
| छागस्य ,, | ... | ... | ,, |
| अवेः ,, | ... | ... | ,, |
| वृषल्याः ,, | ... | ... | ,, |
| गजस्य ,, | ... | ... | ,, |
| दोलायाः ,, | ... | ... | ,, |
| रथस्य ,, | ... | ... | ,, |
| गृहस्य ,, | ... | ... | ,, |
| निष्कलक्षणम् | ... | ... | ५७ |
| तप्तकृच्छ्रादीनामनुकल्पाः | ... | ... | ,, |
| होमद्रव्यदानम् | ... | ... | ,, |

| | | | पृ० |
|---|---|---|---|
| होमद्रव्यप्रमाणम् ( टि० ) | ... | ... | ५८-६१ |
| होमद्रव्यमानम् | ... | ... | ६२ |
| पलादिधान्यमानम् | ... | ... | ,, |
| होमद्रव्यगणनाप्रकारः | ... | ... | ६४ |
| आधानक्रमकारिकाः | ... | ... | ६४-६५ |
| सर्वप्रायश्चित्तप्रयोगः | ... | ... | ६६ |
| अब्दादिषु प्राजापत्यगणना | ... | ... | ६८ |
| सचैलस्नानम् | ... | ... | ७२ |
| पर्षत्प्रार्थना | ... | ... | ७३ |
| सभ्येभ्यो गोवृषनिष्क्रयदानम् | ... | ... | ७४ |
| सभ्यप्रार्थना | ... | ... | ७५-७६ |
| निबन्धपूजा | ... | ... | ७७ |
| अनुवादककर्तव्यम् | ... | ... | ७८-७९ |
| अङ्गीकृतप्रायश्चित्तप्रतिज्ञासङ्कल्पः | ... | ... | ८० |
| केशवापनम् | ... | ... | ८१ |
| नृपादीनां विशेषः | ... | ... | ८३ |
| दन्तधावनम् | ... | ... | ८३-८४ |
| भस्मस्नानम् | ... | ... | ८५ |
| गोमयस्नानम् | ... | ... | ८६ |
| मृदा स्नानम् | ... | ... | ८८ |
| शुद्धोदकस्नानम् | ... | ... | ९२ |
| गोमूत्रस्नानम् | ... | ... | ९४ |
| गोमयस्नानम् | ... | ... | ९५ |
| क्षीरस्नानम् | ... | ... | ,, |
| दधिस्नानम् | ... | ... | ,, |
| आज्यस्नानम् | ... | ... | ,, |

| | | | पृ० |
|---|---|---|---|
| कुशोदकस्नानम् | ... | ... | ९६ |
| स्त्रीशूद्राणाममन्त्रकाणि स्नानानि हेमाद्रिसङ्कल्पः (टि०) | | | ६७ |
| स्नानाङ्गतर्पणम् | ... | ... | ६८ |
| विष्णुपूजनम् | ... | ... | १०० |
| विष्णुश्राद्धम् ( टि० ) | ... | ... | १०१ |
| पूर्वाङ्गगोदानम् | ... | ... | १०३ |
| पात्रब्राह्मणलक्षणम् ( टि० ) | ... | ... | १०५ |
| द्रव्यदेवताः ( टि० ) | ... | ... | १०६ |
| भूम्यादीनां प्रतिग्रहे विशेषः (टि०)... | | ... | १०७ |
| प्राच्योदीच्याङ्गधेनुप्रतिग्रहे प्रायश्चित्तम् ( टि० ) ... | | | ११२ |
| गोमूल्यदाने सङ्कल्पः | ... | ... | ११३ |
| प्रायश्चित्तहोमः | ... | ... | ११५–११६ |
| ब्रह्मकूर्चहोमः | ... | ... | ११६ |
| प्रधानसङ्कल्पः | ... | ... | १२१ |
| उत्तराङ्गसङ्कल्पः | | ... | ,, |
| दशदानानि | ... | ... | ,, |
| गोदानम् | ... | ... | १२२ |
| भूमिदानम् | ... | ... | ,, |
| तिलदानम् | ... | ... | १२५ |
| हिरण्यदानम् | ... | ... | ,, |
| आज्यदानम् | ... | ... | १२५ |
| वस्त्रदानम् | ... | ... | १२७ |
| धान्यदानम् | ... | ... | १२८ |
| गुडदानम् | ... | ... | १२९ |
| रौप्यदानम् | ... | ... | १३० |
| लवणदानम् | ... | ... | ,, |

| | | | पृ० |
|---|---|---|---|
| दशदानप्रतिग्रहे प्रायश्चित्तम्(टि०) | ... | ... | १३३ |
| गोवृषनिष्क्रयदानम् | ... | ... | १३४ |
| विप्रस्त्रीशूद्रसुवासिनीविधवादीनां प्रायश्चित्ताचरणे विशेषः (टि०) | | | ,, |
| व्रताङ्गभूतयमनियमादिधर्माः | ... | ... | १३७ |
| दशयमाः | ... | ... | ,, |
| दशनियमाः | ... | ... | १३८ |
| उपवीतित्वं बद्धशिखित्वं चाधिकारिविशेषणम् | | ... | ,, |
| परिधानवस्त्रविचारः | ... | ... | १४१ |
| पवित्रधारणम् | ... | ... | १४२ |
| आचमननिमित्तानि | ... | ... | १४५ |
| नान्दीश्राद्धस्यापराह्णे कर्तव्यता | ... | ... | १४८ |
| अधिकारार्थं गोदानम् | ... | ... | १४६ |
| गणपत्यादिपूजनसङ्कल्पः | ... | ... | १४६ |
| होमद्रव्यदानसङ्कल्पः | ... | ... | ,, |
| कुण्डकारिकाः | ... | ... | १५० |
| अङ्गुलप्रमाणम् | ... | ... | ,, |
| शालाप्रवेशः | ... | ... | १५१ |
| ब्रह्मवरणादि | ... | ... | ,, |
| अरणिमानादि | ... | ... | १५२ |
| अग्निच्छन्दोदैवतविचारः | ... | ... | १५४ |
| आधानमन्त्राणामृष्यादिस्मरणम् | ... | ... | १५५ |
| देवताभिध्यानम् | ... | ... | १५६ |
| कुशकण्डिका | ... | ... | ,, |
| स्रुवाग्निनिर्णयकारिकाः | ... | ... | १५८ |
| आधानहोमः | ... | ... | १६२ |
| आधानादिषु ब्राह्मणभोजनसङ्ख्या | | ... | १६५ |

| | | | |
|---|---|---|---|
| | | | पृ० |
| मणिकावधानम् | ... | ... | ,, |
| पाकयज्ञनिर्णयः | ... | ... | १६६ |
| पाकशब्दार्थः | ... | ... | ,, |
| गृह्यकर्मणामावसथ्याग्नौ विधानम् | | ... | ,, |
| श्राद्धार्थपाकोऽप्यावसथ्याग्नावेव कर्तव्यः | | ... | १७० |
| गृह्याग्नौ नित्यमेव ( सूतके मृतकेऽपिवा ) पाकः कर्तव्यः | | | ,, |
| वैश्वदेवप्रयोगः | ... | ... | १७५ |
| देवयज्ञः | ... | ... | ,, |
| भूतयज्ञः | ... | ... | १७७ |
| पितृयज्ञः | ... | ... | १७८ |
| ब्रह्मयज्ञः | ... | ... | १८०-१८५ |
| मनुष्ययज्ञः | ... | ... | ,, |
| गोग्रासः | ... | ... | ,, |
| वायसबलिः | ... | ... | १८६ |
| श्वबलिः | ... | ... | ,, |
| कीटबलिः | ... | ... | ,, |
| वैश्वदेवनिर्णयः | ... | ... | १८७-१९१ |
| नित्यहोमकालः | ... | ... | ,, |
| होमाधिकारिणः | ... | ... | १९२ |
| होमद्रव्याणि | ... | ... | १९३ |
| आहुतिपरिमाणम् | ... | ... | १९४ |
| होमे वर्ज्यब्राह्मणाः | ... | ... | १९५ |
| सायम्प्रातर्होमस्यैकद्रव्यत्वम् | ... | ... | ,, |
| समिल्लक्षणम् | ... | ... | १९६ |
| व्रतादिषु प्रतिनिधिनिरूपणम् | ... | ... | १९७ |
| सायंहोमकर्मकारिका | ... | ... | १९९ |

| | | | |
|---|---|---|---|
| | | | पृ० |
| स्मार्ताचमनम् | ... | ... | १९९ |
| सङ्कल्पविचारः | ... | ... | ,, |
| प्राणायामविचारः | ... | ... | ,, |
| मन्त्रमात्रोच्चारणे आदावोङ्कारः कार्यः | | | २०० |
| होममन्त्रेषु विशेषः | ... | ... | २०१ |
| ओङ्कारेण सह मन्त्रस्य सन्धिविषयको विचारः | | | २०२ |
| सायंहोमप्रयोगः | ... | ... | २०२-२०५ |
| प्रातर्होमप्रयोगः | ... | ... | २०६ |
| पक्षहोमविधिः | ... | ... | २१० |
| पक्षहोमप्रयोगः | ... | ... | २१४ |
| आशौचनिर्णयः | ... | ... | २१६ |
| पत्न्या रज उत्पत्तौ विचारः | ... | ... | २१९ |
| पर्वनिर्णये पौर्णमासीविचारः | ... | ... | २२२ |
| अमावास्याविचारः | ... | ... | २२५ |
| चौरविचारः | ... | ... | २२८ |
| स्थालीपाकारम्भनिर्णयः | ... | ... | २३० |
| पक्षादिकर्मप्रयोगः | ... | ... | २३२ |
| पिण्डपितृयज्ञप्रयोगः | ... | ... | २३६ |
| नवान्नमुहूर्तविचारः | ... | ... | २४१ |
| नवान्नप्रयोगः | ... | ... | २४२ |
| उपाकर्मनिर्णयः | ... | ... | २४४ |
| उत्सर्गनिर्णयः | ... | ... | २४८ |
| उत्सर्गप्रयोगः | ... | ... | २४९ |
| उपाकर्मप्रयोगः | ... | ... | २५० |
| प्रवासविधिकारिका | ... | ... | २५७ |
| साग्निकप्रवासे पाकभावेऽश्वदेवाभ्यादिनिर्णयः | | | २६० |

पृ०

प्रवासे भोजनविचारः ... ... २६६
प्रवासे सायम्प्रातर्होमः ... ... २७१
प्रवासे वैश्वदेवः ... ... २७२
प्रवासे स्थालीपाकः ... ... ,,
प्रवासे पिण्डपितृयज्ञः ... ... २७३
प्रवासे आग्रयणम् ... ... २७४
प्रवासादागतस्य गृहोपस्थानादिविधिः ,,
प्रवसतो यष्टुर्होमफलनिर्णयः ... ... २७५
प्रवसतः साग्निकस्य पाकविधिः ... ... २७६
निरग्निकवैश्वदेवविधिनिर्णयः ... ... २७८
गृह्योदितविधिनाग्न्याधानप्रयोगः ... २८१
यज्ञपार्श्वोक्तो निरग्निककर्तृकवैश्वदेवविचारः ... २८४
स्मृत्युक्ता वैश्वदेवकारिकाः ... ... २८५
निरग्निकवैश्वदेवार्थं कुण्डकरणम् ... ... २८६
यज्ञपार्श्वोक्तवैश्वदेवप्रयोगः ... ... २८७
स्मृत्युक्तो वैश्वदेवप्रयोगः ... ... २८८
निरग्निकवैश्वदेवनिर्णयः ... ... २८९
विधुरोपासनविचारः ... ... २९६
विधुरोपासनप्रयोगः ... ... २९९
विधुरस्य प्रवासविधिः ... ... ३०१
अग्निसमारोपविधिः ... ... ३०२
अग्नित्यागप्रायश्चित्तविचारः ... ... ३०३
अग्नित्यागप्रायश्चित्तप्रयोगः ... ... ३०४
पुनराधानप्रयोगः ... ... ३०५
पुनराधाननिमित्तानि ... ... ३०६
पुनराधानकारिकाः ... ... ३०८

पृ०
प्रायश्चित्तविचारः ... ... ३१४
होमकालाद्यतिक्रमणे विपर्यासादीनां च प्रायश्चित्तविचारः ३१९-३२८
श्रवणाकर्मसाधनकारिकाः ... ... ३२६
श्रवणाकर्मप्रयोगः ... ... ३३५
शूलगवयज्ञप्रयोगः ... ... ३४४
पृषातकाकर्म ... ... ३४९
आग्रहायणीप्रयोगः ... ... ३५२
प्रत्यवरोहणप्रयोगः ... ... ३५६
प्रथमाष्टकाप्रयोगः ... ... ३५८
अन्वष्टकाप्रयोगः ... ... ३६२
द्वितीयाष्टकाप्रयोगः ... ... ३६६
तृतीयाष्टकाप्रयोगः ... ... ,,
तुर्याष्टकाप्रयोगः ... ... ३६७
वृषोत्सर्गप्रयोगः ... ... ,,
प्राशितपाकयज्ञप्रयोगः ... ... ३७६
अन्त्येष्टिप्रयोगः ... ... ३

## ( अथ श्रवणाकर्मसाधनकारिकाः । )

विघ्नेश्वरं च पितरं च सरस्वतीं च
कात्यायनं च निजसूत्रकृतं प्रणम्य ।
गङ्गाधरादिवरपद्धतिमानिरीक्ष्य
(१)रम्यां तनोमि महतीं नवपाकरीतिम् ॥

गृह्यकारिकायाम्—

"अथातः श्रवणाकर्म शास्त्रदृष्ट्या मयोच्यते ।
श्रावण्यामेव तत्कार्यमभावाद्गौणकालतः ॥
परिसङ्ख्योक्तितः सूत्रकारस्यान्य(त्स्मृ)स्मृतेर्बलात् ।
वचनात्सूत्रकारस्य सकृदस्य क्रिया भवेत् ॥
एवमेवोत्तरेषां स्यादावृत्तिर्वा स्मृतेर्बलात् ।
सकृत्करणमिच्छन्ति पाकयज्ञेषु केचन ॥
आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिः सतां मतात् ।
कल्पयित्वा बहिःशालां बलिदानार्थमुत्तरे ॥
प्राच्यामेव गृहाद् गृह्यकारिकाकृन्मतं भवेत् ।
शालायां सर्वतः कृत्वा प्रलेपं गोमयाम्बुभिः ॥
आसनं पूर्ववत्पत्न्या ततोऽभ्यवसनं भवेत् ।
यावज्जीवं पाकयज्ञैर्यजेत्संवत्सरेण वा ॥

---

( १ ) 'शिवः प्रसादकुरुते नव पाकपद्धतिम्' इति सर्वादर्शपुस्तकपाठः ।

नान्दीमुखं स्याच्छ्रवणाकर्मारम्भनिमित्तकम् ।
प्राणानायम्य त्र्यृष्यादि कालं स्मृत्वोच्चरेदिदम् ॥
करिष्ये श्रवणाकर्म ततो वैकल्पिकान्स्मरेत् ।
ब्रह्मणो(उत्सर्गो) गमनं पश्चादुत्तरे पात्रसादनम्'' ॥

अथ ब्रह्मोपवेशनाद्याघारावाज्यभागान्तो(न्तं) गृह्यकारिकोक्तक्रमेण लिख्यते ।

''अग्नेर्दक्षिणतो ब्रह्मासनं कृत्वा कुशास्तृतम् ।
आमर्णां (ब्रह्माणं) वरयेदग्नेरुत्तरेण गुणान्वितम् ॥
अहं कर्म समाधास्ये ब्रह्मा त्वं वरदो भव ।
ब्रह्मा भवामि च प्रोक्तो गच्छेदग्नेस्तु पूर्वतः ॥
अपरेण तथा चेत्स्यादासनस्येक्षणं ततः ।
एकदेशं तृणस्यापि निरस्याग्निमुखो विशेत् ॥
अभावादतिदेशस्य नासनेक्षादिकं भवेत् ।
कृताकृतावेक्षणार्थमस्मिन्नग्निमुखो विशेत् ॥
प्रणीतं चमसं वामकरस्थं स्वच्छवारिणा ।
पूरयेत्तिदधात्यग्निमुत्तरेण समीपतः ॥
अभावादतिदेशस्य धर्माः प्राणीतिका न च ।
अथ प्रणयनादस्य भवेत्कर्ता च वाग्यतः ॥
प्रदक्षिणं स्तृणात्यग्निमारभ्यैशानकोणतः ।
प्रागग्रैश्छिन्नमूलैस्तत्सौम्यन्तं व्यक्तकैः कुशैः ॥
अग्नेः पश्चिमतः साग्रं बर्हिषां स्तरणं भवेत् ।
पाकयज्ञेषु ये दर्भाः पीतवर्णा भवन्ति ते ॥

निगमोक्त्या न नियमो लूनमूला भवन्ति वै ।
पश्चादुत्तरतो वा स्यात्पात्रासादनमग्रितः ॥
उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत् ।
पवित्रच्छेदना दर्भाः पवित्रे प्रोक्षणी तथा ॥
आज्यस्थाली चरुस्थाली सम्मार्गोपयमाः कुशाः ।
समिधः स्रुव आज्यं च तण्डुलाः पूर्णपात्रकम् ॥
वरो वैकैकमेतानि स्वासाद्योदग्बिलानि च ।
प्रागग्राण्यथवा पश्चात्सादयेत्प्राग्बिलानि च ॥
तदा तान्युत्तराग्राणि केचित्पूर्वे पवित्रयोः ।
कुर्वन्ति प्रोक्षणीपात्रासादनं धर्मदर्शनात् ॥
कथितं वासुदेवेन गृह्यकर्केण धीमता ।
त्रैविद्यवृद्धैराचार्यैर्देवता प्रीयते यतः ॥
एवमासादनं कृत्वा पवित्रच्छेदनैः कुशैः ।
अङ्गुष्ठाङ्गुलिपर्वभ्यां छित्वा प्रादेशसम्मितम् ॥
गर्भहीनं पवित्रं तत्समं स्यादस्पृशं नखैः ।
प्रणीतासु तु कृत्वापस्ताभ्यामुत्पूय तत्र ते ॥
कृत्वा सव्ये स्रुचं पाणावुदिङ्गयति ता अपः ।
दक्षिणेन तु ताः प्रोक्ष्य प्रणीता उदकेन हि ॥
पात्राणि क्रमशः प्रोक्ष्य विदध्यात्तानसञ्चरे ।
असञ्चरः प्रणीताग्नी अन्तरेण प्रकीर्त्तितः ॥
स्वयं स निर्वपेदाज्यमाज्यस्थाल्यां यथार्हतः (समाहितः) ।
प्रणीतासूदकं कृत्वा चरुं स्थिःस्थालितं क्षिपेत् ॥

तण्डुलाननुमानेन चरुपात्रे यथार्थतः ।
दैवे त्रिःक्षालिता ज्ञेयास्तंडुलास्तु पित्र्ये सकृत् ॥
पात्रासादनकाले च तेषां प्रक्षालनं भवेत् ।
हविष्पात्रस्य कर्तुश्च पत्न्या ब्रह्मण एव च ॥
पूर्वं पूर्वं भवेदन्तर्बहिरुत्तरमुत्तरम् ।
पात्रासादन उद्वासे श्रपणे हरणे गतौ ॥
आज्याधिश्रयणे वह्नौ चरोरुत्तरतस्ततः ।
द्वयोः पर्यग्निकरणं कर्तव्यं ज्वलदग्निना ॥
श्रपणं च चरोरेव यथार्थं स्रुवतापनम् ।
ततः स्रुवं मृजेत्प्राश्च मन्तः संमार्जनैः कुशैः ॥
मूलतः पुष्करं यावत्कुशमूलैस्तु (वा स्वतः) वाग्यतः ।
अग्नावभ्युक्ष्य च पुनः प्रतप्य निदधाति तम् ॥
चरोरानीय पूर्वेण घृतमुद्वासयेदुदक् ।
आज्यस्य पश्चादानीय चरुं तस्योत्तरं न्यसेत् ॥
पवित्राभ्यां तदुत्पूय घृतं तस्येक्षणं भवेत् ।
उत्पूय प्रोक्षणी ताभ्यां गृह्णोपयमनान्कुशान् ॥
सव्ये कृत्वा च जान्वाच्य नियम्याधाय तूत्थितः ।
आदध्यात्समिधस्तिष्ठंस्तिस्रः कातीयसूत्रतः ॥
समित्त्रयं तु होमादौ वाग्यमोऽयं स्मृतेर्बलात् ।
आसीन ऊर्ध्वःप्रह्वो वा नियमो यत्र नेदृशः ॥
तदाऽऽसीनेन कर्तव्यं न प्रह्वेण न तिष्ठता ।
सपवित्रेण हस्तेन प्रोक्षणीपात्रवारिणा ॥

पर्युक्षणं भवेदग्नेरशेषेण प्रदक्षिणम् ।
प्रणीतासु पवित्रे ते कृत्वा जान्वाच्य दक्षिणम् ॥
अन्वारब्धे कृते होमो ब्रह्मणा दक्षिणे करे ।
बहुकाष्ठैः समिन्धीयादर्चिष्मन्तं क्रियाक्षमम् ॥
स्रुवेणाज्यं गृहीत्वाग्नेः प्रत्यगुत्तरदेशतः ।
आरभ्य दिशमाग्नेयीमाज्यधारामृजुं हरेत् ॥
मनसा संस्मरेत्स्वाहायुक्तं चैव प्रजापतिम् ।
नैर्ऋतीं दिशमाश्रित्य त्वैशानीं पूर्ववद्धरेत् ॥
अत्रेन्द्राय पदं स्वाहायुक्तं नोपांशुकं भवेत् ।
स्वाहेत्याघारयेदेतावाघाराविति भाषि(तौ)कौ ॥
प्राञ्चं वा जुहुयादेतावृजुं सन्ततमेव वा ।
जुहुयादग्नये स्वाहा सोमायेति तथा परा ॥
प्रथमेशानकोणेऽग्नेर्द्वितीयाग्नेयकोणके ।
सुसमिद्धेऽथवा वह्नौ, समिद्धे चोत्तराहुतिः ॥
प्रधानाहुतिस्तस्याग्नेर्भूर्भुवःस्वस्तथा परा ।
त्वन्नः सत्वन्नोऽयाश्चाग्ने ये ते शतमुदुत्तमम् ॥
प्रजापतय इत्येता नवाज्याहुतयः क्रमात् ।
चर्वाद्यादावन्यदन्ते स्विष्टकृच्च हुनेत्ततः ॥
हुत्वा हुत्वैवं सर्वासां शेषं पात्रान्तरे क्षिपेत् ।
भूरादिनवसु स्विष्टकृति चाद्ये चतुष्टये ॥
अन्वारम्भो भवेदेषु सोऽन्वारम्भः कुशेन हि ।
होमान्ते च ततः कुर्यात्संस्रवप्राशनं ततः ॥

मार्जनं स्यात्पवित्राभ्यामग्नौ ते प्रक्षिपेत्ततः ।
अग्रमग्नौ दक्षिणादानं प्रयोगे च भवेदिति ॥
ब्राह्मणं गौर्वरे ब्रह्मणयं ते प्रतिगृह्यताम् ।
अयं ते पूर्णपात्रस्तु पूर्णपात्रो भवेद्यदि ॥
प्रणीतानां विमोकः स्यात्ततो ब्राह्मणभोजनम् ।
अतिरिक्ता न कर्तव्या पदार्था न्यायविन्मतम् ॥
प्रदक्षिणं समूह्य त्रिर्दर्भैर्गोमयोपलेपनम् ।
गोमयादित्रिरेव स्यात्तिस्रः प्रागायता लिखेत् ॥
लेखा स्फ्येन च तत्पांशुमुद्धरेत्तावदेव तु ।
अभ्युक्षणं त्रिरेव स्यात्संस्काराः कथिता भुवः ॥
यत्राग्नेः स्थापनं कुर्यात्तत्रैव विहिता इमे ।
स्वस्थानस्थित एवाग्नौ न क्रियन्ते कदाचन ।
एष एव विधिर्यत्र कचिद्धोमोक्तितोऽपि तु ।
अथोत्थाग्निं समाधाय गृह्यकारोऽब्रवीत्ततः" ॥

इति गृह्यकारिकोक्ता साधारणकारिका समाप्ता ।

## ( श्रवणाकर्मप्रयोगः )

अथ पाकयज्ञश्रवणाकर्मप्रयोगः । ते च पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति संज्ञाभेदेन चतुर्विधा उक्ताः(१) । तेष्वेव होमप्रत्यादिकर्मादयो यावज्जीव(२) मनुष्ठेयाः । इतरेषु श्रवणाकर्मादिषु पुनर्न नियमः । तत्र प्रहुतसंज्ञेषु श्रवणाकर्म तावदुच्यते ।

तत्र प्रथमप्रयोगे निर्णेजनान्तं वैश्वदेवं विधाय प्राणानायम्य देशकालौ सङ्कीर्त्य श्रावणाकर्मारम्भनिमित्तं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं नान्दीश्राद्धं च करिष्ये । श्राद्धं समाप्य पत्न्या सहितोऽग्नेः पश्चात् प्राङ्मुख उपविश्य देशकालौ स्मृत्वा यज्ञेश्वरप्रीतये श्रवणाकर्माहं करिष्ये ।

तत्र वैकल्पिकं स्मरेत् । तत्र सकृदसकृद्वा(३)श्रवणाकर्मादिक-

---

( १ ) पारस्करस्मार्तकल्पे ( १।४।१ ) ।

( २ ) अत्र यावज्जीवपदेन स्वकाल एवानुष्ठेया न तु सर्वदैव । तथा हि मीमांसासिद्धान्तः—

यावज्जीवेति सातत्यं स्वकाले वा निमित्ततः ।
कालाङ्गलोपादाद्यः स्यादङ्गधात्यागतोऽन्तिमः ।

( न्या० मा० ६।२।७ )

( ३ ) "यावज्जीवं पाकयज्ञानुष्ठानं सकृद्वा" ।

"यावज्जीवं पाकयज्ञैर्यजेत्सम्वत्सरेण च" वचनात्सूत्रकारस्य सकृदस्य क्रिया भवत् ।

एवमेवोत्तरेषां स्यादावृत्तिर्वा स्मृतेर्बलात् ।

सकृत्करणमिच्छन्ति तत्रावृत्तिः सतां मतात् । इत्यादि वचनैः सकृदसकृद्वा करणम् ।

रणम् । पूर्वेण ब्रह्मणोगमनम् । उत्तरेण पात्रासादनं पालाश्यः समिधान्तं समानम् । यवनां पिष्टं तण्डुलानां वा, प्राश्नावाघारौ दक्षिणान्तं पूर्ववत् । एषामन्यतमं पक्षमङ्गीकृत्य तेनैवाङ्गीकृतपक्षेण संवत्सरमुत्तराणि कर्माणि कुर्यात् । एतान् वैकल्पिकान्० ।

अथ ऋष्यादिस्मरणम् । तत्र अपश्वेतपदेति द्वयोः प्रजापतिः श्वेतपद(दे)देवता प्रथमस्य श्वेतो वैदर्भ्यो द्वितीयस्य द्वावपि छन्दोहीनौ लिङ्गोक्ता आज्यहोमे विनियोगः । धानावन्तमिति मन्त्रस्य विश्वामित्र गायत्री छन्दः इन्द्रो देवता धानाहोमे विनियोगः । आग्नेयपाण्डवादिमन्त्राणां परमेष्ठी प्रजापतिर्लिंगोक्ता छन्दो हीना होमबलिदानादिषु विनियोगः । नमोऽस्त्विति त्रयाणां मन्त्राणां प्रजापतिरनुष्टुप्सर्पाश्च देवता उपस्थाने विनियोगः । आपो हि ष्ठेति तिसृणां सिन्धुद्वीप गायत्रीछन्द आपो देवता मार्जने विनियोगः । भूरादिनवाहुतीनां पूर्ववत् ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोमं श्वेतपदं श्वेतं वैदर्भ्यमाज्येन विष्णुं श्रवणं श्रावणीं पौर्णमासीं वर्षा एताश्चरुणा इन्द्रं धानाभिः अग्नेयपाण्डुपार्थिवानां सर्पाणामधिपतिं श्वेतवायवान्तरिक्षा ं सर्पाणामधिपति अभिभूः सौर्येदिव्यानां सर्पाणामधिपति एताः सक्तुभिः ध्रुवं भौमं सर्वहुतमेककपालेन पुरोडाशेणाग्निं स्विष्टकृतं चरुधानासक्तुशेषेणाग्निवायुमित्यादि पूर्ववत् । पुनराग्नेयपाण्ड्वादीन् सक्तुबलिभिः एता अङ्गप्रधानदेवता पाकयज्ञकर्मणयक्ष्ये ।

अग्न्योपवेशनाद्याज्यभागान्तं पूर्ववत् । अत्र विशेषः । चरुस्था-

ल्यनन्तरं भर्जनखर्परं, पाणिसम्मितमेककपालं, संमार्गकुशादि, तण्डुलानन्तरं यवाः पिष्टं पूर्णपात्रमिति ।

अथोपकल्पनीयानि—दृषदुपलं, शूर्पं, यज्ञियवृत्तमयमुदपात्रं, दर्वी, प्रादेशमात्राणि त्रीणि त्रिदन्तानि कङ्कतानि यज्ञियवृक्षोऽवान्य-ङ्गुष्ठपर्वविस्तीर्णाग्राणि, अञ्जनं, अनुलेपनं, स्रजः, उल्मुककाष्ठं, उल्का-धारकः, सम्मार्जनीयोदपात्रं, भक्षणार्थं लौकिका धानाः, एतान्युप-कल्प्य पवित्रकरणादि कृत्वा सादनक्रमेणैव प्रोक्ष्य खरस्थाने चरु-स्थानादुत्तरतो भर्जनस्थाने तापनसामर्थ्यमङ्गारं निधाय तत्र भर्जनमुप-धाय तत्र सव्याङ्गुल्याऽशून्येऽङ्गारं निधाय तदुत्तरतः कपालस्थानेऽप्येव-मङ्गारं निधाय तत्रोपरि कपालोपधानं पुनस्तदुपर्यङ्गारनिधानं पूर्ववत् । यदि खरस्थाने भर्जनकपालाधिश्रयणावकाशो नास्ति तदा भर्जन-कपालाधिश्रयणपर्याप्तं देशं बहिः सन्त्यज्योत्तरतः प्रणीताचमसा-दीनां प्रोत्सारणं कार्यम् । प्रणीताप्रोक्षणीनामुत्तरदेशे निधाननिय-मात् । तत्र स्थाने भर्जनाद्यधिश्रयणं कर्त्तव्यम् । तत्र आज्यस्थाल्या-माज्यं निरूप्य प्रणीतोदकेन चरुसेकः । प्रणीतोदकेन पिष्टसंयवनम् । (१)अश्वशफमात्रं पुरोडाशं कृत्वा युगपदाज्यादीन्यधिश्रयेयुः ।

---

(१) अत्र सूत्रम् । "स्थालीपाकꣳ श्रपयित्वाक्षतधानाश्चैकक-पालं पुरोडाश (पा०गृ० २।१४।३) मि"ति । अक्षतधानाश्च—अक्षता यवास्तैस्सम्पाद्या धाना अक्षतधानाः चकारात् श्रपयित्वा श्रपणेन सम्पाद्य । तदुक्तं छन्दोगपरिशिष्टे—

अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते (२८।१)

इति धानाशब्दस्य भृष्टयवमात्रवाचकत्वात् धानाः श्रपयित्वेति ।

तत्राज्यं ब्रह्मा चरुं यजमानः सुतप्ते भर्जने यवानुल्काधारकः सुतप्ते कपाले पुरोडाशमितरश्चाधिश्रयेत् । ततः सर्वेषां पर्यग्निकरणं श्रपणं च, स्रुवं प्रतप्य आज्यादीनि क्रमेणोद्वासयेत् ।

तत्रानुद्वासितानां पूर्वेणोद्वासितानामपरेणेत्येवमेकैकं हविरुद्वासयेत् । तत्राज्यमुद्वास्य प्रोक्षणीस्थानतः पश्चिमदेशे निधाय आज्यादुत्तरतश्चरुं चरोरुत्तरतो धानासहितं भर्जनं भर्जनादुत्तरतः पुरोडाश-

---

अनेन निस्तुषयवस्यापि श्रपणे प्राप्ते तन्निरासाय कण्डनादिजन्यक्षतशून्यार्थकस्याक्षतस्योपादानम् । एवं च कण्डनादिजन्यक्षतशून्यैः सतुषयवैर्धानाः सम्पादनीयाः ।

एककपालं पुरोडाशं-एकस्मिन् कपाले संस्कृतः पुरोडाश एककपालस्तं एककपालं श्रपयित्वेत्यनुवर्तते । स च पुरोडाशोऽश्वशफपरिमाणः । तथैव दर्शपूर्णमासप्रकरणे श्रुतिः—"अश्वशफमात्रं कुर्यादित्युहैक आहुः कस्तद्वेद यावानश्वशफो यावन्तमेव स्वयं मनसा न सत्रा पृथुं मन्येतैवं कुर्यात्" ( श० ब्रा० १।२।६।१० ) इति ।

कपालमपि तावत्परिमाणमेव न न्यूनाधिकपरिमाणं "उरु प्रथा ( य० सं० १।२२ ) इति प्रथयति यावत्कपालमनतिपृथु" इति कात्यायनेन ( श्रौ० सू० २।५।२० ) पुरोडाशपृथुत्वस्य कपालपरिमितत्वबोधनात् ।

अत्र स्थालीपाकादिहोमानामितिकर्तव्यताविशेषश्रवणेनापूर्वत्वस्य व्यवस्थितत्वादिह च पुरोडाशादिधर्माणामश्रवणान्न पुरोडाशादिश्रपणं स्वरूपसम्पादकमात्रेतिकर्तव्यतया पुरोडाशादयः कर्तव्याः । सा च संयवन-कपालाद्युपधाना-धिश्रयण-प्रथन-श्रपणादिकमन्तरेणापि सिद्धमिष्टमुपादेयं पुरोडाशादिस्वरूपनिष्पत्तिसम्भवेऽन्यथानुपपन्नत्वाभावेन पुरोडाशादिविधेस्तदनाक्षेपकत्वादिति ।

सहितं कपालं च निधाय (धानाद्यर्थानुद्धृत्य तन्मशान्पुनरग्नौ प्रक्षिप्य?) प्रोत्सारितानि प्रोत्तरायादीनि पूर्वस्थाने निधाय प्रोत्तरायुत्पवनान्तं कृत्वाऽऽहुतिद्वयपर्याप्तधानाः पात्रान्तरे संस्थाप्येतराः सर्वाः पिष्ट्वा तेषां सक्तूनां स्थाल्याज्येनाभ्यञ्जनं कार्यम् ।

तत आज्यमानीय स्वपुरतो निधाय उपयमनाद्याज्यभागान्तं कृत्वाऽऽज्याहुतिद्वयं जुहुयात् ।

"ॐ अप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा" । इदं श्वेतपदे न० । "ॐ न वै श्वेतस्याध्याचाऽरेहिर्ददर्श कश्चन । श्वेताय वैदर्भ्याय नमः स्वाहा" । इदं श्वेताय वैदर्भ्याय० ।

ततश्चरुमभिघार्य तेनाहुतिचतुष्टयं स्रुवेण जुहुयात् । ॐ विष्णवे स्वाहा । इदं विष्णवे० । ॐ श्रवणाय स्वाहा । इदं श्रवणाय० । ॐ श्रावण्यै पौर्णमास्यै स्वाहा । इदं श्रावण्यै पौर्णमास्यै० । ॐ वर्षाभ्यः स्वाहा । इदं वर्षाभ्यो न मम ।

ततो धाना अभिघार्य स्रुवेण होमः । "ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः (शु०य०सं० २०।२९) स्वाहा" । इदमिन्द्राय । इति धानानामेकाहुतिः ।

आहुतिचतुष्टयपर्याप्तान् सक्तून् पात्रान्तरे कृत्वा तेषां (१)कु-

---

( १ ) अत्र "घृताक्तान् सक्तून् सर्पेभ्यो जुहोती"त्या (पा० गृ० २।१४।८) ज्ञाताञ्जनार्थमाज्यं लौकिकं ग्राह्यं न संस्कृतं "विशये लौकिकमयुक्तत्वा (श्रौ० सू०४।३।७) त् । विशये लौकिकः स्यात्सर्वार्थत्वा-

ताज्जनत्वाभ्याभिघारणम् । तैः पात्रान्तरकृतसक्तुभिराहुतित्रय स्रुवेण "ॐ आग्नेयपाण्डुपार्थिवानाᳫं० सर्पाणामधिपतये स्वाहा" । इदमाग्नेयपाण्डुपार्थिवानाᳫं० सर्पाणामधिपतये० । ॐ श्वेतवायवान्तरिक्षाणाᳫंसर्पाणामधिपतये स्वाहा" । इदं श्वेतवायवान्तरिक्षाणाᳫं सर्पाणामधिपतये० । "ॐ अभिभूः सौर्यदिव्यानाᳫंसर्पाणामधिपतये स्वाहा" । इदमभिभूः सौर्यदिव्यानाᳫंसर्पाणामधिपतये० ।

ततः पुरोडाशमभिघार्य स्रुवेणावदाय "ॐ ध्रुवाय भौमाय स्वाहा" । इदं ध्रुवाय भौमाय न० स्रुवेणैव सर्वं पुरोडाशं हुत्वा चरुसक्तुधानाशेषेण स्विष्टकृत् । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते० । ततो भूराद्या नवाहुतयः । ततः संस्रवप्राश-

---

(जै० सू० ७।३।३०) दि"ति कात्यायनजैमिनिभ्यां तथैव व्यवस्थापनात्।

नन्वत्र सूत्रे सर्पेभ्य इत्यवाच्यं मन्त्रलिङ्गादेव सर्पाणां देवतात्वसिद्धेरिति चेत् विजातीयस्यापि स्वविजातीयाधिपत्यसत्त्वेन सर्पविजातीयस्यापि सर्पाधिपत्यस्यसंभवात्सर्पाधिपतित्वेन रूपेण सर्पभिन्नमुद्दिश्य त्यागकरणनिराकरणाय सर्पविशेष एव सर्पाधिपतिरिति बोधनार्थं सर्पेभ्य इत्यस्य उपादानम् । अथ विजातीयस्य स्वविजातीयाधिपत्यं न क्वापि दृष्टमिति चेन्न ? "अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणा" ( पा० स्मा० १।५।१० )मित्यादिबहुषु तद्दर्शनात् ।

( १ ) शूर्पं चात्र नडवेणुशरेषीकान्यतमं ग्राह्यं श्रौते तन्मयस्यैव दृष्टत्वात् । तथा च दर्शपूर्णमासप्रकरणे श्रुतिः "अथ शूर्पमादत्ते वर्षवृद्धमसीति वर्षवृद्धᳫं० ह्येतद्यदि नडानां यदि वेणूनां यदीषीकाणामि" ( श० ब्रा० १।१।४।१९ )ति ।

नादिप्रणीताविमोकान्तं कुर्यात् ।

ततो बलित्रयपर्याप्ताधिकान्सक्तून् शूर्पे कृत्वा, उदपात्रं तच्छूर्पं दर्वीं कङ्कतान्यञ्जनं गन्धं स्रजश्च गृहीत्वा यजमानो ब्रह्मणा (पत्न्या) उल्काधारिणा च सहोल्कायां ध्रियमाणायां बहिर्निष्क्रम्य बाह्यशालायां गत्वोपविश्य प्रातःसवनेन 'मान्तरा गमये'ति प्रैषं कुर्यात् । प्रैषे कृतेऽग्नियजमानयोरन्तरेण कश्चिन्न गच्छेत् । यजमानस्तु प्रैषमुक्त्वा (१)उपलिप्ते चतुरस्रे हस्तमात्रे स्थण्डिले वाग्यत उदपात्रेण प्रागुदग्वाग्नेयपाण्ड्वाद्यैस्त्रिभिर्मन्त्रैः सर्पानवनेजयेत् ।

"ॐ आग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतेऽवनेनिक्ष्व" इति । एवमुत्तरयोर्मन्त्रयोः ।

ततो दर्व्या शूर्पात् सक्तूनवदायावनेजनस्थानेषु यथाक्रमं प्रतिमन्त्रमाग्नेयपाण्ड्वादिभिर्मन्त्रैर्बलीन्हरेत् ।

"ॐ आग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपत एष ते बलिः" । इदमाग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतये न मम । एवमुत्तरयोर्मन्त्रयोः । ततः पुनरवनेजनं पूर्ववत् ।

ततः संहतैरेव (२)कङ्कतैरग्रदेशेनाग्नेयपाण्ड्वादिभिर्मन्त्रैः प्र-

---

( १ ) एतदुपलेपनं यजमानेन स्वयमेव कर्त्तव्यं तस्य पदार्थतया विहितत्वात् कर्तृविशेषस्यानुक्तत्वात् , "उपनिष्क्रम्य बहिः शालायाः स्थण्डिलमुपलिप्य" (पा०गृ०२।१४।११) इति सूत्रे निष्क्रमणोपलेपनयोर्ल्यबन्तेनोपादानात् निष्क्रमणेन सह यजमानकर्तृकत्वलाभाच्च ।

( २ ) एतत् कङ्कतं प्रादेशमात्रं वैकङ्कतमिति जयरामहरिहरग-

तिमन्त्रमधिपतये प्रलिखस्वेति प्रतिबलि प्रतिलिखेत् ।

ततस्तथैव तैर्मन्त्रै"रधिपतेऽङ्क्ष्वे"ति प्रतिबलि अञ्जेत् ।

ततस्तथैव तैर्मन्त्रै"रधिपतेऽनुलिम्पस्वे"ति प्रतिबलि अनुलिम्पेत्।

पुनस्तथैव प्रतिमन्त्र"मधिपते स्रजोऽपिनह्यस्वे"ति प्रतिबलि (ततो) दद्यात् । स्रजः पुष्पमालाः ।

ततः सक्तुशेषं स्थण्डिले न्युप्य तदुपर्युदपात्रं निनीय (१)"नमोऽस्तु सर्पेभ्य" इति तिसृभिर्ऋग्भिः सर्पानुपतिष्ठते ।

स यावति देशे सर्पाणां न प्रवेशं कामयेत तावन्तं देशमच्छिन्नप्रयोदकधारया "अपश्वेतपदा जही"ति स्वाहावर्जिताभ्यां मन्त्राभ्यां प्रप्तोल्काधारिसहिताः परिषिञ्चन् सकृत्परीत्य द्विस्तूष्णीं परीयात् । एवं त्रिः परिषिञ्चनवर्जमितरयावृत्तिस्तूष्णीम् ।

ततो दर्वीं शूर्पं च प्रताप्योल्कां प्रतप्योल्काधारिहस्ते प्रयच्छेत् ।

---

दाधरविश्वनाथाः । "वारणान्यहोमसंयुक्तानी"(का०श्रौ० १।३।३७) तिपरिभाषितत्वाद्वारणमेव भवतीत्यन्ये ।

( १ ) ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।

या इषवो यातुधानानां ये वा वनस्पती १ ॥ रनु । ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ।

ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ।

(शु०य०सं०१३।६-८) ॥

ततो द्वारसमीपमागत्योपविश्य यजमानः मार्जनीयोदपात्रोदकेनापोहिष्ठेतितिस्रिभिर्मन्त्रैर्मुखमुपस्पृशेत् । ततस्तथैव ब्रह्मोल्काधारी च मुखमुपस्पृश्य सर्वे क्रमेण गृहं प्रविश्योपविश्य धाना अखादन्तः प्राश्नीयुः । ततः श्रवणाकर्माङ्गब्राह्मणभोजनसङ्कल्पः । इतरत्सर्वं सक्तुशेषं सुगुप्ते भाण्डादौ स्थापयेत् । पुनस्तदहः सायंहोमानन्तरं यजमानः सक्तुशेषाद्बलित्रयाधिकान् सक्तून् शूर्पे कृत्वोदपात्रं तच्छूर्पं दर्वीं कङ्कतानि गृहीत्वा प्रदीप्तोल्कापाणिरुल्काधारी च बहिर्निष्क्रम्य बाह्यशालायामुपलिप्तेऽवनेजनादि प्रलेखान्तं बलिहरणं पूर्ववत्कृत्वा सक्तुशेषान्न्युप्योदपात्रं निनीय दर्वीं शूर्पं च प्रत्तास्य निदध्यात् । "नमोऽस्तु सर्पेभ्य" इत्युपतिष्ठते । प्रैषाभावेऽपि बलिहरणे क्रियमाणेऽग्नियजमानयोर्बलियजमानयोश्चान्तरेण कश्चित्कदाचिन्न गच्छेत् । एवं सायंहोमानन्तरोक्तं बलिहरणं मार्गशीर्षपौर्णमासीं यावत् प्रत्यहं सायंहोमानन्तरं कार्यम् ।

अत्र सूत्रकारस्य परिसङ्ख्योक्तेर्गौणकालाभावः । यत्तु सूतकादिना श्रवणाकर्मादिविधिलोपे प्रायश्चित्ताद्युक्तं तत्सर्वं सकृत्पक्षे द्वितीयाद्यावृत्तिविषयं वेदितव्यम् ।

तदुक्तं गृह्यकारिकायाम्—

"श्रवणाकर्म लुप्तं चेत्कथंचित्सूतकादिना ।
आग्रहायणिकं कर्म बलिवर्जमशेषतः ॥
अकृत्वाऽन्यतमं यज्ञं पञ्चानामधिकारतः ।
उपवासेन शुद्ध्यन्ति पाकसंस्थां तथैव च ॥

पाकसंस्थासु लुप्तासु श्रवणाकर्म आदितः ।
प्राजापत्यं चरेत्कृच्छ्रं वचनात्तु प्रजापतेः ॥
स्वयं होमाश्च यावन्तो ह्यकृताश्चेत्प्रमादतः ।
तावतोऽपि बलींश्चायं हरेत्तद्दहरेव तु ॥
एकैकं परिलेखान्तमेकमेवोदपा(व)त्रकम् ।
प्रक्षालनं तदन्ते ( स्यात् ) तु शूर्पदर्व्योर्भवेदिति" ॥

इति श्रीपुष्करपल्लीस्थशिवप्रसादपाठककृते स्मार्तोल्लासे श्रवणाकर्मप्रयोगः समाप्तः ।

## ( इन्द्रयज्ञप्रयोगः )

अथेन्द्रयज्ञप्रयोग उच्यते । स च प्रोष्ठपद्यां(१) पौर्णमास्यां भवति । तत्र प्रथमप्रयोगे पूर्वाह्णे निर्णेजनान्तं वैश्वदेवं कृत्वा ततः कर्ताऽऽचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य इन्द्रयज्ञारम्भनिमित्तं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारा-

( १ ) यद्यपि "प्रोष्ठपद्यामिन्द्रयज्ञ" (पा० गृ० २।१५।१) इति सूत्रे प्रौष्ठपद ( भाद्रपद ) सम्बन्धिनी या काचित्तिथिः प्रतीयते तथापि "अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्यामि" (पा० गृ० २।१४।१ ) त्युपक्रम्य "प्रोष्ठपद्यामिन्द्रयज्ञः, आश्वयुज्यां पृषातका" इति विधानात् प्रोष्ठपद्यादिभिः पदैः पौर्णमास्येव विशेष्यत्वेनोपतिष्ठते तस्यामिन्द्रयज्ञाख्यं कर्म भवति ।

पूर्वकं नान्दीश्राद्धं करिष्ये । श्राद्धं समाप्य ततोऽग्नेः पश्चादुपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्य इन्द्रयज्ञमहं करिष्ये ।

अथ वैकल्पिकं स्मरेत् । तत्र पूर्वेण ब्रह्मणो गमनादिपूर्णपात्रान्तं स्थालीपाकवत् ।

तत ऋष्यादिस्मरणम् । भूरादीनां पूर्ववत् । 'शुक्रज्योति' रित्यादीनां 'उग्रश्च भीमश्चेन्द्रं दैवी'रित्यन्तानामष्टानां मन्त्राणां प्रजापतिर्मरुतो देवताः 'शुक्रज्योतिः' इत्यस्योष्णिक् 'ईदृङ्, ऋतश्चे'त्यनयोर्गायत्री 'ऋतजिच्चे' त्यस्योष्णिक् 'ईदृक्षास' इत्यस्य जगती 'स्वतवाँश्चे'त्यस्य गायत्री 'उग्रश्चे'त्यस्य गायत्री एतेषां सप्तानां मरुतो०, बलिहरणे विनियोगः। अत्र बलिहरणे 'इन्द्रन्दैवीरि'त्यस्य जगती जपे विनियोगः ।

अथ देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोममिन्द्राग्निमिन्द्राणीमजमेकपदमहिर्बुध्न्यं प्रोष्ठपदाः, एता आज्येन, इन्द्रं पायसेन, अग्निं स्विष्टकृतं पायसशेषेण, भूरादीनां पूर्ववत् , शुक्रज्योतिषं चित्रज्योतिषं, सत्यज्योतिषं, ज्योतिष्मन्तम्, शुक्रं, ऋतपसं, अत्यंहसं, ईदृशं, अन्यादृशं, सदृशं, प्रतिसदृशं, मितं, सम्मितं, सभरसं, ऋतं, सत्यं, ध्रुवं, धरुणं, धर्तारं, विधर्तारं, विधारयं, ऋतजितं, सत्यजितं, सेनजितं, सुषेणं, अन्तिमित्रं, दूरेऽमित्रं, गणं, ईदृक्षान्, एतादृक्षान् , सदृक्षान् , प्रतिसदृक्षान् , मितान् , सम्मितान् , सभरसः, मरुतः, स्वतवन्तं, प्रघासिनं, सान्तपनं, गृहमेधिनं, क्रीडिनं, शाकिनं, उज्जेषिणं, उग्रं, भीमं, ध्वान्तं, धुनिं,

सासहांसं, अभियुग्वानं, विक्षिपं, एताः पायस(बलिभिः)शेषेण, एता अङ्गप्रधानार्था देवता अस्मिन् कर्मण्यहं यक्ष्ये ।

ततो ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः । (१)सक्षीरं प्रणीतामणायनम् । (२)यवपिष्टं सप्ताश्वत्थपत्राणि चोपकल्पयेत् । लौकिकोदकेन यवपिष्टसंयवनम् । (३)अपूपचतुष्टयकरणम् । चरोरुत्तरतोऽङ्गारेषु लौकिके खर्परे चतुर्णामपूपानामधिश्रयणम् । पर्यग्निकरणादिपूर्ववत् । चरोरुत्तरतोऽपूपानामुद्वासनम् । प्रोक्षण्युत्पवनान्ते अपूपैः प्रागाद्यग्नेः परिस्तरणम् । उपयमनाद्याज्यभागान्तं कृत्वा पञ्चाज्याहुतीर्जुहुयात् ।

"ॐ इन्द्राय स्वाहा" । इदमिन्द्राय न मम "ॐ इन्द्राण्यै स्वाहा" । इदमिन्द्राण्यै न मम "ॐ अजायैकपदे स्वाहा" ।

---

(१) पायसश्रपणार्थं दुग्धस्यापि प्रणयनमत्र कार्यम् । उपदेशातिदेशयोरभावान्न दुग्धस्य प्रणयनमित्यपि केचित् । तत्र प्रणयनपक्षे प्रणयनपात्रे मध्ये सेतुं कृत्वा मूलभागे जलमन्यत्र नीरं निनीय प्रणयनं कार्यम् । मूलभागे क्षीरमितरत्र जलं वा ।

(२) तण्डुलपिष्टं सप्ताश्वत्थपत्राण्येति हरिहरः । अपूपसंयवनार्थे लौकिकोदकस्य अपूपश्रपणार्थे खर्परस्य चोपकल्पनमिति वैद्यनाथः ।

(३) "पोलिका पोलि पूपिकाः" (३।६२) इत्यभिधानचिन्तामणिः । अपूपो मण्डक इत्यष्टकाप्रकरणे कर्कः । प्रतिदिशं स्तरणार्थमपूपचतुष्टयमिति हरिहरः । अन्ये तु यावद्भिस्स्तरणमुपपद्यते तावत अपूपानाहुः ।

इदमजायैकपदे०। "ॐ अहिर्बुध्न्याय स्वाहा" । इदमहिर्बुध्न्याय० "ॐ प्रौष्ठपदाभ्यः स्वाहा" । इदं प्रौष्ठपदाभ्यो न मम० ।

ततो पायसमभिघार्य । "ॐ इन्द्राय स्वाहा" । इदमिन्द्राय० । एकाहुतिः ।

पायसशेषेण स्विष्टकृत् । "ॐ अग्नये स्विष्टकृते स्वाहा"। इदमग्नये स्विष्टकृते न मम ।

ततो भूराद्या नवाहुतयः ।

ततः संस्रवप्राशनादिप्रणीताविमोकान्तं कुर्यात् ।

ततोऽग्नेरुत्तरतः प्राक् संस्थान्युदक्संस्थानि वा सप्ताश्वत्थपत्राणि संस्थाप्य तेषु पायसशेषेण शुक्रज्योतिरित्यादिभिरुग्रश्चेत्यन्तैः सप्तभिर्नमोऽन्तैर्मन्त्रैः क्रमेण प्रतिमन्त्रं स्रुवेण मरुद्भ्यो बलीन् हरेत् ।

"ॐ (१)शुक्रज्योतिश्च० हाः नमः" । इदं शुक्रज्योतिषे चित्रज्योतिषे सत्यज्योतिषे ज्योतिष्मते शुक्राय ऋतपसेऽत्यंहसे च न मम । (२)"ई दृङ्चान्या० सभराः नमः" । इदमीदृशे अन्यादृशे सदृशे प्रतिसदृशे मिताय सम्मिताय सभरसे च न मम । (३)"ॐ ऋतश्च० विधारयो नमः" । इदमृताय सत्याय ध्रुवाय

---

( १ ) शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च । शुक्रश्च ऋतपाश्चात्यंहाः । ( १७।८० )

( २ ) ईदृङ्चान्यादृङ् च सदृङ् च प्रतिसदृङ् च । मितश्च सम्मितश्च सभराः ( १७।८१ )

( ३ ) ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्त्ता च विधर्त्ता विधारयः ( १७।८२ ) ।

धर्त्राय धर्त्रे विधर्त्रे विधारयाय च न मम । (१) "ॐ ऋतजिच्च-सत्य० गणो नमः" । इदमृतजिते सत्यजिते सेनजिते सुषेणाय अन्तिमित्राय दूरे अमित्राय गणाय च न मम (२) "ॐ ईदृक्षासः० अस्मिन् नमः" । इदमीदृक्षेभ्यः एतादृक्षेभ्यः सदृक्षेभ्यः प्रतिसदृक्षेभ्यो मितेभ्यः सम्मितेभ्यः सभरेभ्यो मरुद्भ्यश्च न मम । (३) "ॐ स्वतवाँश्चो० ज्जेषी नमः"। इदं स्वतवसे प्रघासिने सान्तपनाय गृहमेधिने क्रीडिने शाकिने उज्जेषिणे च न मम। "उग्रश्चे"-त्यस्य मनसोच्चारणम् । (४) "ॐ उग्रश्च भीम० क्षिपः स्वाहा नमः" । इदमुग्राय भीमाय ध्वान्ताय धुनये सासहतेऽभियुग्वने विक्षिपाय च न मम । 'इन्द्रं दैवीरि'ति तत्रैव जपति । (५) "ॐ इन्द्रन्दैवीर्विशो० भवन्तु" । ततो ब्राह्मणभोजनम् ।

---

( १ ) ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरे अमित्रश्च गणः ( १७।८३ ) ।

( २ ) ईदृक्षास एतादृक्षास ऊषुणः सदृक्षास प्रतिसदृक्षास एतन। मितासश्च सम्मितासो नो अद्य सभरसोमरुतो यज्ञे अस्मिन् (१७।८४)

( ३ ) स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी । ( १७।८५ ) ॥

( ४ ) ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चाभियुग्वाँ श्च विक्षिपः स्वाहा । ( शु० य० सं० ३९।७ ) ।

( ५ ) ॐ इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो भवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ( शु० य० सं० १७।८६ ) ।

सूतकादिना मुख्यकालातिक्रमसम्भवे सूत्रकारमतेनाश्विन्याः पौर्णमास्या अर्वाग्गौणकालेऽप्यनादिष्टपूर्वकमिदं कर्तव्यम् । तदुक्तं गृह्यकारिकायाम्—

"अभावान्मुख्यकालस्य गौणकालोऽपि शस्यते ।
कार्यमेतत्स्मृतेः सूत्रकाराभिप्रायतोऽपि च ॥
मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनम् ।
न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणमि"ति ॥

इति स्मार्तोल्लासे इन्द्रयज्ञप्रयोगः समाप्तः ।

## ( पृषातकाकर्म )

अथ पृषातकाकर्मोच्यते । तच्चाश्वयुज्यां पौर्णमास्यां भवति तत्र तदहः प्रातर्होमानन्तरं कुण्डे गोमयोपलेपनादिभिः स्वगृहमलङ्कुर्यात् । मलापकर्षणस्रक्चन्दनालङ्करणनूतनशुक्लाम्बरादिभिश्च सर्वे गृह्या अलङ्कृता भवेयुः ।

तत्र प्रथमप्रयोगे निर्णेजनान्तं वैश्वदेवं विधाय ततः प्राणानायम्य देशकालौ स्मृत्वा पृषातकाकर्माहं करिष्ये । तन्निमित्तं गणेश-

पूजनादि वृद्धिश्राद्धान्तं कृत्वा ततोऽग्निमपरेणोपविश्य प्राणायामादि, श्रीपरमेश्वरप्रीतये पृषातकाकर्माहं करिष्ये ।

तत्र वैकल्पिकमिन्द्रयज्ञवत्स्मरेत् । तत ऋष्यादिस्मरणम् । भूरादीनामृष्यादिकं पूर्ववत् । "ऊनं मे पूर्यता"मिति गौतम गायत्री अग्निर्देवता होमे विनियोगः। "आप्यात्विन्द्र" इत्यस्य वामदेव ऋषिः, "आ न इन्द्र" इत्यस्य प्रजापतिः "आ न इन्द्रो" हरिभिरित्यस्य सरस्वती, "त्रातारमि"त्यस्य गर्गः "इन्द्रः सुत्रामा, तस्य व्वयमि"-त्यनयोरश्विनावृषी "आमन्द्रैरि"त्यस्य विश्वामित्रः "एवेदिन्द्रमि" त्यस्य वसिष्ठः सप्तसु त्रिष्टुप् अष्टम्यां बृहती, अष्टानामिन्द्रो देवता पर्ववेत्तणो विनियोगः ।

ततो देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं सोममेता देवता आज्येन, इन्द्रमिन्द्राणीमश्विनावाश्वयुजीं पौर्णमासीं शरदं दधिमधुघृतमिश्रपायसेन, अग्निं स्विष्टकृतं पायसशेषेण भूरादीनां पूर्ववत्स्मृत्वा अग्निं पृषदाज्येन एता अङ्गप्रधानार्था देवता अस्मिन्कर्मण्यहं यक्ष्ये । ततो ब्रह्मोपवेशनाद्याज्यभागान्तं कुर्यात् । विशेषस्तु—सक्षीरं प्रणीताप्रणयनं दधिमध्वाज्ययुक्तानां पृषदाज्यस्य चोपकल्पनम् । प्रोक्षणयुत्पवनान्तं कृत्वोपयमनकुशादानात्प्राक् पायसे दधिमधुघृतासेकः ।

उपयमनाद्याज्यभागान्तं कृत्वा पायसमभिघार्य पायसेन पश्चाहुतीर्जुहुयात्। स्रुवेणावदाय "ॐ इन्द्राय स्वाहा"। इदमिन्द्राय० । "ॐ इन्द्राण्यै स्वाहा"। इदमिन्द्राण्यै०। "ॐ अश्विभ्यां स्वाहा"। इदमश्विभ्यां०। "ॐ आश्वयुज्यै पौर्णमास्यै स्वाहा"। इदमाश्वयु० "ॐ श-

रदे स्वाहा"। इदं शरदे० । यथादैवतं त्यागः । पायसशेषेण स्वि-ष्टकृत् । भूराद्या नवाहुतयः । प्राशनादि प्रणीताविमोकान्तं कृत्वा तत उपकल्पितं पृषदाज्यं यजमानस्याञ्जलावन्य आसिञ्चेत्ततो यज-मान "ॐ ऊनम्मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहा" इत्यञ्जलिना पृषदाज्यं जुहुयात्। इदमग्नये न ममेति त्यागः। ततः पत्नी गृह्याश्च (१) "आ-यात्विन्द्र" इत्यादिना "यूयं पात स्वस्तिभिः सदा नः" इत्यन्तेन षड-र्चेनानुवाकेन चरुशेषमवेक्षेरन्। ततः पृषातककर्माङ्गं ब्राह्मणभोजनम्। यदि गृहे गावो विद्यन्ते तदा तस्यां रात्रौ मातृभिर्वत्सानुत्सृजेरन् ।

एतत्कर्म मुख्यकाला (तिक्रमे) सम्भवे गौणकालेऽपि कर्तव्यम्।
"पृषातकमिदं कर्म गौणकालेऽपि शस्यते" ।

इति स्मार्त्तोल्लासे पृषातककर्म समाप्तम् ।

---

(१) ॐ आयात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्नक्षत्रमभिभूति पुष्यात् ॥

आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः। ओजि-ष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥

आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च । तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् । ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥

## (आग्रहायणीप्रयोगः)

अथाग्रहायणीकर्म । तच्च मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म भवति । तत्र प्रथमप्रयोगे निर्णेजनान्तं वैश्वदेवं कृत्वा प्राणानायम्य देशकालौ सङ्कीर्त्य आग्रहायणीकर्मनिमित्तं गणपतिपूजनाद्याभ्युदयिकान्तं कृत्वाऽग्निमपरेण प्राणानायम्य श्रीपरमेश्वरप्रीतये आग्रहायणीकर्माहं करिष्ये ।

ततो वैकल्पिकं स्मरेत् । ऋष्यादिस्मरणम् । तत्र "अपश्वेतपदे" त्यादिद्वयोः प्रजापतिर्लिंगोक्ता देवता छन्दोहीनौ, "यां जनाः प्रतिनन्दन्ति" "संवत्सरस्य प्रतिमे" त्येतयोराथर्वण अनु० रात्रिर्देवता, "संवत्सराय परिवत्सराय" "ग्रीष्मो हेमन्त" इत्येतयो रालम्बायनस्त्रिष्टुप् संवत्सरादयो ग्रीष्मादयश्च पञ्च पञ्च क्रमाद्देवता चतुर्णां होमे विनियोगः। भूरादीनां पूर्ववत्। "आग्नेयपाण्डवा"दि मन्त्राणां परमेष्ठी प्रजापतिः ( अनु० ) लिङ्गोक्ता देवता छन्दोहीना होमबलिदानादिषु "नमोऽस्तु सर्पेभ्य" इति त्रयाणां प्रजापतिः अनु०

---

इन्द्रः सुत्रामा स्ववाँ २॥ अवोभिः सुमृडीको भवतु विश्ववेदाः। बाधतान्द्वेषोऽअभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥

तस्य वयठं० सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाँ २॥ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। मा त्वा केचिन्नियमन्वि न पाशिनोऽति धन्वेवताँ २॥ इहि ॥

एवेदिन्द्रं वृषणं वज्रबाहुं वशिष्ठासो अभ्यर्चन्त्यर्कैः। स नस्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः। (२०।४७-५४)।

सर्पाश्च उपस्थाने विनियोगः। "आपो हि ष्ठे"ति तिसृणां सिन्धुद्वीप० गायत्री० आपो देवता मार्जने विनियोगः।

अथ देवताभिध्यानम्। तत्र प्रजापतिमिन्द्रमग्निं सोमं श्वेतपदं श्वेतं वैदर्व्यं रात्रिं रात्रिं संवत्सरं परिवत्सरं इदावत्सरं इद्वत्सरं वत्सरं ग्रीष्मं हेमन्तं वसन्तं वर्षाः शरदमेता देवता आज्येन, सोमं मृगशिरसं मार्गशीर्षीं पौर्णमासीं हेमन्तं स्थालीपाकेन, अग्निं स्विष्टकृतं चरुशेषेण, आग्नेयपाण्डुपार्थिवानां सर्पाणामधिपतिं–श्वेतवायवान्तरिक्षाणां सर्पाणामधिपतिं–अभिभूः सौर्यदिव्यानां सर्पाणामधिपतिं–एताः सक्तुबलिभिः, भूरादीनां पूर्ववत्, एता अङ्गप्रधानार्था देवता अस्मिन् कर्मण्यहं यक्ष्ये।

ततो ब्रह्मवरणाद्याज्यभागान्ते विशेषः। उपकल्पनीयानि–शूर्पम्, उदपात्रम्, दर्वी, कङ्कतानि, अञ्जनम्, अनुलेपनम्, स्रजः, उल्कार्थे काष्ठम्, उल्काधारकः, मार्जनीयोदपात्रम्। अत्र धानावर्जे चरुश्रपणाद्याज्यभागान्तं कृत्वा "ॐ अप श्वेतपदा जहि पूर्वेण चापरेण च। सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा"। इदं श्वेतपदे न मम। "ॐ न वै श्वेतस्याध्याचारेऽहिर्ददर्श कश्चन। श्वेताय वैदर्व्याय नमः स्वाहा"। इदं श्वेताय वैदर्व्याय न मम।

ततो यां जनाद्याश्चतस्र आज्याहुतयः। "ॐ यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम्। संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा"। इदं रात्र्यै०। "ॐ संवत्सरस्य प्रतिमा या तां

रात्रीमुपास्महे । प्रजाᳬंसुवीर्यो कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा" । इदं रात्र्यै० । "ॐसंवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः । तेषां वयᳬं० सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा" । इदं संवत्सरायप रिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय च न मम । "ॐग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाᳬं शतशारदानां निवात एषामभये वसेम स्वाहा" । इदं ग्रीष्माय हेमन्ताय वसन्ताय वर्षाभ्यः शरदे च न मम ।

ततस्स्थालीपाकमभिघार्य चतस्र आहुतीर्जुहुयात् । "ॐ सोमाय स्वाहा" । इदं० । "ॐमृगशिरसे स्वाहा" । इदं० । "ॐ मार्गशीर्ष्यै पौर्णमास्यै स्वाहा" । इदं० । "ॐहेमन्ताय स्वाहा" । इदं० । "ॐअग्नये स्विष्टकृते स्वाहा" । इदमग्नये० । यथादैवतं त्यागाः ।

भूरादिप्रणीताविमोकान्तं कृत्वा सक्तुनिर्वापादि मार्जनान्तः सर्पबलिः श्रवणाकर्मवत् ( त्कृत्वा । ततः ) त्कुर्यात् । तद्यथा— शूर्पे सक्तून् कृत्वा उदपात्रं दर्वीं कङ्कतान्यञ्जनं गन्धं स्रजश्च गृहीत्वा यजमानो ब्रह्मणा पत्न्योल्काधारिणा च सहोल्कायां ध्रियमाणायां बहिर्निष्क्रम्य बाह्यशालायां स्थण्डिलसमीपे उपविश्यावनेजयेत् । "ॐ आग्नेयपाण्डुपार्थिवानाᳬं सर्पाणामधिपतेऽवनेनिक्ष्व । ॐ श्वेतवायवान्तरिक्षाणाᳬं सर्पाणामधिपतेऽवनेनिक्ष्व । ॐअभिभूः सौर्यदिव्यानाᳬंसर्पाणामधिपतेऽवनेनिक्ष्वे"ति ।

ततो दर्व्या शूर्पात् सक्तूनवदायावनेजनस्थाने यथाक्रमेण बलीन् हरेत् "आग्नेया"दिमन्त्रैः । "एष ते बलि"रिति प्रयोगः । ततः पुनरवनेजनानि तैरेवमन्त्रैः ।

ततः कङ्कतेन "प्रलिखस्वे"ति । अञ्जनं गन्धं स्रजश्च । ततः सक्तुशेषं स्थण्डिले न्युप्य तदुपर्युदपात्रं निनीय "नमोऽस्तु सर्पेभ्य" इत्युपतिष्ठते ।

ततः "अप श्वेत० न वै श्वेत०" एताभ्यां स्वाहाकारवर्जिताभ्यां मन्त्राभ्यामुदकधारां निनीय सकृन्मन्त्राभ्यां द्विस्तूष्णीम् । "ॐ अप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः । न वै श्वेतस्याभ्याचारेऽहिर्ददर्श कञ्चन । श्वेताय वैदर्व्याय नमः" इत्येताभ्यां मन्त्राभ्याम् । इतरथावृत्तिस्तूष्णीम् । ततो दर्वीं शूर्पं च प्रक्षाल्योल्कायां प्रतपनम् । ततः सर्वे द्वारसमीपमागत्योपविश्य यजमानो यजमानी चोदपात्रोदके "नापो हि ष्ठे"ति त्रिभिर्मन्त्रैर्मुखं मार्जयेच्चथैव ब्रह्मोल्काधारी च । यजमान उत्सृष्टो बलिरिति ब्रूयात् । ततो गृहं प्रविश्य रात्रौ मातृभिर्वत्सान् समुत्सृजेत् ।

अत्र सूत्रकारस्य परिसङ्ख्योक्तेर्मुख्यकालनियमाद् गौणकालाभावः ।

इति स्मार्तोल्लासे आग्रहायणीकर्म ।

## ( स्रस्तरारोहणप्रयोगः )

अथ स्रस्तरारोहणप्रयोग उच्यते । तत्र मार्गशीर्ष्याः पौर्णमास्या ऊर्ध्वमागामिन्या अष्टम्या अर्वाक् कस्मिँश्चिच्छुभे वासरे कर्तव्यम्(१) । तत्र तदहर्गृहं गृह्याश्च पूर्ववदलङ्कृताः स्युः । यदि शालायां स्रस्तरावकाशो न विद्यते तदा देशान्तरे खरशुद्धिं विधाय तत्राग्निं संस्थाप्य तत्रैतत्कर्म कर्तव्यम् । तत्र प्रथमप्रयोगे निर्णेजनान्तं वैश्वदेवं कृत्वा प्राणानायम्य देशकालौ सङ्कीर्त्य स्रस्तरारोहणनिमित्तं गणपतिपूजनादि(२) नान्दीश्राद्धान्तं कृत्वाऽग्निमपरेण यजमानः पत्नी च पुत्रादयो गृह्याश्च यथाकनिष्ठमुदक्संस्थाः प्राङ्मुखा उपविशेयुः । ततो यजमानः प्राणायामादिकं कृत्वा परमेश्वरप्रीतये स्रस्तरारोहणमहं करिष्ये ।

अथ ऋष्यादिस्मरणम् । "अयमग्निर्वीरतम" इत्यस्य प्रजापतिरनुष्टुप् अग्निर्देवता जपे विनियोगः । "दैवीमध्वमि"त्यस्य

---

( १ ) रेणुदीक्षितोऽपि—

स्रस्तरारोहणं कुर्यात्पौर्णमास्या अनन्तरम् ।
अत्रैव च शुभे वारे अष्टकायाः पुरैव तु ॥
यान्ति गृह्याः सपत्नीकाः सन्ति ये (वृश्चिकुम्भताः) तत्र सुप्रताः ।
अवकाशो न चेदग्नेः पश्चादारोहणाय वै ।
अग्निं देशान्तरे नीत्वा तत्पश्चात्स्रस्तराश्रितिः ॥ इत्यादि ।

( २ ) अत्र मातृपूजा आभ्युदयिकं चेति हरिहरादयः । अपरे तु "नाष्टकासु भवेच्छ्राद्ध" मिति वचनात् न श्राद्धमिच्छन्ति तदा मातृपूजामात्रम् । केचित्तु यत्रैवाभ्युदयिकश्राद्धं तत्रैव मातृपूजनमित्याहुः ।

प्रजापतिः गायत्री अग्निः ( अदितिः ), "सुनावमि"त्यस्य सरस्वती गायत्री अश्विनौ दैवते ( अश्विनावृषी गायत्रीछन्दः द्यौः नौर्वा देवता ) "आ नो मित्रावरुणे"त्यस्य सरस्वती ( विश्वामित्रः ) गायत्री मित्रावरुणौ दैवते अञ्जलिकरणे विनियोगः । "आयुः कीर्तिरि"त्यस्य गौतमः ( आसुरी ) गायत्री अग्निः स्रस्तरारोहणे विनियोगः । "सुहेम" इत्यस्य आश्वलायनः पङ्क्तिः लिङ्गोक्ता हेमन्तादयः पञ्च देवता जपे विनियोगः । "स्योना पृथिवी"त्यस्य दध्यङ्ङथर्वणः गायत्री पृथिवी देवता शयने विनियोगः । "उदायुषे"त्यस्य गौतमः गायत्री अग्निर्देवता उत्थाने विनियोगः ।

इति स्मृत्वा ग्रन्थितैर्दर्भैर्जायापुत्रादिसहितस्यात्मनः शयनपर्याप्तं स्रस्तरं कृत्वा यजमानोऽग्नेः पश्चात् प्रागग्रं स्रस्तरमास्तीर्य तस्योपर्यहतं वस्त्रमुदग्दशमास्तीर्य ब्रह्मवरणं कृत्वा, अग्नेरुत्तरत उदपात्रं शमीशाखां सीतालोष्ठमश्मानं चोदक्संस्थं निधाय स्रस्तरमपरेणोपविश्याग्निमीक्षमाणो यजमानः "ॐ अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः । सुवीर्योऽयꣳश्रेष्ठ्ये दधातु नावि"ति जपित्वा "दैवीन्नावमि"(१) त्यादिभि "र्मध्वा रजाꣳसि सुक्रतु" इत्यन्तैस्त्रिभिर्मन्त्रैरधोनाभि प्राञ्चमञ्जलिं कृत्वा "ब्रह्मन् प्रत्यवरोहामे"ति ब्रह्माणमामन्त्र्य "प्रत्यवरोहध्वमि"ति ब्रह्मणानुज्ञातो यजमानः पत्नी पुत्रादयो गृह्याश्च यथा-

( १ ) ॐ दैवीं नावꣳस्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ सुनावमारुहेममस्रवन्तीमनागसम् । शतारित्राꣳस्वस्तये ॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतु ( शु०य० सं० २१ । ६-८ ) ॥

ज्येष्ठं प्राङ्मुखा वामपादेन "ॐ आयुष्कीर्तिर्यशोबलमन्नाद्यं प्रजामि" ति मन्त्रं जपन्तः सर्वे क्रमेण स्रस्तरमारोहयेयुः । आरुह्याक्रम्यो· पविशेयुः । तेषां मध्ये उपनीतास्त एव "सुहेमन्तः सुवसन्तः सुग्री- ष्मः प्रतिधीयतान्नः । शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा" इति मन्त्रं जपेयुः । तत्रारूढास्ते सर्वे(१) "स्योना पृथिवी"ति मन्त्रेणा- रोहणक्रमेणैव प्राक्शिरसो दक्षिणपार्श्वैः शयीरन् । तत ॐ "उद्वा- युषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरि"त्यनेन मन्त्रेण सर्वे क्रमादुत्तिष्ठेयुः । एवं ब्रह्मणानुमन्त्रणाद्युत्थानान्तं द्विर- परं कर्म भवेत् । तत आरभ्य मासचतुष्टयं यावत्सर्वे अधः शयीरन् यथेष्टं वा । अत्र गौणकालाभावः ।

इति स्मार्तोल्लासे स्रस्तरारोहणप्रयोगः समाप्तः ।

## ( प्रथमाष्टकाप्रयोगः )

अथाष्टकान्वष्टकाप्रयोग उच्यते । ऊर्ध्वमाग्रहायण्या मार्गशीर्ष- पौष-माघानां कृष्णाष्टमीषु ऐन्द्री वैश्वदेवी प्राजापत्याः क्रमेण स- ञ्ज्ञितास्तिस्रोऽष्टका कर्मणि स्युः । एतासु तावत्प्रथमा ऐन्द्रीसंज्ञ-

---

(१) ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ ( शु० य० सं ३५।२१ ) ॥

काऽष्टकोच्यते । तत्र प्रथमप्रयोगे वृद्धिश्राद्धं विधायाऽग्नेः पश्चादुपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थमष्टकाकर्माहं करिष्ये । पूर्ववद्वैकल्पिकं स्मरेत् ।

ऋष्यादिस्मरणम् । 'त्रिंशत्स्वसार"इत्यादिमन्त्रजातस्य याज्ञवल्क्य ( प्रजापतिः ) ऋषिः त्रिष्टुप् अष्टम्या अनुष्टुप् लिङ्गोक्ता आज्यहोमे विनियोगः । भूरादीनां पूर्ववत् ।

ततो देवताभिध्यानम् । तत्र प्रजापतिमिन्द्रमग्निं, सोमं, स्वसॄः, रात्रिं, अष्टकां, रात्रीः, रात्रीः, रात्रीः, रात्रिं, रात्रिं, रात्रिं, रात्रिं, एता आज्येन–पृथिवीं, अन्तरिक्षं, दिवं, दिशः, प्रदिशः, आदिशः, अहोरात्रे, अपः, मरीचीः, धातारं, समुद्रं, ब्रह्माणं, विश्वानादित्यान्, वसून्देवान्, रुद्रान्, गोप्तॄन्, मरुतः, प्रजापतिं, परमेष्ठिनं, अष्टकां चरुणा–इन्द्रमपूपेन–अग्निं स्विष्टकृतं स्थालीपाकापूपशेषेण–भूरादीनां पूर्ववत् । एता अङ्गप्रधानार्था देवता अस्मिन् कर्मण्यहं यक्ष्ये ।

ततो ब्रह्मवरणाद्याज्यभागान्ते विशेषः । तण्डुलानन्तरं सिद्धस्यापूपस्यासादनम् । प्रोक्षणकाले प्रोक्षणम् ।

तत आज्यभागानन्तरमाज्येनैव "त्रिंशत्स्वसार" इत्याद्यैर्दशाहुतीर्जुहुयात् । "ॐ त्रिंशत्स्वसार उपयन्ति निष्कृतिं समानं केतुं प्रतिमुञ्चमानाः ऋतूँस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा"।इदं स्वसृभ्यो न मम "ॐ ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि विपश्यन्ति

पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा" । इदं रात्र्यै न मम ।। "ॐएकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वाहा" । इदमष्टकायै न मम । "ॐ अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामतिमा प्रयुक्त स्वाहा" । इदं रात्रीभ्यो न मम ।। "ॐ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्त स्वाहा" । इदं रात्रीभ्यो न मम । "ॐ पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिकलोकमेकᳬस्वाहा" ।। इदं रात्रीभ्यो नमम । "ॐ ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नियच्छतु स्वाहा" । इदं रात्र्यै न मम । "ॐया प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराᳬसमाᳬस्वाहा" । इदं रात्र्यै न मम । "ॐशुक्रऋषभा नभसा ज्योतिषाऽऽगाद्विश्वरूपा शबलीरग्निकेतुः । समानमर्थᳬ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा" । इदं रात्र्यै न मम । "ॐ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत्स्वाहा" । इदं रात्र्यै न मम ।

ततः स्थालीपाकमभिघार्य तेन चतस्र आहुतीः "शान्ता पृथिवी"-

त्याद्यष्टकान्ता जुहुयात् । "ॐ शान्ता पृथिवी शिवमन्तरिक्षꣳ शं नो द्यौरभयं कृणोतु । शं नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा" । इदं पृथिव्या अन्तरिक्षाय दिवे दिग्भ्यः प्रदिग्भ्यः आदिग्भ्योऽहोरात्राभ्यां च न मम "ॐ आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याꣳ स्वाहा"। इदमद्भ्यो मरीचिभ्यो धात्रे समुद्राय ब्रह्मणे च न मम । "ॐ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु। ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहा" । इदं विश्वेभ्य आदित्येभ्यो वसुभ्यो देवेभ्यो रुद्रेभ्यो गोप्तृभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिने च न मम । "ॐ अष्टकायै स्वाहा" । इदमष्टकायै न मम ॥

अथापूपमभिघार्य तेनैकाहुतिः । "ॐ इन्द्राय स्वाहा" । इदमिन्द्राय न मम ।

ततः स्थालीपाकापूपशेषेण स्विष्टकृत् । ततो भूरादिप्रणीताविमोकान्तं कुर्यात् ।

इति स्मार्तोल्लासे प्रथमाष्टकाप्रयोगः समाप्तः ।

## ( अन्वष्टकाप्रयोगः )

अष्टकाया उत्तरेद्युः पिण्डपितृयज्ञवदन्वष्टकाकर्म कुर्यात् । तच्च मातर्यविद्यमानायां भवति । तदुक्तं गृह्ये—

"मातर्यविद्यमानायाम(मा)न्वष्टक्यमिदं भवेत् ।
पितर्यविद्यमाने तु दर्शे तद्वत्पितुः क्रतुः" ॥

तत्र निर्णेजनान्तं वैश्वदेवं कृत्वा अपराह्णे प्राचीनावीती नीवीबन्धनम् । अग्नेः परितो वस्त्रादिवृते उदग्द्वारे परिवृते दक्षिणामुखेन कर्म कुर्यात् । प्राणायामादि, देशकालौ सङ्कीर्त्य परमेश्वरप्रीतये अन्वष्टकाकर्माहं करिष्ये । तत्र वैकल्पिकं स्मरेत् । अग्नेः पश्चात् पात्राणामासादनम् । चरु( करणम् )ग्रहणम् । पश्चाल्लेखाकरणम् । एतत्तेऽन्नमिति पिण्डदानम् । आचार्यादेः पिण्डदानं वा सूत्राण्याच्छादनानि एतान्वैकल्पिकपदार्थानहं करिष्ये ।

अथ ऋष्यादिस्मरणम् । "अग्नये कव्यवाहनाये"त्यादिसर्वमन्त्राणां प्रजापतिः "अग्नये कव्यवाहनाय, सोमाय पितृमते" द्वे यजुषी लिङ्गोक्तदैवते ( देवदेवत्ये वा ) होमे विनियोगः । "अपहता असुरा" इत्यस्या असुरक्षांसि देवताः यजुः लेखाकरणे विनियोगः । "ये रूपाणी"त्यस्य कव्यवाहनोऽग्निर्देवता त्रिष्टुप्० उल्मुकनिधानेवि० । "अत्र पितर" इत्यस्य पितरो देवता बृहती० जपे विनियोगः। "अमी मदन्त" इत्यस्य पितरः यजुर्जपे विनियोगः । "नमो व" इत्यादीनां लिङ्गोक्ता देवता षड्यजूंषि एषामञ्जलिकरणे विनियोगः । "गृहान्न"इति पितरो यजुर्जपे विनियोगः । "एतद्वः"

इति पितरो यजुः सूत्राधाने विनियोगः । "ऊर्जं व्वहन्ती"रिति विराट् आपो अपां निषेके विनियोगः । "आधत्त" त्यस्य पितरो गायत्री मध्यमपिण्डप्राशने विनियोगः । अथवा सर्वेषां पितृयज्ञक्रतौ विनियोगः ।

ततो देवताभिध्यानम् । अत्र पिण्डकरणे त्रयः पक्षाः । मांसेन पायसेन चरुणा वा । अस्माभिश्चरुपक्षग्रहणं कृतम् । अग्निं कव्यवाहनं, सोमं पितृमन्तं, चरुणा, गोत्रमस्मत्पितरममुकशर्माणं, ( एवं ) पितामहं प्रपितामहं, सगोत्रामस्मन्मातरं अमुकीं (दां) देवीं, एवं पितामहीं, प्रपितामहीं अमुकीं(दां) देवीं, चरुपिण्डैः सुरासक्त्वादिद्रव्यैराचार्यादीन्वा पिण्डैरहं यक्ष्ये ।

तत आग्नेयादिदक्षिणान्तं(अप्रदक्षिणं)दक्षिणाग्रैः दर्भैः परिस्तरणम् । अपरेणोत्तरेण वा पात्रासादनम् । प्राक्संस्थानि दक्षिणाग्राणि प्राग्बिलानि, उत्तरेण चेत् दक्षिणासंस्थानि प्रागग्राणि दक्षिणबिलानि, स्रुचं, उलूखलं, मुसलं, शूर्पं, चरुस्थालीम्, आज्यं, मेक्षणं, वज्रं, उदपात्रम्, सकृदाच्छिन्नानि, अनवखण्डितास्तण्डुलाः, अन्यतरा सुरा, सक्तवः, अञ्जनम्, अनुलेपनम्, ्ज इत्यासादयेत् । स्रुचि तण्डुलग्रहणम् । कण्डनम् । शूर्पादानम् । उद्वपनम् । निष्पवनम् । सकृत्फलीकरणम् । चरुस्थाल्यामावपनम् । उदकासेचनम् । अधिश्रयणम् । शृतस्याभिघारणम् । दक्षिणत उद्वासनम् । पाणि सोपग्रहं हृदि न्यस्य सव्यं जान्वाच्य "ॐ अग्नये कव्यवाहनाय स्वाहा" । इदमग्नये कव्यवाहनाय न मम । मध्ये मेक्षणेन जुहुयात् । तस्मात्"ॐ-

सोमाय पितृमते स्वाहा"। इदं सोमाय पितृमते न मम। तस्माद् मेक्षणप्रक्षेपः। अथवा पूर्ववदेव होमः। ततो(१) "अपहता" इति रेखाकरणम्। "ये रूपाणी"(२) त्युल्मुकनिधानम्। प्रमीतपितृकस्याग्नेः पित्रादिभ्यः पिण्डदानम्। ततः प्रत्यक् प्राग्वा मात्रादिभ्यो लेखाकरणम्। उल्मुकनिधानं पूर्ववत्। गोत्रे अस्मन्मातरमुकि देवि(दे) अवनेनिक्ष्व। एवं पितामहि० प्रपितामहि०। सकृदाच्छिन्नान्युपस्तीर्य चरुशेषेण पिण्डान् कृत्वा गोत्रे अस्मन्मातः अमुकि देवि(दे)एतत्तेऽन्नम्। इदं गोत्रायै अस्मन्मात्रे अमुकी देव्यै (दायै) न मम। एवं पितामहि०। प्रपितामहि०। मात्रादिपिण्डसन्निधावनपत्येभ्य आचार्यशिष्येभ्य इच्छया लेखोल्मुकवर्जं दत्वा मात्रादिपिण्डत्रयसमीपे तत्समावटत्रयं खात्वा तेषु पूर्ववद्गोत्रादिनिर्दिश्यामुकि देवि (दे) सुरां पिबेति क्रमेण गुडोदका-(गुडपायसा) दिकृतां सुरामेकेनैव पाणिनोपसिञ्चेत्।

तदुक्तं गृह्ये—

> केचिल्लोकभयादत्र प्रत्यक्षान्नाहरेत् सुराम्।
> किन्तु तत्सदृशं द्रव्यं गुडवार्या(दुग्धा)दिकं भवेत्॥

तथैवामुकि देवि (दे) तृप्यस्वेति तत्रैव सक्तुप्रक्षेपः। एवमेवाङ्क्ष्वेत्यञ्जनदानम्। पिण्डेषु अनुलिम्पस्वेत्यनुलेपनम्। स्रजोऽपिन-

---

(१) ॐ अपहता असुरा रक्षाᳬंसि वेदिषदः (शु०य०सं०२।२९)॥

(२) ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् (२।३०)॥

ह्यस्वेति स्रजश्च । एतत्सुरादिदानं मातृभ्य एव । (१)"अत्र पितर" इत्यादि सूत्रदानादर्वाक् पूर्ववन्मन्त्रेणैव कुर्यात् । प्रत्यवनेजनं सर्वत्र नीवीं विस्रंस्य "नमो व" इति षडञ्जलिकरणम् । सूत्राद्यन्यतमदानम् । प्रतिपिण्डमुभयत्र स्त्रीपिण्डपूर्वकं वा।(२)"ऊर्जमि"त्यवनेजनशेषोदकनिषेकः पिण्डमूले सकृत्सकृदुभयत्र.पिण्डं चरुपात्रे प्रत्यवधायावघ्रायाग्नौ सकृदाच्छिन्नान्युभयानि सहैवाभ्याधायोल्मुके चापि विसृज्य यज्ञोपवीती भूत्वाऽऽचम्य मातृविसर्जनं कुर्यात् । एवं सर्वत्र स्मृत्युक्तविधानेनान्वष्टक्यश्राद्धं कुर्यात् ।

इत्यन्वष्टकाप्रयोगः समाप्तः ।

---

( १ ) अत्र पितर इत्यर्द्धर्चं जपित्वा पराङावृत्य वायुं धारयन् आतमनादुदङ्मुख असित्वा तेनैवाऽऽवृत्यामीमदन्तेत्यर्धर्चं जपित्वा नीवीं विस्रंस्य नमो व इति प्रतिमन्त्रमञ्जलिं कुर्यात् ।

ॐ अत्र:पितरो मा दयध्वं यथाभागमावृषायध्वम् । ॐअमीमदन्त पितरो यथाभागमावृषायिषत । ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः । ॐ गृहान्नः पितरो दत्त सतो वः पितरो देष्म । ॐ एतद्वः पितरो वास आधत्त । ( २।३१-३२ )

( २ ) ॐऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थतर्पयत मे पितॄन् ।

आधत्तेति मध्यमपिण्डं प्राश्नाति पुत्रकामा ।

ॐ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् । ( २।६३ ) ॥

## ( द्वितीयाष्टकाप्रयोगः )

अथ पौषस्य वैश्वदेवी अष्टका ( तस्याः ) प्रयोग उच्यते । सा च गोपशुस्थानीयछागमांसेन भवति । तस्य च देशकालविरुद्धत्वात्पायसेन चरुणा वा स्यात् । तत्र प्रथमप्रयोगे मातृपूजनपूर्वकं वृद्धिश्राद्धं कृत्वा प्राणायामादि देशकालौ सङ्कीर्त्य द्वितीयाष्टकाकर्माहं करिष्ये इति सङ्कल्प्य प्रथमाष्टकावत्सर्वं कुर्यात् ।

विशेषस्तु—अष्टकानन्तरं विश्वान् देवान् चरुणेत्यभिध्यानम् । अष्टकाहुत्यन्ते चरुमभिघार्य "ॐ विश्वेभ्यो देवेभ्यः स्वाहा" इदं विश्वेभ्यो देवेभ्यो न मम । इति हुत्वोभयशेषेण स्विष्टकृत् । अन्यत् सर्वं पूर्ववत् ।

इति द्वितीयाष्टका समाप्ता ।

## ( तृतीयाष्टकाप्रयोगः )

एवमेव माघस्य प्राजापत्याष्टका सिद्धेन कालशाकेन चरुणा ।

तदुक्तं गृह्ये—

"कालशाकं चरुं सिद्धं स्थानेऽपूपस्य साधयेदि"ति ॥

तत्राष्टकानन्तरं प्रजापतिं कालशाकेनेत्यभिध्यानम् । महानसादौ मूलान्यंशमुद्धृत्य कालशाकं चरुं पक्त्वा तण्डुलानन्तरमासाद्य प्रोक्षयेत् । अष्टकाहुत्यन्ते "ॐ प्रजापतये स्वाहा" । इदं प्रजापतये न मम । इति शाकाहुतिः । उभयशेषात्स्विष्टकृत् । अन्यत्सर्वं समानम् ।

## ( तुर्याष्टकाप्रयोगः )

एवमेव चतुर्थी भाद्रपदस्य पितृयष्टका । अष्टकान्ते पितॄन् प्राचीनावीतिशाकेनेत्यभिध्यानम् । तण्डुलानन्तरं शाकमासाद्य प्रोक्ष्य चरुस्थाल्यां चरुनिर्वापः । द्वितीयस्यां सोदकायां शाकं प्रक्षिपेत् । एवं चरुधर्मेण शाकं पक्त्वाष्टकाचर्वाहुत्यनन्तरं "ॐपितृभ्यः स्वाहा" इदं पितृभ्यो न मम । इति शाकाहुतिः । एतस्य शाकचरोरासादनादिहोमान्तं प्राचीनावीतिना कर्तव्यम् । एतदनन्तरं यज्ञोपवीती ( अप ) उपस्पृश्योत्तरं विदध्यात् । स्विष्टकृदादिपूर्ववत् । सर्वत्रोत्तरेद्युरन्वष्टकाकर्म च यथोक्तं स्यात् ।

इति श्रीपुष्करपल्लीस्थशिवप्रसादपाठककृते स्मार्तोल्लासे
अष्टकान्वष्टकाप्रयोगः समाप्तः ।

## ( वृषोत्सर्गप्रयोगः )

अथ वृषोत्सर्गप्रयोग उच्यते । तत्र कालः—

कार्तिक्यामाश्वयुज्यां वा संभवेदन्यकालतः ।
आश्वयुज्यां वृषोत्सर्गश्चेदूर्ध्वं स पृषातकात् ॥

रेवतीग्रहणं सूत्रे बाहुल्यार्थकृतं त्विह ।
नात्रापि गौणकालोऽस्ति विशेषवचनाद्यतः ।।
अष्टकाकर्मवत्प्रोक्तं काले तद्वद्विचारिते ।।

स च गयासाम्याद्यनेकफलदर्शनात्पितृतृप्ति-स्वर्गावाप्ति-पापक्षयार्थिना परमेश्वरप्रीतिकामेन कार्तिक्यादौ कर्तव्यः । तत्र गोष्ठे गवां मध्ये नदीतटे वने शिवालये स्वगृहेऽपिवान्यत्र वा शुचौ रम्ये मण्डपे वा प्रागुदक्प्रवणे देशे आवसथ्याग्निं संस्थाप्य मत्स्यपुराणाद्युक्तप्रकारेण सलक्षणपयस्विन्या गोर्वत्समेकवर्णं यथोक्तलक्षणं नीलमेव द्विवर्णं वा षण्मासोर्ध्ववर्षत्रयावधिकं तथाविधाभिरष्टाभिश्चतसृभिर्वा वत्सतरीभिरलाभे द्वाभ्यां वान्वितमीशानदिश्युपकल्पयेत् ।

ततः कर्ता प्राणानायम्य देशकालौ सङ्कीर्त्य तत्सत्परमेश्वरप्रीत्यर्थं वृषोत्सर्गमहं करिष्ये । तदङ्गभूतं गणपतिपूजनादिवृद्धिश्राद्धान्तं कृत्वा ऐशान्यां रुद्रकुम्भस्थापनम् । पञ्चरत्नपञ्चपल्लवगन्धोदकपूरितं वस्त्रपुष्पस्रङ्मण्डितसर्वलक्षणं कुम्भं धान्यपुञ्जोपरि विन्यस्य तत्र शिवमावाह्य अभ्यर्च्य प्राकृतवैकल्पिकानन्तरमेकवर्णो वृष इति स्मरेत् ।

अथ देवताभिध्यानम् । षट्कृत्वोऽग्निं ततः प्रजापतिमिन्द्रमग्निसोममाज्येन-अग्निं, रुद्रं, शर्वं, पशुपतिं, उग्रं, अशनिं, भवं महादेवं, ईशानं, पायसेन-पूषणं पिष्टमयेन हविषा-अग्निं स्विष्टकृतं पायसपौष्णशेषेण-शेषमाज्येनेति पूर्ववत् ।

अथ ऋष्यादिस्मरणम् । (१)"इह रतिः" देवा ऋषयः यजुः "उप सृजन्"इत्युष्णिगग्निर्देव० (सत्रोत्थाने) विनियोगः "पूषा गा" इति गौतमः ( परमेष्ठी ) गायत्री पूषा पिष्टहोमे विनियोगः । भूरादीनां पूर्ववत् । रुद्राध्यायस्य परमेष्ठिः ( देवाः प्रजापति र्वा ) ऋषिः आद्योऽनुवाकः षोडशर्चे एकरुद्रदेवत्यः तत्र "नमस्ते रुद्र" गायत्री "या ते रुद्र, यामिषुं, शिवेन वचसा" इति तिस्रोऽनुष्टुभः "अध्यवोचत्, असौ यस्ताम्रः, असौ योऽव" इति तिस्रः पङ्क्तयः "नमोऽस्तु नीलग्रीवाय, प्रमुञ्च, विज्यं, या ते, परि ते धन्वनो, अवतत्य, नमस्त आयुधाय" इति सप्तानुष्टुभः "मा नो महान्तं, मा नस्तोके" द्वे जगत्यौ कुत्सदृष्टे "नमो हिरण्यबाहवे" इत्यादीनि चत्वारिंशदधिकद्विशतसङ्ख्याकानि यजूंषि सप्ताष्टका द्वन्द्विनस्त्रयो ( चतुर्विं ) विंशतितोऽष्टका जाता एवमुभयतोनमस्कारान्यतरतोनमस्काराश्च तिस्रोऽशीतयो रुद्रास्तेषां देवताः "नमो वः किरिकेभ्य" इत्यादीनां व्याहृतीनां देवहृदयभूता अग्निवाय्वर्करूपा अतिरुद्राः पञ्चरुद्रा देवता "द्रापे" इत्युपरिष्टाद्बृहती "इमा रुद्राये"ति जगती "या ते" ऽनुष्टुप् "परि नो मीढुष्टमे" त्युभे त्रिष्टुभौ "विकिरिद्र, सहस्राणी"ति चानुष्टुभौ सप्तानामेकरुद्र एव

---

( १ ) सर्वानुक्रमसूत्रे तद्भाष्ये च "इह रतीत्यादीनि चत्वारि यजूंष्यग्निदेवत्यानि धृतिहोमे विनियुक्तानि । प्रथमे इह रतिः स्वाहा यजुर्गायत्री इह रमतां स्वाहा यजुरुष्णिक् इह धृतिः स्वाहा यजुर्गायत्री इह स्वधृतिः स्वाहा यजुरुष्णिक्" इत्थमपि ऋष्यादिकमुक्तम् ।

“असङ्ख्याता”दिदशानामवतानानामनुष्टुभः दशरुद्रा “नमोऽस्तु” इति त्रयाणां प्रत्यवरोहाणां घृतयः बहवो रुद्रा देवताः ( रुद्रः शतशीर्षो वा ) जपे विनियोगः । “मयो भू”रित्यादीनां देवा ऋषयः यजूंषि वायवः “यास्ते, या वो” अनयोरिन्द्राग्नी, अग्नीदेवते अनुष्टुभौ ‘रुचं न” इत्यस्याग्निः अनुष्टुप् “तत्वा यामी”ति शुनश्शेपस्त्रिष्टुप् वरुणः “स्वर्ण घर्म” इति यजुषां अग्निः उपस्थाने विनियोगः । “एतं युवान”मिति याज्ञवल्क्यस्त्रिष्टुप् वृषो देवता उत्सर्जने विनियोगः ।

ततो अन्वारणादि पर्युक्षणान्तं कृत्वा सक्षीरं प्रणीताप्रणयनम् । तण्डुलानन्तरं सिद्धस्य पौष्णस्यासादनम् । प्रोक्षणकाले प्रोक्षणम् । रौद्रं पायसं श्रपयित्वा पर्युक्षणान्तं कृत्वा अनन्वारब्धे चतुःपञ्चसप्तदशैकादशाक्षरैः स्वाहान्तैरिहरतिरित्यादिमन्त्रैः षडाज्याहुतीर्जुहुयात् ।

“ॐइह रतिः स्वाहा । ॐइह रमध्वं स्वाहा । ॐइह धृतिः स्वाहा । ॐइह स्वधृतिः स्वाहा । ॐउपसृजं धरुणं मात्रे धरुणो मातरं धयन् स्वाहा । ॐरायस्पोषमस्मासु दीधरत्स्वाहा” ( ८।५१ ) । षण्णां इदमग्नये इति त्यागः ।

ततोऽन्वारब्धे आघारावाज्यभागौ–ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । ॐइन्द्राय स्वाहा । इदमिन्द्राय न मम । ॐअग्नये स्वाहा । इदमग्नये न मम । ॐसोमाय स्वाहा । इदं सोमाय न मम ।

ततः पायसमभिघार्य अनन्वारब्धे होमः । ॐअग्नये स्वाहा ।

ॐरुद्राय स्वाहा । ॐशर्वाय स्वाहा । ॐपशुपतये स्वाहा । ॐउग्राय स्वाहा । ॐअशनाय स्वाहा । ॐभवाय स्वाहा । ॐमहादेवाय स्वाहा । ॐईशानाय स्वाहा । यथादैवतं त्यागः ।

ततः पौष्णमभिघार्य "ॐपूषा गा अन्वेतु नः पूषा रक्षतु सर्वतः । पूषा वाजꣳ सनोतु नः स्वाहा"इत्येकाहुतिः । इदं पूष्णो न मम ।

ततोऽन्वारब्धे पायसपौष्णेन स्विष्टकृत् । "ॐअग्नये स्विष्टकृते स्वाहा" । इदमग्नये स्विष्टकृते न मम । भूराद्या नवाहुतयः ।

ततः संस्रवप्राशनादिप्रणीताविमोकान्तं कृत्वा कुम्भे रुद्रं जपित्वा पायसशेषेण दिक्षु रौद्रबलिं दत्वा वृषस्य वामे स्फिचि चक्रं दक्षिणे त्रिशूलं शूद्रस्य तु विपरीतं कृत्वा दुग्धसहितं कुङ्कुमेनापि चाङ्कितं वृषभं वत्सतरीसहितं(१)"हिरण्यवर्णा"ति चतसृभि"रापो हि ष्ठे"ति तिसृभिः"शन्नो देवीरि"त्यष्टभिर्मन्त्रैः कुम्भैस्त्रिः स्नापयित्वा अग्निसमीपमानीयोत्तरतः पावकं वत्सतरीमध्ये स्थितं गन्धपुष्पधूपदीपवा-

(१) हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥
यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ।
घृतश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवन्तु ॥
( अथर्ववे० १।३३।१-४ )

सोभिः किंकिणीघण्टादिना चरणकण्ठशृङ्गाग्रखुरेष्वलङ्कृत्य रुद्रान्पुरुषसूक्तं कूष्माण्डिमिश्चत्वारि शृङ्गा-चित्रावसो—सावित्रीमघ-मर्षणं चेति मन्त्रान् वृषभस्य दक्षिणे वामे वा कर्णे जपेत् ।

वत्सतर्यो रूपवत्यः पतिं वो बलिनं शुभम् ।
ददामि तेन सहिताः क्रीडध्वं हृष्टमानसाः ॥

इति वत्सतरीकर्णे जपेत् ।

वृषोऽयं भगवान् धर्मश्चतुष्पात्सुप्रकीर्तितः ।
वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः ॥

इति वृषमभिमन्त्रयते ।

एतं युवानं वृषभं ददामि गवां पतिं यूथपतिं सदर्पम् ।
अनेन सार्द्धं चरत प्रकामं कामं तथा प्राप्नुत वत्सतर्यः ॥

इति वत्सतर्योऽभिमन्त्रयते ।

ततो लाजान्समन्तात्प्रकीर्य वृषभस्य वत्सतरीणां च पुच्छमेकी-कृत्य धृत्वा वृषभस्यैव वा सपुष्पधूपदीपाक्षतहिरण्योदकपूर्णेनाञ्ज-लिना "एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण । मा नः साप्तजनुषाऽसुभगा रायस्पोषेण समिषा मदेम" ।

अन्योद्देशप्रयोगश्चेत्सव्येनैनं वृषमुत्सृजेत् । पित्र्युद्देशेन चेदपस-व्येन । (१)"ॐमयो भूरमिमा व्याहि स्वाहे"त्यादिना "स्वर्णासूर्यः

---

(१) मयो भूरभि मा वाहि स्वाहा मारुतोऽसि मरुतागणः श-म्भूर्मयो भूरमिमा वाहि स्वाहावस्यूरसि दुवस्वाञ्छम्भूर्मयोभूर-मिमा वाहि स्वाहा ।

स्वाहे''त्यनेनानुवाकशेषेण तमेवाभिमन्त्र्य तत्पुच्छं तिलोदकपूर्णे ताम्रपात्रे निक्षिप्य—

स्वधा पितृभ्यो मातृभ्यो बन्धुभ्यश्चापि तृप्तये ।
मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजाः ॥
गुरुश्वसुरबन्धूनां ये कुलेषु समुद्भवाः ।
ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ॥
नरा ये चात्र तिष्ठन्ति पतिताः पितृबान्धवाः ।
वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमाम् ॥

इत्यञ्जलिना दक्षिणाभिमुखः पितृंश्च संतर्प्य वृषभं दक्षिणं परिभ्राम्य नमस्कुर्यात् ।

धर्मोऽसि त्वं चतुष्पादश्चतस्रस्ते प्रियाः शुभाः ।
एता हि पोषणार्थाय मयोत्सृष्टास्त्वया सह ॥

---

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते ॥
रुचन्नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥
स्वर्ण घर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा ( शु० य० सं० १८।४५–५० ) ॥

धर्मस्त्वं वृषरूपेण सदात्मानन्दकारकः ।
अष्टमूर्तेरधिष्ठानमतः शान्ति प्रयच्छ मे ॥

इत्यनेनामन्त्र्य कर्षद्वयहिरण्यसहितं सोपस्करं कुम्भं वासांस्य लङ्करणानि सघृतं कांस्यपात्रं चाचार्याय दत्वा क्षमाप्य त्रिःप्रभृतीन् ब्राह्मणान् संयतान् शिवव्रतधरान् यथाशक्तिपायसादिनाऽविस्तारेण शिवप्रीतये भोजयेत् । अन्येभ्यो दक्षिणां दद्यात् । वृषाङ्कयितारं च तोषयेत् ।

इति वृषोत्सर्गः समाप्तः ।

## ( वृषलक्षणं तन्महिमा च )

अथ वृषलक्षणमहिमालिख्यते । तदुक्तं गृह्ये—

एकवर्णो द्विवर्णो वा सर्वरूपो महत्तरः ।
नीलो वा लोहितो वा स्यात् सर्वाङ्गैश्च समन्वितः ॥
पयस्विनीजीववत्सापुत्रः प्रथमरूपवान् ।
कूटः कर्णस्तथा काणः ( खण्डो ) चण्डश्च बधिरस्तथा ॥
श्लोणः सप्तशफश्चैव वर्जनीया इमे वृषाः ।
भरद्वाजोऽनुपर्णी च कूटादींश्च निषेधति ॥

सर्वथोक्तवृषालाभे आपस्तम्बादिसम्मतम् ।
एकशृङ्गो भवेत्कूटः कर्णः स्याच्छिन्नकर्णकः ॥
एकेनाक्ष्णा हि काणः स्यात्खण्डःस्याद्भग्नदन्तकः ।
अथवा शिपिविष्टोवा चाण्डःस्याद्वा प्रकोपनः ॥
बधिरोऽश्रुतशब्देन स्फोटकेन युतोऽथवा ।
वृषः सप्तखुरो योऽसौ स सप्तशफ उच्यते ॥
समोदके नाकपृष्ठे भुवि तस्य विचेष्टितम् ।
महत्पुण्याभिकाङ्क्षी यस्तारयेत्स्वान् पितॄन् परम् ॥
धनपुत्रसमृद्ध्यैवं स नीलं वृषमुत्सृजेत् ।
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ।
वृषोत्सर्गादृते किञ्चिन्नान्यत्पुण्यं महीतले ॥
गयाश्राद्धाश्वमेधाभ्यां सममेतत्फलं स्मृतम् ।
स्वर्गादिकामनायोगे ग्रहणादौ भवेदयम् ॥
ग्रहणद्वितये पुण्ये तीर्थे चैवायनद्व(ये)योः ।
विषुवद्द्वितये चैव मृताहे बान्धवस्य च ॥
उपसर्गे समुत्पन्ने पित्रादौ प्रेततां गते ।
दुर्निमित्तेषु सर्वेषु वृषोत्सर्गः प्रशस्यते ॥
मातृपक्षाश्च ये केचिद्येचान्ये पितृपक्षजाः ।
गुरुश्वसुरबन्धूनां ये चान्ये पिण्डवर्जिताः ॥
वृषोत्सर्गेण ते सर्वे लभन्तां गतिमुत्तमाम् ।

दद्यादनेन मन्त्रेण तिलपुञ्जयुतं जलम् ॥
पितृभ्यश्च समासेन ब्राह्मणेभ्यश्च दक्षिणाम् ।
स्वधा पितृभ्यो बन्धुभ्यो मातृभ्यश्चापि तृप्तये ।
पराशरसगोत्राय विष्णुशर्मोग्रवर्चसे ।
कामं वत्सतरीभिश्च सहैवं वृषमुत्सृजेत् ॥

इति स्मार्तोल्लासे वृषोत्सर्गः समाप्तः ।

## ( प्राशितपाकयज्ञप्रयोगः । )

अथ प्राशितपाकयज्ञप्रयोग उच्यते । वृषोत्सर्गानन्तरं मार्गशीर्षे कार्तिके वा शुक्ले पक्षे पुण्येऽह्नि शूलगवपशुः कर्तव्यः । अथवा पायसचरुरेव ।

तत्राभ्युदयिकं कृत्वा प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीमत्परमेश्वरप्रीतये पायसेन प्राशितपाकयज्ञकर्माहं करिष्ये । यावन्त्यो गृहे गावो विद्यन्ते तासां पायसेन बहूनामलाभे एकस्यापि गोः पायसेन क्रियते । अपिवा महिष्या वा आनीय महानसादुद्धृताग्निना चरुधर्मवर्जं महत्यां पात्र्यां तण्डुलैः पायसं श्रपयित्वा तेन त्रिःप्रभृतीन् ब्राह्मणान् भोजयित्वा तच्छेषं सभार्योऽश्नीत ।

पैत्र्यष्टकावृषोत्सर्गौ पायसप्राशनं च प्रारब्धपाकयज्ञसंनिहितप्राप्ते प्रथमे मासि १ न कुर्वीत । अनुत्सर्गपक्षे द्वितीयाद्यावृत्तौ वा आश्वयुज्यां वृषोत्सर्गे क्रियमाणे पृषातककर्मानन्तरं कर्तव्यम् ।

पाकयज्ञान् समासाद्य एकाज्यानेकबर्हिषः ।
एकं स्विष्टकृतं कुर्यान्नानापि सति दैवते ॥

इति पाकयज्ञः ।

गृह्ये—

पाकयज्ञान्न कुर्वीत मलमासे कदाचन ।
सम्भ(वात्)वे शुद्धमासे स्यादेषा भास्करसम्मतिः ॥
यस्मिन्मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो ह्यधिमास्ये मलिम्लुचः ॥
संक्रान्तिद्वयसंयुक्तः स्पृष्टे मासि विशेषतः ।
मासद्वयगतं तत्र कर्म स्यादिति सङ्ग्रहः ॥
मार्गशीर्षेऽथवा तिष्ये भाद्रो वा क्षयसंज्ञिकः ।
पृथगेवाष्टकाकर्म तत्रैकस्मिन् दिनद्वये ॥
तन्त्रेणान्वष्टकाकर्म कालकर्त्रादि योगतः ।
अग्निमाधाय विधिवत्पाकयज्ञैर्यजेत यः ॥
स याति परमं स्थानं यत्र देवो महेश्वरः ॥

इति पुष्करपल्लीवास्तव्य आलम्बायनगोत्रोत्पन्नजयदेवपाठक-तत्सुत शिवाजीपाठकतत्पुत्रशिवप्रसादपाठककृते स्मार्तोल्लासे स्मार्ताधानादिपाकयज्ञान्तः प्रयोगविधिनिर्णयः समाप्तः ।

## ( अन्त्येष्टिप्रयोगः )

अथान्त्येष्टिप्रयोग उच्यते । सायंहोमानन्तरं यजमानस्य मरणाशङ्कायां प्रातर्होमः कार्यः। आसादनानन्तरं मरणं, अहूयमाने होमद्रव्ये चेन्मरणं, तदा हविषामावसथ्याग्नौ प्रक्षेपः कर्तुरभावात् । प्रातर्होमानन्तरं मरणे होमो नास्ति होमसमाप्तेः। पौर्णमासपक्षादिकर्मानन्तरं दर्शात्प्राङ्मरणाशङ्कायां तदैव दर्शपर्यन्तमावसथ्ये सायंप्रातश्चैकतन्त्रेण होमं कृत्वा पिण्डपितृयज्ञवर्जं दर्शपक्षादि कार्यम् । पक्षादेरारम्भणानन्तरमहूयमाने म्रियते चेत्तदा होमद्रव्यस्यावसथ्याग्नौ प्रक्षेपः । सकलकर्मासम्भवे प्रधानदेवतानां होमः, तदसम्भवे केवलेनाज्येन प्रधानदेवताहोममात्रं स्यात् । तस्याप्यसम्भवे आज्याहुतिं जुहुयात् । यथा—अग्नये स्वाहा । अग्नीषोमाभ्यां स्वाहा । इन्द्राग्निभ्यां स्वाहा । विष्णवे स्वाहा, इत्यादि ।

ततो मरणानन्तरं पुत्रादि(दाह)कर्ता देशकालौ सङ्कीर्त्य आत्मशुद्धिद्वारा पित्रादेरौर्ध्वदेहाधिकारसिद्ध्यर्थं पञ्चदशद्वादशषट्-त्रीन्कृच्छ्रान्यथाशक्तिप्रायश्चित्तममुकप्रत्याम्नायेन सद्यः सूतकान्ते वा करिष्ये । तदङ्गभूतं वपनं करिष्ये ।

आत्मनः शुद्धिकामो वा पितॄणां मुक्तिहेतवे ।
वपनं कायशुद्ध्यर्थं तस्मात्केशान् वपाम्यहम् ॥

क्षौरं कृत्वा शीतोदकेन स्नानम् । ततो लौकिकाग्नौ पाकः कर्तव्यः । प्रेतेन सह प्रत्यक्षावसथ्याग्नेर्नयनम् । प्रेताग्न्योर्मध्येऽन्येन न गन्तव्यम् । तत उत्क्रान्तश्राद्धादि चितोपरि प्रेतनिधानात्पूर्व-

वत् । प्रेतवाहकास्तु नीवीतिनो मुक्तकेशा ज्ञातयश्च प्राचीनावीतिनो मुक्तकेशा गच्छेयुः । दक्षिणाशिरसं मृतं चितौ निधाय पात्राणयासादयेत् । मुखे हिरण्यं, शिरसि चमसं, पार्श्वयोः शूर्पं, अण्डयोरुदगग्रे अरणी अन्तरेणोरूपक्षेपः । लोहं निष्काष्य चाश्रौविलीकयोश्च मृन्मयादीनामम्भसि प्रक्षेपः । चिताया दक्षिणतोऽग्निदानम् । सकृत्परिसमूहनादि क्रव्यादाग्निमुपसमाधायाग्निं सम्पूज्य प्रार्थयेत् ।

कृत्वा सुदुष्करं कर्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ।
दहेयं सर्वगात्राणि दिव्यान् लोकान्स गच्छतु ॥
त्वं भूतकृज्जगद्योने त्वं लोकपरिपालकः ।
प्रेतसंस्कारकस्तस्मादेनं स्वर्गमृतं नय इति ॥

ततो मृतस्य पुत्रो वा भ्राता वाऽन्यो ब्राह्मणो वा कृतापसव्यो दक्षिणामुखः सन्नाज्यं संस्कृत्य—

"अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहा" ( शु०य०सं०३५।२२ )

इति आज्याहुतिंजुहुयात् ।

असावित्यस्य प्रथमान्तं त्वमुकः स्वर्गायेति प्रेतनामग्रहणम् । इदमग्नये इति त्यागः । स्त्रियामप्यस्यानूहः । पुरुषस्य शिरोदेशे स्त्रियः पाददेशेऽग्निं प्रज्वाल्य दक्षिणनासिकायां स्रुवं वज्रं दक्षिण-

हस्ते निधाय शेषं पूर्ववत्(१)।

द्वितीये चतुर्थे वा संचयनम्। नवश्राद्धं तु प्रथमदिन एव।

तदुक्तं कात्यायनसूत्रदेवभाष्ये—

"अस्थिसंचयनादर्वागाहिताग्नेर्द्विजन्मनः।
अयुग्मान् भोजयेद्विप्रान्नवश्राद्धं तदुच्यते"॥

सपिण्डश्राद्धे अग्नौकरणहोमो ब्राह्मणहस्त एव कार्यः साग्नौ।

तदुक्तं गृह्यकारिकायाम्—

"सपिण्डीकरणाद्यानि प्रेतश्राद्धानि यानि वै।
तानि स्युर्लौकिके वह्नाविति शाट्यायनोऽब्रवीत्॥
प्रेतविप्रकरे होमः साग्नेरपि भवेदिह।
अग्नौकरणशेषेण पितृब्राह्मणभोजनम्" इति।

वोपदेवोऽपि—

"षोडशे मासिके श्राद्धे सपिण्डीकरणे तथा।

---

(१) इत उत्तरं "क्षौरं स्नान" मित्यादि श्राद्धानुक्रमश्लोकः अशुद्धप्रायः सर्वादर्शपुस्तकेषु दृश्यते स चेत्थम्—

क्षौरं स्नानं सुपुत्रैः श्रवणमथ तिथेर्ब्रनुमुनपिंडं
बहिः कुंभैर्जलसिक्तम् विषयदिने श्राद्धपिण्डे समेऽह्नि
श्राद्धं चैकादशाहे भवति नृपमितान्यानि कृत्वा सपिण्डं
पश्चात्पाथेयश्राद्धं विलयतिमृतके वत्सरूकोऽयं क्रमेण॥

पाणावेव तु होतव्यमन्यत्राग्नौ तु हूयते" इति ।
पाकोऽपि लौकिकाग्नावेव एक एव न पृथक् ।

तदुक्तं गृह्यकारिकायाम्—

एवं श्राद्धं स्वयं कुर्यात्कार्यैक्यादेकपाकतः ।
एकोद्दिष्टं पार्वणं च शेषं प्रकृतिवद्भवेत् ॥

तत्रामुकगोत्रायामुकप्रेताय स्वाहेत्येकामाहुतिं प्रेतद्विजकरे हुत्वा पितामहब्राह्मणहस्ते "अग्नये कव्यवाहनाय स्वाहा, सोमाय पितृमते स्वाहे"त्याहुतिद्वयं हुत्वाऽन्नं परिविष्य देवपात्रमालभ्य जपतीत्यादि पूर्ववत् ।

## अथ उच्छिन्नाग्नेर्मृताधानम् ।

ततः कर्त्ता देशकालौ स्मृत्वा प्राचीनावीती गोत्रस्यामुकमृतस्य उच्छिन्नाग्नेर्दाहार्थं मृताधानं करिष्ये । यदि उच्छिन्नाग्निस्तर्हि यतो विच्छेदस्तत्कालगणनं यावदग्निविच्छेदप्रायश्चित्तं तदैव कुर्यात्सङ्कल्पयेद्वा । अरण्योरभावे चान्ये अरणी आनीयारण्योरुपरि दक्षिणं प्रेतपाणिं धृत्वा "अयं ते" इति समारोपमन्त्रं पुत्रादिर्जपेत् । "येऽस्याग्नय"इति मन्त्रेण मथित्वा खरे स्थापयित्वा "येऽस्याग्नयो जुह्वतो मांसकामाः सङ्कल्पयन्तो यजमानं सजायं हविषे सादनाय वा पते स्वर्गं लोकमिमं प्रेतं नयत" इत्यनेन मन्त्रेण प्रमथ्याज्यं संस्कृत्य स्रुवेण स्रुचि द्वादश गृहीत्वा समित्पूर्वकं जुहोति । तत्र मन्त्रः—उपावरोह जातवेद इमं प्रेतं स्वर्गाय लोकाय प्रेताहुतिं चास्ये जुषस्व

स्वाहा'' । इदमग्नये न मम । पश्चाद्दाहः कर्तव्यः । अग्नौ समारूढे सति अरण्योः'' प्रेतस्पर्शं कृत्वा उपावरोहमन्त्रं पठित्वाऽग्निं मथित्वा स्वरे कृत्वा तूष्णीं द्वादशस्रुवेणाज्यं गृहीत्वा तूष्णीं हुत्वा पूर्ववद्दाहः ।

अथ वर्षादिना चिताशमने विहितारण्योपात्रादिकाष्ठेनादग्धेन मन्थनं तदलाभेऽन्यकाष्ठेन दग्धशेषेण मन्थनं कृत्वा शेषस्य दाहः कार्यः । अथवा शेषस्याप्सु प्रक्षेपः । अथवा लौकिकेऽग्नौ भूर्भुवः स्वाहेति घृताहुतिं स्रुवेण स्रुचा वा हुत्वा तेन लौकिकाग्निना शेषस्य दाहः कर्तव्यः ।

अथाग्नावुपशान्ते स्वाररायोर्नाशे स्वामिनो मरणे अन्ये अरणी समानीय तस्योपरि प्रेतहस्तं निधाय ''अयं ते योनिरि''ति मन्त्रं पठित्वा पूर्वोक्तप्रकाधानं कृत्वा पश्चाद्दाहः ।

भर्तुः पूर्वं पत्नीमरणेऽप्येवं, पात्रासादनं तु पूर्ववत् ।

दुष्टस्त्रीमरणे विशेषश्छन्दोगपरिशिष्टे—

अनयैवावृता नारी दग्धव्या या व्यवस्थिता ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिरिति ॥

व्यवस्थिता=साध्वी । असाध्वी तु केवलाग्निभिः । पात्राणि तु चितेरुत्तरतः समीपे तदप्येकदेशेन पृथग् दग्धव्यानि । अतिनिन्दिता तु केवलाग्निभिरपि न दग्धव्येति तद्वृत्तौ । उदके प्रवासे वा यजमाने मृते सति शवागमनपर्यन्तं कर्मलोपो नास्ति सर्वं कर्म कर्तव्यम् । पुत्रादिर्यावन्मरणवार्तां न शृणोति तावत्सन्ध्यादि-

कर्मलोपो नास्ति । मरणश्रवणानन्तरं होमपिण्डपितृयज्ञपक्षादिक-मपि न भवति । अग्निधारणमेव भवति । ततो ग्रामसमीपमागत्य सीमायामेव मृतस्य शरीरं च अस्थीनि वा स्थापयेन्न ग्राममध्येऽग्नि-समीपे आनयेयुः । अस्नां तु विशेषः । अस्थीन्याहृत्य कृष्णाजिन स्योपरि पुरुषाकारेण स्थापयित्वा मेषरोमभिरस्थीन्याच्छाद्य पञ्चग-व्येनाज्येन चास्थीन्यभिघार्याग्निसमीपमानीय उक्तप्रायश्चित्तं कृत्वो-त्क्रान्तिश्राद्धादि पूर्ववद्दाहः ।

तदुक्तं कारिकायाम्—

आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः ।
दहेयं ब्राह्मणविधौ लौकिकाग्नौ मन्त्रवर्जितम् ।
दग्ध्वाऽस्थीनि पुनर्ग्राह्यं क्षीरेण क्षालयेत्ततः ।
स्वेनाग्निना स्वमन्त्रेण पृथगेहे पुनर्दहेत् ॥

अस्थ्नामलाभे पालाशविधिं कृत्वा नारायणबलिपूर्वको दाहः। दाहदिनमारभ्य दशाहमाशौचं पुत्रादेः । त्रैपाक्षिकपर्यन्तं दहनदिने श्राद्धमग्निहोत्रिणां त्रैपाक्षिकादूर्ध्वं मरणदिने श्राद्धम् ।

यदि द्वितीयविवाहं करोति तदाऽभ्युदयिकपूर्वकमाधानं दारका-लत्वात् ।। कालान्तरे विवाहं कृत्वा साग्निसहाधिकारिणि कृता ज्येष्ठा मृता तदग्न्युत्मुकेन दाहः कार्यः । द्वितीया भार्या सहाधि-कारिणी तया सह पुनराधानं कर्तव्यं तदा प्रथममाभ्युदयिकमेव सान्तेत्पूर्वमवधिं कृत्वा मृता तस्याग्निर्न दातव्यः । अधिकृता चेत्त-दाऽश्वत्थकाष्ठेन निर्मथ्याग्निना मन्त्रवद्दाहः कर्तव्यः । अवश्याकर्मो-

पक्रमे सति ज्येष्ठा मृता तदा भार्यान्तरं यदि विद्यते तया सह पुनः क्रिया। आग्रहायणीकर्मणि कृते ज्येष्ठा मृता तदा नावृत्तिः। अष्टका चतुष्टयमध्ये भार्यामरणे द्वितीयभार्यया सह पुनः क्रिया अधिकारिणी कनिष्ठा भवति तदा एकादशरात्रिनिवृत्तौ पुनराधपूर्वकमुर्वरितं कर्म कृत्वा क्रिया कार्या श्रवणाकर्मेति दिक्। इत्यन्त्येष्टि प्रयोगः।

इति श्रीशिवप्रसादपाठककृते स्मार्तोल्लासे आधानाद्यन्त्येष्टि पर्यन्तः प्रयोगविधिनिर्णयः समाप्तः। शुभम्।

# स्मार्तोल्लासोद्धृतग्रन्थ–ग्रन्थकर्तृनामानि ।

( वर्णानुक्रमतो विन्यस्तानि )


### अ

अगस्त्यः १६५।१;
अङ्गिराः २९०।१३;
अथर्वसंहिता १८४।७;
अथातो धर्म-
जिज्ञासापद्धतिः २६४।१३;
अनन्तः २३६।१५;
अनन्तभट्टीयः २४७।११;
अनन्तयाज्ञिकः २३६।१२;
अनुवाकसूत्रम् १८४।८;
अपरार्कः १७१।१८;
१६०।६;
२९८।१९;
२३१।१८;

### आ

आचारादर्शः २९१।५;
आत्रेयः ८३।१;
आपस्तम्बः ५१।४;
१४१।११;
२८०।१७;
२९५।१०;
३१०।१५;
आपस्तम्बधर्म-
सूत्रम् २६१।२;
आपस्तम्बपरि-
शिष्टम् २६९।२;
आपस्तम्बाधानप्रयोगः १३।१०;
आशार्कभाष्यम् २६४।१२;
आश्वलायनः १३।६;
२१७।११;
२३७।१;
२५९।१७
२९८।२;
६९८।८;
२९८।२०;
आश्वलायनश्रौतसूत्रम् ३१९।७;
आह्निकः १८५।१५

### ई

ईश्वरगीता २००।१३;

### उ

उत्तरमीमांसा १८४।१४;
९;

### ऋ

ऋक्संहिता १८४।५; ३२०।२;

### क

कठसूत्रम् २६५।५;

कर्कोपाध्यायः १०२।३; २०२।६; २२८।५; २३६।१६;

कर्मप्रदीपः २१६।५; २२५।१२;

कश्यपः २०।१०; २४।६; २४६।७;

काठकः २११।५;

कातीयः १९०।१६; ३०३।८;

कात्यायनः १३८।३; ३०३।११; १४१।५; १४५।१; १४५।७; १५४।१३; १६४।१२; १७०।६; १७२।५; १७४।१४; १७८।१६; १७९।२; १८३।१२; १९१।६; १९३।७; १९९।२१; २०१।४; २०६।३; २१७।१६; २२३।१७; २२३।२१; २२४।१०; २२५।५; २२६।१४; २३७।६; २४५।९; २६४।१८; २८४।२; २९०।१९; २९३।४; २९५।५; ३११।११; ३१५।९;

३२३।२;
कात्यायनश्रुतिः १३।१७; १८५।१; 
कात्यायनश्रौतसूत्रम् १५०।१७; १५१।४; १५१।१३; १८४।८; २०२।१; २०२।५; २२७।६; २२८।२; २३२।४; २४७।१४; २६६।३; ३१४।५; ३२५।९;
कारिका १२।८; १५०।२; १५८।१०; १७५।८; २१९।१४; २३०।१; २३०।८; २३५।१५; २४०।११; २४१।५; २४७।१४; २५०।१४; २९९।१०; ३०८।१; ३८३।८;
कालादर्शः २४७।२१;
काश्यपः १४३।१
काशीखण्डम् १७३।१७; २८९।१७;
कूर्मपुराणम् २००।१३; २५८।६;
कृष्णंभट्टीयः १५५।३; १७१।१३;
केशवस्वामी १७१।१४; २६९।२;
कौषीतकिगृह्यसूत्रम् १८५।१;
क्रमकारिका ३४।११; १६४।२;

ग

गङ्गाधरः १३।१३; ६२।७; १५४।४; १५४।१६; १८५।१०;

३१६।२;
३२३।७;
गदाधरभाष्यम् २०३।९;
२२७।४;
२७८।१०;
२९०।१०;
१०३।१३;
गर्गः १५।१;
२५।४;
१६२।१८;
२४४।१३;
गर्गपद्धतिः २७८।१०;
गर्गोपाध्यायः २६४।१३;
२७९।१४;
१७९।१९;
२८३।१२;
गार्ग्यः ७।३;
७।१९;
१५।२;
१४८।३;
२२६।१७;
२२९।१४;
गालवः १४७।१६;
गृह्यः ५।१९;
१६।१४;
२७।१६;
३६२।३;
३६४।१४;
३६६।१४;
३७४।१०;
३७७।७;
गृह्यकाण्डम् १।५;
गृह्यकारः ३३४।१४;
गृह्यकारिका ४।९;
१२।३;
२९।६;
३५।४;
१५८।७;
१८२।६;
१९२।२१;
१९६।१०;
२०९।१;
२४१।५;
२५७।१२;
२६८।१७;
२९७।१०;
३१५।२;
३२०।४;

| | |
|---|---|
| | ३२९।६; |
| | ३३०।५; |
| | ३४३।१७; |
| | ३४९।३। |
| | ३८०।८; |
| | ३८१।३; |
| गृह्यमतम् | १९९।२; |
| गृह्यरेणुः | १४२।२। |
| गोपथब्राह्मणम् | ६३।१९; |
| गोभिलः | २२३।१४; |
| | २४७।३। |
| गोभिलसूत्रम् | २९।१। |
| | २४७।३; |
| गौतमः | २८०।१७; |
| गौतमस्मृतिः | २६५।१४; |
| ग्रन्थान्तरम् | ६३।१४; |
| | १७५।४; |
| | २६६।५। |
| | २८६।१८। |
| | २६६।१०। |

घ

| | |
|---|---|
| चतुर्विंशतिमतम् | १७०।११। |
| | १६०।९। |
| | २९४।७। |
| चन्द्रिका | ६२।१। |
| चरणव्यूहः | २७८।१२। |

छ

| | |
|---|---|
| छन्दोगपरिशिष्टम् | १५०.२२। |
| | १७८।१६। |
| | १७६।२। |
| | १९४।५। |
| | १६९।२१। |
| | २०१।४। |
| | २२२।२; |
| | २३०।१५; |
| | २६४।१८। |
| | ३८२।१३। |
| छान्दोग्यः | २२८।९। |
| | २६७।७। |

ज

| | |
|---|---|
| जयरामभाष्यम् | २०३।१३ |
| जातूकर्ण्यः | २१६।१६। |
| | २१८।५। |
| जाबालिः | २१७।५ |
| | २१८।५। |

ट

| | |
|---|---|
| टोडरानन्दः | २५।५। |

त

| | |
|---|---|
| तिथितत्त्वम् | १९९।१२। |

तैत्तिरीयब्राह्मणम् २२७।५;
त्रिकाण्डमण्डनम् २३२।८;
२६८।५;
त्रिशच्छ्लोकी २९७।१७;

द

दक्षः १७४।९;
दर्शपूर्णमासपद्धतिः १५५।१;
दानभागवतम् ६५।६:
दामोदरनिबन्धः २१३।२;
दाक्ष्यपरिशिष्टम् २००।१५;
दीपिका १६।३;
१५५।१;
२४६।१३;
२८६।८;
देवभाष्यम् २६५।५;
३८०।३;
देवयाज्ञिकः १९२।७;
२१३।८;
२२८।३;
२३२।४;
२३६।११;
२६३।१९;
देवलः १९९।१५;

ध

धर्मप्रवर्त्तः ३२५।१२;
धर्मप्रवृत्तिः २२९।१७;

न

नारायणवृत्तिः १३।१४;
२०१।१२
निघण्टुः १८४।१२
निरुक्तम् १८४।१३
निर्णयामृतम् १४८।६;

प

पराशरः ५१।१;
१४७।४;
पराशरमाधवीयम् २४५।१८;
२४७।१८;
परिशिष्टम् १४५।७
१५७।१०;
१५७।२०;
१७४।१४;
१८९।८;
२६१।१९;
२९४।११;
२९५।२;
३२२।१४;
पाणिनीयशिक्षा १८४।१०;
पाणिनीयसूत्रम् १८४।१२;
पारस्करः ३।१७;
२७।१४

१४२।५;
१६९।६;
१६९।१४;
१८४।९
१८९।४;
२३१।१,२;
२४८।७;
२६२।४;
२६२।१५;
२६५।११;
२८०।२;
२८०।४;
पारिजातः ८।१०;
पिङ्गलसूत्रम् १८४।११;
पुलस्त्यः २१७।१;
पूर्वमीमांसा १८५।१२;
पृषोदिविविधान-
परिशिष्टम् २७८।५;
२७८।११;
२७८।१३;
२८४।१७;
पैठीनसिस्मृतिः १६०।७;
प्रचेताः २४६।११;
०८९।१३
प्रयोगपारिजातम् १४२।१५;
२३१।१७;
२४५।६;
२४५।१२;
२४६।४;
२४८।२;
३०४।७;
प्रयोगरत्नम् २१०।१३;
३०३।८;
प्रयोगरत्नाकरः २३१।१८;
प्रसवोत्थानपरिशिष्टम् २७८।५;
११;
२८१।१;
२८४।१७;
२९६।१४;
प्रायश्चित्तकाण्डम् ३२२।२;
प्रायश्चित्तमुक्तावलिः २९७।४;

ब

बह्वृचः १७३।९;
१९०।१४;
बह्वृचपरिशिष्टम् २४७।११;
बृहत्पराशरोक्तकल्पः १७९।६;
बृहन्नारदीयः १९०।१८;
बृहस्पतिः १९४।१५
२४५।१८;
बौधायनः १७१।१८;
१७३।८;

| | |
|---|---|
| | १९४।१९; |
| | २२८।१४; |
| | २२८।१९; |
| | २५८।६; |
| | २९६।२; |
| | ३१२।१६; |
| | ३१३।९; |
| | २६६।१; |
| ब्रह्मपुराणम् | २१७।२०; |
| | २६६।२; |

भ

| | |
|---|---|
| भर्तृयज्ञः | ६।४; |
| | २०३।९; |
| | २२८।४; |
| भविष्यः | १९९।१२; |
| | २९०।१; |
| भविष्यपुराणम् | ६२।१०; |
| | १९९।१२; |
| भ(भा)रद्वाजः | २१७।६; |
| | २५९।१६; |
| भार्गवः | २५।४; |
| | ३१०।११; |
| भास्करः | ४८।५; |
| | ३७७।९; |
| भृगुः | १३९।१; |

म

| | |
|---|---|
| मण्डनः | १९३।१२; |
| | १९२।१; |
| मदनपारिजातम् | १७२।१४; |
| | २३७।९; |
| | २४७।७; |
| | २६१।१९; |
| | २९१।५; |
| | २९३।७; |
| मदनरत्नम् | ६।११; |
| | ८।१०; |
| | १५।२; |
| | ६२।१०; |
| | १५४।१३; |
| | २०१।१७; |
| | २४५।६; |
| | २४७।९; |
| मनुः | ७।१६; |
| | १०।३; |
| | १६९।११; |
| | १७०।२; |
| | १७३।१४; |
| | १८१।११; |
| | २७१।७; |
| | २९१।११; |
| महाभारतम् | १८४।१५; |

महार्णवः २४४।१६;

माधवीयः २२६।१७;

मार्कण्डेयः १४२।७;

माहेश्वरः २२।१;

मुहूर्तरत्नावलिः १२।१२;

मूल्याध्यायः ५६।११;

मेधातिथिः १९०।१३;

य

यज्ञपार्श्व १९।९; ३२।७; ३५।४; १५१।३; १६५।११; १७०।६ १७२।५; १७४।१९; १९५।१५; २१३।५; २६११।६; २७०।११; २७०।१६; २८४।१; २८७।१;

यज्ञपार्श्वपरिशिष्टम् २७८।१२ २८४।२; २८५।१;

याज्ञवल्क्यः २१६।८;

याज्ञवल्क्यस्मृतिः १८४।१५;

याज्ञिकसम्प्रदायः १६६।१;

योगियाज्ञवल्क्यः २००।१०;

र

रत्नमाला १३।१९ १७।१;

रामवाजपेयी ६२।६; १५१।७

रुद्रकल्पद्रुमः १८२।८; २६०।१४; २६३।१२;

रेणुः १५५।१०;

रेणुकारः १६५।८;

रेणुकारिका १५३।१६; १५४।४; २६१।१०; २६४।५; २६४।८;

ल

लघुविष्णुः १५७।१६;

लिखितः २६५।९;

लौगाक्षिः २२३।६;

२२४।२;

लौगाक्षिकारिका ८।६;

लौगाक्षिस्मृतिः १८९।२;

**व**

वराहः १४१।१;
वराहपुराणम् ६२।१६;
वासिष्ठः ८।४;
१४७।१;
२२९।८;
२८५।७;
वाजसनेयिगृह्यम् २७८।८;
विष्णुः २९०।१०;
२६९।२;
विष्णुधर्मोत्तरम् २५।१०;
६३।१;
विष्णुपुराणम् १४१।१४;
१७३।१०;
वृद्धगार्ग्यः १५।२;
२२६।११;
वृद्धमनुः १९९।१८;
२४५।२;
वृद्धयाज्ञवल्क्यः २३७।४;
वृद्धशातातपः २२४।१४;
२२४।१६;
वृद्धाः ३०३।११;
वेदाङ्गज्योतिषम् १८४।११;
वैद्यनाथः १५५।१;
वैद्यनाथभाष्यम् २२८।४
वोपदेवः १९०।१५;
३८०।१३;
व्याघ्रपादः १४१।१८;
व्यासः २।९;
६।११;
२०१।१७;
२१६।२;
२६६।४;
२८६।३;
२८५।१३;
२९२।१८;
२९४।४;

**श**

शङ्खः २८५।१०;
२९२।१४;
शङ्खलिखितौ २९५।९;
शतपथः १६८।१३;
१७४।१;
१७४।४;
१८४।३;
१८५।१;
२३७।२;
२५१।१२;
२५२।१४;
२९२।१८;
शाङ्खायनकारिका १७०।१७;
शाङ्खायनगृह्यम् २८।४;

२२८।११;
२४१।७;
२६४।४;
२६५।११;
२६७।७;
शाङ्खायनपरिशिष्टम् १९०।१०;
शाट्यायनः २००।१८;
२६३।११;
३८०।१०;
शातातपः ७।१६;
१४१।२१;
१४२।१८;
२९१।५;
३०९।१८;
शिष्टाः ३०३।९;
शुक्लयजुःसंहिता ८७।१;
९०।३;
९३।१;
९६।१;
११०।१;
११२।१,४;
११७।५;
११८।६;
११९।१,२,३;
१२०।१;
१६२।६-९;
१६३,१-५;
१६४।५-८;
१६६।११;
१६७।३;
१६८।२;
१७६।१;६;७;
१७९।६-८;
१८०।३;
१८१।१;
१८४।२-३;
२०३।१२;
२०६।१७;
२०८।४;
२२२।१६;
२३८।१८-१९;
२३९।५-६;
" ८-१०;
२४०।१;
२४४।१;
२५१।१२
" १५;
२५२।१५;
२५३।१;
" २;
२५५।१३;
२५६।५;

,, ६;
,, ९;
२७३।२०
२७४।११;
,, १२;
२७६।१४
,, १५;
२७७।६;
२८४।१५;
२८७।९;
,, १०;
३२४।१२;
,, १४;
३२५।१२;
३३९।१५;
३४२।७;
३४७।१२;
,, १४;
,, १६;
३४८।१
,, ३
,, ६;
,, ७;
,, ८;
,, १०;
३५१।१५;
३५७।१५;
३५८।५;
३६४।२-३;
३६५।१,३,४;
३६९।१;
३७०।१६;
३७२।१८;
३७४।१६;

शुल्बसूत्रम् १५१।६;

शौनकः ३२३।१;

श्रीधरः २७।१९;

श्रीधरपद्धतिः २१८।८; २२९।२;

श्रीपतिः १४।६; १९।१०; २१।३;

श्रुतिः १३।१५; १७४।१; १८५।२; २३४।२; ३११।१०;

स

सत्यव्रतः ७।८;

सत्याषाढः ३१३।७;

सर्वानुक्रमणी १५४।१९; १८४।८;

सर्वानुक्रमसूत्रम् १५४।६;
१८२।१४;
सर्वानुक्रमसूत्रभाष्यम् २०१।२;
सामवेदसंहिता १८४।६;
सिद्धान्तशेखरः १९५।५;
सुमन्तुः ८।१;
२९२।११;
सूर्यसिद्धान्तः २०।१४;
स्कन्दपुराणम् ६३।९;
२२३।६;
स्मृतिः १७४।५;
२१६।११;
स्मृतिभास्करः २६९।१३;
स्मृतिरत्नावलिः १७२।८;
१९०।१४;
स्मृतिसंग्रहः १३७।१;
स्मृत्यन्तरम् १७३।२;
१९४।८;
१९५।८;
१९७।१२;
२३७।८;
स्मृत्यर्थसारः ५७।५;
१९३।१६;
१९६।४;
३०४।७;
संग्रहः २४१।१५;
२९७।४;
संग्रहकारः २३१।१६;

ह

हरिहरः ६२।७;
१५१।२२;
१५४।४;
१६५।२२;
२०१।१४;
२१०।१४;
२१०।२१;
२३०।१०;
२८०।२०;
हरिहरभाष्यम १७२।८;
२३०।११;
२७८।१०;
हारीतः ८।७;
१४२।१०;
२६९।१३;
२९३।१;
२९७।१;
हेमाद्रिः ८१।७;
१४१।८;
१४६।३;
१८९।८;
१९०।१५;
२४७।६;
२८९।११;
हेमाद्रिप्रयोगः ९७।१;

सटिप्पणस्य स्मार्तोल्लासस्य

# शुद्ध्यशुद्धिपत्रम् ।

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| वायः, प्रा | वायः प्रा | ३ | ८ |
| पूत्र | पुत्र | ५ | १५ |
| परिजात | पारिजात | ८ | १० |
| क्लीब | क्लीबा | ८ | १४ |
| परिवादन | परिवेदन | ९ | १० |
| मण्णुने | मण्डने | ९ | २० |
| शङ्कुस्य | शङ्कस्य | १० | १७ |
| क्रिया | क्रिया | ११ | ४ |
| भियमातेति | ञियमा नेति | | |
| केचत । इमिति | केचन । इति | ११ | १६–१७ |
| यो जगेत् | योजयेत् | ११ | २० |
| महिमवर्णनं | महिमावर्णनं | १२ | ५ |
| सिन्धौ | सिंधौ | १२ | २१ |
| ज्येष्ठासे | ज्येष्ठास्वे | १३ | २१ |
| कृतिका | कृत्तिका | ,, | ,, |
| विद्धि | विद्धि | १४ | ९ |
| वर्षााः । | वर्षाः । | ,, | ,, |
| प्रीयूष | पीयूष | १५ | २० |
| मोक्षि | माक्षि | १७ | २२ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| झषो | झषो | १८ | १३ |
| अधाना | आधाना | १८ | २० |
| विष्कम्भ | विष्कुम्भ | १६ | २२ |
| त्यागा | त्यागो | २१ | २२ |
| कुमुदनी | कुमुदिनी | २२ | ६ |
| ततुगते | तन्तुगते | २२ | २२ |
| अग्निर्धीयते | अग्निराधीयते | २३ | ३ |
| भातृभिः | भ्रातृभिः | २३ | १५ |
| वियते | वियन्ते | २७ | १७ |
| मिष्यत | मिष्यते | ३० | १२ |
| रक्तष्ठे | रक्तुष्ठे | ३० | २५ |
| त्र्यङ्गु | त्र्यङ्कु | ३१ | ६ |
| तत् | सा | ३२ | १५ |
| दूरु | दूरू | ३३ | ५ |
| विभ्रूयात् | विभ्रियात् | ३३ | १८ |
| शा(छा)ङ्गुकम् | शा(छा)ङ्कुलम् | ३४ | १ |
| स्रवः | स्रुवः | ३५ | २४ |
| सङ्गसदृशः | सङ्गसदृशः | ३६ | ८ |
| पातु | पोतु | ३७ | ६ |
| खात | खातं | ३९ | १३ |
| माऽवः | माऽयः | ४० | ६ |
| सृणोति | शृणोति | ४० | १६ |
| मयूतख | मयूख | ४४ | २५ |
| ब्रह्म | ब्रह्म | ४५ | ३ |
| ब्राह्मणा | ब्राह्मणा | ४५ | ३ |
| अक्रष्ठ | अक्रुष्ठ | ४५ | २५ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| ( २ ) | ( १ ) | ४६ | ४ |
| ( ३ ) | ( २ ) | ४६ | ७ |
| ( ४ ) | ( ३ ) | ४६ | ८ |
| ना'' पार | ना'' इति पार | ४६ | २० |
| दङ्गल | दङ्कुल | ४६ | २४ |
| स्यहं | ऽस्यहं | ४८ | २० |
| श्लोकः | श्लोक्तः | ५१ | १६ |
| आ० स्मृ० | आप० स्मृ० | ५२ | ५ |
| तापनारख्ये | तापनाख्ये | ५१ | १० |
| हिस्तदा | हिमस्तदा | ५५ | २१ |
| कशस्य | केशस्य | ५७ | १ |
| हामः | होमः | ५८ | १७ |
| अज्यं | आ'ज्यं | ६१ | ७ |
| छमृंगी | छैमृंगी | ६१ | १८ |
| मुष्ठि | मुष्टि | ६२ | १७ |
| चकार्श्या | चेकार्श्या | ६७ | १५ |
| नैनित्तिकं | नैमित्तिकं | ६८ | ६ |
| संप्रवयामि | सम्प्रवक्ष्तामि | ६८ | १८ |
| सार्द्धाब्दे | सार्द्धाब्दे | ६९ | १ |
| व्रतस्नातः | व्रतस्नातः | ६६ | २० |
| श्रमव | श्रम | ६६ | २३ |
| अङ्गिरापि | अङ्गिरा अपि | ७० | १० |
| ष्ठामेन | ष्ठोमेन | ७१ | २४ |
| क्रमिकोट | कृमिकोट | ७२ | २० |
| मतुलानीं | मातुलानीं | ७८ | १७ |
| शुद्धिर्भवति | शुद्धिर्भवति | ७८ | २२ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| पितृर्णा | पितॄणां | ८० | २३ |
| क्षुरादिक्षिस | क्षुरादिच्छिन्नस | ८१ | १६ |
| पोपपाभ्यां | पोपपापाभ्यां | ८१ | १५ |
| न गाष्ठे | नगोष्ठे | ८२ | ६ |
| वपेत्ः | वपेत् | ८२ | १९ |
| उदङ्मुखः | उदङ्मुख | ८२ | १६ |
| नमोन्तान | नमोऽन्तानि | ८४ | २१ |
| शर्ष | शर्ष | ८५ | १२ |
| प्रबाधयात् | प्रबोधयात् | ८५ | १३ |
| स्मन स | स्म स | ८५ | १८ |
| जलमिति भस्म- | जलमिति भस्म स्थल- | | |
| सर्वं | मिति भस्म सर्वं | ८५ | २१ |
| ब्रह्मामिर्वा | ब्रह्माग्निर्वा | ८५ | २५ |
| गोमयर्ले | गोमयैर्ले | ८७ | १८ |
| हरिण्य | हिरण्य | ८८ | ४ |
| कां १ | काण्ड० १ | ८६ | २० |
| अताय | आताय | ९० | ७ |
| ( १० ) | ( स्मृ० १० ) | ९१ | २७ |
| चादकम् | चोदनम् | ९३ | ३ |
| योन÷ | योनः | ९४ | २५ |
| बन्धम | बन्धन | ६४ | २५ |
| नानि ॥ | नानि, | ९६ | १ |
| नमा मारा | नमो मारा | ९६ | १८ |
| न्नुतं च | न्नृतं के | ९६ | ३२ |
| पुष्कराख्य | पुष्कराख्य | ९८ | १० |
| कर्म्मभूमौ | कर्म्मभूमौ | ९८ | २१ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| चेव | चैव | १०० | ८ |
| चतुर्गणमसम्भवे | चतुर्गुणमसम्भवे | १०२ | १२ |
| वदङ्मुख | उदङ्मुख | १०४ | १५ |
| द्विजास्समाः | द्विजोस्समाः | १०७ | २ |
| दोव | देव | १०७ | २१ |
| कथचि | कथञ्चि | १०९ | १२ |
| रोहिणीं | रोगिणीं | १०९ | १५ |
| सृङ्ग | शृङ्ग | १०९ | १८ |
| तदस्नुमृति | तदनुस्मृति | ११० | ४ |
| उपाशु | उपांशु | १११ | २० |
| सिद्धार्थं | सिद्ध्यर्थं | ११२ | ३ |
| कामदवत्यम् | कामदैवत्यं | ११२ | १० |
| दिभ्यो | दिभ्यो | ११२ | १६ |
| नश्यनीति | नश्यतीति | ११२ | २० |
| प्रच्याङ्ग | प्राच्याङ्ग | ११२ | २५ |
| प्रयश्चित्त | प्रायश्चित्त | ११३ | १५ |
| पूवषद्रा | पूर्वषद्रा | ११३ | २६ |
| त्रिष्टप् | त्रिष्टुप् | ११४ | ८ |
| दामनव | दानमव | ११४ | २० |
| आज्यहुतीनां | आज्याहुतीनां | ११५ | १२ |
| अङ्गष्ठार्धं तु | अङ्गुष्ठार्धं तु | ११६ | १५ |
| सर्पिदया | सर्पिर्दया | ११७ | ८ |
| दधिकाव्णा | दधिकाव्णो | ११८ | १० |
| मित्यास्त्याङ्क्षायाम् | मित्याकाङ्क्षायाम् | ११८ | १६ |
| होतव्यम् | होतव्यम् | ११८ | २१ |
| इद विष्णवे | इदं विष्णवे | ११९ | १ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| अग्नये | ॐ अग्नये | ११९ | ३ |
| तथव च | तथैव च | ११८ | १२ |
| सोमाय | ॐ सोमाय | १२० | १ |
| वितु ब्यात् | वितु० यात् | १२० | १ |
| वरुणश्चव | वरुणश्चैव | १२० | ८ |
| आवऽ | आवऽ | १२० | २० |
| प्रकान्त | प्रकान्त | १२१ | ११ |
| ( १ ) दान | दान | १२३ | ७ |
| सगोत्रये | सगोत्राये | १२४ | ७ |
| रक्षांसि | रक्षाᳪसि | १२५ | १७ |
| यमजं ह्यो | यमजᳬठं० ह्यो | १२५ | १७ |
| दाक्षायणं हिरण्यं स | दाक्षायणᳬठं०हिरण्यᳬठं०स | १२५ | १८ |
| तथाहि | तथा हि | १२८ | ११ |
| नीयपूवमी | नीयपूर्वमी | १२८ | १६ |
| देयानीनि | देयानीति | १३१ | १४ |
| दवतं | दैवतं | १३१ | २३ |
| द्रव्याणि | द्रव्याणि | १३२ | १ |
| चारसर्व | चरितसर्व | १३२ | ३ |
| अस्वच्छिद्र | अस्वच्छिद्र | १३२ | १९ |
| हेमाद्रः | हेमाद्रिः | १३३ | ११ |
| अघ | अत्र | १३३ | ११ |
| गोनिष्क | गोवृषनिष्क | १३३ | १ |
| पुत्रायच्छिद्र | पुत्रायुच्छिद्र | १३६ | २६ |
| पूर्वम्मैवं | पूर्वकर्म्मैवं | १३८ | २५ |
| हातृभिः ॥ | होतृभिः | १३९ | २२ |
| वेशम्पायन | वैशम्पायन | १४० | २२ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| ( २ ) | ( १ ) | १४३ | ३ |
| हारातः | हारीतः | १४३ | ५ |
| चव | चैव | १४५ | २ |
| मन्त्रांच्चारण | मन्त्रोच्चारण | १४६ | ७ |
| श्रतिरपि | श्रुतिरपि | १४६ | २० |
| करिष्पे | करिष्ये | १४९ | १० |
| सुत्रंः | सूत्रं | १५० | ४ |
| वरमरणि | वरणमरणि | १५२ | १ |
| मूत | भूत | १५२ | १८ |
| दनादर्भा | दनदर्भ | १५६ | २१ |
| अम्र | अग्रे | १५८ | १८ |
| मङ्कष्ठं | मङ्गुष्ठं | १५८ | २४ |
| सभ्याधान | सभ्याधान | १६४ | १८ |
| घुम्नितमं | द्युम्नितमं | १८१ | ८ |
| स्म्रूपण | स्मृगूपेण | १८१ | २३ |
| रामा | रामो | १८१ | २४ |
| पा० शि० | पा० या० शि० | १८४ | ११ |
| बा० | ब्रा० | १८४ | ४ |
| देवप्रयोगा | देवनिर्णयः | १८६ | १ |
| पत्रात् | पात्रात् | १८९ | ५३ |
| स्मिल्लोके | स्मिल्लोके | २०४ | २३ |
| द्रुशब्दस्य | द्रुशब्दस्य | २०७ | २४ |
| स्थने | स्थाने | २१३ | २२ |
| जंयेसर्वं | जंयेत्सर्वं | २१६ | १४ |
| चेद्रसा | चेद्रजसा | २२० | ४ |
| जसन्विता | जसान्विता | २२० | १२ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
| --- | --- | --- | --- |
| पाकारम्भ | पाकारम्भ | २३० | ६ |
| लिगोक्ता | लिङ्गोक्ता | २३३ | ६ |
| अधस्त | आधस्त | २४० | २१ |
| सर्वन् | सर्वान् | २४२ | १९ |
| पकाभाव | पाकाभाव | २७० | ८ |
| साग्निकस्व | साग्निकस्य | २७९ | १३ |
| मीमासा | मीमांसा | २९५ | १५ |
| सूत्र | सूत्रे | २९५ | २२ |
| तर्ल्लोस | तोंल्लासे | ३०२ | १ |
| ैश्यादि | वैश्यादि | ३०३ | १ |
| मदमग्नयं | इदमग्नये | ३०५ | २१ |
| मुसल्य | मुसलङ्स्य | ३०८ | १५ |
| क्ष्मुद्रः | क्षुद्रः | ३१७ | २१ |
| तुर्विश्वनि | तुर्विश्वानि | ३२६ | १ |
| "गृहीत्वा।ठं० | गृहीत्वा "समितठं० | ३२८ | ३ |
| प्राङ्मुख | प्राङ्मुख | ३३५ | ९ |
| मुतराणि | मुत्तराणि | ३३६ | ४ |
| लिगोक्ता | लिङ्गोक्ता | ३३६ | ६ |
| होमवलि | होमबलि | ३३६ | १० |
| पुरोडाशेनाग्नि | पुरोडाशेनाग्नि | ३३९ | १८ |
| वैद्श्याय | वैश्याय | ३३६ | ९ |
| प्रवासिनं | प्रवासिनं | ३४९ | २० |
| भर्ता | भर्ता च | ३४७ | २१ |
| श्युवयिक | श्युवयिक | ३५२ | ५ |
| लिगोक्ता | लिंगोक्ता | ३५२ | ८ |
| तिसृणां | तिसृणां | ३५३ | १ |

| अशुद्धपाठः | शुद्धपाठः | पृ० | पं० |
|---|---|---|---|
| मैद्रय्यं | मैद्रव्यं | ३५३ | ४ |
| अपित्वा | जपित्वा | ३५७ | १५ |
| त्वाद्भि | त्याद्भि | ३५७ | १६ |
| गृह्यमः | गृह्यामः | ३६५ | १७ |
| दशरूद्रा | दशरुद्रा | ३७० | १ |
| सोमाय | सोमाय | ३७० | २० |
| कुम्भे | कुम्भे | ३७१ | ९ |
| बाह्वि | बाह्वि | ३७२ | २० |
| मघ | मघ | ३७३ | १४ |
| बधो | बधे | ३७३ | १५ |
| वरुणे | वरुणे | ३७३ | १० |
| प्रहणादौ | प्रहणादौ | ३७५ | १४ |
| वृषोत्सर्गप्रयोगः | प्राशितपाकयज्ञप्रयोगः | ३७७ | १ |
| यजमनं | यजमानं | ३८१ | १७ |

# THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by M. M. GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, (किरणावलीभास्कर) [वैशेषिक],
a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs 1-12

No 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त],
by Rangoji Bhaṭṭa,
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs 1-12

No 3—The Vedānta Kalpalatikā, (वेदान्तकल्पलतिका) [वेदान्त],
by Madhusūdana Sarasvatī
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya Rs 1-12

No. 4—The Kusumāñjali Bodhanī, (कुसुमाञ्जलिबोधनी) [न्याय],
a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja
Ed. with Introduction etc. by Gopinath Kaviraj, MA, Rs 2-0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra
Ed. with Introduction etc. by Gopīnath Kaviraj, MA. Rs. 1-2

No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा],
by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)—Ditto Ditto Rs. 0-12

No. 7-(Part I)-The Yoginīhṛdaya dīpikā, (योगिनीहृदयदीपिका) [तन्त्र], by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1-8

No 7—( Part II ) Ditto Ditto Rs. 1-4

No. 8—The Kāvyaḍākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.
Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-10

No. 9—(Part I)-The Bhakti Chandrikā (भक्तिचन्द्रिका) [भक्ति], a Commentary on S'āṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-15

No. 10-(Part I)-The Siddhāntaratna, (सिद्धान्तरत्न) [गौडीयवैष्णवदर्शन], by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part II)—Do. Do. Rs. 2-12

No. 11-The S'rī Vidyā Ratna Sūtras, (श्रीविद्यारत्नसूत्र) [तन्त्र], by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste, Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, (रसप्रदीप) [अलङ्कार], by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, (सिद्धसिद्धान्तसंग्रह) [नाथमार्ग] by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, ( त्रिवेणिका ) [अलङ्कार], by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part I)-The Tripurārahasya. ( Jñāna Khaṇḍa) (त्रिपुरारहस्य, ज्ञानखण्ड) [तान्त्रिकदर्शन],
Ed. with a Prefatory Note by Gopinātha Kavirj, M.A Rs. 0-14

No. 15-( Part-II )—Do. Do Rs. 2-4

No. 15-( Part III )—Do. Do. Rs. 2-0

No. 15-( Part IV )—Do. with Introduction, etc. by Gopinath Kaviraj, M. A. Rs. 1-8

No. 16–The Kāvya Vilāsa, (काव्यविलास) [अलङ्कार], by Chiranjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1–2

No. 17–The Nyāya Kalikā, (न्यायकलिका) [न्याय] by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A. D. Litt. Rs 0–14

No. 18–(Part I)–The Gorakṣa Siddhānta Saṅgraha. (गोरक्षसिद्धान्तसंग्रह) [नाथमार्ग],
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A., Rs. 0–14

No. 19–( Part. I )–The Prākṛita Prakāśa (प्राकृतप्रकाश) [प्राकृतव्याकरण] by Vararuchi with the Prākṛita Sanjīvanī by Vasantarāja and the Subodhinī by Sadānanda.
Ed. with Prefatory note etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A.
Rs 2–4

No. 19–( Part.II ) Ditto Ditto Rs. 2–12

No 19—( Part. III ) Introduction etc. ( In Preparation. )

No. 20–The Mānsatattvaviveka ( मांसतत्त्वविवेक ) [ धर्मशास्त्र ], by Viśvanātha Nyāyapanchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Pandit Jagannātha Sāstri Hoshing Sāhityopādhyāya, with a Foreword by Pandit Gopi Nath Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 0–12

No. 21–( Part I ) The Nyāya Siddhānta Mālā (न्यायसिद्धान्तमाला) [ न्याय ], by Jayarāma Nyāya Panchānana Bhaṭṭāchārya.
Edited with Introduction etc. by Dr. Mangal Deva Sāstrī, M. A., D. Phil. ( Oxon ), Librarian, Govt. Sanskrit Library, Sarasvati Bhavana, Benares.
Rs. 1–4

No. 21–( Part–II ) Ditto Ditto Rs. 2–0

No. 22–The Dharmānubandhi S'lokachaturdaśī ( धर्मानुबन्धिश्लोकचतुर्दशी) [धर्मशास्त्र], by S'ri Seṣa Kṛṣṇa with a Commentary by Rāma Pandit.

Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Assistant Librarian, Government Sanskrit Library, Saraswati Bhavana, Benares. Rs. 1–0

No. 23–The Navarātrapradipa (नवरात्रप्रदीप) [धर्मशास्त्र], by Nanda Pandit Dharmādhikārī.

Ed. with Introduction etc. by Vaijanātha S'āstrī Varakale, Dharmaśāstra–S'āstrī, Sādholāl Research Scholar, Sanskrit College, Benares, with a Foreword by Pāndit Gopinath Kaviraj, M. A., Principal, Government Sanskrit College, Benares. Rs. 2–0

No. 24–The S'rī Rāmatāpinīyopaniṣad (रामतापिनीयोपनिषद्) [उपनिषद्], with the Commentary called Rāma Kāśikā in Pūrvatāpinī and Ānandanidhi in Uttaratāpinī by Ānandavana.

Ed. with Introduction etc. by Anantarāma S'āstrī Vetāla Sāhityopādhyāya, Post–Āchārya Scholar, Govt. Sanskrit College, Benares, with a Foreword by Pandit Gopī Nātha Kavirāja, M. A., Principal, Government Sanskrit College, Benares. Rs. 3–12

No. 25–The Sāpiṇḍyakalpalatikā ( सापिण्ड्यकल्पलतिका ) [ धर्मशास्त्र ], by Sadāśivadeva alias Āpadeva with a commentary by Nārāyaṇa Deva.

Edited with Introduction etc. by Jagannātha S'āstrī Hośiṅga Sāhityopādhyāya, Sādholāl Research Scholar, Govt. Sanskrit College, Benares. Rs. 1–4.

No. 26–The Mṛgāṅkalekhā Nāṭikā ( मृगाङ्कलेखानाटिका ) [नाटिका], by Viśvanātha Deva Kavi.

Edited with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya, Asst. Librarian, Government Sanskrit Library, Benares. Rs. 1–0

No. 27–The Vidvachcharita Pañchakam ( विद्वच्चरितपञ्चकम् ) [निबन्ध]
By Nārāyana S'āstri Khiste, Sāhityacharya, Assistant Librarian, Govt. Sanskrit College, Sarasvati Bhavana Library, Benares. With an Introduction by Gopināth Kaviraja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 2–0.

No. 28-The Vrata Kos'a (व्रतकोश) [धर्मशास्त्र], by Jagannātha S'āstri Hosiṅga Sāhityopādhyāya, late Sadholal Research Scholar, Sanskrit College, Benares. With a Foreword by S'rī Gopināth Kaviraja, M. A., Principal, Govt. Sanskrit College, Benares. Rs. 4-0

No. 29-The Vṛitti dīpikā (वृत्तिदीपिका) [व्याकरण], By Mauni S'rī Kṛṣṇa Bhatta.
Edited with Introduction etc by Pt. Gangadhara S'astri Bhāradvāja, Professor, Govt. Sanskrit College, Benares. Rs. 1-2

No. 30-The Padārtha Maṇḍanam ( पदार्थमण्डन ) [ वैशेषिक ], By S'rī Veṇīdatta.
Edited with Introduction etc. by Pandit Gopāla S'āstri Nene, Professor, Govt. Sanskrit College, Benares. Rs. 0-14

No. 31-( Part I)-The Tantraratna ( तन्त्ररत्न ) [ मीमांसा ], by Pārth Sārathi Mis'ra.
Edited by M. M. Dr. Ganganatha Jha, M. A, D. Litt, Vice-Chancellor, Allahabad University Allahabad. Rs. 1-14

No. 31-( Part II ) Ditto. Ditto.
Edited by Pt. Gopāl S'āstri Nene, Govt. Sanskrit College, Benares. Rs. 2-4

No. 32-The Tattvasāra ( तत्त्वसार ) [ न्याय ], by Rākhāldasa Nyāyaratna.
Edited with Introduction etc by. Harihara S'astri, Benares Hindu University. Rs. 1-0.

No. 33-( Part I ) The Nyaya Kaustubha ( न्यायकौस्तुभ ) [ न्याय ], by Mahadeva Puntamkar.
Edited with Introduction etc by Umes'a Mis'ra, M. A., Allahabad University, Allahabad. Rs. 3-4

No. 34-( Part I ) The Advaita Vidyātilakam ( अद्वैतविद्यातिलकम् ) [ शाङ्करवेदान्त ], by S'rī Samarapuṅgava Dīkṣita.
With a Commentary by S'rī Dharmayya Dīkṣita.
Edited with Introduction, etc, by Ganapati Lal Jha, M. A., Sadholal Research Scholar, Govt. Sanskrit Library, Benares. Rs. 1-4

No. 35-The Dharma Vijaya Nāṭaka ( धर्मविजयनाटक ) [ नाटक ], by Bhūdeva S'ukla.

Edited with Introduction etc, by Pandit Nārāyana S'āstri Khiste, Asst. Librarian, Govt. Sanskrit Library, Benares. Rs. 1-4

No. 36–The Ānanda Kanda Champū ( आनन्दकन्दचम्पू ) [ चम्पू ], by Mitra Mis'ra.
Edited, with a Foreword by Gopinath Kaviraj, M. A, by Nanda Kishore Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 3–8

No. 37–The Upanidāna Sūtra ( उपनिदानसूत्रम् ) [ वेद ], Edited with Introduction by Dr. Mangaldeva S'āstri, M. A., D. Phil. Rs. 1–0

No. 38–The Kiranāvali prakās'a dīdhiti ( Guna ), ( किरणावली-प्रकाशदीधिति ) [ वैशेषिक ], by Raghunāth S'iromani.
Edited by Pandit Badrināth Sāstri, M. A., Lucknow University Rs. 1–12

No. 39–The Rāma Vijaya Mahākāvya, ( रामविजयमहाकाव्य ) [ काव्य ] by Rupanātha.
Edited by Pt. Ganapatilal Jha, M. A. Rs. 2–0

No. 40–(Part I) The Kālatattva Vivechana(कालतत्त्वविवेचन)[धर्मशास्त्र] by Raghunātha Bhaṭṭa.
Edited with a Foreword by Gopinātha Kaviraja M.A by Nanda Kishore S'arma Sāhityāchārya, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No. 40–( Part II ) Do Do Rs. 3–8

No. 41–( Part I ) The Siddhānta Sārvabhauma (सिद्धान्तसार्वभौम) [ज्योतिष], by S'rī Munīs'vara.
Edited with Introduction etc. by Jyautiṣāchārya Pandit Murlidhara Thakkura, late Sadholal Scholar, Sanskrit College, Benares Rs 3-0

No. 41–( Part II ) Do. Do. Rs. 2–0

No. 42–The Bheda Siddhi (भेदसिद्धि) [न्याय], by Vis'vanātha Pañchānana Bhaṭṭāchārya.
Edited with notes etc., by Nyāya Vyākaranāchārya Pandit Sūrya Nārāyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares. Rs. 1–12

No. 43–( Part I ) The Smārtollāsa ( स्मार्तोल्लास ) [ कर्मकाण्ड ], by S'iva Prasāda.

Edited with Introduction, notes, etc, by Vedāchārya Pandit Bhagavat Prasad Mis'ra, Professor, Govt. Sanskrit College, Benares. Rs. 1–8

No. 43–( Part II ) Do. Do. Rs. 2–12

No. 43–( Part III ) Do. Do.

No. 44–( Part I ) S'ūdrāchāra S'iromani (शूद्राचारशिरोमणि) [धर्मशास्त्र] Edited by Sāhityāchārya Pandit Nārayan S'astri Khiste. Rs. 2–4

No. 44–( Part II ) Do. Do.

No. 45–( Part I ) Kiraṇāvalī Prakāśa (Guṇa) (किरणावली प्रकाश-गुण) [ वैशेषिक ], by Vardhamāna.

Edited, with a Foreword by Pt. Gopinath Kaviraj M. A., by Pandit Badrinath S'astri, M. A., Lucknow University. Rs. 1–8

No. 45–( Part II ) Do. Do.

No. 46–( Part I ) Kāvya prakāśa-dīpikā (काव्यप्रकाशदीपिका) [अलङ्कार] by S'rī Chaṇḍī Dāsa.

Edited by S'ivaprasāda Bhaṭṭāchārya, M. A., Professor, Presidency College, Calcutta. Rs. 1–12

No. 47–Bhedajayaśrī ( भेदजयश्री ) [ माध्ववेदान्त ], by S'rī Tarkavāgīśa Bhaṭṭa Venīdattāchārya,

Edited with Introduction etc, by Pandit Tribhuvan prasad Upādhyāya, M. A., Inspector of Sanskrit Pāṭhashalas, United Provinces, Benares. Rs. 1–4

No. 48–Samyak Sambuddha bhāṣitam Buddhapratimālakṣaṇam ( सम्यक्संबुद्धभाषितं प्रतिमालक्षणम् ) [ शिल्पशास्त्र ],

With the Commentary Sambuddhabhāṣita pratimā lakṣana Vivaraṇī. Critically edited with Introduction etc by Haridās Mitra, M, A, Viśvabhārati, S'āntiniketana. Rs. 1–4

No. 49–Bhedaratna ( भेदरत्न ) [ न्याय ] by Sankara Miśra,

Edited with Introduction etc, by Pandit Sūryanārāyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares. Rs. 1–8

No. 50–Mâtrikâ Chakra Viveka ( मातृकाचक्रविवेक ) [ तन्त्र ], by Svatantrânanda Nâtha, with a Commentary.

Edited by Pandit Lalita Prasad Dabral Vyâkarnâchârya. With a Foreword by Pt Gopinâth Kaviraj, M.A., Principal Govt. Sanskrit College, Benares. Rs. 2–0

No. 51–52. Advaita Siddhânta Vidyotana (अद्वैतसिद्धान्तविद्योतन) [वेदान्त], by Brahmânanda Sarasvati, and

Nṛisimha Vijnâpana (नृसिंहविज्ञापन) [वेदान्त], by Nṛisimhâśrama.

Edited with notes, Introduction etc. by Sûrya Nârâyaṇa S'ukla, Professor, Govt. Sanskrit College, Benares Rs. 1–12

No. 53–Nṛisimha Prasâda-Vyavaharsâra ( नृसिंहप्रसाद–व्यवहारसार ) [ धर्मशास्त्र ], by Dalapati Râja.

Edited with Introduction etc. by Pandit Vinâyaka S'âstri Tillu, Research Scholar, Sanskrit College, Benares. Rs. 4–0

No. 54–Nṛisimha Prasâda-Prâyaśchitta Sâra (नृसिंहप्रसाद प्रायश्चित्तसार) [ धर्मशास्त्र ], by Sri Dalapati Râja.

Edited by Pandit Nanda Kishora Sharma and Nanda Kumar Sharma Sahityacharya. Rs. 3–4

No. 55–Nṛisiṃha Prasâda–S'râdha Sâra (नृसिंहप्रसाद श्राद्धसार) [धर्मशास्त्र]

Edited by Pandit Vidyadhara Miśra, College of Oriental Leraning, Benares Hindu University, Benares. Rs. 2–0

No. 56–Bhagavannâma Mahâtmya Samgraha (भगवन्नाममाहात्म्यसंग्रह) [भक्तिशास्त्र], by Raghunâthendra yati, with Com. by Ananta S'âstri Phadke.

Edited by Pt. Ananta S'âstri Phadake. Rs. 2–12

No. 57. ( Part I ) Gaṇita Kaumudî ( गणितकौमुदी ) [ गणित ], by Nârâyaṇa Pandit. Edited by Pt. Padmakar Dvivedi. Professor, Govt. Sanskrit College, Benares.

No. 58–Khyâtivâda ( ख्यातिवाद ) [ वेदान्त ]. by S'aṅkara Chaitanya Bhâratî.

Edited by S'aṅkara Chaitanya Bhâratî. with Foreword by M. M. Gopinath Kaviraj. M. A. Rs. 1–4

No. 59–Sānkhya tattvāloka ( सांख्यतत्त्वालोक ) [ सांख्य ], by Hariharananda Aranya.
Edited with Introduction & by Jajneswar Ghosh. M. A. with a foreword by M. M. Pt. Gopinath Kaviraj. M. A.

No. 60–( Part I ) S'aṇḍilya Samhitā ( शाण्डिल्यसंहिता ) [ पाञ्चरात्र ],
Edited by Pt. Ananta Gopal Phadke. Professor, Govt. Sanskrit College, Benares.

No. 62–Nrisinha Prasāda—Tīrtha Sāra ( नृसिंहप्रसादः—तीर्थसारः ) [ धर्मशास्त्र ],
Edited by Pt. S'urya Narayana Sukla.

No. 63–Bhaktyadhikaraṇa mālā ( भक्त्यधिकरणमाला ) [ भक्तिशास्त्र ], by Nārāyaṇa Tīrtha.
Edited by Pt. Ananta Gopal Phadke.

No. 64–Vāsiṣṭha Dars'ana ( वासिष्ठदर्शनम् ) [ वेदान्त ], Compiled by Dr. B. L. Atreya.
Edited by Dr. B. L. Atreya, M. A., Ph. D., Lecturer, Benares Hindu University.

No. 65–67—

( a ) Tīrthendu S'ekhara ( तीर्थेन्दुशेखरः ) [ धर्मशास्त्र ], by Nāge'sa.

( b ) Tristhalī Setu ( त्रिस्थलीसेतुः ) [ धर्मशास्त्र ], by Bhaṭṭoji Dīkṣita.

( c ) Kas'ī Mokṣavichāra ( काशीमोक्षविचारः ) [ वेदान्त ], by Sures'vara Āchārya.
Edited with Introduction by Pt. Surya Narayan S'ukla, Prof. Govt. Sanskrit College, Benares.

No. 68–Madhva Mukhālankāra ( मध्वमुखालङ्कारः ) [ माध्ववेदान्त ], by Vanamāli Mis'ra.
Edited with Introduction by Pt. Narasinha Varakhedker. with a Foreword by M. M. Pt. Gopinath Kaviraj. M. A.

## Works in the press

No. 1. Dakṣiṇāmūrti Samhitā ( दक्षिणामूर्तिसंहिता ) [ तन्त्र ],
Edited by Pt. Nārāyana S'āstri Khiste.

No. 2. As'valāyana S'rauta Sūtra with Sidhhānti Bhāshya (सिद्धान्तिभाष्यसहित आश्वलायनश्रौतसूत्र) [वेद],
Edited by Dr. M. D. S'āstri, M. A., D. Phil.

## Works in the press.

No. 3. Niti manjarī (नीतिमञ्जरी) [वेद], by Dyā :Dvivedī.
Edited by Dr. Mangal deva Sastri. M. A., D. Phil.

No. 4. Nyāya Kaustubha ( Part II ) Anumānakhand (न्यायकौस्तुभ-अनुमानखण्ड) [न्याय], by Mahādeva Puntamkar.
Edited by Pt. Goswami Dāmodara S'āstri.

No. 5. Mīmānsā Chandrikā ( मीमांसाचन्द्रिका ) [ मीमांसा ], by Brahmānanda Sarsvati.
Edited by Pt, Haran Chandra Bhaṭṭāchārya S'āstri.

No. 6. Tantraratna (Part III) (तन्त्ररत्न) [ मीमांसा ], by Partha Sārathi.
Edited by Pt. Gopal Sāstri Nene,

No. 7. Kāvya prakāśa dīpikā ( Part II ) ( काव्यप्रकाशदीपिका ), [ अलङ्कार ], by S'ri Chaṇḍīdāsa.
Edited by Pt. S'ivaprasāda Bhaṭṭāchārya, M. A.

No 8. Kālatattvavivechana ( Part III ) (कालतत्त्वविवेचन) [धर्मशास्त्र] by Ragunātha Bhaṭṭa.
Edited by Pt. Nanda kishore Sharma.

No. 9. Siddhānta Sārvabhauma ( Part-III ) ( सिद्धान्तसार्वभौम ). [ ज्योतिष ], by Munīśvara.
Edited by Pt. Murlidhar Thakkur.

No 10. Upendra Vijnāna Sūtra ( उपेन्द्रविज्ञानसूत्र ) [ दर्शन ],
Edited by Dr. M. D. Shastri.

No. 11 Nyāyāmṛita Saurabha ( न्यायामृतसौरभ ) [ माध्ववेदान्त ], by Vanamāli.
Edited by Pt. Nrisimha Achārya.

No. 12–Īs'vara Pratyabhijñā Kārikās of Utpala with the Vimars'ini of Abhināva Gupta and Com on Vimars'inī by Bhāskara kaṇṭha.
Edited by K. Subrahmanya Iyer, M. A. and K. C. Pandeya M. A. Ph. D.

# THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

M. M. GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its Evolution, by Gaṅgānātha Jhā.

(b) The View-point of Nyāya Vaiśeṣika Philosophy, by Gopinath Kaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 1-12

Vol. II—

(a) Paraśurāma Miśra alias Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha S'armā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj.

(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇa S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the Late Col. G. A. Jacob.

(b) Studies in Hindu Law (3): Judicial Procedure: by Gaṅgā nātha Jha

(c) Theism in Ancient India, by Gopintha Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamal Bhaṭṭācharya.

(f) Indian Dramaturgy, by P. N. Pātankar. Rs 5.

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgā-nātha Jha.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Ṛgveda–Prātiśākhya, by Maṅgala Deva S'āstrī.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Ramayanic Age, by Manmatha natha Roy

(f) Satakāyavāda: Causality in Sāṅkhya, by Gopinatha Kaviraj.

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expension of the Aryans. by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools, by G.L. Sinha. Rs 5.

Vol. V—

(a) Ancient Home of the Aryans and their migration to India by A. C. Ganguly.

(b) A Satrap Coin, by Shyamalal Mehr.

(c) An Estimate of the Civilisation of the Vanaras as depicted in the Rāmayaṇa, by Manmatha nātha Roy.

(d) A Comparison of the Contents of the Ṛgveda, Vajasaneya, Tattirīya & Atharvaveda Prātiśākhyas, by Maṅgala Deva S'āsti.

(e) Foramal Training and the Ancient Indian Thought, by G.I. Sinha.

(f) History and Bibliography of Nyâya Vais'eṣika Literature, by Gopinath Kavirâj.

(g) A Descriptive Index to the names in the Râmâyaṇa, by Manmatha nâtha Roy.

(h) Notes and Queries, (1) Virgin Worship, by Gopinath Kaviraj. Rs. 5

Vol. VI—

(a) Index to S'abara's Bhâṣya, by the late Col. G. A. Jacob.

(b) Some Aspects of the History and Doctrines of the Nâthâs, by Gopinath Kaviraj.

(c) An Index etc. the Ramayana, by Manmatha nâtha Roy.

(d) Studies in Hindu Law by M. M. Gaṅganatha Jha.

(e) The Mimamsa manuscripts in the Govt. Sanskrit Library (Benares), by Gopinâtha Kavirâj.

(f) Notes and Queries, by Gopinâtha Kavirâj. Rs. 5–0

Vol. VII.

(a) Bhâmaha and his Kâvyâlaṅkâr, by Baṭukanâtha S'armâ and Baladeva Upâdhyâya.

(b) Some variants in the readings of the Vais'eṣika Sûtras, by Gopinâtha Kavirâj.

(c) History and Bibliography of Nyâya Vais'eṣika Literature, by Gopinâtha Kavirâj.

(d) An attempt to arrive at the correct meaning of some obscure Vedic words, by Sîtâram Joshi.

(e) A comparison of the contents of the Rig Veda, Vajasaneya Taittiriya, and Atharva Veda (Châturadhyâyika) Prâtis'âkhyas, by Mangal Deva Shâstri.

(f) An Index to the Ramayana, by Manmatha Nâtha Roy.

(g) An Index to S'abrar's Bhâṣya, by the late Col. J. A. Jacob.

( h ) Gleanings from the Tantras, by Gopinātha Kavirāj.

(i) The date of Madhusudana Srarswati, by Gopinātha Kavirāj.

( j ) Descriptive notes on Sanskrit Manuscripts, by Gopinātha Kavirāj.

( k ) A note on the meaning of the word Parārdha, by Umes'a Mis'ra. Rs. 5

Vol. VIII.

( a ) Indian Philosophy, by Tarakanatha Sanyal.

( b ) An Index to the Rāmāyaṇa, by Manmatha Nath Roy.

( c ) Index to S abara's Bhāṣya, by the late Col. J. A. Jacob.

( d ) Hari Svāmi, the commentator of S'atapatha Brāhmana and the date of Skanda Svami the commentator of the Ṛigveda, by Mangaladeva S'āstri.

( e ) Mysticism in Veda, by Gopināth Kaviraj.

( f ) The Deva dāsī: a brief history of the Institution, by Man math Nātha Roy. Rs. 5

Vol. IX

( a ) The Life of a Yogin, by Gopinātha Kavirāj.

( b ) On the Antiquity of the Indian Art Canon. by Haridas Mitra.

( c ) Prāchīna Vargīkarana Paddhati by Satisha Ch. Guha.

( d ) Yoga Vasishtha and some of the minor Upanishads by B. L. Atreya.

( e ) An index to the proper names occurring Valmiki's Rāmāyaṇa by Manmath Nath Roy.

( f ) The Philosophy of Tripurā Tantrā by Gopinath Kaviraj.

( g ) Notes on Pās'upata Philosophy by Gopinath Kaviraj.

Rs. 5

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES

( SANSKRIT )

SARASVATALOKA

Edited by

M. M. GOPINATH KAVIRAJ, M. A

Kirana 1 ( In progress )

(a) Mangalam, etc, by Nârâyaṇa S'âstri Khiste.

(b) Mimansaka mata samgraha, by Haranchandra Bhaṭṭâcharya.

(c) S'rimad Âcharya Mandana Mis'ra by Chinna Swami S'astri.

(d) Bhagavato Buddhasya Chaitama Upades'as'cha, by Gopinatha Kaviraj.

Kirana I ( Supplement )

Sanskrita Kavi Parichaya-(Bharavi) by Nanda Kishore Sharma. Rs. 1-4

Kirana II ( In progress )

(a) S'âradâ Prasâdanam by Nârâyâna S'âstri Khiste.

(b) Chûḍâmaṇi Dars'anam by S'as'adhara Tarkachûḍâmaṇi.

To be had of
The Superintendent Government Press,
ALLAHABAD, U. P.